
18413

UNIVERSAL
LIBRARY
OU_184613
UNIVERSAL
LIBRARY

शास्त्री, पी. पी. एस्. (सपां.)
श्रीमन्महाभारतम् Vol. XVI Pt. 1
1935
17.12.62 P440
L&U 613

OSMANIA UNIVERSITY LIBRARY
Call No. S 349·5-46 S531M Accession No. S 11876
Author शास्त्री, पी. पी. एस्. (संपा.)
Title श्रीमन्महाभारतम्. Vol. XVI Pt. II
This book should be returned on or before the date last marked below. 1935

THE
MAHĀBHĀRATA

(Southern Recension)

For the first time critically edited by

VIDYASAGARA VIDYAVACHASPATI

P. P. S. SASTRI, B. A. (OXON), M.A.,

Professor of Sanskrit and Comparative Philology
Presidency College, Madras, and Editor
Descriptive Catalogues of Sanskrit
and Telugu Mss. in the Tanjore
Palace Library.

Vol. XVI—ANUSĀSANA PARVAN.
PART—I

PUBLISHED BY

V. RAMASWAMY SASTRULU & SONS

292, ESPLANADE, MADRAS.

All Rights Reserved.

PRINTED BY V. VENKATESWARA SASTRULU
OF V. RAMASWAMY SASTRULU & SONS
AT THE 'VAVILLA' PRESS, MADRAS.—1935.

॥ श्रीरस्तु ॥

॥ श्रीमन्महाभारतम् ॥

तत्र

अनुशासनपर्वणि

प्रथमो भागः

मद्रपुरराजकीयकलाशालासंस्कृताचार्यैः
बि. ए. (आक्सन्), एम्. ए. (मद्रास्)
इत्यादिबिरुदाङ्कितैः
विद्यासागर विद्यावाचस्पति. पि. पि. सुब्रह्मण्यशास्त्रिभिः
दाक्षिणात्यशाखानुसारेण सविमर्शं संशोधितः

सत्येन देवान् प्रीणाति
सत्यमाहुः परं धर्मं



पितॄंश्च ब्राह्मणांस्तथा ।
तस्मात् सत्यं
न लोपयेत् ॥

अनुशासन-६२-३०.

चेन्नपुर्यां
वाविळ्ळ रामस्वामिशास्त्रुलु अण्ड् सन्स्
इत्येतैः सम्मुद्य प्रकाशितम्

चेन्नपुर्यां
वाविळ मुद्रणालये
मुद्रितम्
१९३५.

INTRODUCTION.

I

It is proposed to issue the Anuśāsana Parvan in two volumes. The first volume deals with chapters 1—78, while the second volume completes the Anuśāsana Parvan.

In the preparation of this volume for the Press, the following manuscripts fully representative of the Southern Recension, were utilised.

अ—represents the Principal Text printed. The Manuscript belongs to Brahma Sri Krishna Sastrigal, Palace Pauranikar, Trivandrum. Its description is as follows:—Substance—palm-leaf; Size—$17\frac{7}{8} \times 2\frac{1}{2}$ inches; Leaves—284; Lines—10-12 to a page; Script-Grantha; Anuśāsana Parvan Complete.

क—is used for additional readings, etc. The Manuscript belongs to His Highness the Maharaja of Travancore and was made available to us through the kindness of Sir C. P. Ramaswami Aiyer, K. C. I. E., Legal and Constitutional Adviser to the

State. Its description is as follows:—Substance—palm-leaf; Size—$16\frac{1}{4} \times 1\frac{3}{4}$ inches; Leaves:— 382; Lines 10–11 to a Page; Script - Malayalam; Anus'āsana Parvan Complete : Date of Transcription—1791 A. D.

स—is used for additional readings, etc. The Manuscript belongs to the Adyar Library, Madras. Its description is as follows:—Substance—palm-leaf; Size—$19\frac{5}{8} \times 2\frac{1}{4}$ inches ; Lines—10–12 to a page ; Leaves 102, Script-Telugu Anus'āsana Parvan complete. Date of Transcription—23rd February 1558 A. D.

ख—is used for additional readings etc. The Manuscript was procured for us by Mr. K. K. Lakshminarayana Iyer of Kadayam village in the Tinnevelly District from Mr. Natesa Iyer. Its description is as follows:—Substance—palm-leaf, Size—$16\frac{1}{2} \times 1\frac{1}{2}$ inches Leaves—381; Lines—9–10 to a page; Script-Grantha; Anus'āsana Parvan complete. Date of Transcription—1822 A. D.

II

From the Parvasaṅgraha-Parvan to the Ādi Parvan, it will be observed that the Anuśāsana Parvan should consist of 146 chapters and 8000 stanzas only according to the Northern Recension and 156 chapters and 12000 stanzas according to the Southern Recension. Our remarks regarding the distinguishing features of the Anuśāsana Parvan according to the Southern Recension as well as the scheme of chapters and total number of stanzas in the Anuśāsana Parvan according to the Principal Text printed are held over for inclusion in Volume XVII which completes the Anuśāsana Parvan.

All Manuscripts representative of the Southern Recension of the Anuśāsana Parvan, agree in dividing the Anuśāsana Parvan into two main sub-parvans, the Anuśāsanika Parvan and the Bhiṣma-svargārohaṇa Parvan.

All the Manuscripts and Printed Editions representative of the Northren Recension agree in naming the Anuśāsanika Parvan as the Dānadharma Parvan.

III
SCHEME OF ADHYAYAS.

No.	Name of Parva.	As stated in the Anukramanikadhyaya to the Northern Recension Manuscripts and Editions.	As actually divided in the Northern Recension Printed Edition; Poona with Bhavadipa 1929—1933.	As actually divided in the Kumbakonam Edition 1906—1910 Mixed version of bothRecensions.	As stated in the Anukramanikadhyaya to Southern Recension Manuscripts.	As actually divided in the Southern Recension printed in Madras by the Vavilla Press 1931—1935.
I	Adi	227	234	260	218	218
II	Sabha	78	81	103	72	72
III	Aranya	269	315	315	269	269
IV	Virata	67	72	78	67	67
V	Udyoga	186	196	196	186	186
VI	Bhishma	117	122	122	118	118
VII	Drona	170	202	203	170	170

VIII	Karna	69	96	101	69	110
IX	Salya	59	65	66	59	59
X	Sauptika	18	18	18	18	18
XI	Stri	27	27	27	27	27
XII	Santi	329	365	375	339	339
XIII	Anusasana	146	168	272	156	156
XIV	Asvamedhika	103	92	118	133	133
XV	Asramavasika	42	39	41	42	42
XVI	Mausala	8	8	9	8	8
XVII	Mahaprasthanika	3	3	3	3	3
XVIII	Svargarohana	5	5	5	5	5
		1923	2108	2312	1959	2000

IV

CONCORDANCE.

ANUS'ĀSANA PARVAN. PART—I

(1933) Poona Edition with Bhavadipa Chapter.	(1909) Kumbakonam Edition Chapter.	Manuscripts of the Southern Recension Chapter.	(1935) Southern Recension Chapter.
1	1	1	1
2	2	2	2
27	3	3	3
28	4	4	,,
29	5	5	,,
3	6	6	4
4	7(1-12)	7	,,
	,,(13-62)	8	5
30	8	9	6
6	9	10	7
7	10	11	8
5	11	12	9
8	12	13	10
omitted	13	14	,,
,,	14	15	11
,,	15	16	,,
,,	16	17	,,
,,	17	18	,,
,,	18	19	12
,,	19	20	,,
,,	20	21	,,
,,	21	22	,,
,,	22	23	,,
,,	23	24	,,
,,	24	25	,,
,,	25	26	,,
,,	26	27	,,
,,	27	28	,,
,,	28	29	,,
,,	29	30	,,
9	30	31	13
10	31	32	14

Poona Edition with Bhavadipa Chapter.	Kumbakonam Edition Chapter.	Manuscripts of the Southern Recension Chapter.	Southern Recension Chapter.
11	32	33	15
omitted	33	34	16
12	34	35	17
13	35	36	18
omitted	36	37	19
,,	37	38	,,
,,	38	39	20
,,	39	40	,,
,,	40	41	21
,,	41	42	,,
,,	42	43	,,
,,	43	44	,,
,,	44	45	,,
14	45(1–354)	46	22
	,,(364–417)	47	,,
15	46	48	23
16	47	,,	,,
17	48	49	,,
18	49	50	24
19	50 (1 28)	51	25
,,	,,(29-110)	52	,,
20	51	53	,,
21	52	54	,,
omitted	53	55	26
,,	54	56	27
,,	55	57	,,
,,	56	58	,,
,,	57	59	,,
,,	58	60	,,
,,	59	61	,,
22	60	62	28
23(1–47)	61	63	29
,, (48–103)	62	64	,,
24	63	65	30
25	64	66	31
26	65	67	32
31	66	68	33
32	67	Omitted	Omitted

Poona Edition with Bhavadipa Chapter.	Kumbakonam Edition Chapter.	Manuscripts of the Southern Recension Chapter.	Southern Recension Chapter.
33	68	69	34
34	69	70	,,
35	70	71	,,
36	71	72	35
37	72	73	36
38	73	74	37
39	74	75	38
40	75	76	39
41	76	77	,,
42	77	78	,,
43	78	79	,,
44	79	80	40
45	80	81	41
46	81	82	,,
47	82	83	42
48	83	84	43
49	84	85	44
50	85	86	45
51	86	87	,,
52	87	88	46
53	88	89	47
54	89	90	,,
55	90	91	,,
56	91	92	,,
57	92	93	48
58	93	Omitted	omitted
59	94	94	49
60	95	95	50
61	96	96	51
62	97	97	52
63	98	98	53
64	99	99	54
65	100	100	,,
66	101	101	55
67	102	102	56
68	103	103	57
69	104	104	58
70	105	105	59

Poona Edition with Bhavadipa Chapter.	Kumbakonam Edition Chapter.	Manuscripts of the Southern Recension Chapter.	Southern Recension Chapter.
71	106	106	60
72	107	107	61
73	108	108*	,,
74	109	109	,,
75	110	110	62
76	111	111	63
77	112	112	64
78	113	113	65
79	114	114	,,
80	115	115	,,
81	116	116	66
omitted	117	117	67
,,	118	118	68
,,	119	119	69
,,	120	120	70
,,	121	121	,,
,,	122	122	,,
,,	123	123	,,
,,	124	124	71
,,	125	125	,,
,,	126	126	,,
,,	127	127	,,
82	128	128	72
83	129	129	73
84	130	130	74
85(1–86)	131	131	,,
,,(87–168)	132	132	,,
86	133	133	75
87	134	134	76
88	135	135	77
89	136	136	,,
90	137	137	78

क—कोशे नाम्नाध्यायसमाप्तिः

Besides its ethical greatness, the Anuśāsana Parvan is also famous for the high toleration it inculcates among the votaries of S'iva and Viṣṇu. Both S'iva and Viṣṇu are held in equally high esteem and their one thousand names are enumerated in this Parvan. In this Part, the one thousand and eight names of S'iva are enumerated in pp. 249–263. In their enumeration, the Southern Recension differs from the Northern Recension in very many details. Attention is invited to the one thousand and eight names of S'iva appearing in chapter 65 of the Liṅga Purāṇa (Bombay Edition) which follows closely the Northern Recension.

The Presidency College,
Madras.
16—12—1935.

P. P. S. SASTRI,
Editor.

॥ श्रीरस्तु ॥

महाभारतस्यानुशासनपर्वणि प्रथमो भागः

तत्र

॥ विषयानुक्रमणिका ॥

आनुशासनिकपर्व

अध्यायः			पुटम्
१	युधिष्ठिरेण भीष्मं प्रति धर्मादिकथनप्रार्थना	...	१
	युधिष्ठिरेण भीष्मादिसंहारे स्वस्य हेतुत्वेन परिशोचनम्	...	२
	गौतमीलुब्धकसंवादानुवादः	...	,,
	भीष्मेण गौतमीलुब्धकसंवादकथनेन युधिष्ठिर-शोकपरिहरणम्	...	,,
२	भीष्मेण युधिष्ठिरं प्रति गृहस्थधर्मकथनपूर्वकमतिथि-सत्कारे सुदर्शनोपाख्यानस्य दृष्टान्ततया कथनम्	...	१३
	सुदर्शनोपाख्यानम्	...	,,
३	भीष्मेण क्षत्रियादिभिः ब्राह्मण्यस्य दौर्लभ्ये मतङ्गोपाख्यानकथनम्	...	२८
	मतङ्गोपाख्यानम्	...	,,
	इन्द्रमतङ्गसंवादः	...	३१
	मतङ्गेन ब्राह्मण्यप्राप्तये तपश्चरणम्	...	३२
	इन्द्रेण मतङ्गं प्रति ब्राह्मण्यस्य दौर्लभ्यकथनम्	...	,,
	इन्द्रेण मतङ्गं प्रति ब्राह्मण्यव्यतिरिक्तेष्टदानम्	...	३६
४	विश्वामित्रस्य ब्राह्मण्यप्राप्तिप्रकारकथनम्	...	३७
५	वीतहव्यस्य ब्राह्मण्यलाभप्रकारकथनम्	...	४८
	वीतहव्यादीनां युद्धकथनम्	...	४९
	भारद्वाजेन दिवोदासपरिसान्त्वनम्	...	५०

अध्यायः		पुटम्
५	भृगुप्रतर्दनसंवादः	५२
	वीतहव्यस्य सन्ततिकथनम्	५४
६	दैवपुरुषकारयोः मध्ये पुरुषकारस्य प्राबल्यकथनम्	५५
	पुरुषकारप्राबल्ये दृष्टान्तकथनम्	५६
७	सुकृतस्य कर्मणश्शुभफलप्रतिपादनम्	६२
	दुष्कृतकर्मणामशुभफलप्रतिपादनम्	६५
८	शुकवासववृत्तान्तेनानृशंस्यप्रशंसनम्	६६
	शुकवासवसंवादानुवादः	,,
	शुकेनानुक्रोशस्यावर्जनीयत्वकथनम्	६९
	इन्द्रेण शुकं प्रतीष्टदानम्	,,
९	ब्राह्मण्यस्य संश्लाघनम्	७१
	भीष्मेण स्वप्रीतिविषयाणां कथनम्	७२
	भीष्मेण युधिष्ठिरं प्रति सदृष्टान्तकथनं ब्राह्मणाश्रयणानुज्ञानम्	७३
१०	भीष्मेण प्रशंसनपरवेदसंवादानुवादः	७५
	वेदचतुष्टयसंवादानुवादः	,,
	इन्द्राद्यादिसंवादानुवादेन सत्यस्य महिमानुवर्णनम्	७६
११	श्रीभगवद्व्याससंवादानुवादेन भगवन्महिमानुवर्णनम्	७७
	मद्गराजव्याससंवादानुवादः	,,
	श्रीभगवत्स्वरूपस्वभावादिवर्णनम्	८०
	श्रीभगवत एव सर्वैरपि सर्वकर्मसमाराध्यत्वकथनम्	८३
	श्रीभगवता स्वाराधकान् प्रत्येव स्वस्य फलप्रदत्वकथनम्	८५
१२	गरुडोपाख्यानम्	८७
	काश्यपेन स्वभार्याभ्यां वरणक्रमेण पुत्रवरप्रदानम्	८९
	अण्डसाहस्र्यास्सर्पसाहस्रीविनिर्गमः	९०
	अरुणगरुडयोरुत्पत्तिः	९१
	कद्रूविनताभ्यां सशपथं पणविधानम्	९२
	सर्पैः कद्रूनिन्दनम्	९३

अध्यायः		पृष्ठम्
१२	कद्रा स्वपुत्रान् सर्पान् प्रति कर्तव्यबोधनम् ...	९४
	कद्रा कतिपयान् सर्पान् प्रति जनमेजयेन वध्यत्वरूप-शापदानम् ...	९५
	कद्रा स्वपुत्राणां केषांचिद्वधवालीभवनेन पणनिर्वर्तनाय विनताह्वानम् ...	९६
	विनतया कद्रूं प्रति दास्यसमाचरणम् ...	९७
	गरुडेन नारदमुखात् स्वमातुः कद्रूदास्योदन्तपरिज्ञानम्...	९८
	गरुडेन विनतादास्यमोचनार्थं कद्रूकृतस्यामृताहरणस्य-स्वपितरि निवेदनम् ...	१००
	काश्यपेन गरुडं प्रत्यमृताहरणाय शक्तिपरीक्षायै गजकच्छपभक्षणचोदनम् ...	१०२
	काश्यपेन गरुडं प्रति गजकच्छपयोः वासस्थलादिकथनम्	,,
	काश्यपेन गरुडं प्रति गजकच्छपयोः ग्रहणोपायकथनम्...	१०४
	गरुडेन गजकच्छपयुद्धदर्शनम् ...	१०५
	गरुडेन वामदक्षिणपादाभ्यां क्रमेण गजकच्छपग्रहण-पूर्वकमुत्पतनम् ...	१०६
	गरुडेन गृहीतया कयाचन वृक्षशाखया समुद्रे कुविन्दानां हननम् ...	१०७
	गरुडेन गजकच्छपभक्षणम् ...	१०८
	गरुडेन ब्रह्माणं प्रति स्वमातृगोचरं वचनम् ...	१०९
	गरुडेन ब्रह्मोक्त्या अभ्युपशमाय नवनीताहरणम् ...	११०
	शान्ताग्निना गरुडेनामृताहरणे तं प्रतीन्द्रानुधावनम् ...	१११
	गरुडेनेन्द्रायुधवज्रपराभवनम् ...	११२
	इन्द्रस्तुतेन गरुडेनामृताहरणपूर्वकं कद्रूप्रसादनम् ...	११३
	गरुडेन स्वमातुः कद्रूदास्यान्मोचनम् ...	११४
	गरुडेनेन्द्रं प्रत्यमृतप्रत्यर्पणम् ...	११५
	इन्द्रेण गरुडस्य श्रीभगवद्रूपेणावतरिष्यमाणत्वकथनम् ...	११६

अध्यायः		पृष्ठम्
१३ भीष्मेण युधिष्ठिरं प्रति ब्राह्मणाय प्रतिश्रुताप्रदानस्यानर्थहेतुत्वे सृगालवानरसंवादानुवादः	...	११७
सृगालवानरसंवादानुवादः	...	,,
ब्राह्मणप्रशंसनम्	...	११९
१४ शूद्रोपदेशस्यानर्थहेतुत्वे मुनिशूद्रकथाकथनम्	...	१२१
भीष्मेणोपदेशस्य विमर्शपूर्वकत्वकथनम्	...	१२९
१५ श्रीमहालक्ष्म्या रुक्मिणीं प्रति स्ववासस्थलकथनम्	...	१३१
श्रीमहालक्ष्म्या स्वानभिमतस्थलकथनम्	...	१३२
१६ वत्सनाभमुनिचरित्रकथनम्	...	१३५
कृतघ्नानां प्रायश्चित्तनिर्णयः	...	,,
१७ स्त्रीपुंसयोः संयोगे स्त्रिया एव सुखाधिक्ये भङ्गाश्वनोपाख्यानस्य प्रमाणतया कथनम्	...	१३९
भङ्गाश्वनोपाख्यानम्	...	,,
१८ भीष्मेण मनोवाक्कायैः क्रियमाणस्य शुभस्यैव कर्मणो भगवत्प्रसादहेतुत्वोक्तिः	...	१४६
१९ युधिष्ठिरेण संसारनिर्वेदकथनपूर्वकं वैष्णवधर्मकथनप्रार्थनम्		१४८
युधिष्ठिरेण विविधानां पापकर्मणां व्यासोक्तनानाफलानुवादः	...	१५१
युधिष्ठिरेण जीवीयगर्भवासे निर्वेदप्रदर्शनम्	...	१५२
युधिष्ठिरेण भीष्मं प्रति वैष्णवधर्मग्रहणाय शरणवरणम्	...	१५५
भीष्मेण ब्रह्मादिस्तम्बपर्यन्तानां सर्वजगतां नश्वरत्वकथनम्		१५६
भीष्मेण श्रीभगवदाश्रयणस्यैव संसारार्णवसन्तारकत्वकथनम्	...	१५८
२० नारदसनत्कुमारसंवादः	...	,,
तत्त्वसृष्ट्यादिकथनम्	...	१६२
प्रलयप्रकारादिकथनम्	...	११६
भूतादिसृष्टिकथनम्	...	१६६
२१ गरुडकाश्यपसंवादानुवादः	...	१७१
ब्रह्मणा कृतः श्रीभगवतस्स्तवः	...	१७२

अध्यायः		पृष्ठम्
२१	भीष्मेण गरुडमुनिसंवादानुवादः ...	१७४
	श्रीभगवता गरुडं प्रति स्वमहिमोक्तिः ...	१८५
	गरुडेन कृता श्रीभगवत्स्तुतिः ...	१८९
	श्रीभगवता गरुडं प्रति स्वप्रभावकथनम् ...	१९४
	सुपर्णोपाख्यानफलप्रतिपादनम् ...	२०२
२२	श्रीमहादेवमहिमानुवर्णनम् ...	२०४
	श्रीभगवज्जाम्बवतीसंवादानुवादः ...	२०५
	श्रीभगवदुपमन्युसंवादानुवादः ...	२०९
	उपमन्युना स्वमातरं प्रत्युक्तिः ...	२१४
	उपमन्युनेन्द्रं प्रति महादेवप्रभावकथनम् ...	२१६
	महादेवेन स्वप्रभावकथनम् ...	२२८
	श्रीभगवता महादेवे स्वस्य भक्तिप्रदर्शनम् ...	२३०
	महादेवेन श्रीभगवन्तं प्रति स्वस्माद्वरग्रहणनियमनम् ...	२३५
२३	श्रीभगवता पार्वत्या वरयाचनम् ...	२३६
	पार्वत्या श्रीभगवते वरप्रदानम् ...	२३७
	तण्डिकृतश्रीपरमेश्वरस्तुतिः ...	२३८
	श्रीमहादेवेन तण्डिं प्रति स्वस्माद्वरप्रार्थनचोदनम् ...	२४४
	श्रीमहादेवेन तण्डिं प्रति वरप्रदानम् ...	२४५
	उपमन्युना श्रीभगवन्तं प्रति श्रीमहादेवमहिमानुवर्णनपूर्वकं तन्नामसहस्रकथनोपक्रमः ...	२४६
	शिवसहस्रनामस्तोत्रम् ...	३४९
	श्रीमहादेवमहिमानुवर्णनम् ...	२६४
	श्रीमहादेवसहस्रनामस्तोत्रस्य प्रास्तिक्रमः ...	२६५
१	वैशम्पायनेन व्यासोक्तश्रीमहादेवमहिमानुवादः ...	२६७
	वाल्मीकिपरशुरामाभ्यां श्रीमहादेवस्य शरणवरणम् ...	२६८
	वरिष्ठाख्यस्य मनुसुतस्य चरितकथनम् ...	२६९
	जैगीषव्यपराशरादीनां श्रीमहादेवानुग्रहविषयत्वकथनम्	२७०
	माण्डव्यगालवादिषु श्रीमहादेवानुग्रहफलकथनम् ...	२७२

अध्यायः		पृष्ठम्
२४ श्रीभगवताऽपि पुरुषोत्तमेन केनचिद्व्याजेन श्रीमहादेव-संश्लाघनम्	...	२७३
श्रीमहादेवस्तवराजफलश्रुतिः	...	२७५
२५ युधिष्ठिरेण भीष्मं प्रति स्त्रीणां सहधर्मचारिणीत्व-गोचरप्रश्नः	...	२७६
भीष्मेणाष्टावक्रोपाख्यानकथनेन स्त्रीस्वभावप्रदर्शनम्	...	२७७
वदान्यं प्रति अष्टावक्रेण कन्यायाचनम्	...	,,
अष्टावक्रोपाख्यानम्	...	२७८
२६ युधिष्ठिरेणर्ष्यादीनां वियोनिजत्वगोचरप्रश्नः	...	२९६
भीष्मेणर्ष्यादीनां तपोज्ञानादिभिः वियोनिजत्वदोष-परिहारकथनम्		,,
ब्राह्मणादीनां वर्णक्रमोत्पन्नस्त्रीणां च पतिपत्नीभाव-नियमप्रदर्शनम्	...	२९७
वसिष्ठादीनामुत्पत्तिक्रमः	...	२९८
बहूनां चर्षीणां गोत्रप्रवर्तकत्वकथनम्	...	३००
ऋषीणां तपोज्ञानादिभिः यस्य कस्याप्यदौर्लभ्यकथनम्	...	,,
ऋषिनदीस्त्रीदुश्चरितानामुत्पत्त्यादोर्दुर्निरूपत्वकथनम्	...	३०१
२७ नारदमार्कण्डेयसंवादानुवादः	...	,,
कृतादियुगधर्मनिरूपणम्	...	३०३
चतुर्भिर्वर्णैः क्रियमाणे हव्यकव्यकर्मणि मन्त्रादिलोपे सत्यसुरादीनामेव तत्प्राप्तिस्थानत्वकथनम्	...	३०४
कन्यादानविधिनिरूपणम्	...	३०५
नारदेन दानात् पूर्वं कन्यायाः गर्भिणीत्वादौ विधेय-निरूपणम्	...	३०६
कन्यानां श्रीमहालक्ष्मीसाम्यनिरूपणम्	...	३०७
स्त्रीणां परिग्रहस्य धर्माधर्मत्वविभजनम्	...	३०८
धर्मपत्नीलक्षणकथनम्	...	३०९
परक्षेत्रोत्पन्नजीवानां जातिविभागपुरस्सरं गर्ह्यत्वकथनम्		३१०
स्त्रीणां चापल्ये दोषभूयस्त्वाभावकथनम्	...	३१३

अध्यायः		पृष्ठम्
२७	एकस्य बहुभार्यत्वे कर्तव्यनिरूपणम् ...	३१४
	पतिव्रतात्यागिनो नरस्य निष्कृतिविषयत्वाभावकथनम् ...	३१५
	व्यभिचारिणीत्यागे पुंसो दोषाभावकथनम् ...	३१६
	दुष्टयोरपि मातापित्रोरवश्यभर्तव्यत्वकथनम् ...	,,
	स्त्रीणां व्यभिचारेऽपि रजोदर्शने दोषाभावकथनम् ...	३१७
	नराणां शुद्धिजनकतीर्थविभागकथनम् ...	,,
	कामिभिस्संयोगेऽप्यदूष्याणां स्त्रीणां जातिविभजन-पूर्वकं तज्जन्यपुत्राणां वैदिककर्मब्राह्मत्वकथनम् ...	३१८
	धननारीणां सर्वधर्मविनाशकत्वकथनम् ...	३१९
	श्रोत्रियाश्रोत्रियाणां संस्काराभ्यां गौरवतारतम्य-निरूपणम् ...	३२०
२८	ब्राह्मणानामेव दानं प्रत्युत्तमपात्रत्वकथनम् ...	३२२
	ब्राह्मणानामुत्तमत्वे निदर्शनसन्दर्शनम् ...	३२३
	ब्राह्मणानां शीलराहित्ये गर्ह्यत्वकथनम् ...	३२४
	ब्रह्मचर्यादिलक्षणकथनम् ...	३२६
	दानपात्रतत्फलानां च निरूपणम् ...	३२७
२९	दैवपैतृकयोः कर्मणोः कालविशेषकर्तव्यत्वकथनम् ...	३२८
	दानस्य विहितकालातिलङ्घने दोषवत्त्वकथनम् ...	३२९
	श्राद्धे निमन्त्रणानर्हनिरूपणम् ...	,,
	श्राद्धे निमन्त्रणार्हनिरूपणम् ...	३३१
	दिनस्य प्रातस्त्वादिना नानाकर्मानुष्ठानाधिकरण-कालत्वनिर्णयः ...	३३२
	ब्राह्मणादिभ्यो कर्मानुपूर्वीविधिः ...	३३३
	दानस्य सत्प्रतिगृहीतृगतत्वे महाफलत्वकथनम् ...	३३५
	निन्दितकर्माचरणेन नरकप्राप्तिकथनम् ...	३३६
	शुभकर्माचरणेन स्वर्गप्राप्तिकथनम् ...	३३९
३०	व्यासेन ब्रह्महत्यास्वरूपकथनम् ...	३४१
	ब्रह्महत्याविभागप्रतिपादनम् ...	३४२
३१	युधिष्ठिरेण पुण्यतीर्थप्रश्नः ...	३४३

अध्यायः		पृष्ठम्
३१ भीष्मेण पुण्यतीर्थनामगोचरकथनम्	...	३४४
गौतमाङ्गिरस्संवादानुवादः	...	,,
पुण्यतीर्थानां स्नानादिना महाफलप्रदत्वकथनम्	...	,,
गौतमाङ्गिरस्संवादश्रवणस्य महाफलप्रदत्वकथनम्	...	३५१
३२ भीष्मदिदृक्षया महर्षीणामागमनकथनम्	...	३५२
भीष्ममभिष्टुत्यान्तर्धानगतानृषीन् प्रति पाण्डवैस्स्तुतिः	...	३५३
सिद्धसिलोञ्छवृत्तिसंवादः	...	३५४
गङ्गामहिमानुवर्णनम्	...	३५५
३३ श्रीभगवन्नारदसंवादानुवादेन मनुष्येण पूज्यताहेतु-गुणनिरूपणम्	...	३६८
नारदेन श्रीभगवन्तं प्रति सदुणब्राह्मणादरणविधानम्	...	३७०
३४ सद्ब्राह्मणानामवश्यपूज्यत्वकथनम्	...	३७२
ब्राह्मणपराभवस्य दुर्गतिकारणत्वकथनम्	...	३७४
ब्राह्मणमहिमानुवर्णनम्	...	३७५
ब्राह्मणानामवश्यसेव्यत्वे प्रमाणतया श्रीभगवत्पृथिवीसंवादस्य कथनम्	...	३७७
भीष्मेण युधिष्ठिरं प्रति ब्राह्मणसेवायाः कर्तव्यत्वचोदनम्	...	३७८
ब्रह्मणा सृष्टिकाले ब्राह्मणान् प्रति नियमनम्	...	६७९
ब्राह्मणानां नानाजन्तुसाम्यकथनम्	...	३८०
भीष्मेण युधिष्ठिरं प्रति योगक्षेमलाभायानवरतं ब्राह्मणपरिचर्याविधाननियमनम्	...	३८१
३५ ब्राह्मणमाहात्म्यप्रतिपादनम्	...	३८२
इन्द्रशम्बरसंवादानुवादः	...	,,
३६ दानपात्रविवेचनम्	...	३८५
दानापात्रविवेचनम्	...	३८६
गृहस्थकर्मनिरूपणम्	...	३८७
३७ नारदपञ्चचूडासंवादानुवादः	...	३८८

अध्यायः		पृष्ठम्
३७ स्त्रीस्वभावप्रतिपादनम्	...	३८८
स्त्रीणां स्वभावप्रदर्शनम्	...	३८९
स्त्रीणामसद्धर्मनिरूपणम्	...	३९०
स्त्रीणामसिधारा विषसर्पैस्साम्यकथनम्	...	३९२
३८ भीष्मेण स्त्रीणां दुश्चरितकथनम्	...	३९३
३९ स्त्रीणां रक्षणदौष्कर्यप्रतिपादनम्	...	३९५
विपुलोपाख्यानकथनम्	...	,,
ब्रह्मणा नरचित्तव्यामोहनाय स्त्रीभ्यश्शक्तिप्रदानम्	...	३९६
विपुलदेवशर्मणोस्संवादः	...	३९८
विपुलेन योगमहिम्ना गुरुभार्याशरीरप्रवेशः	...	४०१
विपुलाधिष्ठितशरीरतया गुरुपत्न्योत्थानादिकरणाशक्तिवर्णनम्	...	४०३
इन्द्रेण गुरुपत्नीशरीरान्तर्वृत्तिविपुलदर्शनेन भयाधिगमः		४०४
विपुलेनेन्द्रगर्हणम्	...	४०५
देवशर्मणा विपुलकृत्येन परितोषणम्	...	४०६
गुरुवाक्येन विपुलेन पुष्पाहरणपूर्वकं चम्पानगरीगमनम्		४०८
विपुलेन वने नरमिथुनदर्शनम्	...	,,
विपुलेन नरमिथुनवाक्येन वैवर्ण्याधिगमः	...	४०९
विपुलेन गुरवे पुष्पप्रदानम्	...	४१०
देवशर्मणा विपुलं प्रति मिथुनगोचरप्रश्नप्रकारः	...	,,
देवशर्मणा मिथुनवृत्तान्तकथनम्	...	४११
स्त्रीणां स्वभावनिरूपणम्	...	४१३
४० भीष्मेण कन्याप्रदानविभागनिरूपणम्	...	४१४
विवाहभेदनिरूपणम्	...	४१५
वैवाहिकधर्मतत्त्वकथनम्	...	४१७
विवाहे शुल्कस्य सदोषत्वे स्वीयवंशवृत्तान्तकथनम्	...	४१८
मन्त्रपूर्वकपाणिग्रहणस्यैव विधेयत्वनिरूपणम्	...	४२१
४१ स्वयंवरस्य कतिपयमान्यत्वे सुकृतुवाक्यनिरूपणम्	...	४२२

अध्यायः		पुटम्
४१	धनभागिनामधिकारिणां निर्वचनम् ...	५२३
	स्त्रीणां प्रशंसनम् ...	४२४
	स्त्रीणां गौरवे प्रमाणनिरूपणम् ...	४२६
४२	दायविभागविधिनिरूपणम् ...	४२७
	ब्राह्मणस्यासवर्णपत्नीषु प्रजोत्पत्तौ प्रायश्चित्ता-हैताकथनपूर्वकं दायविभागक्रमप्रदर्शनम् ...	४२८
	ब्राह्मण्या एव सवैधर्मानुष्ठानहेतुत्वकथनम् ...	४३०
	ब्राह्मण्यादिजातानां पुत्राणां वैषम्यप्रदर्शनम् ...	४३१
	क्षत्रियस्याप्रमादेन सर्वरक्षकत्वनिर्बन्धनम् ...	,,
	क्षत्रियादीनामसवर्णपत्नीषु सन्ततिसम्भवे दायवि-भागक्रमप्रदर्शनम् ...	४३२
४३	सङ्करजात्युद्भवानां चारित्रादिकथनम् ...	४३४
	सङ्करजात्युद्भवानां नामविभागकथनम् ...	४३५
	आर्यानार्ययोःसदसद्योनित्वस्य कर्मविज्ञेयत्वकथनम् ...	४३९
४४	सवर्णक्षेत्रक्षेत्रिजनितौरसादिपुत्रनिरूपणम् ...	४४१
	षडपध्वंसजानामपशदानां च लक्षणनिरूपणम् ...	४४३
	रेतोजक्षेत्रजानां लक्षणादिकथनम् ...	४४४
	कृत्रिमलक्षणकथनपूर्वकं तत्संस्कारादिकथनम् ...	४४५
४५	च्यवननहुषसंवादानुवादः ...	४४७
	च्यवनेन गङ्गायमुनयोर्जले प्रवेशः ...	४४८
	मत्स्यजीविभिः मत्स्यैस्साकं जालेन च्यवनस्य समाकर्षणम्	४४९
	दाशैः च्यवनसमाश्वासनम् ...	४५०
	च्यवननहुषसंवादः ...	४५१
	गविजातेन गोः शल्यत्वकल्पनेन च्यवनमोचनम् ...	४५३
	गवां प्रभावकथनम् ...	४५४
	च्यवनेन दाशानां स्वर्गप्रापणम् ...	४५५
४६	परशुरामस्योत्पत्तिप्रतिपादनम् ...	४५७
	च्यवनविश्वामित्रसंवादानुवादेन परशुरामो-त्पत्तिवृत्तान्तकथनम् ...	४५८

अध्यायः		पुटम्
४६	कुशिकेन च्यवनं प्रति परिचर्याविधानम् ...	४६०
	च्यवनेनैकविंशतिदिवसपर्यन्तं स्वापविधानम् ...	४६१
	च्यवनेन स्वापादुत्थायान्तर्धानम् ...	४६२
४७	अन्तर्हितेनापि च्यवनेन कुशिकं प्रति पुनरुशयने स्वात्मप्रदर्शनम् ...	४६३
	च्यवनेन स्नानशालायामन्तर्धानम् ...	४६४
	च्यवनेनान्तर्हितेनापि स्नात्वा सिंहासने स्वात्मप्रदर्शनम्	४६५
	कुशिकेन च्यवनाय सर्वोपहारसमर्पणम् ...	,,
	कुशिकेन साङ्ग्रामिकरथेन च्यवनस्य गृहप्रापणवेलायां च्यवनेन याचकेभ्यो धनादिदानम् ...	४६६
	च्यवनेन सभार्यं कुशिकं प्रति वरप्रदानम् ...	४६९
	च्यवनेन सभार्यस्य कुशिकस्य प्रतोदताडनजन्यव्रणापाकरणेन तद्गृहप्रेषणम् ...	४७०
	कुशिकेन भार्यया सह गृहे सुखेन निवसनम् ...	४७१
	कुशिकेन वने च्यवनदर्शनम् ...	४७४
	कुशिकेन स्वभार्यां प्रति च्यवनप्रभावकथनम् ...	४७५
	च्यवनेन कुशिकं प्रत्यभिनन्दनम् ...	४७६
	कुशिकेन च्यवनं प्रति स्वस्मिंस्तदनुग्रहनिवेदनम् ...	,,
	च्यवनकुशिकसंवादः ...	४७७
४८	युधिष्ठिरेण ज्ञातिबन्धुवधस्मृत्या स्वशरीरत्यागोद्यमनम् ...	४८४
	तपसां दानानां च विशिष्य फलकथनम् ...	४८५
	तिलगोभूदानफलकथनम् ...	४८८
	गृहदानफलकथनम् ...	४९०
	पाण्डवैः युधिष्ठिरवाक्यादरणम् ...	४९१
४९	सर्वदानानां गुणवत्साधुभ्यः प्रतिपादननियमनम् ...	४९२
	दानपात्रविवेचनम् ...	४९३
	सद्भ्यः प्रतिपादनेन फलप्रतिपादनम् ...	४९४
	ब्राह्मणानां दानपात्रतया प्रशंसनम् ...	४९५

अध्यायः		पृष्ठम्
४९ क्षत्रियादिभिः ब्राह्मणानामेवोपचर्तव्यत्वकथनम्	...	४९५
५० ब्राह्मणमहिमानुवर्णनपूर्वकं तद्दानप्रशंसनम्	...	४९७
दानविधानेनानुग्रहकरणम्	...	४९९
५१ श्रद्धापूर्वकदानविधानम्	...	५००
ब्राह्मणानां रक्षणीयत्वकथनम्	...	५०१
प्रजानां रक्षणीयत्वशासनम्	...	५०२
५२ भूमिगीतागाथाकथनम्	...	,,
इन्द्रबृहस्पतिसंवादानुवादः	...	,,
५३ भूमिदानप्रशंसनमन्नदानफलप्रतिपादनं च	...	५१४
अन्नदानस्य सकलफलप्राप्तिहेतुत्वकथनम्	...	५१७
अन्नदानानुशासनम्	...	५१९
५४ नारददेवकीसंवादः	...	५२१
कृत्तिकादिनक्षत्रेष्वन्नादिदानफलप्रतिपादनम्	...	,,
कृत्तिकारोहिण्योर्दानफलप्रतिपादनम्	...	,,
मृगशिरः प्रभृतिपूर्वोत्तरफल्गुन्यन्तेषु दानफलप्रतिपादनम्		५२२
हस्तादिज्येष्ठान्तनक्षत्रेषु दानफलकथनम्	...	५२३
मूलाद्युत्तरप्रोष्ठपदान्तनक्षत्रेषु दानफलकथनम्	...	५२४
रेवतीनक्षत्रे दानफलकथनम्	...	५२५
अश्विनीभरणीनक्षत्रयोः दानफलकथनम्	...	,,
पानीयतीर्थदानफलकथनम्	...	,,
घृतदानप्रशंसनम्	...	५२६
छत्रदानफलनिरूपणम्	...	५२७
५५ पादुकादानफलनिरूपणपूर्वकं तिलदानफलकथनम्	...	५२८
तिलस्योत्पत्त्यादिवर्णनेन तत्प्राशस्त्यवर्णनम्	...	५२९
भूदानप्रशंसनम्	...	५३०
भूदानस्य यज्ञतुल्यताकथनम्	...	५३१
गोदानफलकथनम्	...	५३२
अन्नदानफलकथनम्	...	५३४
५६ अन्नजलदानफलकथनम्	...	५३६

अध्यायः		पुटम्
५७ जलप्रभाववर्णनम्	...	५३९
तिलजलदीपदानप्रशंसनम्	...	,,
यमब्राह्मणसंवादः	...	५४१
५८ गोभूविद्यादानप्रशंसनम्	...	५४४
दानापात्रविवेचनम्	...	५४५
दानपात्रविवेचनम्	...	५४६
५९ ब्राह्मणस्वापहारस्यानर्थहेतुत्वकथनम्	...	५४८
नृगोपाख्यानकथनम्	...	,,
६० नाचिकेतोपाख्यानस्य गोदानप्रशंसनापरतया कथनम्	...	५५३
नाचिकेतेनोद्दालकिं प्रति वैवस्वतलोकप्राप्त्यादिकथनम्	...	५५४
यमेन नाचिकेतं प्रति गोदानमहिमानुवर्णनम्	...	५५७
यमेन नाचिकेतं प्रति गवामलाभे घृततिलक्षीरा-द्यन्यतमधेनुदानमहिमानुवर्णनम्	...	५५९
६१ इन्द्रेण ब्रह्माणं प्रति गोदानफलप्रश्नः	...	५६४
ब्रह्मणा गोदानफलकथनम्	...	५६५
गवां विक्रये चापहारे च दुर्गतिकथनम्	...	५७३
गोदानकाले सुवर्णदक्षिणायाः प्राशस्त्यकथनम्	...	,,
गोदानमहिमानुवर्णनस्य परम्पराप्राप्तत्वकथनम्	...	५७४
६२ अध्ययनाध्यापनगुरुशुश्रूषादीनां फलनिरूपणम्	...	५७५
सत्यदमादीनां फलनिरूपणम्	...	५७६
६३ गोदानविधिकथनम्	...	५८०
गोदानकाले दाक्षाऽनुसन्धेयप्रदर्शनम्	...	५८१
गोदातुः व्रतनियमादिकथनम्	...	५८३
भीष्मेण गोप्रदातॄणां नामफलयोः कथनम्	...	५८५
युधिष्ठिरेण सनियमं गोप्रदानम्	...	५८६
६४ गोदानमहिमानुवर्णनम	...	५८७
कपिलगवामुत्पत्तिकथनम्	...	५८८
गोवत् केषाञ्चित् पदार्थानां सर्वदा शुद्धिकथनम्	...	५९०

अध्यायः		पृष्ठम्
६४ रुद्रस्य पशुपतित्वादिकारणकथनम्	...	५९१
भीष्मवाक्येन युधिष्ठिरेण गोप्रदानम्	...	५९२
६५ वसिष्ठसौदाससंवादानुवादः	...	५९२
गोमहिमानुवर्णनम्	...	,,
वसिष्ठेन गोमांसभक्षणनिषेधादिकथनम्	...	५९४
वसिष्ठेन विविधगोदानेन विविधलोकप्राप्तिवर्णनम्	...	५९६
वसिष्ठेन प्रत्यहं कालत्रयेऽपि जप्यगोमन्त्रप्रतिपादनम्	...	५९९
६६ गवां पवित्रत्व-धारकत्व-तारकत्व-पोषकत्वादिकथनम्	...	६०२
व्यासेन शुकं प्रति गोमहिमानुवर्णनम्	..	६०३
गोभिः ब्रह्मणस्सकाशात् शृङ्गाधिगमः	...	६०४
गोगोचरनित्यजप्यश्लोककथनम्	...	६०५
६७ गोलोकस्य ब्रह्मलोकादप्युपरितनत्वे कारणकथनम्	...	६०८
६८ गवामुत्पत्तिप्रकारकथनम्	...	६११
गोमातॄणां नाम कथनम्	...	६१२
सुरभ्या स्वपुत्रीणामिन्द्रादिभ्यः प्रदानम्	...	६१४
६९ इन्द्रेण सुरभिं प्रति स्वस्यामरत्वप्राप्तिप्रार्थनम्	...	६१५
सुरभ्येन्द्रं प्रति क्षीरप्रदानेनामरत्वप्रदानपूर्वकं तस्मै सर्वाभीष्टप्रदानानुग्रहणम्	...	६१६
गवामङ्गेषु सुरभ्यनुग्रहणेन्द्रादिदेवानाम अनुप्रवेशः	...	६१७
७० फेनोपाख्यानकथनम्	...	६१९
सुमित्रनाम्ने ब्राह्मणोत्तमायाङ्गिरसेनैकगोदानम्	...	६२०
एकस्या गोः गोसहस्रसम्भवः	...	६२२
सुमित्रेण गोवत्सक्षीरफेनपानात् फेनप इति नामाधिगमः		६२३
फेनपेन गिरिह्रदे स्त्रीरूपधारिणीनां गवामवलोकनम्	...	,,
फेनपगोभिः गिरिह्रदे विद्यमानाः गाः प्रति स्वेषां गोलोकप्राप्त्युपायप्रार्थनम्	...	,,
गिरिह्रदगोभिः फेनपगोभ्यो रन्तिदेवसखे पशुभाव-प्राप्त्या गोलोकगमनचोदनम्	...	,,

अध्यायः		पुटम्
७०	फेनपगोभिः फेनपवधाय चोदिताभिः कपिलाभिस्तद्वध-प्रतिज्ञानम् ...	६२५
	गोमातृभिः फेनपं प्रत्यनुग्रहविधानम् ...	६२६
	गोमातृभिः फेनपस्य योगप्रभावेण गोलोकप्रापणम् ...	६२७
	कपिलाभिः फेनपशरीरस्य शृङ्गादिनाऽवचूर्णनम् ...	,,
	गोमातृभिः इतरगोभ्यश्शापप्रदानम् ...	,,
	फेनपगोभी रन्तिदेवं प्रति यागे स्वेषां पशुभावप्रार्थनम् ...	६२८
	रन्तिदेवेन यागसमाप्तिप्रकारप्रतिज्ञानम् ...	,,
	रन्तिदेवेन कस्याश्चिद्दोर्वत्सस्नेहदर्शनेन तद्वधजुगुप्सया यागसमापनम् ...	६२९
७१	व्यासशुकसंवादकथनम् ...	६३१
	व्यासेन कपिलाप्रभाववर्णनम् ...	६३६
७२	गोश्रीसंवादानुवादेन गोमूत्रपुरीषयोः श्रीदेव्यधिष्ठान-स्थानत्वकथनम् ...	६४२
	गोश्रीसंवादः ...	६४३
७३	गोलोकस्य स्वर्गादुपरितनत्वे कारणप्रतिपादनम् ...	६४६
७४	सुवर्णोत्पत्तिप्रकारकथनम् ...	६५३
	परशुरामवसिष्ठसंवादानुवादः ...	,,
	भीष्मेण सुवर्णदानमहिमानुवर्णनस्य स्वपितृनियोगा-धीनत्वकथनम् ...	६५४
	सुवर्णदानमहिम्नीन्द्रब्रह्मसंवादस्य प्रमाणतया कथनम् ...	६५६
	देवैः रुद्रं प्रत्यग्निद्वारा पुत्रोत्पादनप्रार्थनम् ...	६५७
	पार्वत्या देवान् प्रति स्वेषु दारेष्वनपत्यत्वशापदानम् ...	६५८
	देवैः ब्रह्माणं प्रति तारकासुरवधोपायप्रार्थनम् ...	६५९
	ब्रह्मणाऽग्निद्वारा तारकासुरवधोपायकथनम् ...	,,
	अग्निना मण्डूकान् प्रति तज्जिह्वायाः रसापरिज्ञानरूप-शापदानेऽपि देवैः तत्परिहारविधानम् ...	६६२
	अग्निना गजान् प्रति जिह्वाप्रतीपत्वशापदानेऽपि देवैः तत्परिहारविधानम् ...	६६३

अध्यायः			पृष्ठम्
७४	अग्निना शुकस्य पक्षिणो वाग्वैकल्यरूपशापदानेऽपि देवैः केनचित्प्रकारेण तत्परिहरणम्	...	६६४
	अग्निना शमीवृक्षगर्भावस्थानम्	...	,,
	देवैः अग्निं प्रति प्रार्थनम्	...	६६५
	अग्निना गङ्गायां रुद्रतेजोरोधाय प्रस्थानम्	...	६६५
	गङ्गयाऽग्निं प्रत्यनुग्रहणम्	...	६६८
	सुब्रह्मण्यसुवर्णसम्भवनिरूपणम्	...	,,
	भृग्वङ्गिरःप्रभृतीनां प्रभावकथनम्	...	६७१
७५	सुब्रह्मण्यप्रभावकथनम्	...	६७८
	देवादिभिः सुब्रह्मण्यं प्रति क्रीडनकादि दानम्	...	६८०
	देवैः सुब्रह्मण्यस्य सेनाधिपत्ये संस्थापनम्	...	६८१
	सुब्रह्मण्येन तारकासुरवधकरणम्	...	,,
७६	प्रतिपदादितिथिषु श्राद्धकरणस्य फलप्रतिपादनम्	...	६८३
	शुक्लपक्षापेक्षया कृष्णपक्षस्य श्रैष्ठ्यप्रतिपादनम्	...	६८५
७७	श्राद्धे तिलमांसव्रीहियवानां दाने फलविशेषकथनम्	...	६८६
	कृत्तिकादिनक्षत्रेषु श्राद्धकरणे फलप्रतिपादनम्	...	६८७
७८	श्राद्धे भोजनार्हानर्हनिरूपणम्	...	६९०

॥ अनुशासनपर्वणि प्रथमसम्पुटविषयानुक्रमणिका समाप्ता ॥

॥ श्रीः ॥

॥ महाभारतम् ॥

॥ १३ ॥ अनुशासनपर्वणि ॥ १३ ॥

॥ प्रथमसम्पुटम् ॥

॥ श्रीः ॥

॥ महाभारतम् ॥

॥ अनुशासनपर्व ॥

॥ प्रथमोऽध्यायः ॥

(आनुशासनिकपर्व)

युधिष्ठिरेण भीष्मं प्रति पुनः धर्मादिकथनप्रार्थना ॥ १ ॥ भीष्मादिनिधने स्वस्यैव हेतुत्वबुद्ध्या स्वोपालम्भनपूर्वकं शोचन्तं युधिष्ठिरं प्रति भीष्मेण जीवस्य कर्मैण्यस्वातन्त्र्यमभिधाय तन्निदर्शनतया गौतमीलुब्धकादिसंवादानुवादः ॥ २ ॥

[1]युधिष्ठिरः—

धर्मो बहुविधाकारस् सूक्ष्मश्चोक्तः पितामह ।
न च वै हृदये शान्तिर् अस्ति काचिन्ममानघ ॥ १

---

1. क-ख-घ—वैशम्पायनः—

शिबिराद्धास्तिनपुरं प्राप्य भारत सञ्जयः ।
प्रविवेश महाप्राज्ञो धृतराष्ट्रनिवेशनम् ॥
शोकेनोपहत स्सूतो विह्वलन् भृशदुःखितः ।
चिन्तयन् वैशसं घोरं सूतपुत्रस्य पाण्डवैः ॥

युधिष्ठिरः— [अधिकः पाठः]

अस्मिन्नर्थे बहुविधा शान्तिरुक्ता त्वयाऽनघ ।
स्वकृतात् का नु शान्तिस्याद् [1]दुःखाद्बहुविधादपि ॥ २

शराचितं शरीरं हि तीव्रव्रणमुदीक्ष्य ते ।
शमं नोपलभे वीर दुष्कृतान्येव चिन्तयन् ॥ ३

रुधिरेणावसिक्ताङ्गं प्रस्रवन्तं यथाऽचलम् ।
त्वां दृष्ट्वा पुरुषव्याघ्रं सदावर्षमिवाम्बुदम् ॥ ४

अतः कष्टतरं किं नु मत्कृते यत् पितामहः ।
इमामवस्थां गमितः प्रत्यमित्रै रणाजिरे ॥ ५

मन्ये नृपतयश्चान्ये सपुत्रास्सहबान्धवाः ।
वयं हि धार्तराष्ट्राश्च काममन्युवशं गताः ॥ ६

कृत्वैतन्निन्दितं कर्म प्राप्स्यामः कां गतिं नृप ॥ ६॥

सोऽहमार्तिकरो राजन् सुहृद्वधकरस्तथा ।
न शान्तिमधिगच्छामि कुतश्चिन् संशितव्रत ॥ ७॥

भीष्मः—

परतन्त्रः कथं हेतुम् आत्मानमनुपश्यसि ।
कर्मण्यस्मिन् महाभाग सूक्ष्मं ह्येतदतीन्द्रियम् ॥ ८॥

अत्राप्युदाहरन्तीमम् इतिहासं पुरातनम् ।
संवादं मृत्युगौतम्योः काललुब्धकपन्नगैः ॥ ९॥

---

1. ब—च्छमा

गौतमी नाम काऽप्यासीत् स्थविरा शमसंयुता ।
सर्पेण दष्टं स्वं पुत्रम् अपश्यद्गतचेतनम् ॥ १०॥

अथ तं [1]साधु पाशेन बद्ध्वा सर्पममर्षणः ।
लुब्धकोऽर्जुननामा तु गौतम्यास्समुपानयत् ॥ ११॥

[2]तां चाब्रवीदयं ते स पुत्रहा पन्नगाधमः ।
ब्रूहि क्षिप्रं महाभागे वध्यतां केन हेतुना ॥ १२॥

अग्नौ प्रक्षिप्यतामेष च्छिद्यतां खण्डशोऽपि वा ।
[3]न ह्ययं बालहा पापश् चिरं जीवितुमर्हति ॥ १३॥

गौतमी—

विसृजैनमबुद्धिस्त्वम् अवध्योऽर्जुनक त्वया ।
को ह्यात्मानं गुरुं कुर्यात् प्राप्तव्ये सति चिन्तयन् ॥ १४॥

प्लवन्ते धर्मलघवो लोकेऽस्मिंसि यथा प्लवाः ।
मज्जन्ति पापगुरवश् शस्त्रं स्कन्नमिवोदके ॥ १५॥

नास्यामृतत्वं भवितैवं हतेऽस्मिञ्
जीवत्यस्मिन् को व्यसुस्स्यादनन्ते ।
अस्योत्सर्गे प्राणयुक्तस्य जन्तोर्
मृत्युं लोके को न गच्छेदनन्ते ॥ १६॥

---

1. ब—स्नायु
2. अ—अर्धश्लोकं नास्ति
3. ब—नास्तीदमर्धम्

लुब्धकः—

जानाम्यहं नेह गुणागुणज्ञास्
सदायुक्ता गुरवो वै भवन्ति ।
स्वर्गस्य ते सूपदेशा भवन्ति
तस्मात् क्षुद्रं सर्पमिमं हनिष्ये ॥ १७॥

शममीप्सन्तः कालयोगं त्यजन्ति
शुचं च सन्तस्त्वर्थविदस्त्यजन्ति ।
श्रियः क्षयश्शोचतां नित्यशो हि
तस्मात् त्याज्यं जहि शोकं हतेऽस्मिन् ॥ १८॥

गौतमी—

न चैवार्तिर्विद्यतेऽस्मद्विधानां
धर्मारामस्सततं सज्जनो हि ।
नित्यायस्तो बालजनो न चायं
धर्मोऽपैति प्रभवाम्यस्य नाहम् ॥ १९॥

ब्राह्मणानां न कोपोऽस्ति कुतः कोपाच्च यातना ।
मार्दवात् क्षम्यतां साधो मुच्यतामेष पन्नगः ॥ २०॥

लुब्धकः—

हत्वा हि लाभाश्रयणेन भाव्यं
सद्यो लाभो बलवद्भि प्रशस्तः ।

कालाल्लाभो यस्तु सद्यो भवेत
हते श्रेयः कुत्सिते त्वीदृशे स्यात् ॥ २१॥

गौतमी—

काऽर्थप्राप्तिर्गृह्य शत्रुं निहत्य
का वा प्रीतिः प्राप्य शत्रुं न मुच्य ।
तस्मात् सौम्य मुजगे तु क्षमेयं
मोक्षं किं वा कारणं नास्य कुर्याम् ॥ २२॥

लुब्धकः—

कस्मादस्माद्बहवो रक्षितव्या
नैको बहुभ्यो गौतमि रक्षितव्यः ।
कृतागसं धर्मकृतस्त्यजन्ति
सरीसृपं पापमिमं त्यज त्वम् ॥ २३॥

गौतमी—

नास्मिन् हते पन्नगे पुत्रको मे
सम्प्राप्स्यते लुब्धक जीवितं वै ।
गुणं वाऽन्यं नास्य वधे प्रपश्ये
तस्मात् सर्पं लुब्धक मुञ्च जीवम् ॥ २४॥

लुब्धकः—

वृत्रं हत्वा देवराड् धर्मभागं
हत्वा यज्ञं धर्ममवाप चैव ।

शूली देवो देवव्रतं कुरु त्वं
क्षिप्रं सर्पं जहि मा ते विशङ्का ॥ २५॥

भीष्मः—

असकृत् प्रोच्यमानाऽपि गौतमी भुजगं प्रति ।
लुब्धकेन महाभागा सा पापे नाकरोन्मतिम् ॥ २६॥

ईषदुच्छ्वसमानस्तु कृच्छ्रात् संस्तभ्य पन्नगः ।
उत्ससर्ज गिरं मन्दां मानुषीं पाशपीडितः ॥ २७॥

सर्पः—

को न्वर्जुनक दोषोऽत्र विद्यते मम बालिश ।
अस्वतन्त्रं हि मां मृत्युर् विवशं समचूचुदत् ॥ २८॥

तस्यायं वचनाद्दष्टो न कोपेन न काम्यया ।
तस्य तत् किल्बिषं लुब्ध विद्यते यदि किञ्चन ॥ २९॥

लुब्धकः—

यदन्यवशगेनेदं कृतं ते पन्नगाशुभम् ।
कारणं वै त्वमप्यत्र तस्मात् त्वमपि किल्बिषी ॥ ३०॥

मृत्पात्रस्य क्रियायां हि दण्डचक्रादयो यथा ।
कारणं च प्रकल्प्यन्ते तथा त्वमपि पन्नग ॥ ३१॥

किल्बिषी चापि मे वध्यस् त्वमाख्याहि भुजङ्गम ॥ ३२

सर्पः—

सर्व एतेऽन्यवशगा दण्डचक्रादयो यथा ।

तथाऽहमपि तस्माद्वै नैव हेतुर्मतस्तव ॥ ३३
अथवा मतमेतत्ते अन्योऽन्यस्य प्रयोजकः ।
कार्यकारणसन्देहो भवत्यन्यत्र चोदनात् ॥ ३४
[1]एवं सति न मे दोषो नास्मि वध्यो न किल्बिषी ।
किल्बिषं मन्यसे हि त्वं वध्यमेव प्रभाषसे ॥ ३५

लुब्धकः—

[2]कारणं यदि न स्याद्वै न कर्ता स्यास्त्वमप्युत ।
विनाशे कारणं त्वं च तस्माद्वध्योऽसि पन्नग ॥ ३६
असत्यपि कृते कार्ये नेह पन्नग विद्यते ।
तस्मान्नात्रैव हेतुस्याद् वध्यः किं बहु भाषसे ॥ ३७

पन्नगः—

कार्याभावे क्रिया न स्यात् सत्यं सत्यपि कारणे ।
तस्माद्धतेऽस्मिन् हेतौ मे वाच्यो हेतुर्विशेषतः ॥ ३८
यद्यहं कारणत्वेन मतो लुब्धक [3]तत्त्वतः ।
अन्यः प्रयोक्ता स्यादत्र किं न जन्तुविनाशने ॥ ३९

लुब्धकः—

वध्यस्त्वं चेतनावत्त्वाद् बालघाती नृशंसकः ।
भाषसे किं बहु पुनर् वध्यस्सन् पन्नगाधम ॥ ४०

---

1. अ—नास्मीदमधैम्
2. अ—अर्धचतुष्टयं नास्ति
3. ब—न स्वतः

पन्नगः—

यथा हवींषि जुह्वाना मखे लुब्धक ऋत्विजः ।
न फलं प्राप्नुवन्त्यत्र फलयोगात् तथा ह्ययम् ॥ ४१

भीष्मः—

तथा ब्रुवति तस्मिंस्तु पन्नगे मृत्युचोदनाम् ।
आजगाम ततो मृत्युः पन्नगं चाब्रवीदिदम् ॥ ४२

मृत्युः—

कालेनाहं प्रमुदितः पन्नग त्वामचूचुदम् ।
विनाशहेतुर्नास्य त्वं न त्वहं प्राणिनश्शिशोः ॥ ४३

यथा वायुर्बलोपेतो विकर्षति जलप्रदान् ।
तद्विध[1]स्त्वद्वशे चाहं कालस्य वशगश्चिरम् ॥ ४४

सात्त्विका राजसाश्चैव तामसा ये च केचन ।
भावाः कालात्मकास्सर्वे प्रवर्तन्ते हि जन्तुषु ॥ ४५

जङ्गमास्स्थावराश्चैव विदित्वा भुवि वा दिवि ।
सर्वे कालात्मकास्सर्प कालात्मकमिदं जगत् ॥ ४६

प्रवृत्तयश्च या लोके तथैव च निवृत्तयः ।
तासां प्रकृतयो याश्च सर्वं कालात्मकं स्मृतम् ॥ ४७

आदित्यश्चार्यमा त्वग्निर् आपो वायुश्शतक्रतुः ।
अग्निः खं पृथिवी द्यौश्च ओषध्यो मरुतो दिशः ॥ ४८

---

1. क-घ—स्त्ववशो नाहं

सरितस्सागराश्चैव भावाभावौ च पन्नग ।
सर्वे कालेन सृज्यन्ते संह्रियन्ते पुनस्तथा ॥ ४९

एतज्ज्ञानन् कथं वा त्वं मद्दोषं सर्प मन्यसे ।
अथ चैवागतो दोषो मयि त्वमपि दोषवान्॥ ५०

सर्पः—

निर्दोषं दोष[1]वन्तं तु न त्वां मृत्यो ब्रवीम्यहम् ।
त्वयाऽहं चोदित इति ब्रवीम्येतावदेव तु ॥ ५१

यदि काले च दोषोऽस्ति यदि तत्रापि नेष्यते ।
दोषो नैव परीक्ष्यो मे न ह्यत्राधिकृता वयम् ॥ ५२

निर्मोक्षस्तस्य मोहस्य मया कार्यो यथातथम् ।
मृत्यो तवापि दोषस्याद् इत्यतेन्मे प्रयोजनम् ॥ ५३

भीष्मः—

सर्पोऽथार्जुनकं प्राह श्रुतं ते मृत्युभाषितम् ।
[2]नानागसं मां पाशेन सन्तापयितुमर्हसि ॥ ५४

लुब्धकः—

मृत्यो श्रुतं ते वचनं तव चैव भुजङ्गम ।
नैव तावद्विदोषत्वं भवति त्वयि पन्नग ॥ ५५

---

1. क-घ—वत्त्वेन ख—वन्तं वा
2. क—नानाधर्मोपदे+ति घ—नानाधर्मोपदेशेन+ति

मृत्युस्त्वं चैव हेतुर्हि जन्तोरस्य विनाशने ।
उभयं कारणं जन्तोर् न कारणमकारणम् ॥ ५६

मृत्युं च धिक्करिष्यन्ति क्रूरं दुःखकरं नृणाम् ।
त्वामेव हि वधिष्यामि [1]परं पापस्य कारणम् ॥ ५७

सर्पः—

विवशौ कालवशगौ श्रुतनिर्दिष्टकारिणौ ।
नावां दोषेण हन्तव्यौ यदि सम्यक् प्रपश्यसि ॥ ५८

लुब्धकः—

युवामुभौ परवशौ यदि वै मृत्युपन्नगौ ।
हर्षक्रोधौ कथं स्याताम् एतदिच्छामि वेदितुम् ॥ ५९

मृत्युः—

याः काश्चिदेव चेष्टास्युस् सर्वाः कालवशानुगाः ।
पूर्वमेवैतदुक्तं हि मया लुब्धक तत्त्वतः ॥ ६०

भीष्मः—

[2]अथोपगम्य कालस्तु तस्मिन् धर्मार्थसंशये ।
अब्रवीत् पन्नगं मृत्युं तं चार्जुनकलुब्धकम् ॥ ६१

कालः—

नैवाहं नाप्ययं मृत्युर् नायं लुब्धक पन्नगः ।
किल्बिषी [3]जन्तुमरणे न वयं हि प्रयोजकाः ॥ ६२

---

1. क-ब—परपा　　2. अ—अर्धद्वयं नास्ति
3. अ-क-ब—जातु

अकरोद्यदयं कर्म तदर्जुनक चोदितम् ।
प्रणाशहेतुर्नान्योऽस्य वध्यतेऽयं स्वकर्मणा ॥ ६३

यदनेन कृतं कर्म तेनायं निधनं गतः ।
विनाशहेतुः कर्मास्य सर्वे कर्मवशा वयम् ॥ ६४

कर्मदायादको लोकः कर्म बन्धनलक्षणम् ।
कर्माणि चोदयन्तीह तथाऽन्योन्यं यथा वयम् ॥ ६५

यथा मृत्पिण्डतः कर्ता कुरुते यद्यदिच्छति ।
[1]एवमात्मकृतं कर्म मानवः प्रतिपद्यते ॥ ६६

यथा च्छायातपौ नित्यं सुसम्बद्धौ निरन्तरम् ।
तथा कर्म च कर्ता च सम्बद्धावात्मकर्मभिः ॥ ६७

एवं नाहं नैव मृत्युर् न सर्पो न तथा भवान् ।
न चैव ब्राह्मणी वृद्धा शिशुरेवात्र कारणम् ॥ ६८

भीष्मः—

तस्मिंस्तथा ब्रुवाणे तु ब्राह्मणी गौतमी नृप ।
स्वकर्मप्रत्ययाँल्लोकान् मत्वाऽर्जुनकमब्रवीत् ॥ ६९

गौतमी—

नैव कालो न भुजगो न मृत्युरिह कारणम् ।
स्वकर्मभिरयं बालः कालेन निधनं गतः ॥ ७०

---

1. अ—नास्तीदमधैम्

मया च तत् कृतं कर्म येनायं मे सुतो मृतः ।
यथा कालस्तथा मृत्युर् मुञ्चार्जुनक पन्नगम् ॥ ७१

भीष्मः—

ततो यथागतं जग्मुर् मृत्युः कालोऽथ पन्नगः ।
अभूद्विरोषोऽर्जुनको [1]विशोका चैव गौतमी ॥ ७२

एतच्छ्रुत्वा शमं गच्छ मा भूश्चिन्तापरो नृप ।
स्वकर्मप्रत्ययाँल्लोकांस् त्रीन् विद्धि समितिञ्जय ॥ ७३

न तत् त्वया कृतं पार्थ नापि दुर्योधनेन च ।
कालेन तत् कृतं विद्धि निहता येन पार्थिवाः ॥ ७४

वैशम्पायनः—

इत्येतद्वचनं श्रुत्वा बभूव विगतज्वरः ।
युधिष्ठिरो महातेजाः पप्रच्छेदं स धर्मवित् ॥ ७५

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां
अनुशासनपर्वणि प्रथमोऽध्यायः ॥ १ ॥
॥ ८९ ॥ आनुशासनिकपर्वणि प्रथमोऽध्यायः ॥ १ ॥
[अस्मिन्नध्याये ७५ श्लोकाः]

---

1. क-घ—विरोषा

॥ द्वितीयोऽध्यायः ॥

भीष्मेण युधिष्ठिरं प्रति गार्हस्थ्याश्रयणेनातिथिसत्कारस्य श्रेयस्साधनतायां दृष्टान्ततया सुदर्शनोपाख्यानकथनम् ॥

युधिष्ठिरः—

पितामह महाप्राज्ञ सर्वशास्त्रविशारद ।
श्रुतं मे महदाख्यानाम् इदं मतिमतां वर ॥ १

भूयस्तु श्रोतुमिच्छामि धर्मार्थसहितं नृप ।
कथ्यमानं त्वया किञ्चित् तन्मे व्याख्यातुमर्हसि ॥ २

केन मृत्युर्गृहस्थेन धर्ममाश्रित्य निर्जितः ।
[1]इत्येतं धर्ममाचक्ष्व तत्त्वेन भरतर्षभ ॥ ३

भीष्मः—

अत्राप्युदाहरन्तीमम् इतिहासं पुरातनम् ।
यथा मृत्युर्गृहस्थेन धर्ममाश्रित्य निर्जितः ॥ ४

मनोः प्रजापते राजन्निक्ष्वाकुरभवत् सुतः ।
तस्य पुत्रशतं जज्ञे नृपतेस्सूर्यवर्चसः ॥ ५

दशमस्तस्य पुत्रस्तु दशाश्वो नाम भारत ।
माहिष्मत्यामभूद्राजा धर्मात्मा सत्यविक्रमः ॥ ६

1. अ—इदमर्धत्रयं नास्ति

दशार्श्वस्य सुतश्चासीद् राजा परमधार्मिकः ।
सत्ये तपसि दाने च यस्य नित्यं रतं मनः ॥ ७

मदिराश्व इति ख्यातः पृथिव्यां पृथिवीपतिः ।
धनुर्वेदे च वेदे च यस्य नित्यं रतं मनः ॥ ८

मदिराश्वस्य पुत्रस्तु द्युतिमान् नाम भारत ।
महाभागो महातेजा महासत्त्वो महाबलः ॥ ९

पुत्रो द्युतिमतस्त्वासीत् सुवीरो नाम नामतः ।
धर्मात्मा [1]कोशवांश्चैव राजराज इवापरः ॥ १०

सुवीरस्य च राजेन्द्र पुत्रो युद्धेषु दुर्जयः ।
दुर्जयो नाम विख्यातस् सर्वशास्त्रविशारदः ॥ ११

दुर्जयस्येन्द्रवपुषः पुत्रोऽग्निसदृशद्युतिः ।
दुर्योधनो नाम महान् राजाऽऽसीद्राजसत्तम ॥ १२

तस्येन्द्रसमवीर्यस्य सङ्ग्रामेष्वनिवर्तिनः ।
विषयश्च प्रतापश्च तुल्यमेवाभ्यवर्तताम् ॥ १३

अन्नैर्धनैश्च बहुभिस् सस्यैरन्यैश्च भारत ।
नगरं विषयं चास्य [2]प्रतिपूर्णं तदाऽभवत् ॥ १४

न तस्य विषये कश्चित् कृपणो नाम दुर्गतः ।

---

1. क-ङ—भोगवां ख—धर्मार्थकोश
2. क-ङ—वारिपूर्णं सदा ख—परिपूर्णस्त

व्याधितो दुर्गतश्चैव पुरुषः प्रत्यदृश्यत ॥ १५

स दक्षिणो मधुरवाग् अनसूयुर्जितेन्द्रियः ।
धर्मात्मा चानृशंसश्च विक्रान्तो नविकत्थनः ॥ १६

[1]धन्यो वदान्यो मेधावी ब्रह्मण्यस्सत्यसङ्गरः ।
न चावमन्ता दाता च वेदवेदाङ्गपारगः ॥ १७

तं नर्मदा देवनदी पुण्या शीतजला शिवा ।
चकमे पुरुषश्रेष्ठं स्नेहभावेन भारत ॥ १८

तस्य जज्ञे तदा नद्यां कन्या राजीवलोचना ।
नाम्ना सुदर्शना चैव रूपेण च सुदर्शना ॥ १९

तादृग्रूपा न नारीषु भूतपूर्वा युधिष्ठिर ।
दुर्योधनसुता यादृग् अभवद्वरवर्णिनी ॥ २०

तामग्निश्चकमे साक्षाद् राजकन्यां सुदर्शनाम् ।
सुरूपं दीप्तिमत् कृत्वा [2]शरदर्कसमद्युति ॥ २१

सा चाग्निशरणे राज्ञा शुश्रूषाकृतनिश्चया ।
नियुक्ता पितृसंदेशाद् आरिराधयिषुश्शिखिम् ॥ २२

तस्या मनोहरं रूपं दृष्ट्वा देवो हुताशनः ।
मन्मथेन समाविष्टः पत्नीत्वे यतते मिथः ॥ २३

---

1. अ—नास्तीदमर्धम्
2. अ—शरदिन्दु

अग्निः—

भज मामनवद्याङ्गि कामात् कमललोचने ।
रम्भोरु मृगशावाक्षि पूर्णचन्द्रनिभानने ॥ २४

तवेदं पद्मपत्राक्षं मुखं दृष्ट्वा मनोहरम् ।
भ्रूलताललितं कान्तम् अनङ्गो बाधते हि माम् ॥ २५

ललाटं चन्द्रलेखाभं शिरोरुहविभूषितम् ।
दृष्ट्वा ते पत्रलेखाङ्कम् अनङ्गो बाधते भृशम् ॥ २६

[1]बालातपेनाकुलितं सस्वेदपुलकोद्गमम् ।
बिम्बाधरोष्ठवदनं विबुद्धमिव पङ्कजम् ॥ २७

अतीव चारुविभ्रान्तं मुदमावहते मम ॥ २७॥

दन्तप्राकारनियता वाणी तव सुरक्षिता ।
ताम्रपल्लवसङ्काशा जिह्वेयं मे मनोहरा ॥ २८॥

समास्निग्धास्सुजाताश्च सहिताश्च द्विजास्तव ।
द्विजप्रिये प्रसीदस्व भज मां सुभगा ह्यसि ॥ २९॥

मनोज्ञं [2]ललितापाङ्ग मुखं तव मनोहरम् ।
स्तनौ ते संहतौ भीरु हाराभरणभूषितौ ॥ ३०॥

पक्वबिल्वप्रतीकाशौ कर्कशौ सङ्गमक्षमौ ।
गम्भीरनाभिसुभगे भज मां वरवर्णिनि ॥ ३१॥

---

1. अ—इदमर्धद्वयं नास्ति 2. क-ख—सुकृता घ—असित

भीष्मः—

सैवमुक्ता विरहिते पावकेन महात्मना ।
ईषदाकम्पिहृदया व्रीडिता वाक्यमब्रवीत् ॥ ३२॥

सुदर्शना—

ननु नाम कुलीनानां कन्यकानां विशेषतः ।
माता पिता प्रभवतः प्रदाने बान्धवाश्च [1]ये ॥ ३३॥
पाणिग्रहणमन्त्रैश्च हुते चैव विभावसौ ।
सतां मध्ये निविष्टायाः कन्यायाश्शरणं पतिः ॥ ३४॥
साऽहं नात्मवशा देव पितरं वरयस्व मे ॥ ३५

भीष्मः—

अथ नातिचिरात् कालाद् राजा दुर्योधनः किल ।
यज्ञसम्भारनिपुणान् मन्त्रीनाहूय चोक्तवान् ॥ ३६
यज्ञं यक्ष्येऽहमिति वै सम्भारास्सम्भ्रियन्तु मे ॥ ३६॥
ततस्समाहिते तस्य यज्ञे ब्राह्मणसत्तमैः ।
विप्ररूपी हुतवहो नृपं कन्यामयाचत ॥ ३७॥
न तु राजा प्रदानाय तस्मै भावमकल्पयत् ।
दरिद्रश्च सुवर्णश्च ममायमिति पार्थिव ॥ ३८॥
इति तस्मै न वै कन्यां दित्सां चक्रे नराधिपः ॥ ३९
अथ दीक्षामुपेतस्य यज्ञे तस्य महात्मनः ।

1. क-घ—मे

[1]आहितो हवनार्थाय वेद्यामग्निः प्रणश्यत ॥ ४०
ततस्स भीतो नृपतिर् भृशं प्रव्यथितेन्द्रियः ॥ ४०॥

मन्त्रिणो ब्राह्मणांश्चैव पप्रच्छ किमिदं भवेत् ।
यज्ञे समिद्धो भगवान् नष्टो मे हव्यवाहनः ॥ ४१॥

स मन्त्रकुशलैस्तैस्तैर् ब्राह्मणैर्वेदपारगैः ।
[2]अमानुषो विकारोऽयम् इति तैरेव बोधितः ॥ ४२॥

धर्मविघ्नकरं वीर नैतत्त्वय्युपपद्यते ॥ ४३

स्तूयतां भगवान् वह्निर् ब्राह्मणैर्वेदपारगैः ।
[3]ऋत्विग्भिर्मन्त्रकुशलैर् यज्यतां वा हुताशनः ॥ ४४

अथ ऋक्सामयजुषां पारगैर्वेदपारगैः ।
वेदतत्त्वार्थकुशलैस् स्तुतस्स्तोमपुरस्कृतैः ॥ ४५

गुह्येषु नामधेयेषु [4]कीर्त्यमानेषु पावकः ।
स्वरूपं दीप्तिमत् कृत्वा शरदर्कसमद्युतिः ॥ ४६

ततो महात्मा तानाह दहनो ब्राह्मणर्षभान् ।
वरये ह्यात्मनोऽर्थाय दुर्योधनसुतामिति ॥ ४७

ततस्ते कल्यमुत्थाय तस्मै राज्ञे न्यवेदयन् ॥ ४७॥

---

1. घ—आहितो हवनार्थाय तस्मै भावमकल्पयत् । [इत्यर्धमधिकम्]
2. अ-ख—अर्धत्रयं नास्ति
3. ख—अर्धद्वयं नास्ति
4. अ—अयं पादोऽनन्तरश्च न स्तः

ततस्स राजा तच्छ्रुत्वा वचनं ब्रह्मवादिनाम् ।
अवाप्य परमं हर्षं तथेति प्राह बुद्धिमान् ॥ ४८॥

प्रायाचत ततश्शुल्कं भगवन्तं विभावसुम् ।
नित्यं सान्निध्यमिह ते चित्रभानो भवेदिति ॥ ४९॥

[1]तमाह भगवानग्निर् एवमस्त्विति पार्थिवम् ॥ ५०
ततस्सान्निध्यमद्यापि माहिष्मत्यां विभावसोः ।
दृष्टं हि सहदेवेन दिशो विजयता च तत् ॥ ५१

ततस्तां समलङ्कृत्य कन्यामहतवाससम् ।
ददौ दुर्योधनो राजा पावकाय महात्मने ॥ ५२

प्रतिजग्राह चाग्निस्तां राजपुत्रीं सुदर्शनाम् ।
विधिना वेददृष्टेन वसोर्धारामिवाध्वरे ॥ ५३

तस्या रूपेण शीलेन कुलेन वपुषा श्रिया ।
अभवत् प्रीतिमानग्निर् गर्भं चास्यां समादधे ॥ ५४

तस्यां समभवत् पुत्रो नाम्नाऽग्नेयस्सुदर्शनः ।
शिशुरेवाध्यगात् सर्वं स च ब्रह्म सनातनम् ॥ ५५

अथौघवान्नाम नृपो नृगस्यासीत् पितामहः ।
[2]तस्याप्योघवती पुत्री पुत्रश्चौघरथोऽभवत् ॥ ५६

1. अ—कीर्तिमानेष पावक स्वरूपं दीप्तिमत् कृत्वा ? [अधिकः पाठः]
2. घ—ब्राह्मणा विस्मितास्सर्वे यदुक्तं चित्रभानुना [इत्यधिकः पाठः]

तामोघवान् ददौ तस्मै स्वयमोघवतीं तदा ।
सुदर्शनाय विदुषे भार्यार्थे देवरूपिणीम् ॥ ५७

स गृहस्थाश्रमरतस् तया सह सुदर्शनः ।
कुरुक्षेत्रेऽवसद्राजन्नोघवत्या समन्वितः ॥ ५८

गृहस्थश्चापि जेष्यामि मृत्युमित्येव स प्रभो ।
प्रतिज्ञामकरोद्धीमान् दीप्ततेजा विशां पते ॥ ५९

तामेवौघवतीं राजन् स पावकसुतोऽब्रवीत् ॥ ५९॥

सुदर्शनः—

अतिथेः प्रतिकूलं ते न कर्तव्यं कथञ्चन ॥ ६०

येन येन च तुष्येत नित्यमेवातिथिस्तव ।
अध्यात्मनः प्रदानेन न ते कार्या विचारणा ॥ ६१

एतद्व्रतं मम सदा हृदि सम्परिवर्तते ।
गृहस्थानां हि सुश्रोणि नातिथेर्विद्यते परम् ॥ ६२

प्रमाणं यदि वामोरु वचनं मम शोभने ।
इदं वचनमव्यग्रा हृदि त्वं धारयेस्सदा ॥ ६३

निष्क्रान्ते मयि कल्याणि तथा सन्निहितेऽनघे ।
अतिथिर्नावमन्तव्यः प्रमाणं यद्यहं तव ॥ ६४

भीष्मः—

तमब्रवीदोघवती यता मूर्ध्नि कृताञ्जलिः ॥ ६४॥

ओघवती—

न मे त्वद्वचनं किञ्चिद् अकर्तव्यं कथञ्चन ॥ ६५

भीष्मः—

जिगीषमाणस्तु सदा तथा मृत्युस्सुदर्शनम् ।
पृष्ठतोऽन्वगमद्राजन् रन्ध्रान्वेषी तथा सदा ॥ ६६

इध्मार्थं तु गते तस्मिन्नग्निपुत्रे सुदर्शने ।
अतिथिर्ब्राह्मणश्श्रीमांस् तामाहौघवतीं तदा ॥ ६७

मृत्युः—

आतिथ्यं दत्तमिच्छामि त्वयाऽद्य वरवर्णिनि ।
प्रमाणं यदि धर्मस्ते गृहस्थाश्रमसम्मतः ॥ ६८

भीष्मः—

इत्युक्ता तेन विप्रेण राजपुत्री यशस्विनी ।
विधिना प्रतिजग्राह वेदोक्तेन विशां पते ॥ ६९

आसनं चैव पाद्यं च तस्मै दत्त्वा द्विजातये ।
प्रोवाचौघवती विप्रं केनार्थी किं ददामि ते ॥ ७०

तामब्रवीत् ततो विप्रो राजपुत्रीं सुदर्शनाम् ॥ ७०॥

मृत्युः—

त्वया ममार्थः कल्याणि निर्विशङ्कं तदाचर ॥ ७१

यदि प्रमाणं धर्मास्ते गृहस्थाश्रमसम्मताः ।
प्रदानेनात्मनो राज्ञि कर्तुमर्हसि मे प्रियम् ॥ ७२

भीष्मः—

तया स छन्द्यमानोऽन्यैर् ईप्सितैर्नृपकन्यया ।
नान्यमात्मप्रदानात् स तस्या वव्रे वरं द्विजः ॥ ७३

सा तु राजसुता स्मृत्वा भर्तुर्वचनमादितः ।
तथेति लज्जमाना सा तमुवाच द्विजर्षभम् ॥ ७४

ततो रहस्स विप्रर्षिस् सा चैवोपविवेश ह ।
संस्मृत्य भर्तुर्वचनं गृहस्थाश्रमकारिणः ॥ ७५

अथेध्मान् समुपादाय स पावकिरुपागमत् ।
मृत्युना रौद्र[1]भावेन नित्यं बन्धुरिवान्वितः ॥ ७६

ततस्त्वाश्रममागम्य स पावकसुतस्तदा ।
तामाजुहावौघवतीं क्वासि यातेति चासकृत् ॥ ७७

तस्मै प्रतिवचस्सा तु भर्त्रे न प्रददौ तदा ।
कराभ्यां तेन विप्रेण [2]स्पृष्टा भर्तृव्रता सती ॥ ७८

[3]न दोषोऽस्तीति मन्वाना लज्जिता भर्तुरेव च ।
तूष्णीम्भूताऽभवत् साध्वी विप्रकोपाच्च शङ्किता ॥ ७९

अथ तां किं न्विति पुनः प्रोवाच स सुदर्शनः ॥ ७९॥

---

1. क-घ—रूपेण
2. क-घ—सम्यगालिङ्गिता सती
3. क-घ—निर्विष्टास्मी ख—उच्छिष्टाऽस्मी

सुदर्शनः—

क सा साध्वी क सा याता गरीयः किमतो मम ॥ ८०

पतिव्रता सत्यशीला नित्यं चैवार्जवे रता ।
कथं न प्रत्युदेत्यद्य स्मयमाना यथापुरम् ॥ ८१

भीष्मः—

उटजस्थस्तु तं विप्रः प्रत्युवाच सुदर्शनम् ॥ ८१॥

मृत्युः—

अतिथिं विद्धि सम्प्राप्तं पावके ब्राह्मणं च माम् ॥ ८२

अनया छन्द्यमानोऽहं भार्यया तव सत्तम ।
तैस्तैरतिथिसत्कारैर् आर्जवेन [1]भृतो मतः ॥ ८३

आत्मप्रदानावधिना मामर्चति शुभानना ।
अनुरूपं यदत्राद्य तद्भवान् वक्तुमर्हति ॥ ८४

भीष्मः—

कूटमुद्गरहस्तश्च मृत्युश्चैनं समन्वयात् ।
हीनप्रतिज्ञमत्रैनं वधिष्यामीति चिन्तयन् ॥ ८५

सुदर्शनस्तु मनसा कर्मणा चक्षुषा गिरा ।
त्यक्तेर्ष्यस्त्यक्तमन्युश्च स्मयमानोऽब्रवीदिदम् ॥ ८६

सुदर्शनः—

[2]सुरतं तेऽस्तु विप्राग्र्य प्रीतिर्हि परमा मम ।

---

1. क—मतो मम ख—रैराहृतं चार्जवे मनः घ—हृतो मम
2. क—स्वागतं तेऽस्तु

गृहस्थस्य तु धर्मोऽग्र्यस् सम्प्राप्तोऽतिथिपूजनम् ॥ ८७

अतिथिः पूजितो यस्य गृहस्थस्य तु गच्छति ।
[1]नास्मात् परो धर्म इति ब्रह्मन् मम मनीषितम् ॥ ८८

प्राणाश्च मम दाराश्च यच्चान्यद्विद्यते वसु ।
अतिथिभ्यो मया देयम् इति मे व्रतमाहितम् ॥ ८९

निस्सन्दिग्धं मया वाक्यम् एतत्ते समुदाहृतम् ।
ततोऽहं विप्र सत्येन स्वयमात्मानमालभे ॥ ९०

पृथिवी वायुराकाशम् आपो ज्योतिश्च पञ्चमम् ।
बुद्धिरात्मा मनः कालो दिशश्चैतास्तथा दश ॥ ९१

नित्यमेतानि पश्यन्ति देहिनां देहसंश्रिताः ।
सुकृतं दुष्कृतं चापि कर्म कर्मवतां वर ॥ ९२

यथैषा नानृता वाणी मयाऽद्य समुदाहृता ।
तेन सत्येन मां देवाः पालयन्तु दहन्तु वा ॥ ९३

भीष्मः—

ततो नादस्समभवद् दिक्षु सर्वासु भारत ।
असकृत् सत्यमित्येव नैतन्मिथ्येति सर्वशः ॥ ९४

उटजात् तु ततस्तस्मान्निश्चक्राम स वै द्विजः ।
वपुषा खं च भूमिंच व्याप्य वायुरिवोद्धतः ॥ ९५

1. क-ख-ङ—न हि तस्मात् परो धर्म इति प्राहुर्मनीषिणः । [पाठान्तरम्]

स्वरेण विप्रशक्येन त्रीँल्लोकाननुनादयन् ।
उवाच चैनं धर्मज्ञं पूर्वमामन्त्र्य नामतः ॥ ९६

मृत्युः—

धर्मोऽहमस्मि भद्रं ते जिज्ञासार्थं तवानघ ।
प्राप्तस्सत्यं च ते ज्ञात्वा प्रीतिर्हि परमा त्वयि ॥ ९७

विजितश्च त्वया मृत्युर् एष त्वामनुगच्छति ।
रन्ध्रान्वेषी तव सदा त्वया धृत्या वशीकृतः ॥ ९८

न चास्ति शक्तिस्त्रैलोक्ये कस्यचित् पुरुषोत्तम ।
[1]पतिव्रतामिमां भार्यां तव वीक्षितुमप्युत ॥ ९९

रक्षिता त्वद्गुणैरेषा पातिव्रत्यगुणादपि ।
अधृष्या यदियं ब्रूयात् तथा तन्नान्यथा भवेत् ॥ १००

[2]एषा हि तपसा स्वेन संयुता ब्रह्मवादिनी ।
पावनार्थं तु लोकस्य सरिच्छ्रेष्ठा भविष्यति ॥ १०१

अर्धेनौघवती नाम त्वामर्धेनानुयास्यति ।
शरीरेण [3]महाभागा योगो ह्यस्या वशे स्थितः ॥ १०२

अनया सह लोकांश्च गन्तासि तपसाऽऽर्जितान् ॥ १०२॥

---

1. अ—अर्धद्वयं नास्ति 2. ख—इदमर्धं नास्ति
3. क—महाभाग

यत्र नावृत्तिमभ्येति शाश्वतांस्ताननुत्तमान् ।
अनेन चैव देहेन लोकांस्त्वमनुवत्स्यसे ॥ १०३॥

निर्जितश्च त्वया मृत्युर् ऐश्वर्यं च तवोत्तमम् ।
पञ्चभूतान्यतिक्रान्तस् स्ववीर्याच्च मनोभवात् ॥ १०४॥

गृहस्थधर्मेणानेन कामक्रोधौ च ते जितौ ॥ १०५

स्नेहो रागश्च तन्द्री च लोभो द्रोहश्च केवलः ।
तव शुश्रूषया राजन् राजपुत्र्या च निर्जिताः ॥ १०६

भीष्मः—

शुक्लानां तु सहस्रेण वाजिनां रथमुत्तमम् ।
युक्तमारुह्य भगवान् यमस्साक्षाज्जगाम ह ॥ १०७

मृत्युरात्मा च लोकाश्च जिता भूतानि पञ्च च ।
बुद्धिः कालो मदो मोहः कामक्रोधौ तथैव च ॥ १०८

तस्माद् गृहाश्रमस्थस्य [1]नान्यद्दैवतमस्ति वै ।
[2]ऋतेऽतिथिं नरव्याघ्र मनसैतद्विचारय ॥ १०९

अतिथिः पूजितो यद्धि मनसा ध्यायते शुभम् ।
न तत् क्रतुशतेनापि तुल्यमाहुर्मनीषिणः ॥ ११०

पात्रं चातिथिमासाद्य शीलाढ्यं यो न पूजयेत् ।

---

1. क-घ—नान्यदेव तपोऽस्ति वै

2. क—आतिथ्यात् तु नर घ—ऋतेऽतिथेर्नर

सुदत्तं सुकृतं वाऽपि [1]क्षपयेदप्यनर्चितः ॥ १११

एतत्ते कथितं पुत्र मयाऽऽख्यानमनुत्तमम् ।
यथा विनिर्जितो मृत्युर् गृहस्थेन पुराऽभवत् ॥ ११२

धन्यं यशस्यमायुष्यम् इदमाख्यानमुत्तमम् ।
[2]यः पठेच्छृणुयाद्वाऽपि सर्वपापप्रणाशनम् ॥ ११३

[3]य इदं कथयेन्नित्यम् अहन्यहनि पार्थिव ।
सुदर्शनस्य चरितं पुण्याँल्लोकानवाप्नुयात् ॥ ११४

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां
अनुशासनपर्वणि द्वितीयोऽध्यायः ॥ २ ॥
॥ ८९ ॥ आनुशासनिकपर्वणि द्वितीयोऽध्यायः ॥ २ ॥
[अस्मिन्नध्याये ११४ श्लोकाः]

---

1. क-घ—कम्पयेदप्ययाचितः
2. क-ख-घ—बुभूषता हि वक्तव्यं सर्वदुश्चरितापहम् । [पाठान्तरम्]
3. अ-क—नास्तीदमर्धम्

॥ तृतीयोऽध्यायः ॥

भीष्मेण युधिष्ठिरं प्रति ब्राह्मण्यस्य क्षत्रियादिदौर्लभ्ये दृष्टान्ततया मतङ्गोपाख्यानकथनारम्भः ॥ १ ॥ तत्रेन्द्रमतङ्गसंवादानुवादारम्भः ॥ २ ॥ मतङ्गेन ब्राह्मण्यप्राप्तये वर्षशतं तपश्चरणम् ॥ ३ ॥ तं प्रतीन्द्रेण प्राणिनां कथंचिन्मानुषत्वलाभेऽपि नानानीचयोनिषु परिभ्रमणपूर्वकं क्रमेण चैवर्णिकत्वमात्रप्राप्तिकथनेन ब्राह्मण्यस्य दुर्लभत्वोक्तिः ॥ ४ ॥ इन्द्रेण पुनर्ब्राह्मण्यप्राप्तये तपस्यते मतङ्गाय ब्राह्मण्यस्य दुष्प्रापत्वकथनपूर्वकमितराभीष्टवरदानम् ॥ ५ ॥

युधिष्ठिरः—

प्रज्ञाश्रुताभ्यां वृत्तेन शीलेन च यथा भवान् ।
गुणैस्समुदितस्सर्वैर् वयसा च समन्वितः ॥ १

सर्वेषां चैव जन्तूनां सतामेतन्न संशयः ॥ १॥

तस्माद्भवन्तं पृच्छामि धर्मं धर्मभृतां वर ॥ २
क्षत्रियो यदि वा वैश्यश् शूद्रो वा राजसत्तम ।
ब्राह्मण्यं प्राप्नुयात् केन तन्मे ब्रूहि पितामह ॥ ३

तपसा वा सुमहता कर्मणा वा श्रुतेन वा ।
ब्राह्मण्यमथ चेदिच्छेत् कथं शक्यं पितामह ॥ ४

भीष्मः—

ब्राह्मण्यमतिदुष्प्रापं वर्णैः क्षत्रादिभिस्त्रिभिः ।
परं हि सर्वभूतानां स्थानमेतद्युधिष्ठिर ॥ ५

बह्वीस्तु संसरन् योनीर् जायमानः पुनः पुनः ।
पर्याये नाम कस्मिंश्चिद् ब्राह्मणो नाम जायते ॥ ६

अत्राप्युदाहरन्तीमम् इतिहासं पुरातनम् ।
मतङ्गस्य च संवादं गर्दभ्याश्च युधिष्ठिर ॥ ७

द्विजातेः कस्यचित् पार्थ तुल्यवर्णः पुनस्सुतः ।
पुरा मतङ्गो नाम्नाऽऽसीत् सर्वैस्समुदितो गुणैः ॥ ८

स यज्ञकारणात् पार्थ पित्रा सृष्टश्शुभाननः ।
त्वरया तं खरैर्युक्तम् आस्थाय रथमाव्रजत् ॥ ९

स बालं गर्दभी पुत्रं [1]वहन्तं मातुरन्तिके ।
निरविध्यत् प्रतोदेन नासिकायां पुनः पुनः ॥ १०

तं दृश्य नासिनिर्भिन्नं [2]गर्दभं पुत्रगृद्धिनी ।
उवाच मा शुचः पुत्र चण्डालस्त्वाऽभिविध्यति ॥ ११

ब्राह्मणो दारुणो नास्ति मैत्रो ब्राह्मण उच्यते ।
आचार्यस्सर्वभूतानां शास्ता किं प्रहरिष्यति ॥ १२

अयं च पापप्रकृतिर् बाले न कुरुते दयाम् ।
स्वां योनिं मानयंस्त्वेतां भावं भावोऽधिगच्छति ॥ १३

एतच्छ्रुत्वा मतङ्गस्तु करुणं रासभीवचः ।

---

1. क-ख—वसन्तम्
2. क-घ—गर्दभो

अवतीर्य रथात् तूर्णं तामिदं प्रत्यभाषत ॥ १४

मतङ्गः—

ब्रूहि रासभि तत्त्वेन जननी येन दूषिता ।
केन मां वेत्थ चण्डालं ब्राह्मण्यं केन मेऽनशत् ॥ १५

तत्त्वेन मे महाप्राज्ञे ब्रूहि सर्वमशेषतः ॥ १५॥

रासभी—

ब्राह्मण्यां वृषलेन त्वं मत्तायां नापितेन वै ।
जातस्ततोऽसि चण्डालो ब्राह्मण्यं तेन तेऽनशत् ॥ १६॥

भीष्मः—

एवमुक्तो मतङ्गस्तु प्रत्युपायाद्गृहं पुनः ।
तमागतमभिप्रेक्ष्य पिता पुत्रमथाब्रवीत् ॥ १७॥

यस्त्वं यज्ञार्थसंसिद्धौ नियुक्तो गुरुकर्मणि ।
कस्मात् प्रतिनिवृत्तोऽसि कच्चिन्न कुशलं तव ॥ १८॥

मतङ्गः—

अयोनिरहियोनिर्वा यस्स्यात् स कुशली भवेत् ।
कुशलं तु कुतस्तस्य यस्येयं जननी भवेत् ॥ १९॥

ब्राह्मण्यां वृषलाज्जातं [1]खरी वेदयते हि माम् ।
अमानुषी गर्दभीयं तपस्तप्स्ये महावने ॥ २०॥

---

1. क-घ—सञ्चिवे

भीष्मः—

[1]एवमुक्त्वा स पितरं प्रतस्थे कृतनिश्चयः ।
ततो गत्वा महारण्यम् अतप्यत महत्तपः ॥ २१॥

ततस्सन्तापयामास विबुधांस्तपसाऽन्वितः ।
मतङ्गस्सुसुखं प्रेप्सुस् स्थानं सुचरितादथ ॥ २२॥

तं तथा तपसा युक्तम् उवाच हरिवाहनः ॥ २३

इन्द्रः—

मतङ्ग तप्यसे किं त्वं भोगानुत्सृज्य मानुषान् ॥ २३॥

वरं ददामि ते हन्त वृणीष्व त्वं यदिच्छसि ।
यदवाप्यं च यत् किञ्चित् सर्वमेव वृणीष्व तत् ॥ २४॥

मतङ्गः—

ब्राह्मण्यं कामयानोऽहम् इदमारब्धवांस्तपः ।
गच्छेयं तदवाप्यैतद् वर एष वृतो मया ॥ २५॥

भीष्मः—

एतच्छ्रुत्वा तु वचनं तमुवाच पुरन्दरः ॥ २६

इन्द्रः—

ब्राह्मण्यं प्रार्थयानस्त्वम् अप्राप्य विनशिष्यसि ॥ २६॥

श्रेष्ठं यत् सर्वभूतेषु तपो यदतिवर्तते ।
तदुक्तं प्रार्थयानस्त्वं मतङ्ग विनशिष्यसि ॥ २७॥

1. ख—अर्धद्वयं नास्ति

देवतासुरमर्त्यानां वरं विश्वस्य यत् सुखम् ।
चण्डालयोनौ जातेन न तत् प्राप्यं कथञ्चन* ॥ २८॥

भीष्मः—

एवमुक्तो मतङ्गस्तु संशितात्मा महाव्रतः ।
[1]अतिष्ठदेकपादेन शतं वै परिवत्सरान् ॥ २९॥

तमुवाच सहस्राक्षः पुनरेव महायशाः ॥ ३०

इन्द्रः—

मतङ्ग परमं स्थानं प्रार्थयानो महाव्रत ।
मा कृथास्साहसं तात नैष धर्मपथस्तव ॥ ३१

विमार्गतो मार्गमाणस् सर्वथा न भविष्यसि ।
[2]मतङ्ग परमं स्थानं वार्यमाणो मयाऽसकृत् ॥ ३२

चिकीर्षस्येव तपसा सर्वथा न भविष्यसि ॥ ३२॥

तिर्यग्योनिगतस्सर्वो मानुष्यं यदि गच्छति ।
अजाविकश्वपाको वा चण्डालो वा कदाचन ॥ ३३॥

[3]मल्लकः पुल्कसो वाऽपि ये चान्ये हीनजातिषु ।
तस्यामधमयोनौ स्म सततं परिवर्तते ॥ ३४॥

ततो दशगुणे काले लभते शूद्रतामपि ॥ ३५

---

* सर्वेषु कोशेषु अत्रैवाध्यायसमाप्तिर्दृश्यते
1. अ-क—अर्धत्रयं नास्ति
2. ख—इदमर्धद्वयं नास्ति
3. क-घ—मल्लुकः

शूद्रतायाश्चिरं कालं तत्रैव परिवर्तते ॥ ३५॥

[1-2]ततश्च त्रिशते काले लभते वैश्यतामपि ।
वैश्यकश्च चिरं कालं तत्रैव परिवर्तते ॥ ३६॥

ततष्षष्टिगुणे काले राजन्यो नाम जायते ।
राजन्ये तु चिरं कालं तत्रैव परिवर्तते ॥ ३७॥

ततस्त्रिंशद्गुणे काले लभते ब्रह्मबन्धुताम् ।
[3]ब्रह्मबन्धुश्चिरं कालं तत्रैव परिवर्तते ॥ ३८॥

ततश्च द्विगुणे काले लभते काण्डपृष्ठताम् ।
काण्डपृष्ठश्चिरं कालं तत्रैव परिवर्तते ॥ ३९॥

[4]ततश्च त्रिशते काले लभते द्विजतामपि ।
द्विजतायां चिरं कालं तत्रैव परिवर्तते ॥ ४०॥

ततश्चतुश्शते काले श्रोत्रियो नाम जायते ।
श्रोत्रियत्वे चिरं कालं तत्रैव परिवर्तते ॥ ४१॥

तदेनं क्रोधहर्षौ तु कामद्वेषौ तथैव च ।
विचिकित्साऽ[5]भिमानश्च ह्यपवादश्च विन्दति ॥ ४२॥

---

1. अ-क—इदमाद्यर्धंचतुष्टयं नास्ति
2. ख—ततस्त्रिंशद्गुणे काले घ—ततश्च त्रिगुणे काले
3. अ-क-घ—अर्धंत्रयं नास्ति
4. क-घ—इदमर्धं नास्ति
5. क-घ—तिमानश्च रतिमानश्च ख—तिवादश्च तन्द्री मानश्च

तांश्चेच्छत्रूञ्जयत्येव प्राप्नोति परमां गतिम् ।
अथ ते वै जयन्त्येनं तालं पक्वमिवापतेत् ॥ ४३॥

मतङ्ग सम्प्रधार्यैतद् यदहं त्वामचोदयम् ।
वृणीष्व काममन्यं वै नैतच्छक्यमिति त्वया ॥* ४४॥

भीष्मः—

एवमुक्तो मतङ्गस्तु दुःखशोकपरायणः ।
अतिष्ठत [1]गयां गत्वा सोऽङ्गुष्ठेन शतं समाः ॥ ४५॥

सुदुष्करं वहन् योगं कृशो धमनिसन्ततः ।
त्वगस्थिभूतो धर्मात्मा स ततापेति नश्श्रुतम् ॥ ४६॥

तं तपन्तमभिद्रुत्य पाणिं जग्राह वासवः ।
वराणामीश्वरो दाता सर्वभूतहिते रतः ॥ ४७॥

इन्द्रः—

मतङ्ग ब्राह्मणत्वं तैस् संवृतं परिपन्थिभिः ।
पूजयन् सुखमाप्नोति दुःखमाप्नोत्यपूजयन् ॥ ४८॥

ब्राह्मणे सर्वभूतानां योगक्षेमस्समाहितः ॥ ४९

ब्राह्मणा ननु तृप्यन्ति पितरो देवतास्तथा ।
ब्राह्मणस्सर्वभूतानां मतङ्ग पर उच्यते ॥ ५०

ब्राह्मणः कुरुते तद्धि योऽसौ यद्यदिहेच्छति ॥ ५०॥

---

* सर्वेषु कोशेषु अत्रैवाध्यायसमाप्तिरिष्यते

1. क-ख—गवा स्नात्वा योगं गोष्ठे

बह्वीस्म संसरन् योनीर् जायमानः पुनः पुनः ।
पर्याये तात कस्मिंश्चिद् ब्राह्मण्यमिह विन्दति ॥ ५१॥

किं नु शोचसि दुःखार्त्वं मृतं किमनुशोचसि ।
तं न शोचसि यो लब्ध्वा ब्राह्मण्यमिह पातयेत् ॥ ५२॥

ब्राह्मण्यं यत्तु दुष्प्रापं त्रिभिर्वर्णैर्दुरासदम् ।
सुदुर्लभं च तन् प्राप्य नानुतिष्ठन्ति मानवाः ॥ ५३॥

ये पापेभ्यः पापतमास् तेषामधम एव सः ।
ब्राह्मण्यं योऽवजानीते धनं लब्ध्वा सुदुर्लभम् ॥ ५४॥

दुष्प्रापमिति ब्राह्मण्यं प्राप्तं तदनुपालनम् ।
दुरवापमवाप्यैतन्नानुतिष्ठन्ति ब्राह्मणाः ॥ ५५॥

मतङ्गः—

एकाराम एकरतिर् निर्द्वन्द्वोऽहं वने मुनिः ।
अहिंसादमदानस्थो नैव ब्राह्मणतां लभे ॥ ५६॥

परं वरं वृणे देव स मे सिध्येत वासव ।
यथा कामविहारी स्यां कामरूपी विहङ्गमः ॥ ५७॥

ब्रह्मक्षत्रानुरोधेन लभे पूजां मनीषिभिः ।
एवं ममाक्षया प्रीतिर् भवत्विह पुरन्दर ॥ ५८॥

इन्द्रः—

मतङ्ग गम्यतां शीघ्रम् एवमेतद्भविष्यति ॥ ५९

स्त्रियस्सर्वास्त्वया लोके यक्ष्यन्ते भूतिकर्मणि ।
एवं तवाक्षया कीर्तिर् भविष्यति तपोधन ॥ ६०

छन्ददेव इति ख्यातस् स्त्रीभिः पूज्यो भविष्यसि ॥ ६०॥

भीष्मः—

एतत् तस्मै वरं दत्त्वा वासवोऽन्तरधीयत ।
ब्रह्म त्यक्त्वा मतङ्गोऽपि प्राप तत्स्थानमुत्तमम् ॥ ६१॥

एवमेव परं स्थानं मर्त्यानां भरतर्षभ ।
ब्राह्मण्यं नाम दुष्प्रापम् इन्द्रेणोक्तं महात्मना ॥ ६२॥

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां
अनुशासनपर्वणि तृतीयोऽध्यायः ॥ ३ ॥
॥ ८९ ॥ आनुशासनिकपर्वणि तृतीयोऽध्यायः ॥ ३ ॥
[अस्मिन्नध्याये ६२॥ श्लोकाः]

॥ चतुर्थोऽध्याय ३८

युधिष्ठिरेण भीष्मं प्रति सविस्तरं विश्व रेखानुवादपूर्वकं तस्य ब्राह्मण्यप्राप्तिहेतुप्रश्नः ॥ १ ॥ भीष्मेण युधिष्ठि विश्वामित्रस्योत्पत्तिप्र- कारकथनेनैव ब्राह्मण्यप्राप्तिप्रकारकथनम् ॥ २ ॥

युधिष्ठिरः—

ब्राह्मण्यं यदि दुष्प्राप्यं त्रिभिर्वर्णैर्नराधिप ।
कथं प्राप्तं महाराज क्षत्रियेण महात्मना ॥ १

विश्वामित्रेण धर्मात्मन् ब्राह्मणत्वं नरर्षभ ॥ १॥

श्रोतुमिच्छामि तत्त्वेन तन्मे ब्रूहि पितामह ॥ २

तेन ह्यमितवीर्येण वसिष्ठस्य महात्मनः ।
हतं पुत्रशतं सद्यस् तपसा च पितामह ॥ ३

यातुधानाश्च बहवो राक्षसास्तिग्मतेजसः ।
मन्युनाऽऽविष्टदेहेन सृष्टाः कालान्तकोपमाः ॥ ४

महान् कुशिकवंशश्च ब्रह्मर्षिशतसङ्कुलः ।
स्थापितो नरलोकेऽस्मिन् विद्वद्ब्राह्मणसंस्तुतः ॥ ५

ऋचीकस्यात्मजश्चैव शुनश्शेफो महातपाः ।
विमोक्षितो महासत्रात् पशुतामप्युपागतः ॥ ६

हरिश्चन्द्रः क्रतौ देवांस् तोषयित्वाऽऽत्मतेजसा ।

पुत्रतामनुसम्प्राप्तो विश्वामित्रस्य धीमतः ॥ ७

नाभिवादयते ज्येष्ठं देवरातो नराधिप ।
पुत्राः पञ्चशतं चापि शप्ताश्श्वपचतां गताः ॥ ८

त्रिशङ्कुर्बन्धुसन्त्यक्त ऐक्ष्वाकः प्रीतिपूर्वकम् ।
अवाक्शिरा दिवं नीतो दक्षिणामाश्रितो दिशम् ॥ ९

विश्वामित्रस्य भगिनी नदी राजर्षिसेविता ।
[1]कौशिकीति कृता पुण्या ब्रह्मर्षिगणसेविता ॥ १०

तपोविघ्नकरी चैव पञ्चचूडा सुसम्मता ।
रम्भा नामाप्सराश्शापाद् अस्य शैलत्वमागता ॥ ११

तथैवास्य भयाद्भद्रा वसिष्ठस्सलिले पुरा ।
आत्मानं मज्जयामास विपाशः पुनरुत्थितः ॥ १२

तदाप्रभृति पुण्या सा विपाशा वै महानदी ।
विख्याता कर्मणा तेन वसिष्ठस्य महात्मनः ॥ १३

वश्यश्च भगवान् येन देवसेनाग्रगः प्रभुः ।
स्तुतः प्रीतमनाश्चासीत् पश्चाच्चैनममोचयत् ॥ १४

ध्रुवस्यौत्तानपादस्य ब्रह्मर्षीणां तथैव च ।
मध्ये ज्वलति यो नित्यम् उदीचीमाश्रितो दिशम् ॥ १५

तस्यैतानि च कर्माणि तथाऽन्यानि च कौरव ।

---

1. अ—नास्तीदमर्धम्

क्षत्रियस्येत्यतो जातान्यातिकौहेतूलं हि मे ॥ १६

किमेतदिति तत्त्वेन प्रब्रूहि भरतर्षभ ।
देहान्तरमनासाद्य कथं स ब्राह्मणोऽभवत् ॥ १७

एतत् तत्त्वेन मे राजन् सर्वमाख्यातुमर्हसि ।
मतङ्गस्य यथा तत्त्वं तथैवैतद्ब्रवीहि मे ॥ १८

स्थाने मतङ्गो ब्राह्मण्यं नालभद्भरतर्षभ ।
चण्डालयोनौ जातस्य कथं ब्राह्मण्यमुच्यते ॥ १९

भीष्मः—

श्रूयतां पार्थ तत्त्वेन विश्वामित्रो यथा पुरा ।
ब्राह्मणत्वं गतस्तात राजर्षित्वं तथैव च ॥ २०

भरतस्यान्ववाये वै मिथिलो नाम पार्थिवः ।
बभूव भरतश्रेष्ठ सत्यधर्मभृतां वरः ॥ २१

तस्य पुत्रो महानासीज् जह्नुर्नाम जनेश्वरः ।
दुहितृत्वमनुप्राप्ता गङ्गा यस्य महात्मनः ॥ २२

तस्यात्मजस्तुल्यगुणस् सिन्धुद्वीपो महायशाः ।
सिन्धुद्वीपाच्च राजर्षिर् बलाकाश्वो महाबलः ॥ २३

[1]पल्वलस्तस्य तु सुतस् साक्षाद्धर्म इवापरः ।

---

* सर्वेषु कोशेषु अत्रैवाध्यायसमाप्तिर्दृश्यते

1 क-घ—पल्लवस्तस्य तनयः ख—पर्वतस्तस्य तनयः

कुशिकस्तस्य तनयस् सहस्राक्षसमद्युतिः ॥ २४

कुशिकस्यात्मजश्श्रीमान् गाधिर्नाम जनेश्वरः ।
अपुत्रस्स महाबाहुर् वनवासमुपागमत् ॥ २५

कन्या जज्ञे सुता तस्य वने निवसतस्ततः ।
नाम्ना सत्यवती नाम रूपेणाप्रतिमा भुवि ॥ २६

तां वव्रे भार्गवश्श्रीमांश् च्यवनस्यात्मजः प्रभुः ।
ऋचीक इति विख्यातो विपुले तपसि स्थितः ॥ २७

स तां न प्रददौ तस्मै ऋचीकाय महात्मने ।
दरिद्र इति मन्वानो गाधिश्शत्रुनिबर्हणः ॥ २८

प्रत्याख्याय तु तं यान्तम् अब्रवीद्राजसत्तमः ।
शुल्कं प्रदीयतां ब्रह्मन् ततो वेत्स्यसि मे सुताम् ॥ २९

ऋचीकः—
किं प्रयच्छामि राजेन्द्र तुभ्यं शुल्कमिदं नृप ।
दुहितुर्ब्रह्मसंसक्तो मा तेऽन्या भूद्विचारणा ॥ ३०

गाधिः—
चन्द्ररश्मिप्रकाशानां हयानां वातरंहसाम् ।
एकतश्श्यामकर्णानां सहस्रं दिश भार्गव* ॥ ३१

भीष्मः—
ततस्स भृगुशार्दूलश् च्यवनस्यात्मजः प्रभुः ।

* सर्वेषु कोशेषु अत्रैवाध्यायसमाप्तिर्दृश्यते

वरुणं चाब्रवीद्देवम् आदित्यं पतिमम्भसाम् ॥ ३२

ऋचीकः—

[1]एकतश्श्यामकर्णानाम् अश्वानां वातरंहसाम् ।
सहस्रमिन्दुवर्णानां भिक्षे त्वां देवसत्तम ॥ ३३

भीष्मः—

तथेति वरुणो देव आदित्यो भृगुसत्तमम् ।
उवाच यत्र ते च्छन्दस् तत्रोत्थास्यन्ति वाजिनः ॥ ३४

ध्यातमात्रे त्वृचीकेन हयानां चन्द्रवर्चसाम् ।
गङ्गाजलादुदतिष्ठत् सहस्रं विपुलौजसाम् ॥ ३५

अदूरे कान्यकुब्जस्य गङ्गायास्तीर उत्तरे ।
अश्वतीर्थं तदद्यापि मानवाः परिचक्षते ॥ ३६

तत् तथा गाधये तात सहस्रं वाजिनां शुभम् ।
ऋचीकः प्रददौ प्रीतश् शुल्कार्थं वदतां वर ॥ ३७

ततस्स विस्मितो राजा गाधिश्शापभयेन च ।
ददौ तां समलङ्कृत्य कन्यां भृगुसुताय ह ॥ ३८

जग्राह पाणिं विधिना तस्या ब्रह्मर्षिसत्तमः ।
सा चैनं वरमासाद्य परं हर्षमवाप ह ॥ ३९

तुतोष विप्रर्षिस्तस्यास् सुवृत्तेन च भारत ।
छन्दयामास चैवैनां वरेण वरवर्णिनीम् ॥ ४०

---

1. क—इदमर्धं नास्ति

मात्रे तत् सर्वमाचख्यौ सा कन्या राजसत्तम ।
अथ तामब्रवीन्माता सुतां किञ्चिदवाङ्मुखीम् ॥ ४१

गाधिपत्नी—

ममापि पुत्रि भर्ता ते प्रसादं कर्तुमर्हति ।
अपत्यस्य प्रदानेन समर्थस्स महातपाः ॥ ४२

भीष्मः—

ततस्सा त्वरितं गत्वा तत् सर्वं प्रत्यवेदयत् ।
मातुश्चिकीर्षितं राजन् ऋचीकस्तामथाब्रवीत् ॥ ४३

ऋचीकः—

गुणवन्तमपत्यं वै त्वं च साऽथ जनिष्यथः ।
जनन्यास्तव कल्याणि मा भूद्वै प्रणयोऽन्यथा ॥ ४४

तथैव च गुणश्लाघी पुत्र उत्पत्स्यते शुभे ।
अस्मद्वंशकरश्श्रीमांस् तव भ्राता च वंशकृत् ॥ ४५

ऋतुस्नाता च साऽश्वत्थं त्वं च वृक्षमुदुम्बरम् ।
परिष्वजेथां कल्याणि तत इष्टमवाप्स्यथः ॥ ४६

चरुद्वयमिदं चैव मन्त्रयुक्तं शुचिस्मिते ।
त्वं च सा चोपयुञ्जाथां ततः पुत्राववाप्स्यथः ॥ ४७

भीष्मः—

ततस्सत्यवती दृष्ट्वा मातरं प्रत्यभाषत ।
यदृचीकेन कथितं तद्व्याचख्यौ चरुद्वयम् ॥ ४८

तामुवाच ततो माता सुतां सत्यवतीं तदा ॥ ४८॥

सत्यवतीमाता—

पुत्रि मूर्ध्नि प्रपन्नायाः कुरुष्व वचनं मम ॥ ४९

भर्त्रा य एष दत्तस्ते चरुर्मन्त्रपुरस्कृतः ।
एतं प्रयच्छ मह्यं त्वं मदीयं त्वं गृहाण च ॥ ५०

वृक्षयोरपि व्यत्यासं कुर्याश्च वरवर्णिनि ।
यदि प्रमाणं वचनं मम मातुरनिन्दिते ॥ ५१

व्यक्तं भगवतश्चात्र कृतमेव भविष्यति ॥ ५१॥

ततो मे त्वच्चरौ भावः पादपे च सुमध्यमे ।
कथं विशिष्टो भ्राता ते भवेदित्येव मा चिरम् ॥ ५२॥

भीष्मः—

तथा च कृतवत्यौ ते माता सत्यवती च सा ।
पृथग् गर्भमनुप्राप्ते [1]तत एव युधिष्ठिर ॥ ५३॥

दृष्ट्वा गर्भमनुप्राप्तां भार्यां स भगवानृषिः ।
उवाच तां सत्यवतीं दुर्मना भृगुसत्तमः ॥ ५४॥

ऋचीकः—

व्यत्यासेनोपयुक्तस्ते चरुर्व्यक्तं भविष्यति ।
पादपे चापि व्यत्यासस् सुव्यक्तं ते कृतश्शुभे ॥ ५५॥

1. अ—अयं पादोऽनन्तरश्च न स्तः

मया च विश्वं यद्ब्रह्म त्वच्चरौ विनिवेशितम् ।
क्षत्रवीर्यं च सकलं चरौ तस्या निवेशितम् ॥ ५६॥

त्रिलोकविख्यातगुणं त्वं विप्रं जनयेरिति ।
सा च क्षत्रं विशिष्टं वै तत एतत् कृतं मया ॥ ५७॥

व्यत्यासस्स कृतो यस्मात् त्वया मात्रा तथैव च ।
तस्मात् सा ब्राह्मणं श्रेष्ठं माता ते जनयिष्यति ॥ ५८॥

क्षत्रियं तूग्रकर्माणं भद्रे त्वं जनयिष्यसि ।
न हि मे तत्कृतं साधु मातृस्नेहेन भामिनि ॥ ५९॥

भीष्मः—

सा श्रुत्वा शोकसन्तप्ता पपात वरवर्णिनी ।
भूमौ भगवती राजंश् छिन्नमूला यथा लता ॥ ६०॥

प्रतिलभ्य ततस्संज्ञां शिरसा प्रणिपत्य च ।
उवाच भार्या भर्तारं गाधेयी ब्राह्मणर्षभम् ॥ ६१॥

ऋचीकपत्नी—

प्रसादयन्त्यां भार्यायां मयि ब्रह्मविदां वर ।
प्रसादं कुरु विप्रर्षे न मे स्यात् क्षत्रियस्सुतः ॥ ६२॥

कामं ममोग्रकर्मा वै पौत्रो भवितुमर्हति ।
न मे स स्यात् सुतो ब्रह्मन्नेष मे दीयतां वरः ॥ ६३॥

भीष्मः—

एवमस्त्विति होवाच स्वां भार्यां सुमहातपाः ।

ततस्सा जनयामास जमदग्निं सुतं शुभम् ॥ ६४॥

विश्वामित्रं त्वजनयद्राधेर्भार्या यशस्विनी ।
ऋषिप्रभावाद्राजेन्द्र ब्रह्मर्षिं ब्रह्मवादिनम् ॥ ६५॥

ततो ब्राह्मणतां यातो विश्वामित्रो महातपाः ।
क्षत्रियस्सन्नपि तथा ब्रह्मवंशस्य कारकः ॥ ६६॥

तस्य पुत्रा महात्मानो ब्रह्मवंशविवर्धनाः ।
तपस्विनो ब्रह्मविदो गोत्रकर्तार एव च ॥ ६७॥

मधुच्छन्दश्च भगवान् देवरातश्च वीर्यवान् ।
[1]कुक्षिरत्रिश्शकुन्तश्च बभ्रुः कालपथस्तथा ॥ ६८॥

याज्ञवल्क्यश्च विख्यातस् तथा स्थूणः परावतः ।
उलूकोऽ[2]थ मधूकश्च तथाऽक्षस्सैन्धवा[3]ननः ॥ ६९॥

पर्णजङ्घश्च भगवान् गावलश्च महानृषिः ।
ऋषिर्वत्रस्तथा सालस् सालङ्कायन एव च ॥ ७०॥

ललाटो नारदश्चैव तथा कूर्ममुखस्स्मृतः ।
ऊर्ध्वलिर्मुसलश्चैव रक्षोग्रीवस्तथैव च ॥ ७१॥

अङ्गिवानेकशृत्यश्च शिलायूपस्सितश्शुचिः ।

---

1. क—त्रिशङ्कुश्शङ्कुरत्रिश्च घ—निशङ्कुः-कुक्षिरिति शकुन्तिश्च वधस्तथा
2. ख—यमलूकश्च अ—धर्मलूकश्च
3. क-घ— नयः—

[1]चक्रतो मानमन्तव्यो वातव्यश्चेतवाहनः ॥ ७२॥

श्यामायनाऽथ गार्ग्यश्च जाबालिस्सुश्रुतस्तथा ।
कार्षीरथश्च संश्रुत्यो गुरवो वरदस्तथा ॥ ७३॥

महानृषिश्च कपिलस् तथर्षिस्तारकायणः ।
तथैव रोपगहनस् तथर्षिश्चार्जुनो [2]मयः ॥ ७४॥

मार्गमन्त्री हिरण्याक्षो जङ्घारिर्बभ्रुवाहनः ।
[3]भूतिर्विभूतिस्सूतिश्च सुरङ्गश्च तथैव च ॥ ७५॥

आराधिर्नामयश्चैव चण्डयोर्जुनयोस्तथा ।
उपामन्तुर्मङ्गशिखी शिवो निर्जतिरेव च ॥ ७६॥

गोरुण्ड[4]श्चातिमत्स्यश्च [5]शिथिहोताऽथ गार्दभिः ।
[6]मज्जयोनिरजापेक्षी नारदस्तु महानृषिः ॥ ७७॥

विश्वामित्रात्मजास्सर्वे ऋषयो ब्रह्मवादिनः ॥ ७८

स नैव क्षत्रियो राजन् विश्वामित्रो महातपाः ।

---

1. क—वामवन्तव्या वातत्तुः ख—चक्रलोमा तु वन्तव्यो यातव्य
घ—चक्रतो मावमन्तव्य बातत्यश्चेतवाहनः ।
2. ख—यमः
3. क—स्तुतिर्विभूतिस्सूतिश्च ख-सूतिर्विभूतिस्सूतिश्च सुरागश्च
घ—स्तितिर्विभूतिस्सूतिश्च सुरांश्चैव
4. क-घ—श्चारुम घ-भेरुण्डश्चारुमद्रश्च
5. क—कथहो अथ ख-शिखधीबोध घ-शिक्थहो अथ
6. क—ऊर्जै ख-घ—उज्ज

ऋचीकेनाहितं ब्रह्म परमेतद्युधिष्ठिर ॥ ७९

एतत्ते सर्वमाख्यातं तत्त्वेन भरतर्षभ ।
विश्वामित्रस्य वै राजन् सोमसूर्याग्नितेजसः ॥ ८०

यत्र यत्र च सन्देहो भूयस्ते राजसत्तम ।
तत्र तत्र च मां ब्रूहि वक्तास्मि तव संशयान् ॥ ८१

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां
अनुशासनपर्वणि चतुर्थोऽध्यायः ॥ ४ ॥
॥ ८९ ॥ आनुशासनिकपर्वणि चतुर्थोऽध्यायः ॥ ४ ॥
[अस्मिन्नध्याये ८१ श्लोकाः]

॥ पञ्चमोऽध्यायः ॥

भीष्मेण युधिष्ठिरं प्रति वीतहव्यस्य ब्राह्मण्यप्राप्तिप्रकारकथनम् ॥

युधिष्ठिरः—

विश्वामित्रो महाराज राजा ब्राह्मणतां गतः ।
कथितं भवता सर्वं विस्तरेण पितामह ॥ १

तच्च राजन् मया सर्वं श्रुतं बुद्धिमतां वर ।
आगमो हि परोऽस्माकं त्वत्तः कौरवनन्दन ॥ २

वीतहव्यस्तु राजर्षिर् विश्रुतो वै पितामह ।

ब्राह्मणत्वमनुप्राप्त इति राजन् महायशाः ॥ ३
स केन कर्मणा प्राप ब्राह्मण्यं राजसत्तमः ।
वरेण तपसा वाऽपि तन्मे ब्रूहि पितामह ॥ ४

भीष्मः—

शृणु राजन् यथा राजा वीतहव्यो महायशाः ।
क्षत्रियस्स पुनः प्राप ब्राह्मण्यं लोकसत्कृतम् ॥ ५
मनोर्महात्मनस्तात प्रजेशस्य प्रजापतेः ।
बभूव पुत्रो धर्मात्मा [1]यशसाऽतीव विश्रुतः ॥ ६
तस्यान्ववायजौ राजन् राजानौ धर्मदर्शिनौ ।
हैहयस्तालजङ्घश्च वत्सेषु नृपती पुरा ॥ ७
हैहयस्य तु पुत्राणां दशसु स्त्रीषु भारत ।
शतं बभूव प्रख्यातं वीराणामनिवर्तिनाम् ॥ ८
तुल्यरूपप्रभावानां विदुषां युद्धशालिनाम् ।
महारथानां वेदे च धनुर्वेदे च योगिनाम् ॥ ९
काशिष्वथ तदा राजा दिवोदासपितामहः ।
हर्यश्व इति विख्यातो राजराज इवापरः ॥ १०
स वीतहव्यस्य सुतैरागत्वा पार्थिवर्षभः ।
युद्धे विनिर्जितो राजन् गङ्गायमुनयोरनु ॥ ११

1 ख—शय्यातिरिति

तं च हत्वा नरवरं हैहयास्ते महारथाः ।
प्रतिजग्मुः पुरीं रम्यां वत्सानामकुतोभयाः ॥ १२
हर्यश्वस्य च दायादः काशिराज्येऽभिषेचितः ।
सुदेवो देवसङ्काशस् साक्षाद्धर्म इवापरः ॥ १३
स पालयन्नेव महीं धर्मात्मा काशिनन्दनः ।
स वीतहव्यैरागत्य युधि सर्वैर्विनिर्जितः ॥ १४
तमप्याजौ विनिर्जित्य प्रतियाता यथागतम् ॥ १४॥
सौदेविस्त्वथ काशीशो दिवोदासोऽभ्यषिच्यत ॥ १५
सौदेविस्त्वथ विज्ञाय वीर्यं तेषां महात्मनाम् ।
वाराणसीमुपादाय दिवोदासो विनिर्ममे ॥ १६
विप्रक्षत्रियसम्बाधां वैश्यशूद्रसमाकुलाम् ।
नैकद्रव्योच्चयवतीं समृद्धविपणापणाम् ॥ १७
गङ्गाया उत्तरे कूले वप्रान्ते राजसत्तम ।
गोमत्या दक्षिणे चैव रम्यां देवपुरीमिव ॥ १८
तत्र तं राजशार्दूलं निवसन्तं महाद्युतिम् ।
आगत्य हैहया भूयः प्रबाधन्ते पुनः पुनः ॥ १९
सन्निपात्य ददौ युद्धं तेषां राजा महाबलः ।
देवासुरसमं भीमं दिवोदासो महायशाः ॥ २०
स तु युद्ध्वा महाराजो दिनानां दशतीर्दश ।

हतवाहनभूयिष्ठो राजा दैन्यमुपागमत् ॥ २१

हतयोधस्स राजर्षिः क्षीणकोशश्च भारत ।
दिवोदासः पुरीं हित्वा पलायनपरोऽभवत् ॥ २२

स चाश्रममुपागम्य भरद्वाजस्य धीमतः ।
प्रपद्य चरणौ तस्य मूर्ध्ना च निपपात ह ॥ २३

उवाच भगवन्तं तं पुत्रमाद्यं बृहस्पतेः ॥ २३॥

दिवोदासः—

भगवन् वैतहव्यैर्मे युद्धे वंशः प्रणाशितः ।
अहमेकः परिद्यूनश् शरणं त्वामुपागतः ॥ २४॥

शिष्यस्नेहेन भगवंस् त्वं मां रक्षितुमर्हसि ।
निश्शेषो हि कृतो वंशो मम तैः पापकर्मभिः ॥ २५॥

भीष्मः—

तमुवाच महातेजा भरद्वाजः प्रतापवान् ।
पुरोधास्तस्य राजेन्द्रः दिवोदासस्य धीमतः ॥ २६॥

भरद्वाजः—

न भेतव्यं न भेतव्यं सौदेव व्येतु ते भयम् ॥ २७

अहमिष्टिं च ते राजन् करोमि सुतकारिकाम् ।
वैतहव्यसहस्राणि यया त्वं प्रहरिष्यसे ॥ २८

भीष्मः—

तत इष्टिं चकारर्षिस् तस्य वै पुत्रकारिकाम् ।
अथास्य तनयो जज्ञे दैवोदासिः प्रतर्दनः ॥ २९

स जातमात्रो ववृधे समास्सद्यस्त्रयोदश ।
वेदं चाध्यगमत् कृत्स्नं धनुर्वेदं च कृत्स्नशः ॥ ३०

योगेन तु समाविष्टो भरद्वाजेन धीमता ।
कृत्स्नं हि तेजो यल्लोके तदेतद्देहमाविशत् ॥ ३१

ततस्स कवची धन्वी बाणी दीप्त इवानलः ।
प्रययौ स धनुर्धुन्वन् विवर्षिपुरिवाम्बुदः ॥ ३२

तं दृष्ट्वा परमं हर्षं सौदेविरुपपद्यते ।
मेने च मनसा दग्धान् वैतहव्यान् स पार्थिवः ॥ ३३

ततो वै यौवराज्येन स्थापयित्वा प्रतर्दनम् ।
कृतकृत्यं तदाऽऽत्मानम् स राजा प्रत्यपद्यत ॥ ३४

ततश्च वैतहव्यानां वधाय स महीपतिः ।
पुत्रं प्रस्थापयामास प्रतर्दनमरिन्दमम् ॥ ३५

सरथस्स समुत्तीर्य गङ्गां गङ्गासमानधीः ।
प्रययौ वीतहव्यानां पुरीं परपुरञ्जयः ॥ ३६

वैतहव्यास्तु तं श्रुत्वा रथघोषं समास्थितम् ।
निर्ययुर्नगराच्छीघ्रं रथैस्तैर्नगरोपमैः ॥ ३७

निष्क्रम्य ते नरव्याघ्रा दंशिताश्चित्रयोधिनः ।
प्रतर्दनं समाजघ्नुश् शरवर्षैरुदायुधाः ॥ ३८

अस्त्रैश्च विविधैर्वीराश् शस्त्रैश्च भरतर्षभ ।
प्रावर्षन् वैतहव्यास्ते शीघ्रं शैलमिवाम्बुदाः ॥ ३९

अस्त्रैरस्त्राणि संवार्य तेषां राजन् प्रतर्दनः ।
जघान तान् महातेजा वज्रवेगसमैश्शरैः ॥ ४०

हृतोत्तमाङ्गास्ते राजन् भल्लैश्शतसहस्रशः ।
पतिता रुधिरार्द्रास्तु निकृत्ता इव किंशुकाः ॥ ४१

हतेषु तेषु सर्वेषु वीतहव्यस्सुतेष्वथ ।
प्राद्रवन्नगरीं हित्वा भृगोराश्रममभ्युत ॥ ४२

ययौ भृगुं स शरणं वीतहव्यो नराधिपः ।
अभयं च ददौ तस्मै वीतहव्याय भार्गवः ॥ ४३

आसनं शिष्यमध्ये च भृगुरन्यत् समादिशत ॥ ४३॥

अथानुपदमेवाशु तत्रागच्छत् प्रतर्दनः ।
आश्रमं सोऽथ सम्प्राप्य दैवोदासिरभाषत ॥ ४४॥

प्रतर्दनः—

भो भो केऽत्राश्रमे सन्ति भृगोश्शिष्या महात्मनः ॥ ४५

भीष्मः—

तमभ्यनन्दद्भगवान् सत्कारेण स्वयं भृगुः ।
उवाच चैनं भगवान् किं कार्यमिति सत्कृतम् ॥ ४६

तमुवाच ततो राजा दैवोदासिः प्रतर्दनः ॥ ४६॥

प्रतर्दनः—

एषोऽत्र क्षत्रियो ब्रह्मन् वीतहव्यो विसृज्यताम् ।
अस्य पुत्रैर्महान् वंशः कृत्स्नोऽस्माकं प्रणाशितः ॥ ४७॥
उत्सादितश्च विषयः काशीनां राज्यसंहितः ॥ ४८
एतस्य बलदृप्तस्य हतं पुत्रशतं मया ।
अस्येदानीं वधाद्ब्रह्मन् भविष्याम्यनृणः पितुः ॥ ४९

भीष्मः—

तमुवाच कृपाविष्टो भृगुर्धर्मभृतां वरः ॥ ४९॥

भृगुः—

नेहास्ति क्षत्रियः कश्चित् सर्वे हीमे द्विजोत्तमाः ॥ ५०

भीष्मः—

एवमेतद्वचश्श्रुत्वा भृगोस्तस्य प्रतर्दनः ।
पादावुपस्पृश्य शनैः प्रहसन् सोऽब्रवीद्वचः ॥ ५१

प्रतर्दनः—

एवमप्यस्मि भगवन् कृतकृत्यो न संशयः ।
यदेष क्षत्रियो वीर्यात् स्वजातेस्त्याजितो मया ॥ ५२
ऋषेर्हि वचनं सत्यं सर्वं स्म ब्राह्मणा इति ।
अनुजानीहि मां ब्रह्मन् ध्यायस्व च शिवेन माम् ॥ ५३
त्याजितो हि मया जाते राजैष भृगुसत्तम ॥ ५३॥

भीष्मः—

भृगुणा सोऽभ्यनुज्ञातो ययौ राजा प्रतर्दनः ।
[1]यथागतं गतिं कान्तां दैवोदासिः प्रतापवान् ॥ ५४॥
भृगोर्वचनमात्रेण सोऽपि ब्राह्मणतां गतः ।
वीतहव्यो महाराज ब्रह्मवादित्वमेव च ॥ ५५॥
तस्य गृत्समदः पुत्रो वीतहव्य इवापरः ।
शक्रस्त्वमिति यो दैत्यैर् गृहीतः किल पूर्वजैः ॥ ५६॥
ऋग्वेदे वर्तते चाग्र्या श्रुतिरत्र विशां पते ।
यत्र गार्त्समदं ब्रह्मन् ब्राह्मणैस्समुदाहृतम् ॥ ५७॥
स ब्रह्मवादी विप्रर्षिश् श्रीमान् गृत्समदोऽभवत् ।
पुत्रो गृत्समदस्यापि विप्ररूपावैनसोऽभवत् ॥ ५८॥
सावैनसस्य पुत्रौ वै वितत्यस्तस्य चात्मजः ।
वितत्यस्य सुतस्तस्य शिवस्तस्यात्मजोऽभवत् ॥ ५९॥
[2]श्रवास्तस्य सुतश्चापि श्रवसश्चाभवत् तमः ।
तमसश्च प्रकाशोऽभूत् तनयो द्विजसत्तम ॥ ६०॥
प्रकाशस्य च वागिन्द्रो वागिन्द्राद्ब्रह्मवादिनः ।
बभूव प्रीतिमांस्तस्य पुत्रो वेदविदां वरः ॥ ६१॥
घृताच्यां तस्य पुत्रस्तु रुरुर्नामोदपद्यत ॥ ६२
प्रमद्वरायां तु रुरोः पुत्रस्समुदपद्यत ।

1. ख—इदमर्धद्वयं नास्ति 2. क-घ—श्रियस्तस्य सुतश्चापि

शुनको नाम विप्रर्षिर् यस्य पुत्रस्स शौनकः ॥ ६३

एवं ब्राह्मणतां प्राप्य वीतहव्यो महातपाः ।
भृगोः प्रसादाद्राजेन्द्र क्षत्रियः क्षत्रियर्षभ ॥ ६४

एष ते कथितो वंशो राजन् गार्त्समदो यथा ।
विस्तरेण कुरुश्रेष्ठ किमन्यदिह वर्तताम् ॥ ६५

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां
अनुशासनपर्वणि पञ्चमोऽध्यायः ॥ ५ ॥
॥ ८९ ॥ आनुशासनिकपर्वणि पञ्चमोऽध्यायः ॥ ५ ॥
[अस्मिन्नध्याये ६५ श्लोकाः]

॥ षष्ठोऽध्यायः ॥

भीष्मेण युधिष्ठिरं प्रति सदृष्टान्तप्रदर्शनं दैवादपि पुरुषकारस्य प्राबल्यप्रतिपादनम् ॥

युधिष्ठिरः—

पितामह महाप्राज्ञ [1]विदितास्त्र महाबल ।
दैवे पुरुषकारे च किं स्याच्छ्रेष्ठतरं मतम् ॥ १

भीष्मः—

अत्राप्युदाहरन्तीमम् इतिहासं पुरातनम् ।
वसिष्ठस्य च संवादं ब्रह्मणश्च युधिष्ठिर ॥ २

---

1. क-घ—अधीता

दैवमानुषयोः किंस्वित् कर्मणोश्श्रेष्ठमित्युत ।
पुरा वसिष्ठो भगवान् पितामहमुवाच ह ॥ ३

ततः पद्मोद्भवो देवो देवानां सम्भवो निधिः ।
उवाच सुशुभां वाणीं शुभैस्तां हेतुभिर्युताम् ॥ ४

ब्रह्मा—

बीजतो ह्यङ्कुरोत्पत्तिर् अङ्कुरात् पर्णसम्भवः ।
पर्णान्नालाः प्रसूयन्ते नालात् स्कन्धः प्रवर्तते ॥ ५

स्कन्धात् प्रवर्तते पुष्पं पुष्पान्निर्वर्तते फलम् ।
[1]फलान्निर्वर्त्यते बीजं [2]बीजं नाफलमुच्यते ॥ ६

नाबीजाज् जायते किञ्चिद् बीजेन न विना फलम् ।
बीजाद्बीजं भवत्येव नाबीजं विद्यते फलम् ॥ ७

यादृशं वपते बीजं क्षेत्रमासाद्य [3]पालकः ।
[4]सुकृते दुष्कृते वाऽपि तादृशं लभते फलम् ॥ ८

यथा बीजं विना क्षेत्रं वन्ध्यं भवति निष्फलम् ।
तथा पुरुषकारेण विना दैवं न सिध्यति ॥ ९

क्षेत्रं पुरुषकारस्तु दैवं बीजमुदाहृतम् [5]।

---

1. ख-घ—अर्धत्रयं नास्ति
2. क—बीजात् स्यात्संभवः पुनः
3. क-घ—वापकः
4. अ-क—अर्धचतुष्टयं नास्ति
5. घ—नाबीजाज्जायते किञ्चिद् बीजेन न विना फलम् ।
बीजाद्बीजं भवत्येव नाबीजं विद्यते फलम् ॥ [अधिकः पाठः]

क्षेत्रबीजसमायोगात् ततस्सस्यं समृद्ध्यते ॥ १०

कर्मणा फलनिर्वृत्तिं स्वयमश्नाति कारकः ।
प्रत्यक्षं दृश्यते लोके कृतस्याप्यकृतस्य वा ॥ ११

शुभेन कर्मणा सौख्यं दुःखं पापेन कर्मणा ।
कृतं सर्वत्र लभते नाकृतं भुज्यते क्वचित् ॥ १२

कृती सर्वत्र लभते प्रतिष्ठां भाग्यवीक्षिताम् ।
नाकृती लभतेऽभीष्टं क्षते क्षारावसेचनम् ॥ १३

तपसा रूपसौभाग्यं रत्नानि च धनानि च ।
प्राप्यते कर्मणा सर्वं न दैवादकृतात्मनाम् ॥ १४

दैवं स्वर्गश्च भोगश्च निष्ठा या च मनीषिता ।
सर्वं पुरुषकारेण कृतेनेहोपलभ्यते ॥ १५

ज्योतींषि त्रिदशा नागा यक्षाश्चन्द्रार्कमारुताः ।
सर्वे पुरुषकारेण मानुषा देवतां गताः ॥ १६

अर्थो वा मित्रवर्गो वा ऐश्वर्यं वा कुलान्वितम् ।
श्रीश्चापि दुर्लभा भोक्तुं तथैवाकृतकर्मभिः ॥ १७

शौचेन लभते विप्रः क्षत्रियो विक्रमेण हि ।
वैश्यः पुरुषकारेण शूद्रश्शुश्रूषया श्रियम् ॥ १८

नादातारं भजन्त्यर्था न क्लीबं नापि निष्क्रियम् ।

नाकर्मशीलं [1]नाशूरं तथा नैवातपस्विनम् ॥ १९

येन लोकास्त्रयस्सृष्टा दैत्यास्सर्वाश्च देवताः ।
स एष भगवान् विष्णुस् समुद्रे तप्यते तपः ॥ २०

स्वं च कर्मफलं न स्यात् सत्यमेव फलं [2]भवेत् ।
लोको दैवं समालम्ब्य उदासीनो भवेद्यदि ॥ २१

अकृत्वा मानुषं कर्म यो दैवमनुवर्तते ।
वृथा [3]भ्राम्यति दुर्मेधाः पतिं क्लीबमिवाङ्गना ॥ २२

न तथा मानुषे लोके फलमस्ति शुभाशुभे ।
यथा त्रिदशलोके वै फलमल्पेन जायते ॥ २३

कृतं पुरुषकारं तु दैवमेवानुवर्तते ।
न दैवमकृते किञ्चित् कस्यचिद्दातुमर्हति ॥ २४

यथा स्थानान्यनित्यानि दृश्यन्ते दैवतेष्वपि ।
कथं कर्म विना देवं [4]स्थाप्यते स्थापयिष्यति ॥ २५

न दैवतानि लोकेऽस्मिन् व्यापारं यान्ति कस्यचित् ।
[5]भयं सञ्जनयन्त्युग्रम् आत्मनिर्भयशङ्कया ॥ २६

---

1. क-घ—नानग्निं
2. क—व्रजेत् ख—लभेत् घ—सत्यमेवाफलं व्रजेत्
3. क-घ—भ्रा
4. क—कस्यते स्थापयिष्यति ख—स्थास्यते स्थापयिष्यते
   घ—कस्य वै स्थापयिष्यति
5. क-ख-घ—एवं

ऋषीणां देवतानां च सदा भवति विग्रहः ।
कस्य वाचाऽप्यदैवं हि यतो दैवं प्रवर्तते ॥ २७

[1]कथं चास्य समुत्पत्तिर् यथा दैवं प्रवर्तते ।
यथा त्रिदशलोकेऽपि प्राप्यते वा बहुच्छलम् ॥ २८

आत्मैव ह्यात्मनो बन्धुर् आत्मैव रिपुरात्मनः ।
आत्मैव ह्यात्मनस्साक्षी कृतस्याप्यपकृतस्य च ॥ २९

कृतं च विकृतं किञ्चित् सिद्ध्यते गुरुवर्मणा ।
सुकृतं च कृतं कर्म अकृतार्थं विपद्यते ॥ ३०

देवानां शरणं पुण्यं सर्वं पुण्यैरवाप्यते ।
पुण्यहीनं नरं प्राप्य किं दैवं प्रकरिष्यति ॥ ३१

पुरा ययातिर्विभ्रष्टो व्योमतः पतितः क्षितौ ।
पुनरारोपितस्स्वर्गं दौहित्रैः पुण्यकर्मभिः ॥ ३२

पुरूरवा वै राजर्षिर् द्विजैरभिहितः पुरा ।
ऐल इत्यभिविख्यातस् स्वर्गं प्राप्तो महीपतिः ॥ ३३

अश्वमेधादिभिर्यज्ञैस् सकृतः कोसलाधिपः ।
महर्षिशापात् सौदासः पुरुषादत्वमागतः ॥ ३४

अश्वत्थामा च रामश्च ऋषिपुत्रौ धनुर्धरौ ।
नागच्छतस्स्वर्गलोकं वेददृष्टेन कर्मणा ॥ ३५

---

1. क—इदमर्धं नास्ति

वसुर्यज्ञशतैरिष्ट्वा द्वितीय इव वासवः ।
मिथ्याभिधानेनैकेन रसातलतलं गतः ॥ ३६

बलिर्वैरोचनिर्बद्धो धर्मपाशेन दैवतैः ।
विष्णोः पुरुषकारेण पातालशयनः कृतः ॥ ३७

शक्रस्याथ रथोपस्थे विष्ठितो जनमेजयः ।
द्विजस्त्रीणां वधं कृत्वा किं स दैवेन वार्यते ॥ ३८

अज्ञानाद्ब्राह्मणीं हत्वा स्पृष्टो बालवधेन सः ।
वैशम्पायनविप्रर्षिः किं दैवेन निवारितः ॥ ३९

गोप्रदानेन मिथ्या वै ब्राह्मणेभ्यो महामखे ।
नृगश्चैव महाराजः कृकलासत्वमागतः ॥ ४०

धुन्धुमारश्च राजर्षिस् सत्रेष्वेव जरां गतः ।
प्रतिरङ्गं परित्यज्य सुष्वाप स गिरिव्रजे ॥ ४१

पाण्डवानां हृतं राज्यं धार्तराष्ट्रैर्महाबलैः ।
पुनः प्रत्याहृतं चैव न दैवा[1]द्द्रुजसंश्रयात् ॥ ४२

तपोनियमसंयुक्ता मुनयस्संशितव्रताः ।
किं ते दैवबलाच्छापम् उत्सृजन्ते न कर्मणा ॥ ४३

पापमुत्सृजतां नृणां धर्मं प्राहु[2]स्सुदुर्लभम् ।
लोभमोहवशापन्नं न दैवं त्रायते नरम् ॥ ४४

1. क-ख – द्रह्मसं 2. घ—न दुर्लभम्

[1]यथाऽग्निः पवनोद्धूतस् सुसूक्ष्मो भविता महान् ।
[2]तथा कर्म समावृत्तं दैवं साधु विशिष्यते ॥ ४५

यथा तैलक्षये दीपः प्रम्लानमुपगच्छति ।
तथा कर्मक्षये दैवं प्रम्लानमुपगच्छति ॥ ४६

विपुलमपि धनौघं वाहनं वा गृहं वा
पुरुष इह न शक्तः कर्महीनोपभोक्तुम् ।
सुविहितमपि चार्थं दैवतै रक्ष्यमाणम्
अवगुणमपि साधुं कर्मणा संश्रयन्ते ॥ ४७

भवति मनुजलोकाद्दैवलोको विशिष्टो
बहुतनयसमृद्ध्या मानुषाणां गृहाणि ।
त्रिभुवनभवनाभं दृश्यते वापराणाम्
[3]अनुफलति च कर्म त्वेव लोके न दैवम् ॥ ४८

व्यपनयति विमार्गे नास्ति दैवप्रभुत्वं
गुरुमिव कृतमग्र्यं कर्म संयाति दैवम् ।
अनुवहनमदीनं कर्मकारेण दैवं
[4]नयति पुरुषकारस्सञ्चितस्तत्र तत्र ॥ ४९

---

1. अ—इदमर्धं नास्ति
2. अ—इदमाद्यर्धत्रयं नास्ति
3. क—अनुफलमिति कर्मैत्वेव ख—अनुभवति हि
4. अ-ख—न भवति पुरुषः क

भीष्मः—

एतदाख्यानमाख्यातं सदृशं नात्र संशयः ।
फलं पुरुषकारस्य यः पश्यति हि तत्त्वतः ॥ ५०

अभ्युत्थानेन दैवस्य समारम्भेण केनचित् ।
विधिना कर्मणा चैव स्वर्गमार्गमवाप्नुयात् ॥ ५१

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां
अनुशासनपर्वणि षष्ठोऽध्यायः ॥ ६ ॥
॥ ८९ ॥ आनुशासनिकपर्वणि षष्ठोऽध्यायः ॥ ६ ॥
[अस्मिन्नध्याये ५१ श्लोकाः]

॥ सप्तमोऽध्यायः ॥

भीष्मेण युधिष्ठिरंप्रति शुभाशुभकर्मफलप्रतिपादनम् ॥

युधिष्ठिरः—

कर्मणां मे समस्तानां फलिनां भरतर्षभ ।
फलानि भरतश्रेष्ठ प्रब्रूहि परिपृच्छतः ॥ १

भीष्मः—

रहस्यं यदृषीणां तु तच्छृणुष्व युधिष्ठिर ।
या गतिः प्राप्यते येन प्रेत्यभावे चिरेप्सिता ॥ २

येन येन शरीरेण यद्यत् कर्म करोत्ययम् ।
तेन तेन शरीरेण तत्फलं प्रतिपद्यते ॥ ३

यस्यां यस्यामवस्थायां यत् करोति शुभाशुभम् ।
तस्यां तस्यामवस्थायां तत्फलं प्रतिपद्यते ॥ ४

न पश्यति कृतं कर्म चित्तपञ्चेन्द्रियैरिह ।
तान्यस्य साक्षिणो नित्यं षष्ठ आत्मा शुभाशुभे ॥ ५

चक्षुर्दद्यान्मनो दद्याद् वाचं दद्यात् सुभाषिताम् ।
अनुव्रजेदुपासीत स यज्ञः पञ्चदक्षिणः ॥ ६

यो दद्यादपरिक्लिष्टम् अन्नमध्वनि वर्तते ।
श्रान्तायादृष्टपूर्वाय तस्य पुण्यफलं महत् ॥ ७

स्थण्डिले शयमानानां गृहाणि शयनानि च ।
[1]चीरवल्कलसंवीते वासांस्याभरणानि च ॥ ८

वाहनासनयानानि योगात्मनि तपोधने ।
अग्नीनुपशयानस्य राजन् पौरुषमुच्यते ॥ ९

रसानां प्रतिसंहारात् पशून् पुत्रांश्च विन्दति ।
अवाक्शिरास्तु यो लम्बेद् उदवासं च यो वसेत् ॥ १०

मण्डूकशायी च नरो लभते चेप्सितां गतिम् ॥ १०॥

पाद्यमासनमेवाथ दीपमन्नं प्रतिश्रयम् ।
दद्यादतिथिपूजार्थं स यज्ञः पञ्चदक्षिणः ॥ ११॥

वीरासनं वीरशय्यां वीरस्थानमुपासतः ।

1. अ—इदमर्धं नास्ति

अक्षयास्तस्य वै लोकास् सर्वकामोपगास्तथा ॥ १२॥
धनं प्राप्नोति दानेन मौनेनाज्ञां विशां पते ।
उपभोगांश्च तपसा जीवितं ब्रह्मचर्यया ॥ १३॥
रूपमैश्वर्यमारोग्यम् अहिंसाफलमश्नुते ।
फलमूलाशिनां राज्यं स्वर्गः पर्णाशिनस्तथा ॥ १४॥
प्रायोपवेशनाद्राज्यं सर्वत्र सुखमुच्यते ।
सत्येन लभते स्वर्गं दीक्षया कुलमुच्यते ॥ १५॥
गवाह्निकदीक्षायास् स्वर्गकामी तृणाशनात् ॥ १६
स्थितस्त्रिषवणस्नाने वायुं पीत्वा शतक्रतोः ।
सलिलाशो भवेद्यश्च स मुनिस्सत्कृतो द्विजः ॥ १७
मरुत्साधयतो राज्यं नाकपृष्ठमनाशिने ॥ १७॥
उपवासं च दीक्षायाम् अभिषेकं च पार्थिव ।
कृत्वा द्वादशवर्षाणि वीरस्थानाद्विशिष्यते ॥ १८॥
अधीत्य सर्ववेदान् वै सद्यो दुःखात् प्रमुच्यते ।
तत्पाठधारणात् स्वर्गम् अर्थज्ञानात् परां गतिम् ॥ १९॥
वितृष्णानां वेदजपात् स्वर्गमोक्षफलं स्मृतम् ॥ २०
या दुस्त्यजा दुर्मतिभिर् या न जीर्यति जीर्यतः ।
योऽसौ प्राणान्तिको रोगस् तां तृष्णां त्यजतस्सुखम् ॥ २१
यथा धेनुसहस्रेषु वत्सो विन्दति मातरम् ।

एवमेव कृतं कर्म कर्तारमनुगच्छति ॥ २२

अचोद्यमानानि पुनः पुष्पाणि च फलानि च ।
स्वकालमनुवर्तन्ते तथा कर्म कृतं पुरा ॥ २३

जीर्यन्ति जीर्यतः केशा दन्ता जीर्यन्ति जीर्यतः ।
चक्षुश्श्रोत्रे च जीर्येते तृष्णैका न तु जीर्यते ॥ २४

येन प्रीणन्ति पितरस् तेन प्रीतः प्रजापतिः ।
माता तु येन प्रीणाति अतिथिस्तेन पूजितः ॥ २५

येन प्रीणात्युपाध्यायस् तेन स्याद्ब्रह्म पूजितम् ॥ २५॥

सर्वे तस्यादृता धर्मा यस्यैते त्रय आदृताः ।
अनादृतास्तु यस्यैते सर्वास्तस्याफलाः क्रियाः ॥ २६॥

वैशम्पायनः—

भीष्मस्यैतद्वचश्श्रुत्वा विस्मिताः कुरुपुङ्गवाः ।
आसन् प्रहृष्टमनसः प्रीतिमन्तोऽभवंस्तदा ॥ २७॥

भीष्मः—

यन्मन्त्रे भवति वृथा प्रयुज्यमाने
यत् सोमे भवति वृथाप्रसूयमाने ।
यच्चाग्नौ भवति वृथा च हूयमाने
तत् सर्वं भवति वृथाऽभिधीयतेऽद्य ॥ २८॥

इत्येतदृषिणा प्रोक्तम् उक्तवानस्मि भारत ।
शुभाशुभफलप्राप्तौ [1]किमतश्श्रोतुमिच्छसि ॥ २९॥

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां
अनुशासनपर्वणि सप्तमोऽध्यायः ॥ ७ ॥
॥ ८९ ॥ आनुशासनिकपर्वणि सप्तमोऽध्यायः ॥ ७ ॥
[अस्मिन्नध्याये २९॥ श्लोकाः]

॥ अष्टमोऽध्यायः ॥

भीष्मेण युधिष्ठिरं प्रति शुकवासवसंवादानुवादेनानृशंस्यप्रशंसनम् ॥

युधिष्ठिरः—

आनृशंस्यस्य धर्मज्ञ गुणान् भक्तजनस्य च ।
श्रोतुमिच्छामि कार्त्स्न्येन तन्मे ब्रूहि पितामह ॥ १

भीष्मः—

विषये काशिराजस्य ग्रामा[2]न्निष्क्रम्य लुब्धकः ।
[3]मविषं काण्डमादाय मृगयामास वै मृगम् ॥ २
तत्र चामिषलुब्धेन लुब्धकेन महावने ।
अविदूरे मृगं दृष्ट्वा बाणः प्रतिसमाहितः ॥ ३
तेन दुर्वारितास्त्रेण निमित्तविफलेषुणा ।

1. क-घ—क्रमतः 2. क-घ—म्विक्रम्य
3. क-घ—विषमं

दुरात्मना तरुर्विद्धो मृगं तत्र जिघांसता ॥ ४

स तीक्ष्णविषदिग्धेन शरेणातिबलात्कृतः ।
उत्सृज्य फलपत्राणि पादपश्शोषमागतः ॥ ५

तस्मिन वृक्षे तथाभूते कोटरेषु चिरोषितः ।
शुको न जहते वासं तस्य भक्त्या वनस्पतेः ॥ ६

निष्प्रचारो निराहारो ग्लानश्शिथिलभाषणः ।
कृतज्ञस्स हि धर्मात्मा वृक्षेणात्मा[1]प्यशुष्यत ॥ ७

तमुदारं महासत्त्वम् अतिमानुषचेष्टितम् ।
[2]समदुःखं शुकं दृष्ट्वा विस्मितः पाकशासनः ॥ ८

ततश्चिन्तामुपगतश् शक्रः कथमयं द्विजः ।
तिर्यग्योन्यामसम्भाव्यम् आनृशंस्यं समास्थितः ॥ ९

अथवा नात्र चित्रं हीत्यभवद्वासवस्य तु ।
प्राणिनामिह सर्वेषां सर्वं सर्वत्र पश्यति ॥ १०

ततो ब्राह्मणवेषेण मानुषं रूपमास्थितः ।
अवतीर्य महीं शक्रस् तं पक्षिणमुवाच ह ॥ ११

इन्द्रः—

शुक भोः पक्षिणां श्रेष्ठ दाक्षेयी सुप्रजास्त्वया ।
पृच्छे त्वां [3]शुकमेवं तु कस्मान्न त्यजसे द्रुमम् ॥ १२

1. क—न तुष्यति ङ—प्यतुष्यत
2. क-ङ—सम्मुखं तं शुकं ज्ञात्वा 3. ख—शुष्कमेवं तु

भीष्मः—

अथ पृष्टश्शुकः प्राह मूर्ध्ना तमभिवाद्य च ॥ १२॥

शुकः—

स्वागतं देवराजाय विज्ञातं तपसा मया ॥ १३

भीष्मः—

ततो दशशताक्षेण साधु साध्विति भाषितम् ।
अहो विज्ञानमस्येति तपसा पूजितस्ततः ॥ १४

तमेव शुभकर्माणं शुकं परमधार्मिकम् ।
जानन्नपि च तत् पापं पृच्छते पाकशासनः ॥ १५

इन्द्रः—

निष्पत्रमफलं शुष्कम् अशरण्यं पतत्रिणाम् ।
किमर्थं सेवसे वृक्षं यदा महदिदं वनम् ॥ १६

अन्येऽपि बहवो वृक्षाः पत्रसञ्छन्नकोटराः ।
शुभाः पर्याप्तमञ्चारा विद्यन्तेऽस्मिन् महावने ॥ १७

गतायुषमसामर्थ्यं क्षीणसारं हतश्रियम् ।
विमृश्य प्रज्ञया धीर जहीमं ह्यस्थिरं द्रुमम् ॥ १८

भीष्मः—

तदुपश्रुत्य धर्मात्मा शुकश्शक्रेण भाषितम् ।
सुदीर्घमतिनिश्वस्य दीनो वाक्यमभाषत ॥ १९

शुकः—

अनतिक्रमणीयानि दैवतानि शचीपते ।
यत्राभवंस्तत्र भवांस् तन्निबोध सुराधिप ॥ २०

अस्मिन् द्रुमवरे जातस् साधुभिश्च गुणैर्युते ।
बालभावे च सङ्गम्य शत्रुभिश्चाप्यधर्षितः ॥ २१

किमनुक्रोशवैफल्यम् उत्पादयसि मेऽनघ ।
अनुरक्तस्य भक्तस्य संस्पृशेन्न च पावकः ॥ २२

आनृशंस्येऽभिरक्तस्य भक्तस्यानुगतस्य च ।
अनुक्रोशो हि साधूनां सदा प्रीतिं प्रयच्छति ॥ २३

त्वमेव दैवतैस्सर्वैः पृच्छ्यसे धर्म[1]संश्रयान् ।
अतस्त्वं देवदेवानाम् आधिपत्ये प्रतिष्ठितः ॥ २४

त्वमर्हसि सहस्राक्ष मां योजयतुं भक्तितः ।
तद्भक्तितस्त्याजयितुं न मामर्हसि सत्तम ॥ २५

समस्थमुपजीवन वै विषमस्थं कथं त्यजेत् ॥ २५॥

भीष्मः—

तस्य वाक्येन सौम्येन [2]भाषितः पाकशासनः ।
शुकं प्रोवाच धर्मज्ञम् आनृशंस्येन तोषितः ॥ २६॥

वरं वृणीष्वेति तदा स च वव्रे वरं शुकः ।

---

1. ख—संश्रयात् 2. ख—हर्षितः

आनृशंस्यपरो नित्यम् अस्य वृक्षस्य सम्भवम् ॥ २७॥

विदित्वा च शुभां शक्रस् तां शुके शीलसम्पदम् ।
प्रीतः क्षिप्रमथो वृक्षम् अमृतेनावसिक्तवान् ॥ २८॥

ततोऽस्य फलपत्राणि शाखाश्चापि मनोहराः ।
शुकस्य दृढभक्तित्वाच् छ्रीमत्त्वं चाप स द्रुमः ॥ २९॥

शुकश्च कर्मणा तेन आनृशंस्यकृतेन ह ।
आयुषोऽन्ते महाराज प्राप शक्रसलोकताम् ॥ ३०॥

एवमेव मनुष्येन्द्र भक्तिमन्तं समाश्रितः ।
सर्वार्थसिद्धिं लभते शुकं प्राप्य यथा द्रुमः ॥ ३१॥

इति श्रीमहाभारते शतसाहस्र्यां संहितायां वैयासिक्यां
अनुशासनपर्वणि अष्टमोऽध्यायः ॥ ८ ॥
॥ ८९ ॥ आनुशासनिकपर्वणि अष्टमोऽध्यायः ॥ ८ ॥
[अस्मिन्नध्याये ३१॥ श्लोकाः]

॥ नवमोऽध्यायः ॥

भीष्मेण युधिष्ठिरं प्रति ब्राह्मणप्रशंसनम् ॥

युधिष्ठिरः—

यथैव ते नमस्कार्याः प्रोक्ताश्शक्रेण मानद ।
तथैव मयि चाचक्ष्व येषां स्पृहयसे नृप ॥ १

उत्तमापद्गतस्यापि यत्र ते वर्तते मनः ।
मनुष्यलोके सर्वत्र यदमुत्रेह चाच्युतम् ॥ २

भीष्मः—

स्पृहयामि द्विजातीनां येषां ब्रह्म परं धनम् ।
येषां सम्प्रत्ययस्स्वर्गस् तपस्स्वाध्यायसाधनम् ॥ ३

येषां वृद्धाश्च बालाश्च पितृपैतामहीं धुरम् ।
उद्वहन्ति न सीदन्ति तेषां वै स्पृहयाम्यहम् ॥ ४

[1]विद्यास्वभिविनीतानां दान्तानां मृदुभाषिणाम् ।
श्रुतवृत्तोपपन्नानां पदाक्षरविदां सताम् ॥ ५

संसत्सु वदतां तान हंसानामिव सङ्गशः ॥ ५॥

[2]मङ्गल्यरूपरुचिरा व्योम्नि जीमूतनिस्स्वनाः ।
[3]सम्युगुच्चरिता वाचश् शूयन्ते ह्यतिपावनाः ॥ ६॥

1 अ—इदमर्धत्रयं नास्ति 2. ख—इदमर्धं नास्ति
3 ख ज्ञानविज्ञानयुक्तानां तेषां च स्पृहयाम्यहम् । [अधिकः पाठः]

शुश्रूषमाणे नृपतौ प्रेत्य चेह सुखावहाः ॥ ७

येषां च तेषां दातारस् [1]सदा सदसि सम्मताः ।
विज्ञानगुणसम्पन्नास् तेषां च स्पृहयाम्यहम् ॥ ८

[2]सुसंस्कृतानि प्रयतश् शुचीनि गुणवन्ति च ।
दद्यादन्नानि तृप्त्यर्थं ब्राह्मणेभ्यो युधिष्ठिर ॥ ९

ये चापि येषां दातारस् तेषां च स्पृहयाम्यहम् ॥ ९॥

शक्यं यैश्चाहवे योद्धुं न दातुमनसूयितुम् ।
शूरा वीराश्च शतशस् सन्ति लोके युधिष्ठिर ॥ १०॥

तेषां संख्यायमानानां दानशूरो विशिष्यते ॥ ११

भद्रं तु जन्म सम्प्राप्य भूयो ब्राह्मणको भवेत् ।
बन्धुमध्ये कुले जातस् सुदुरापमवाप्नुयात् ॥ १२

न मे त्वत्तः प्रियतमो [3]लोकेऽस्मिन् पाण्डुनन्दन ।
त्वत्तश्च मे प्रियतरा ब्राह्मणा एव भारत ॥ १३

यथा च मे प्रियतरा विप्रास्त्वत्तः कुरूद्वह ।
तेन सत्येन गच्छेयं लोकान् यत्र च शन्तनुः ॥ १४

न मे पिता प्रियतरो ब्राह्मणेभ्यस्तथा भवान ।
न मे पितुः पिता वाऽपि ये चान्येऽपि सुहृज्जनाः ॥ १५

---

1. घ - अयं पादोऽनन्तरश्च न स्तः 2. घ - अर्धमयं नास्ति
3. अ-क-ङ—नव पादा न सन्ति

न च मे वृजिनं किञ्चिद् विद्यते ब्राह्मणेष्विह ।
अणु वा यदि वा स्थूलं विदितं साधुकर्मभिः ॥ १६

कर्मणा मनसा वाऽपि वाचा वाऽपि परन्तप ।
यन्मे कृतं ब्राह्मणेषु तेनाद्य भवितास्म्यहम् ॥ १७

ब्रह्मण्य इति मामाहुस् तया वाचाऽस्मि पावितः ।
एतदेव पवित्रेम्यस् सर्वेभ्यः परमं स्मृतम् ॥ १८

पश्यामि लोकानतुलाञ् शुचीन् ब्राह्मणतोषणान् ।
तत्र तत्र तु गन्तव्यम् अहाय च चिराय च ॥ १९

यथा पत्याश्रयो धर्मस् स्त्रीणां लोके युधिष्ठिर ।
[1]पतिरेव गतिर्नार्याः क्षत्रियस्य तथा द्विजः ॥ २०

क्षत्रियश्शतवर्षीयो दशवर्षी च ब्राह्मणः ।
पितापुत्रौ च विज्ञेयौ तस्य हि ब्राह्मणः पिता ॥ २१

नारी तु पत्यभावे वै देवरं कुरुते पतिम् ।
पृथिवी ब्राह्मणाभावात् क्षत्रियं कुरुते पतिम् ॥ २२

[2]ब्राह्मणानुज्ञया प्राप्यं राज्यं च सपुरोहितैः ।
तद्रक्षणेन स्वर्गोऽस्य तत्कोपान्नरकोऽक्षयः ॥ २३

[3]पुत्रवच्चैव ते रक्ष्या उपास्या गुरुवच्च नः ।

---

1. क-ख-च--सदैव हि 2. अ—इदमर्धद्वयं नास्ति
3 अ—नास्तीदमर्धम्

अग्निवच्चोपचार्या वै ब्राह्मणाः कुरुसत्तम ॥ २४

[1]ऋजून् सतस्सत्यशीलान् सर्वभूतहिते रतान् ।
आशीविषानिव क्रुद्धान् द्विजानुपचरेत् सदा ॥ २५

तेजसस्तपसश्चैव नित्यं बिभ्येद्युधिष्ठिर ।
दूरतो मातृवत् पूज्याः विप्रदारास्सुरक्षया ॥ २६

हन्युः क्रुद्धा महाराज ब्राह्मणाश्च तपस्विनः ॥ २६॥

अकोपनापराधेन भूयो नरकमश्नुते ॥ २७

ब्राह्मणेषु स्थितं ब्रह्म क्षत्रियः परिपालयेत् ।
पितेव पुत्रान् रक्षेत ब्राह्मणान् ब्रह्मतेजसः ॥ २८

गृहं चैषामवेक्षेथाः कच्चिदस्मीह जीवितम् ॥ २८॥

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां
अनुशासनपर्वणि नवमोऽध्यायः ॥ ९ ॥
॥ ८९ ॥ आनुशासनिकपर्वणि नवमोऽध्यायः ॥ ९ ॥
[अस्मिन्नध्याये २८॥ श्लोकाः]

---

1. क—अर्धत्रयं नास्ति ङ—अर्धद्वयं नास्ति

॥ दशमोऽध्यायः ॥

भीष्मेण युधिष्ठिरं प्रति क्रमेण क्रोधस्यातिथेश्च निन्दाप्रशंसनपरवेद-चतुष्टयसंवादानुवादः ॥ १ ॥ भीष्मेण युधिष्ठिरं प्रति ब्राह्मणानां पतिव्रतानां च महिमप्रतिपादकेन्द्राग्न्यादिसंवादानुवादः ॥ २ ॥

भीष्मः—

अत्राप्युदाहरन्तीमम् इतिहासं पुरातनम् ।
चतुर्णामपि वेदानां संवादं पुत्र तच्छृणु ॥ १

ऋग्वेदः—

गृहानाश्रयमाणस्य अग्निहोत्रं च जुह्वतः ।
सर्वं सुकृतमादत्ते यस्यायं [1]नृद्यतेऽतिथिः ॥ २

यजुर्वेदः—

न स्कन्दते न व्यथते नास्योर्ध्वं सर्पते रजः ।
वरिष्ठमग्निहोत्राच्च ब्राह्मणस्य मुखे हुतम् ॥ ३

सामवेदः—

न चेद्धन्ति पितरं मातरं वा
न ब्राह्मणं नोपवासं करोति ।
यत् किञ्चिदन्यद्वृजिनं करोति
प्रीतोऽतिथिस्तदुपहन्ति पापम् ॥ ४

1. ख—नार्च्यं घ—नार्चते

अथर्ववेदः—

यत् क्रोधनो यजते यद्ददाति
यद्वा तपस्तप्यति यज्जुहोति ।
वैवस्वतो हरते सर्वमस्य
मोघं चेष्टं भवति क्रोधनस्य* ॥ ५

भीष्मः—

भूयस्त्वं शृणु राजेन्द्र धर्मान् धर्मभृतां वर ॥ ५॥
अत्राभ्युदाहरन्तीमम् इतिहासं पुरातनम् ।
इन्द्राग्न्योस्सूर्यशच्योश्च तन्मे निगदतश्शृणु ॥ ६॥

इन्द्रः—

राज्ये विप्रान् प्रपश्यामि कामक्रोधविवर्जितान ।
एतेन सत्यवाक्येन पादः कुम्भस्य पूर्यताम् ॥ ७॥

अग्निः—

[1]यथाऽहं तत्र नाश्नामि यत्र नाश्नन्ति वै द्विजाः ।
एतेन सत्यवाक्येन पादः कुम्भस्य पूर्यताम् ॥ ८॥

सूर्यः—

[2]यथा गोब्राह्मणस्यार्थे सञ्चरामि सदा ज्वलन् ।
एतेन सत्यवाक्येन पादः कुम्भस्य पूर्यताम् ॥ ९॥

* सर्वेषु कोशेषु अर्थवाभ्यायममाप्तिर्दृश्यते
1. अ—अर्धद्वयं नास्ति
2. क-ङ—अर्धचतुष्टयं नास्ति

शची—

कर्मणा मनसा वाचा नावमन्ये पुरन्दरम् ।
एतेन सत्यवाक्येन पादः कुम्भस्य पूर्यताम् ॥ १०॥

इति श्रीमहाभारते शतसाहस्र्यिकायां संहितायां वैयासिक्यां
अनुशासनपर्वणि दशमोऽध्यायः ॥ १० ॥
॥ ८९ ॥ आनुशासनिकपर्वणि दशमोऽध्यायः ॥ १० ॥
[अस्मिन्नध्याये १०॥ श्लोकाः]

॥ एकादशोऽध्यायः ॥

भीष्मेण युधिष्ठिरं प्रति भगवन्महिमप्रतिपादकव्यासवासुदेवसंवादानुवादः ॥ १ ॥ भक्तिश्रद्धादीनां मुक्तिसाधनतात्रतिपादकव्यासवाक्यानुवादः ॥ २ ॥ श्रीकृष्णमहिमप्रतिपादकव्यासमद्रराजसंवादानुवादः ॥ ३ ॥

भीष्मः—

अत्राप्युदाहरन्तीमम् इतिहासं पुरातनम् ।
मद्रराजस्य संवादं व्यासस्य च महात्मनः ॥ १

वैताने कर्मणि तते कुन्तीपुत्र यथा पुरा ।
उक्तो भगवता मद्रे तथा तत्राशृणोद्भवान् ॥ २

मद्रराजः—

कानि तीर्थानि भगवन् फलार्थीहेह के श्रमाः ।

क इज्यते कश्च यज्ञः को यूपः क्रमते च कः ॥ ३

कश्चाध्वरे शस्यते गीतिशब्दः
कश्चाध्वरे गीयते वल्गुभाषैः ।
को ब्रह्मशब्दस्तुतिभिस्तूयते च
कस्येह हविरध्वर्यवः कल्पयन्ति ॥ ४

वर्णाश्रमः किम्फलः कश्च सोमः
कश्चोङ्कारः कश्च वेदार्थमार्गः ।
पृष्टस्तन्मे ब्रूहि सर्वं महर्षे
लोकज्येष्ठं कस्य विज्ञानमाहुः ॥ ५

द्वैपायनः—

लोकज्येष्ठं यस्य विज्ञानमाहुर्
योनिज्येष्ठं यस्य वदन्ति जन्म ।
पूतात्मानो ब्राह्मणा वेदमुख्या
अस्मिन् प्रश्नो दीयतां केशवाय ॥ ६

ब्राह्मणाः—

बालो जात्या क्षत्रधर्मार्थशीलो
जातो देवक्यां शूरपुत्रेण वीरः ।
वेत्तुं वेदानर्हते क्षत्रियो वै
दाशार्हाणामुत्तमः पुष्करात्तः ॥ ७

श्रीभगवान्—

पारशार्य ब्रूहि यद्ब्राह्मणेभ्यः
प्रीतात्मा वै ब्रह्मकल्पस्सुमेधाः ।
पृष्टो यज्ञार्थः पाण्डवस्यातितेजा
एतच्छ्रेयस्तस्य लोकस्य चैव ॥ ८

व्यासः—

उक्तं वाक्यं यद्भवान् मामवोचत्
प्रश्नं चित्रं नाहमत्रोत्सहेऽद्य ।
छेत्तुं स्पष्टं तिष्ठति त्वद्विधे वै
लोकज्येष्ठे विश्वरूपे सुनाभे ॥ ९

श्रीभगवान्—

तत्त्वं वाक्यं ब्रूहि तस्मिन् महर्षे
यस्मिन् कृष्णः प्रोच्यते वै यथावत् ।
प्रीतस्तेऽहं ज्ञानशक्त्या महात्मन्
निर्देशे वै कर्मणां ब्रूहि सिद्धिम् ॥ १०

वैशम्पायनः—

उक्तवाक्ये सत्तमे यादवानां
कृष्णो व्यासः प्राञ्जलिर्वासुदेवम् ।
विप्रैस्सार्धं पूजयन् देवदेवं
कृष्णं विष्णुं वासुदेवं बभाषे ॥ ११

व्यासः—

आनन्त्यं ते विश्वकर्मंस्तवैवं
रूपं पुराणं शाश्वतं च ध्रुवं च ।
कस्ते बुद्ध्येद्वेदवादेषु चैत-
ल्लोके ह्यस्मिञ् शासकस्त्वं पितेव* ॥ १२

भीष्मः—

द्वारकायां यथा प्राह पुराऽयं मुनिसत्तमः ।
वेदविप्रमयं तत्त्वं वासुदेवस्य तच्छृणु ॥ १३

यूपं विष्णुं वासुदेवं विजानन
सर्वान् विप्रान् बोधते तत्त्वदर्शी ।
विष्णुं क्रान्तं वासुदेवं विजानन
विप्रो विप्रत्वं गच्छते तत्त्वदर्शी ॥ १४

विष्णुर्यज्ञस्त्विज्यते चापि विष्णुः
कृष्णो विष्णुर्यश्च कृष्णः प्रभुश्च ।
कृष्णो वेदाङ्गं वेदवादाश्च कृष्ण
एवं जानन ब्राह्मणो ब्रह्म एति ॥ १५

स्थानं सर्वं वैष्णवं यज्ञमार्गे
चातुर्होत्रं वैष्णवं तत्र कृष्णः ।

* सर्वेषु कोशेषु ऽस्मिन्नध्यायसमाप्तिर्दृश्यते

सर्वैर्भावैरिज्यते सर्वकामैः
पुण्याँल्लोकान् ब्राह्मणाः प्राप्नुवन्ति ॥ १६

सोमं सद्भावाद्ये च जातं पिबन्ति
दीप्तं कर्म ये विदानाश्चरन्ति ।
एकान्तमिष्टं चिन्तयन्तो दिविस्थास्
ते पन्थानं प्राप्नुवन्ति [1]व्रतज्ञाः ॥ १७

ओमित्येतद्ध्यायमानो न गच्छेद्
दुर्गं पन्थानं पापकर्मापि विप्रः ।
सर्वं कृष्णं वासुदेवं हि विप्राः
कृत्वा ध्यानं दुर्गतिं न प्रयान्ति ॥ १८

आज्यं यज्ञस्रुक्स्रुवौ यज्ञदाता
[2]इध्मा वर्तिर्यज्ञशाला हवींषि ।
इध्मं पुरोडाशं सर्वदा होतृकर्ता
कृष्णं विष्णुं संविजानंस्तमेति ॥ १९

योगे योगे कर्मणां चाभिहारे
युक्ते वैताने कर्मणि ब्राह्मणस्य ।

---

1. क-ख—प्रतिज्ञाम् ख—कृतज्ञाः
2. ख—इच्छा पत्नी पत्नि

पुष्ट्यर्थेषु प्राप्नुयात् सर्वसिद्धिं
शान्त्यर्थेषु प्राप्नुयात् सर्वशान्तिम्* ॥ २०

द्वैपायनः—

श्रद्धां त्यागं निर्वृतिं चापि पूजां
सत्यं धर्मं यः कृतं चाभ्युपैति ।
काम[1]द्वेषौ त्यज्य सर्वेषु तुल्यश्
श्रद्धापूतस्सर्वयज्ञेषु योग्यः ॥ २१

यस्मिन् यज्ञे सर्वभूताः प्रहृष्टास्
सर्वे चारम्भाश्शास्त्रदृष्टाः प्रवृत्ताः ।
धर्म्यैरर्थैर्ये यजन्ते ध्रुवं ते
पूतात्मानो धर्ममेकं भजन्ते ॥ २२

एकाक्षरं द्व्यक्षरमेकमेव
सदा यजन्ते नियताः प्रतीताः ।
दृष्ट्वा मनागर्चयित्वा स्म विप्रास्
सतां मार्गं तं ध्रुवं सम्भजन्ते ॥ २३

[2]पापात्मानः क्रोधरागाभिभूताः
कृष्णे भक्ता नाम सङ्कीर्तयन्तः ।

---

* सर्वेषु कोशेषु अतैवाध्यायसमाप्तिर्दृश्यते
1. क-ख—क्रोधौ
2. अ—अयं श्लोको नास्ति

पूतात्मानो यज्ञशीलास्सुमेधा
यज्ञस्यान्ते कीर्तिलोकान् भजन्ते ॥ २४

श्रीभगवान्—

एको वेदो ब्राह्मणानां बभूव
चतुष्पादस्त्रिगुणो ब्रह्मशीर्षः ।
पादं पादं ब्राह्मणा वेदमाहुस्
त्रेताकाले तं च तं विद्धि शीर्षम् ॥ २५

द्वैपायनः—

सर्वे वेदास्सर्ववेद्यास्सशास्त्रास्
सर्वे यज्ञास्सर्व इज्याश्च कृष्णः ।
विदुः कृष्णं ब्राह्मणास्तत्त्वतो ये
तेषां राजन् सर्वयज्ञास्समाप्ताः ॥ २६

ज्ञेयो योगी ब्राह्मणैर्वेदतत्त्वैर्
आरण्यकैस्सैष कृष्णः प्रभुत्वात् ।
सर्वान् यज्ञान् ब्राह्मणान् ब्रह्म चैव
व्याप्यातिष्ठद्देवदेवस्त्रिलोके ॥ २७

स एष देवश्शक्रमीशं [1]यजानं
प्रीत्या प्राह क्रतुयष्टारमव्ययम् ।

---

* सर्वेषु कोशेषु अत्रैवाध्यायसमाप्तिरुच्यते
1. ख—विरिञ्चं

न मे शक्तो वेद वेदार्थकत्वाद्
भक्तो भक्त्या शुद्धभावः प्रधानः ॥ २८

मा जानन्ते ब्रह्मशीर्षं वरिष्ठं
विश्वे विश्वं ब्रह्मयोनिं ह्ययोनिम् ।
सर्वत्राहं शाश्वतश्शाश्वतेशः
कृत्स्नो वेदो निर्गुणोऽनन्ततेजाः ॥ २९

सर्वे देवा वासुदेवं यजन्ते
ततो बुद्ध्या मार्गमाणास्तनूनाम् ।
सर्वान् कामान प्राप्नुवन्ते विशालांस्
त्रैलोक्येऽस्मिन् कृष्णनामाभिधानात् ॥ ३०

कृष्णो यज्ञैरिज्यते यायजूकैः
कृष्णो वीरैरिज्यते विक्रमद्भिः ।
कृष्णो वाक्यैरिज्यते सम्मृशानैः
कृष्णो मुक्तैरिज्यते वीतमोहैः ॥ ३१

विद्यावन्तस्सोमपा ये विपापा
इष्ट्वा यज्ञैर्गोचरं प्रार्थयन्ते ॥ ३१॥

श्रीभगवान्—

[1]सर्वे क्रान्तं देवलोकं विशालं
त्वन्ते कृत्वा मर्त्यलोकं भजन्ते ॥ ३२

एवं सर्वे त्वाश्रमास्सुव्रता ये
मां जानन्तो यान्ति लोकानदीनान् ।
यां यां दीक्षामुद्वहन्तो विपापा
ज्योतिर्भूत्वा देवलोकं भजन्ते ॥ ३३

पूज्यन्ते मां पूजयन्तः प्रहृष्टा
मां जानन्तश्श्रद्धया वासुदेवम् ।
भक्त्या तुष्टोऽहं तस्य सत्त्वं प्रयच्छे
सत्त्वस्पृष्टो वीतमोहोऽयमेति ॥ ३४

द्वैपायनः—

ज्योतींषि शुक्लानि च यानि लोके
त्रयो लोका लोकपालास्त्रयश्च ।
त्रयोऽग्नयश्चाहुतयश्च पञ्च
सर्वे देवा देवकीपुत्र एव ॥ ३५

भीष्मः—

व्यासस्यैतद्वचश्श्रुत्वा मद्रराजस्सहर्षिभिः ।
व्यासं कृष्णं च विधिवत् प्रीतात्मा प्रत्यपूजयत् ॥ ३६

1. अ-क-ङ—अर्धमयं नास्ति

वैशम्पायनः—

[1]कविः प्रयातस्तु महर्षिपुत्रो
द्वैपायनस्तद्वचनं निशम्य ।
जगाम पृथ्वीं शिरसा महात्मा
नमश्च कृष्णाय चकार भीष्मः ॥ ३७

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां
अनुशासनपर्वणि एकादशोऽध्यायः ॥ ११ ॥
॥ ८९ ॥ आनुशासनिकपर्वणि एकादशोऽध्यायः ॥ ११ ॥
[अस्मिन्नध्याये ३७ श्लोकाः]

॥ द्वादशोऽध्यायः ॥

श्रीकृष्णेन भीष्मं प्रति युधिष्ठिराय गरुडोपाख्यानकथनचोदना ॥ १ ॥ कश्यपेन स्वभार्ययोः कद्रूविनतयोः क्रमेण पुत्रसहस्रद्वयलाभरूपवरदानम् ॥ २ ॥ कद्रूा अण्डसहस्रात्सर्पसहस्रविनिर्गमे उत्कण्ठितया विनतया स्वीयाण्डद्वये एकतराण्डविभेदनम् ॥ ३ ॥ अकालेऽण्डभेदनादसमग्राङ्गतया जातेनारुणेन विनतायै दास्यप्राप्तिरूपशापदानम् ॥ ४ ॥ वर्षसहस्रान्ते परिणतादण्डाद्विनिर्गतेन गरुडेन मातृपार्श्वं विहाय चिरादेशान्तरेष्वेव सञ्चरणम् ॥ ५ ॥ कदाचन कद्रूविनताभ्यां समुद्रान्ते उच्चैश्श्रवसो हयस्य दर्शनम् ॥ ६ ॥ कद्रूा हयस्य कर्णं पृष्टया विनतया सर्वाङ्गश्वेतत्वकथनम् । कद्रूा तु नीलवालत्वकथनम् ॥ ७ ॥ तथा विवदमानाभ्यां ताभ्यां स्वोक्तव्यत्यासे अन्यतरयाऽन्यतरस्या दास्यवहनरूपपणबन्धनम् ॥ ८ ॥ कद्रूा स्वपुत्रान् प्रति विनतया सह स्वस्य पणबन्धनिवेदनपूर्वकमुच्चैश्श्रवसो वाले

1. अ-ख—कविप्रधानस्तु

स्वाङ्गवेष्टनेन नैल्यसम्पादनचोदना ॥ ९ ॥ कद्रा स्ववचनतिरस्कारिणः काश्चन पुत्रान् प्रति जनमेजयसर्पसत्रे निधनरूपशापदानम् ॥ १० ॥ कैश्चन सर्पैरुच्चैश्श्रवसो वाले स्वाङ्गवेष्टनेन नैल्यसम्पादनम् ॥ ११ ॥ ततः कद्रूचोदनया हयवाले नैल्यदर्शिन्या विनतया तद्दास्यास्वीकरणम् ॥ १२ ॥नारदेन गरुडं प्रति विनतायाः कद्रूदास्यनिवेदनम् ॥ १३ ॥ तच्छ्रवणखिन्नेन तेन कद्रूं प्रति स्वमातुर्दास्यान्मोचनयाचना ॥ १४ ॥ कद्रा गरुडं प्रत्यमृतानयने मातुर्दास्यान्मोचनोक्तिः ॥१५॥ कद्राऽमृताहरणं चोदितेन गरुडेन स्वपितरि कश्यपे तन्निवेदनम् ॥ १६ ॥ तेन तस्य दुष्करत्वकथने गरुडेन स्वेन तस्य सुकरत्वोक्तिः ॥ १७ ॥ कश्यपेन गरुडं प्रति गजकच्छपवृत्तान्तकथनपूर्वकं तयोर्भक्षणाद्बलाप्यायनसम्पादनेनामृताहरणचोदना ॥ १८ ॥ गरुडेन गजकच्छपावासमेत्य चरणाभ्यां तयोर्ग्रहणम् ॥ १९ ॥तथा तयोर्भक्षणाय नैमिशारण्यस्यमहातरुशाखायां वेगान्निपतनम् ॥ २० ॥ तथा स्वनिपतनमात्रेण भज्यमानशाखाया अधोभागे लम्बमानमुनिगणावलोकनात्तुण्डेन तच्छाखाग्रहणपूर्वकं पुनरुत्पतनम् ॥ २१ ॥ तथा देवदूतवचनात्समुद्रान्ते शाखाविसर्जनेन तन्निवासिनां कुविन्दानां हननम् ॥ २२ ॥ गरुडेन शैलाग्रे उपविश्य गजकच्छपयोर्भक्षणम् ॥ २३ ॥ ततस्स्वर्गोऽमृतसमीपं गतेन तेन तत्र परितो ज्वलदग्निदर्शनभयाद्ब्रह्माणं प्रति तच्छमनोपायप्रश्नः ॥ २४ ॥ ब्रह्मणा तं प्रति नवनीतप्रक्षेपेणाग्निसंशामनचोदना ॥ २५ ॥ गरुडेन नवनीतप्रक्षेपेण मन्दीभूताग्न्युल्बनपूर्वकममृतरक्षिणां पक्षप्रहारेण निराकरणम् ॥ २६ ॥ तथाऽमृतमाहृत्य वियति समुत्पतनम् ॥ २७ ॥ तथा स्वस्योपरि इन्द्रेण वज्रे विसृष्टे तत्सन्माननायैकतनूरुहविस्रंसनम् ॥ २८ ॥ गरुडेन कद्रूप्रत्यमृतानयनकथनम् ॥ २९ ॥ कद्रा विनताया दास्यान्मोचनम् ॥ ३० ॥ गरुडेन पुनरिन्द्रायामृतप्रत्यर्पणम् ॥ ३१ ॥

युधिष्ठिरः—

गरुडः पक्षिणां श्रेष्ठ इति पूर्वं पितामह ।
उक्तस्त्वया महाबाहो श्वेतवाहं प्रशंसता ॥ १

अत्र कौतूहल इति श्रवणे जायते मतिः ।
कथं गरुत्मान् पक्षीणां श्रैष्ठ्यं प्राप्तः परन्तप ॥ २

सुपर्णो वैनतेयश्च केन शत्रुश्च भोगिनाम् ।
किंवीर्यः किम्बलश्चासौ वक्तुमर्हसि भारत ॥ ३

भीष्मः—

वासुदेव महाबाहो देवकीसुप्रजास्त्वया ।
श्रुतं ते धर्मराजस्य यदुहर्षविवर्धन ॥ ४

सुपर्णं शंस इत्येव मामाह कुरुनन्दनः ।
अस्य प्रवक्तुमिच्छामि त्वया पृष्टो महाद्युते ॥ ५

त्वं हि शौरे महाबाहो सुपर्णः प्रोच्यसे पुरा ।
अनादिनिधने काले गरुडश्चासि केशव ॥ ६

तस्मात् पूर्वं प्रसाद्य त्वां धर्मपुत्राय धीमते ।
गरुडं पततां श्रेष्ठं वक्तुमिच्छामि माधव ॥ ७

श्रीभगवान्—

यथैव मां भवान् वेद तथा वेद युधिष्ठिरः ।
यथा च गरुडो जातस् तथाऽस्मै ब्रूहि तत्त्वतः* ॥ ८

भीष्मः—

युधिष्ठिर महाबाहो शृणु राजन् यथातथम् ।
गरुडं पक्षिणां श्रेष्ठं वैनतेयं महाबलम् ॥ ९

---

* सर्वेषु कोशेषु अत्रैवाध्यायसमाप्तिर्दृश्यते

तथा च गरुडो राजन् सुपर्णस्तु यथाऽभवत् ।
यथा च भुजगान् हन्ति तथा मे ब्रुवतश्शृणु ॥ १०

पुराऽहं तात रामेण जामदग्न्येन धीमता ।
कैलासशिखरे रम्ये मृगान्निघ्नन् सहस्रशः ॥ ११

तमहं तात दृष्ट्वैव शस्त्राण्युत्सृज्य सर्वशः ।
अभिवाद्य पूर्वं रामाय विनयेनोपतस्थिवान् ॥ १२

तमहं कथान्ते वरदं सुपर्णस्य बलौजसी ।
अपृच्छं स च मां प्रीतः प्रत्युवाच युधिष्ठिर ॥ १३

रामः—

कद्रूश्च विनता चास्तां प्रजापतिसुते उभे ।
ते धर्मेणोपयेमे च मारीचः काश्यपः प्रभुः ॥ १४

प्रादात्ताभ्यां वरं प्रीतो भार्याभ्यां सुमहातपाः ।
तत्र कद्रूर्वरं वव्रे पुत्राणां दशतीश्शतम् ॥ १५

तुल्यतेजःप्रभावानां सर्वेषां तुल्यजन्मनाम् ।
द्वौ पुत्रौ विनता वव्रे वीरौ भरतसत्तम ॥ १६

कद्रूपुत्रसहस्रेण तुल्यवेगपराक्रमौ ।
स तु ताभ्यां वरं प्रादात् तथेत्युक्त्वा महातपाः ॥ १७

जनयामास यान् पुत्रांस् ताभ्यामासीद्यथा पुरा ॥ १७॥

कद्रूः प्रजज्ञे त्वण्डानां तथैव दशतीश्शतम् ॥ १८

अण्डे द्वे विनता चैव दर्शनीयतरे शुभे ॥ १८॥
तानि त्वण्डानि तु तयोः कद्रूविनतयोर्द्वयोः ।
सोपस्वेदेषु पात्रेषु निदधुः परिचारिणः ॥ १९॥
निस्सरन्ति तदण्डेभ्यः कद्रूपुत्रा भुजङ्गमाः ।
पञ्चवर्षशते काले दृष्टाश्च सबलौजसः ॥ २०॥
विनता तेषु जातेषु पन्नगेषु महात्मसु ।
विपुत्रा पुत्रसन्तापाद् अण्डमेकं विभेद ह ॥ २१॥
किमनेन करिष्येऽहम् इति वाक्यमभाषत ।
न हि पञ्चशते काले पुरा पुत्रं ददर्श सा ॥ २२॥
साऽपश्यदण्डान्निष्क्रान्तं विना पुत्रं मनस्विनम् ।
पूर्वकायोपसम्पन्नं वियुक्तमितरेण ह ॥ २३॥
दृष्ट्वा तु तं तथारूपम् असमग्रशरीरिणम् ।
पुत्रदुःखान्विताऽशोचत् स च पक्षी तथा गतः ॥ २४॥
अत्रवीच्च मुदा युक्तः पर्यश्रुनयनस्तथा ।
मातरं चपलाऽसीति हतोऽहमिति चासकृत् ॥ २५॥
न त्वया काङ्क्षितः कालो यावानेवात्यगात् पुरा ।
आवां भवाव पुत्रौ तु श्वसनाद्बलवत्तरौ ॥ २६॥
ईर्ष्याक्रोधाभिभूतत्वाद् योऽहमेवं कृतस्त्वया ।
तस्मात्त्वमपि मे मातर् दासीभावं गमिष्यसि ॥ २७॥

पञ्चवर्षशतानि त्वं स्पर्धसे वै यया सह ।
दासी तस्या भवित्रीति साश्रुपातमुवाच ह ॥ २८॥

एष चैव महाभागे बली बलवतां वरः ।
मोक्षयिष्यति ते मातर् दासीभावान्ममानुजः* ॥ २९॥

विनता पुत्रशोकार्ता शापाद्भीता च भारत ।
प्रतीक्षते स्म तं कालं यः पुत्रोक्तस्तदाऽभवत् ॥ ३०॥

ततोऽप्यतीते पञ्चशते वर्षाणां कालसंयुगे ।
गरुडोऽथ महावीर्यो जज्ञे भुजगभुग्बली ॥ ३१॥

बन्धुरास्यश्शिखी पत्रकोशः कूर्मनखो महान् ।
रक्ताक्षस्संहतग्रीवो ह्रस्वपादो महाशिराः ॥ ३२॥

यस्त्वण्डात् स विनिर्भिन्नो निष्क्रान्तो भरतर्षभ ।
विनतापूर्वजः पुत्रस् सोऽरुणो दृश्यते दिवि ॥ ३३॥

पूर्वां दिशमभिप्रेत्य सूर्यस्योदयनं प्रति ।
अरुणोऽरुणसङ्काशो नाम्ना चैवारुणस्स्मृतः ॥ ३४॥

जातमात्रस्तु विहगो गरुडः पन्नगाशनः ।
विहाय मातरं क्षिप्रम् अगमत् सर्वतो दिशः ॥ ३५॥

स तथा चातिववृधे सर्वकामैरथार्चितः ।

---

* सर्वेषु कोशेषु अत्रैवाध्यायसमाप्तिर्दृश्यते

पितामहविसृष्टेन भोजनेन विशां पते ॥ ३६॥

तस्मिंश्च विहगे तत्र यथाकामं विवर्धति ।
कद्रूश्च विनता चैव गच्छतां सागरं प्रति ॥ ३७॥

ददृशाते तु ते यान्तम् उच्चैश्श्रवसमन्तिकात् ।
स्नात्वोपवृत्तं त्वरितं पीतवन्तं च वाजिनम् ॥ ३८॥

ततः कद्रूर्हसन्त्येव विनतामिदमब्रवीत् ॥ ३९

कद्रूः

हयस्य वर्णः को न्वत्र ब्रूहि यस्ते मतश्शुभे ॥ ३९॥

विनता—

एकवर्णो हयो राज्ञि सर्वश्वेतो मतो मम ।
वर्णं वा कीदृशं तस्य मन्यसे त्वं मनस्विनि ॥ ४०॥

कद्रूः—

सर्वश्वेतो मतस्तुभ्यं य एष हयसत्तमः ।
ब्रूहि कल्याणि दिव्यानि वर्णान्यत्वेन भामिनि ॥ ४१॥

विनता—

यद्यये दीव्यसि त्वं मे कः पणो नो भविष्यति ।
सा तज्ज्ञात्वा पणेयं वै ज्ञात्वा तु विपणे त्वया ॥ ४२॥

कद्रूः—

जिता दासी भवेर्मे त्वम् अहं चाप्यसितेक्षणे ।
नैकवर्णैकवर्णत्वे विनते रोचते च ते ॥ ४३॥

विनता—

रोचते मे पणो राज्ञि दासीत्वेन न संशयः ।
सत्यमातिष्ठ भद्रं ते सत्ये स्थास्यामि चाप्यहम् ॥ ४४॥

रामः—

विनता तु तथेत्युक्त्वा कृतसंशपथा पणे ।
कद्रूरपि तथेत्युक्त्वा पुत्रानिदमुवाच ह ॥ ४५॥

कद्रूः—

मया कृतः पणः पुत्रा मिथो विनतया सह ।
उच्चैश्श्रवसि गान्धर्वे तच्छृणुध्वं भुजङ्गमाः ॥ ४६॥

अहं ब्रुवं नैकवर्णं सैकवर्णमथाब्रवीत् ।
जिता दासी भवेत् पुत्रास् साहसं वै न संशयः ॥ ४७॥

एकवर्णश्च वाजी स चन्द्रकोकनदप्रभः ।
साऽहं दासी भविष्यामि जिता पुत्रा न संशयः ॥ ४८॥

ते यूयमश्वप्रवरम् आविशध्वमतन्द्रिताः ।
सर्वश्वेतं वालधिषु वाला भूत्वाऽञ्जनप्रभाः ॥ ४९॥

सर्पाः—

निकृत्या न जयश्श्रेयान् मातस्सत्या गिरश्शृणु ।
आयत्यां च तदात्वे च न च धर्मोऽत्र विद्यते ॥ ५०॥

---

* सर्वेषु कोशेषु अत्रैवाध्यायसमाप्तिर्दृश्यते

सा त्वं धर्मादपेतं वै कुलस्यैवाहितं तव ।
निकृत्या विजयं मातर् मा स्म कार्षीः कथञ्चन ॥ ५१॥

यद्यधर्मेण विजयं वयं काङ्क्षामहे क्वचित् ।
त्वया नाम निवार्यास्म मा कुरुध्वमिति ध्रुवम् ॥, ५२॥

सा त्वमस्मानपि सतो विपापान्नृजुबुद्धिनः ।
कल्मषेण हि संयोक्तुं काङ्क्षसे लोभमोहिता ॥ ५३॥

ते वयं त्वां परित्यज्य द्रविष्याम दिशो दश ।
यत्र वाक्यं न ते मातः पुनश्श्रोष्याम ईदृशम् ॥ ५४॥

गुरोरप्यवलिप्तस्य कार्याकार्यमजानतः ।
उत्पथं प्रतिपन्नस्य परित्यागो विधीयते ॥ ५५॥

कद्रूः—

शृणोमि विविधा वाचो हेतुमत्यस्समीरिताः ।
वक्रकामनिवृत्त्यर्थं तदहं वो न रोचये ॥ ५६॥

न च तत्पणितं मन्दाश् शक्यं जेतुमतोऽन्यथा ।
जिते निकृत्या श्रुत्वैतत् क्षमं कुरुत पुत्रकाः ॥ ५७॥

श्वोऽहं प्रभातसमये जिता धर्मेण [1]पुत्रकाः ।
शैलूषिणी भविष्यामि विनताया न संशयः ॥ ५८॥

इह चामुत्र चार्थाय पुत्रानिच्छन्ति मातरः ।

1. क-घ—पन्नगाः

साऽहं विपन्ना निरये युष्मानासाद्य सङ्गतान् ॥ ५९॥

इह वा तारयेत् पुत्रः प्रेत्य वा तारयेत् पितॄन् ।
नात्र चित्रं भवेत् किञ्चित् पुनातीति च पुत्रकः ॥ ६०॥

ते यूयं तारणार्थाय मम पुत्रा मनोजवाः ।
आविशध्वं हयश्रेष्ठं वाला भूत्वाऽञ्जनप्रभाः ॥ ६१॥

जानाम्यधर्मस्सकलो विजिता विनता भवेत् ।
निकृत्या दासभावस्तु युष्मानप्यवपीडयेत् ॥ ६२॥

निकृत्या विजयो वेति दासीत्वमवरं भवेत् ।
उभयं निश्चयं कृत्वा जयो वै धार्मिको वरः ॥ ६३॥

यद्यप्यधर्मो विजयो युष्मानेव स्पृशेत् पुनः ।
गुरोर्वचनमादाय धर्मो वस्स भविष्यति ॥* ६४॥

रामः—

श्रुत्वा तु वचनं मातुः क्रुद्धायास्ते भुजङ्गमाः ।
कृच्छ्रेणैवान्वमोदन्त केचिद्धित्वा दिशो गताः ॥ ६५॥

ये प्रतस्थुर्दिशस्तत्र क्रुद्धा तानशपद्वशम् ।
भुजङ्गमानां माता वै कद्रूर्वैरकरी तदा ॥ ६६॥

कद्रूः—

उत्पत्स्यति हि राजन्यः पाण्डवो जनमेजयः ।

* सर्वेषु कोशेषु अत्रैवाध्यायसमाप्तिर्दृश्यते

चतुर्थो धन्विनां श्रेष्ठात् कुन्तीपुत्राद्धनञ्जयात् ॥ ६७॥

स सर्पसत्रमाहर्ता क्रुद्धः कुरुकुलोद्वहः ।
[1]तस्मिन् सत्रेऽग्निना युष्मान् पञ्चत्वमुपनेष्यति ॥ ६८॥

रामः—

एवं च साऽशपन्माता पन्नगान् धर्मचारिणः ।
गुरोः परित्यागकृतो दोष एतद्भविष्यति ॥ ६९॥

एवं शप्ता दिशः प्राप्ताः पन्नगा धर्मचारिणः ।
विहाय मातरं प्राप्ता गता वैरकरीं तदा ॥ ७०॥

तत्र ये वृजिनं तस्याम् उपपन्ना भुजङ्गमाः ।
ते तस्य वाजिनो वाला बभूवुरसितप्रभाः ॥ ७१॥

तान् दृष्ट्वा वालधिस्थांश्च पुत्रान् कद्रूरथाब्रवीत् ।
विनतामथ संहृष्टा हयोऽसौ दृश्यतामिति ॥ ७२॥

एकवर्णो न वा भद्रे पणो नौ सुव्यवस्थितः ।
उदकादुत्तरन्तं तं हयं चैव तु भामिनि ॥ ७३॥

सा त्ववक्रमतिर्देवी विनता जिह्मगामिनीम् ।
अब्रवीद्भगिनीं किञ्चिद् विहसन्तीव भारत ॥ ७४॥

विनता—

हन्त गच्छाव पश्याव सुकृतो नौ पणश्शुभे ।

---

1. अ—अर्धपञ्चकं नास्ति

दासी वा ते भविष्यामि त्वं वा दासी भविष्यसि ॥ ७५॥

रामः—

एवं स्थिरं पणं कृत्वा हयं ते तं ददर्शतुः ।
कृत्वा साक्षिणमात्मनं भगिन्यौ कुरुसत्तम ॥ ७६॥

सा दृष्ट्वैव हयं मन्दं विनता शोककर्शिता ।
श्वेतं चन्द्रांशुवालं तं कालवालं मनोजवम् ॥ ७७॥

तत्र सा व्रीलिता वाक्यं विनता साश्रुबिन्दुका ।
उवाच कालवालोऽयं तुरगो विजितं त्वया ॥ ७८॥

दासी मां प्रेषयस्वार्ये यथाकामवशां शुभे ।
दास्यश्च कामकारा हि भर्तृणां नात्र संशयः ॥* ७९॥

ततः कद्रूर्हसन्तीव विनतां धर्मचारिणीम् ।
[1]दासीवत् प्रेषयामास सा च सर्वं चकार तत् ॥ ८०॥

न विवर्णा न संक्षुब्धा न च क्रुद्धा न दुःखिता ।
प्रेष्यकर्म चकारास्या विनता कमलेक्षणा ॥ ८१॥

इमा दिशश्चतस्रोऽस्याः प्रेष्यभावेन वर्तिताः ।
अथ स्म वैनतेयं वै बलदर्पौ समीयतुः ॥ ८२॥

---

* सर्वेषु कोशेषु अत्रैवाध्यायसमाप्तिर्दृश्यते

1. क-घ—प्रेषयामास कार्येषु

तं दर्पवशमापन्नं परिधावन्तमन्तिकात् ।
ददर्श नारदो राजन् देवर्षिर्दर्पसंयुतम् ॥ ८३॥

तमब्रवीद्देवऋषिर् नारदः प्रहसन्निव ॥ ८४

नारदः—

किं दर्पवशमापन्नो न वै पश्यसि मातरम् ।
बलेन दृप्तस्सततम् अहंमानकृतस्सदा ॥ ८५
दासीं पन्नगराजस्य मातुरन्तर्गृहे सतीम् ॥ ८५॥

रामः—

[1]तमब्रवीद्वैनतेयः कर्म किं तन्महामते ।
यज्जनित्री मयि सुते जाता दासी तपस्विनी ॥ ८६॥
अथाब्रवीदृषिर्वाक्यं दीव्यती विजिता खग ।
[2]निकृत्या पन्नगेन्द्रस्य मात्रा पुत्रैः पुरा सह ॥ ८७॥

गरुडः—

कथं जिता निकृत्याऽसौ भगवञ्जननी मम ।
ब्रूहि तन्मे यथावृत्तं श्रुत्वा वेत्स्ये ततः परम् ॥ ८८॥

रामः—

ततस्तस्य यथावृत्तं सर्वं तन्नारदस्तदा ।
आचख्यौ भरतश्रेष्ठ यथावृत्तं पतत्रिणः ॥ ८९॥

1. क-घ—अर्धचतुष्टयं नास्ति
2. अ—नास्तीदमर्धम्

तच्छ्रुत्वा वैनतेयस्य क्रोधो हृदि समाविशत् ।
जगर्ह पन्नगान् सर्वान् सह मात्रा परन्तप ॥ ९०॥

ततस्तु रोषाद्दुःखाच्च तूर्णमुत्प्लुत्य पक्षिराट् ।
जगाम यत्र माताऽस्य कृच्छ्रे महति वर्तते ॥ ९१॥

तत्रापश्यत् ततो दीनां जटिलां मलिनां कृशाम् ।
तोयदेन प्रतिच्छन्नां सूर्याभामिव मातरम् ॥ ९२॥

तस्य दुःखाच्च रोषाच्च नेत्राभ्यामश्रवास्रवत् ।
प्रवृत्तिं च निवृत्तिं च पौरुषे प्रतितस्थुषः ॥ ९३॥

अनुक्त्वा मातरं किञ्चित् पतत्रिवरपुङ्गवः ।
कद्रूमेव स धर्मात्मा वचनं प्रत्यभाषत ॥ ९४॥

गरुडः—

यदि धर्मेण मे माता जिता यद्यप्यधर्मतः ।
ज्येष्ठा त्वमसि मे माता धर्मस्सर्वस्स मे मतः ॥ ९५॥

इयं तु मे स्यात् कृपणा मयि पुत्रेऽम्ब दुःखिता ।
अनुजानीहि तां साधु मत्कृते धर्मदर्शिनि ॥ ९६॥

रामः—

कद्रूश्श्रुत्वाऽस्य तद्वाक्यं वैनतेयस्य धीमतः ।
उवाच वाचं दुष्प्रज्ञा दुःखक्रोधविमूर्च्छिता ॥ ९७॥

कद्रूः—

नाहं तव न ते मातुर् वैनतेय कथञ्चन ।
कुर्यां प्रियमनिष्टात्मा मां ब्रवीषि खग द्विज ॥ ९८॥

रामः—

तां तथा ब्रुवतीं वाक्यम् अनिष्टां क्रूरभाषिणीम् ।
दारुणां सूनृताभिस्ताम् अनुनेतुं प्रचक्रमे ॥ ९९॥

गरुडः—

ज्येष्ठा त्वमसि कल्याणि मातुर्मे भामिनि प्रिया ।
सोदर्या मम चासि त्वं ज्येष्ठा माता न संशयः ॥ १००॥

कद्रूः—

विहङ्गम यथाकामं गच्छ कामगम द्विज ।
सूनृताभिस्त्वया माता नादासी शक्यमण्डज ॥ १०१॥

अमृतं यद्याहरेस्त्वं विहङ्ग जननीं तव ।
अदासीं त्वमपश्येमां वैनतेय न संशयः ॥* १०२॥

रामः—

तथेत्युक्त्वा तु विहगः प्रतिज्ञाय महाद्युतिः ।
अमृताहरणे वाचं ततः पितरमब्रवीत् ॥ १०३॥

गरुडः—

कामं हि सूनृता वाचो विसृज्य च मुहुर्मुहुः ।

* सर्वेषु कोशेषु अत्रैवाध्यायसमाप्तिः

यच्चाप्यनुज्ञां मातुर्वै न च सा ह्यनुमन्यते ॥ १०४॥

सा मा बहुविधा वाचो वज्रकल्पा विसृज्य वै ।
भगवन् विनता दासी मम माता महाद्युते ॥ १०५॥

कद्रूः प्रेषयते चैव दासीयमिति चाब्रवीत् ।
आहरामृतमित्येव विनता मोक्ष्यते ततः ॥ १०६॥

सोऽहं मातुर्विमोक्षार्थम् आहरिष्य इति ब्रुवन् ।
अमृतं प्रार्थितस्तूर्णं हर्तुमप्रतिनन्द्य वै ॥ १०७॥

पिता—

अमृतं तात दुष्प्रापं देवैरपि कुतस्त्वया ।
रक्ष्यते हि भृशं पुत्र रक्षिभिस्तन्निबोध मे ॥ १०८॥

गुप्तमद्भिर्भृशं साधु सर्वतः परिवारितम् ।
अनन्तरमथो गुप्तं ज्वलता जातवेदसा ॥ १०९॥

ततश्शतसहस्राणि प्रयुतान्यर्बुदानि च ।
रक्षन्त्यमृतमत्यर्थं किङ्करा नाम राक्षसाः ॥ ११०॥

तेषां शक्त्यश्च शूलाश्च शतघ्न्यः पट्टसास्तथा ।
आयुधा रक्षिणां तात वज्रकल्पाश्शिलास्तथा ॥ १११॥

ततो जालेन महता अपनद्धं समन्ततः ।
अयस्मयेन वै तात वृत्रहन्तुस्स्म शासनात् ॥ ११२॥

तत्त्वमेवंविधं तात कथं प्रार्थयसेऽमृतम् ।

सुरक्षितं वज्रभृता वैनतेय विहङ्गम ॥ ११३॥

गरुडः—

पुत्रगृध्या ब्रवीम्येतच् छृणु तात विनिश्चयम् ।
बलवानुपायवानस्मि भूयः किं करवाणि ते ॥ ११४॥

रामः—

तमब्रवीत् पिता हृष्टः प्रहसन् वै पुनः पुनः ॥ ११५

काश्यपः—

यदि तौ भक्षयेस्तात क्रूरौ कच्छपवारणौ ।
तथा बलममेयं ते भविता तन्न संशयः ॥ ११६
अमृतस्यैव चाहर्ता भविष्यसि न संशयः ॥ ११६॥

गरुडः—

क्व तौ क्रूरौ महाभाग वर्तेते हस्तिकच्छपौ ।
भक्षयिष्याम्यहं तात बलस्याप्यायनं प्रति ॥ ११७॥

काश्यपः—

पर्वतो वै समुद्रान्ते नभस्तळ्वेव तिष्ठति ।
उरगो नाम दुष्प्रापः पुरा देवगणैरपि ॥ ११८॥

गोरुतानि स विस्तीर्णः पुष्पितद्रुमसानुमान् ।
तत्र पन्थाः कृतस्तात कुञ्जरेण बलीयसा ॥ ११९॥

गोरुतान्युछ्रयस्तस्य नव सप्त च पुत्रक ।
गच्छताऽऽगच्छता चैव क्षपितस्स महागिरिः ॥ १२०॥

तावान् भूमिसमस्तात कृतः पन्थास्समुत्थितः ।
तेन गत्वा स मातङ्गः पिपासुर्युद्धमिच्छति ॥ ९२१॥

तमतीत्य तु शैलेन्द्रं ह्रदः कोकनदायुतः ।
कनकेति च विख्यातस् तत्र कूर्मो महाबलः ॥ १२२॥

गोरुतानि स विस्तीर्णः कच्छपः कुञ्जरश्च सः ।
आयामतश्चाद्रिसमौ तेजोबलसमन्वितौ ॥ १२३॥

पुनरावृत्तिमापन्नौ तावेतौ मधुकैटभौ ।
जन्मान्तरे विप्रमूढौ परस्परवधैषिणौ ॥ १२४॥

यदा स नागो व्रजति पिपासुस्तं जलाशयम् ।
तदैनं कच्छपो रोषात् प्रतियाति महाबलः ॥ १२५॥

नखैश्च दशनैश्चापि निमज्योन्मज्य चासकृत् ।
विरराद्राग्रहस्तेन कुञ्जरं तं जलेचरः ॥ १२६॥

नागराडपि तोयार्थी पिपासुश्चरणैरपि ।
अग्रहस्तेन दन्ताभ्यां निवारयति वारिजम् ॥ १२७॥

स तु तोयादनुत्तिष्ठन वारिजो गजयूथपम् ।
नखैश्च दशनैश्चैव द्विरदं प्रतिपेधति ॥ १२८॥

निवारितो गजश्रेष्ठः पुनर्गच्छति स्वं वनम् ।
पिपासुः क्षिन्नहस्ताग्रो रुधिरेण समुक्षितः ॥ १२९॥

तौ गच्छ सहितौ पुत्र यदि शक्नोषि भक्षय ।

न तौ पृथक् त्वया शक्यावप्रमत्तौ जले स्थितौ ॥ १३०॥

गरुडः—

कथं तौ भगवञ् शक्यौ मया वारणकच्छपौ ।
युगपद्ग्रहीतुं तं मे त्वम् उपायं वक्तुमर्हसि ॥ १३१॥

काश्यपः—

योद्धुकामे गते तस्मिन् मुहूर्तं स जलेचरः ।
उत्तिष्ठति जलात्तूर्णं योद्धुकामः पुनः पुनः ॥ १३२॥

जलजं निर्जलं तात प्रमत्तं चैव वारणम् ।
ग्रहीष्यसि पतङ्गेश [1]नान्यो योगोऽत्र विद्यते ॥ १३३॥

रामः—

इत्येवमुक्तो विहगस् तद्गत्वा वनमुत्तमम् ।
ददर्श वारणेन्द्रं तं मेघाचलसमप्रभम् ॥ १३४॥

तां स नागो गिरेर्वीथिं सम्प्राप्त इव भारत ।
स तं दृष्ट्वा महाभागस् सम्प्रहृष्टतनूरुहः ॥ १३५॥

विभक्षयिषतो राजन दारुणस्य महात्मनः ।
मातङ्गं कच्छपं चैव प्रहर्षस्सुमहानभूत् ॥ १३६॥

अथ वेगेन महता खेचरस्स महाबलः ।
सङ्कुच्य सर्वगात्राणि कृच्छ्रेणैवान्वपद्यत ॥ १३७॥

---

* सर्वेषु कोशेषु अत्रैवाध्यायसमाप्तिः

1. क-घ—तावद्यो

तथा गत्वा तमध्वानं वारणप्रवरो बली ।
नेशश्वास महाश्वासश् श्रमाद्विश्रमणाय च ॥ १३८॥

तस्य निश्वासवातेन तेन गन्धेन चैव ह ।
उदतिष्ठन्महाकूर्मो वारणप्रतिषेधकः ॥ १३९॥

तयोस्सुतुमुलं युद्धं ददर्श पतगेश्वरः ।
[1]कच्छपेन्द्रद्विरदयोर् इन्द्रप्रह्लादयोरिव ॥ १४०॥

स्पृशन्तमग्रहस्तेन तोयं वारणयूथपम् ।
दन्तैर्नखैश्च जलजो वारयामास भारत ॥ १४१॥

जलजं वारणोऽप्येवं चरणैः पुष्करेण च ।
प्रत्यषेधन्निमज्जन्तम् उन्मज्जन्तं तथैव च ॥ १४२॥

[2]मुहूर्तमभवद्युद्धं तयोर्भीमप्रदर्शनम् ।
अथ तस्माज्जलाद्राजन् कच्छपस्स्थलमास्थितः ॥ १४३॥

स तु नागः प्रभग्नोऽपि पिपासुर्न निवर्तते ।
[3]तोयगृध्नुरशनैस्तर्षाद् अपासर्पत पृष्ठतः ॥ १४४॥

तं दृष्ट्वा जलजस्तूर्णम् अपसर्पन्तमाहवे ।

---

1. अ-क-घ—अर्धपञ्चकं नास्ति
2. अ—द्विजकच्छपयोरेवम् अभवद्भीमदर्शनम् ।
   क-घ—कच्छपेन द्विजेन्द्रस्य युद्धं भीमप्रदर्शनम् ।
3. अ—अर्धद्वयं नास्ति

[1]अभिदुद्राव वेगेन वज्रपाणिरिवासुरम् ॥ १४५॥

तं रोषात् स्थलमुत्तीर्णम् असम्प्राप्तं गजोत्तमम् ।
उभावव समस्तौ तु जग्राह विनतासुतः ॥ १४६॥

चरणेन तु सव्येन जग्राह स गजोत्तमम् ।
प्रस्कन्दमानं बलवान् दक्षिणेन तु कच्छपम् ॥ १४७॥

उत्पपात ततस्तूर्णं पन्नगेन्द्रनिषूदनः ।
दिवं खं च समावृत्य पक्षाभ्यामपराजितः ॥ १४८॥

तेन चोत्पतता तूर्णं सङ्गृहीतैर्नखैर्भृशम् ।
वज्रगर्भैस्सुनिशितैः प्राणांस्तूर्णं मुमोचतुः ॥ १४९॥

तौ गृह्य बलवांस्तूर्णं स्रस्तपादशिरोधरौ ।
विवल्गन्निव खे क्रीडन् खेचरोऽभिजगाम ह ॥ १५०॥

[2]अत्तुकामस्ततो वीरः पृथिव्यां पृथिवीपते ।
निरैक्षत न चापश्यद् द्रुमं पर्याप्तमासितुम् ॥ १५१॥

नैमिशं त्वथ सम्प्राप्य देवारण्यं महाद्युतिः ।
अपश्यत द्रुमं कञ्चिच् छाखास्कन्धसमावृतम् ॥ १५२॥

हिमवच्छिखरप्रख्यं योजनद्वयमुच्छ्रितम् ।
परिणाहेन राजेन्द्र नल्वमात्रं समन्ततः ॥ १५३॥

---

1. अ—गजकच्छपयोरेवं वर्तमाने महाहवे । [अधिकः पाठः]
2. ख– चर्तुकाम

तस्य शाखाऽभवत् काचिद् आयता पञ्चयोजनम् ।
दृढमूला दृढस्कन्धा बहुपत्रसमाचिता ॥ १५४॥
तत्रोपविष्टस्सहसा वैनतेयो निगृह्य तौ ।
[1]अत्तुकामस्ततश्शाखां तस्य वेगादपातयत् ॥ १५५॥
तां पतन्तीमभिप्रेक्ष्य प्रेक्ष्य चर्षिगणानघः ।
आसीनान् वसुभिस्सार्धं सत्रेण जगतीपते ॥ १५६॥
वैखानसान नाम यतीन् वालखिल्यगणानपि ॥ १५७
तत्र भीराविशत् तस्य [2]पतगेन्द्रस्य भारत ॥ १५७॥
तान दृष्ट्वा स यतींस्तत्र समासीनान् सुरैस्सह ।
तुण्डेन गृह्य तां शाखाम् उत्पपात खगेश्वरः ॥ १५८॥
तौ च पक्षी भुजङ्गाशो व्योम्नि क्रीडन्निवा[3]व्रजत् ॥ १५९
[4]तं दृष्ट्वा गुरुसम्भारं प्रगृह्योत्पतितं खगम् ।
ऋषयस्तेऽब्रुवन् सर्वे गरुडोऽयमिति स्म ह ॥ १६०
न त्वन्यः क्षमते कश्चिद् यथाऽयं वीर्यवान् खगः ॥ १६०॥
असौ गच्छति धर्मात्मा गुरुभारसमन्वितः ।
अयं क्रीडन्निवाकाशे तस्माद्गरुड एव सः ॥ १६१॥
एवं ते [5]समयं सर्वे वसवश्च दिवौकसः ।

---

1. अ—विशश्राम ततः
2. क-घ—पक्षिराज
3. क-घ—द्रवत्
4. अ—तदा सर्वेऽपि तं दृष्ट्वा
5. ख—मुनयः सर्वे

अकार्षुः पक्षिराजस्य गरुडेत्येव नाम ह ॥ १६२॥

स पक्षी पृथिवीं सर्वाम् परिधावंस्ततस्ततः ।
मुमुक्षुरशाखिनश्शाखां न स्म देशमपश्यत ॥ १६३॥

स वाचमशृणोद्दिव्याम् उपर्युपरि जल्पतः ।
देवदूतस्य विस्पष्टम् आभाष्य गरुडेति च ॥ १६४॥

देवदूतः—

वैनतेय कुविन्देषु समुद्रान्ते महाबल ।
पात्यतां शाखिनश्शाखा न भीम्ते धर्मनिश्चयात् ॥ १६५॥

रामः—

तच्छ्रुत्वा गरुडस्तूर्णं जगाम लवणाम्भसः ।
उद्देशं यत्र ते मन्दाः कुविन्दाः पापकर्मिणः ॥ १६६॥

तत्र गत्वा ननशाखां मुमोच पततां वरः ।
तया हता जनपदास् तदा षट्त्रिंशतो नृप ॥ १६७॥

स देशो राजशार्दूल ख्यातः परमदारुणः ।
शाखापतग इत्येव कुविन्दानां दुरात्मनाम् ॥ १६८॥

हत्वा तं पक्षिशार्दूलः कुविन्दानां जनव्रजम् ।
उपोपविश्य शैलाग्रे भक्षयामास तावुभौ ॥ १६९॥

* सर्वेषु कोशेषु अत्रैवाध्यायसमाप्तिः

वारणं कच्छपं चैव संहृष्टस्स पतत्रिराट् ॥ १७०

तयोस्स रुधिरं पीत्वा मेदसी च परन्तप ।
संहृष्टः पततां श्रेष्ठो लब्ध्वा बलमनुत्तमम् ॥ १७१
जगाम देवराजस्य भवनं पन्नगाशनः ॥ १७१॥

तं प्रणम्य महात्मानं पावकं विष्फुलिङ्गिनम् ।
रात्रिंदिवं प्रज्वलितं रक्षार्थममृतस्य ह ॥ १७२॥

तं दृष्ट्वा विहगेन्द्रस्य भयं तीव्रमथाविशत् ॥ १७३
न तु तोयान्न रक्षिभ्यो भयमस्योपजायते ।
पक्षित्वमात्मनो दृष्ट्वा ज्वलन्तं च हुताशनम् ॥ १७४
पितामहमथो गत्वा ददर्श भुजगाशनः ॥ १७४॥

तं प्रणम्य महात्मानं गरुडः प्रयताञ्जलिः ।
प्रोवाच तदसन्दिग्धं वचनं पक्षिराट् ततः ॥ १७५॥

गरुडः—

उद्यतं गुरुकृत्ये मां भगवन् धर्मनिश्चितम् ।
विमोक्षणार्थं मातुर्हि दासीभावादनिन्दित ॥ १७६॥
कद्रूसकाशममृतं मया हर्तव्यमीश्वर ।
तदा मे जननी देवी [1]दासीभावात् प्रमोक्ष्यते ॥ १७७॥
तत्रामृतं प्रज्वलितो नित्यमीश्वर रक्षति ।

1. क—तत्राहारात् ख—तदाहारात्

हिरण्यरेता भगवान् पाकशासनशासनात् ॥ १७८॥
तत्र मे देवदेवेश भयं तीव्रमथाविशत् ।
ज्वलन्तं पावकं दृष्ट्वा पक्षित्वं चात्मनः प्रभो ॥ १७९॥
समतिक्रमितुं शक्यः कथं स्यात् पावको मया ।
तस्याभ्युपायं वरद वक्तुमीशोऽसि मे प्रभो ॥ १८०॥

रामः—

तमब्रवीन्महाभागं तप्यमानं विहङ्गमम् ।
अग्नेस्संशमनोपायम् उत्स्मयन् स पुनः पुनः ॥ १८१॥

ब्रह्मा—

पयसा शाम्यते वत्स सर्पिषा च हुताशनः ।
शरीरस्थोऽपि भूतानां किं पुनः प्रज्वलन् भुवि ॥ १८२॥
नवनीतं पयो वाऽपि पावके त्वं समादधेः ।
ततो गच्छ यथाकामं न त्वा धक्ष्यति पावकः ॥* १८३॥

रामः—

पितामहवचश्श्रुत्वा गरुडः पततां वरः ।
जगाम गोकुलं किञ्चिन्नवनीतजिहीर्षया ॥ १८४॥
नवनीतं तथाऽपश्यन्मथितं कलशे स्थितम् ।
तदादाय ततोऽगच्छद् यतस्तद्रक्ष्यतेऽमृतम् ॥ १८५॥
स तत्र गत्वा पतगस् निर्यक्तोयं महाबलः ।

* सर्वेषु कोशेषु अतैवाध्यायसमाप्तिः

[1]हुताशनमपक्रम्य नवनीतमपातयत् ॥ १८६॥
सोऽर्चिष्मान् मन्दवेगोऽभूत् सर्पिषा तेन [2]सर्वतः ।
धूमकेतुर्न जज्वाल धूममेव ससर्ज ह ॥ १८७॥
तमतीत्याशु गरुडो हृष्टात्मा जातवेदसम् ।
रक्षांसि समतिक्रामन् पक्षवातेन पातयन् ॥ १८८॥
ते पतन्ति शिरोभिश्च जानुभिश्चरणैस्तथा ।
उत्सृज्य शस्त्रावरणं पक्षिपक्षसमाहताः ॥ १८९॥
उत्पत्य पर्वतं नागं हत्वा चक्रं व्यतीत्य च ।
अरान्तरेण शिरसा भित्त्वा जालं समाद्रवत् ॥ १९०॥
स भित्त्वा शिरसा जालं वज्रवेगसमो बली ।
[3]उज्जहार ततश्शीघ्रम् अमृतं भुजगाशनः ॥ १९१॥
तदादाय द्रवच्छीघ्रं गरुडश्श्वसनो यथा ।
अथ सन्नाहमकरोद् वृत्रहा विबुधैस्सह ॥ १९२॥
ततो मातलिना युक्तं हरिभिस्स्वर्णमालिभिः ।
आरुरोह रथं शीघ्रं सूर्याग्निसमतेजसम् ॥ १९३॥
सोऽभिद्रवत् पक्षिवरं वृत्रहा पाकशासनः ।
उद्यम्य निशितं वज्रं वज्रहस्तो महाबलः ॥ १९४॥

1. अ—हुताशनं परिक्रम्य 2. अ-ख—तर्पितः
3. क-घ—आजहार ततः क्षिप्र

तथैव गरुडो राजन् वज्रहस्तात् समाद्रवत् ।
ततो वै मातलिं प्राह शीघ्रं वाहय वाजिनः ॥ १९५॥
अथ दिव्यं महाघोरं गरुडाय ससर्ज ह ।
वज्रं सहस्रनयनस् तिग्मवेगपराक्रमः ॥ १९६॥
उत्सिसृक्षन्तमाज्ञाय वज्रं वै त्रिदशेश्वरम् ।
तूर्णं वेगतरो भूत्वा जगाम पततां वरः ॥ १९७॥
पितामहनिसर्गेण ज्ञात्वा लब्धवरः खगः ।
आयुधानां वरं वज्रम् अथ शक्रमुवाच ह ॥ १९८॥

गरुडः—

वृत्रहन्नेष वज्रस्ते वरलब्धः पितामहात् ।
अतस्सम्मानमाकाङ्क्षन् मुञ्चाम्येकं तनूरुहम् ॥ १९९॥
एतेनायुधराजेन यदि शक्रोपि वृत्रहन् ।
हन्यास्त्वं परया शक्त्या गच्छाम्यहमनामयः ॥ २००॥

रामः—

तत्तु तूर्णं तदा वज्रं स्वेन वेगेन भारत ।
जघान परया शक्त्या न चैनमदहद्भृशम् ॥ २०१॥
ततो देवर्षयो राजन् गच्छन्तो वै विहायसा ।
दृष्ट्वा वज्रं विपक्तं तं पक्षिपर्णेऽब्रुवन् वचः ॥ २०२॥

देवर्षयः—

सुपर्णः पक्षिगरुडो यस्य पर्णे वरायुधम् ।

विषक्तं देवराजस्य वृत्रहर्तुस्सनातनम् ॥ २०३॥

भीष्मः—

एवं सुपर्णो विहगो वैनतेयः प्रतापवान् ।
ऋषयस्तं विजानन्ति चाग्नेयं वैष्णवं पुनः ॥ २०४॥

वेदाभिष्टुतमत्यन्तं स्वर्गमार्गफलप्रदम् ।
तनुपर्णं सुपर्णस्य जगृहुर्बर्हिणस्तथा ॥ २०५॥

मयूरा विस्मितास्सर्वे आद्रवन्ति स्म वज्रिणम्* ॥ २०६

ततो वज्रं सहस्राक्षो दृष्ट्वा सक्तं वरायुधम् ।
ऋषींश्च दृष्ट्वा सहसा सुपर्णमिदमब्रवीत् ॥ २०७

इन्द्रः—

न ते सुपर्ण पश्यामि प्रभावं [1]येन मे भवान् ।
इत्युक्ते न मया रक्षा शक्या कर्तुमतोऽन्यथा ॥ २०८

इदं वज्रं मया सार्धं निवृत्तं हि यथागतम् ॥ २०८॥

भीष्मः—

ततस्सहस्रनयने निवृत्ते गरुडस्तथा ।
कद्रूमभ्यागमत्तूर्णम् अमृतं गृह्य भारत ॥ २०९॥

गरुडः—

तदाहृतं मया शीघ्रम् अमृतं जननीकृते ।

---

* सर्वेषु कोशेषु अत्रैवाध्यायसमाप्तिर्दृश्यते
1. ख—तेन योधये

अदासी सा भवत्वद्य विनता धर्मचारिणी ॥ २१०॥

कद्रूः—

स्वागतं स्वाहृतं चेदम् अमृतं विनतात्मज ।
अदासी जननी तेऽद्य पुत्र कामवशा शुभा ॥ २११॥

भीष्मः—

एवमुक्ते तदा सा च सम्प्राप्ता विनता गृहम् ॥ २१२

[1]उपनीय यथान्यायं विहगो बलिनां वरः ।
स्मृत्वा निकृत्या विजयं मातुस्सम्प्रतिपद्यत ॥ २१३

वधं च भुजगेन्द्राणां ये बालास्तस्य वाजिनः ।
बभूवुरसितप्रख्या निकृत्या वै जितास्त्वया ॥ २१४

तामुवाच ततो न्याय्यं विहगो बलिनां वरः ॥ २१४॥
उज्जहारामृतं तूर्णम उत्पपात च रंहसा ॥ २१५

तद् गृहीत्वाऽमृतं तूर्णं प्रयान्तमपराजितम् ।
कद्रूर्भुजङ्गजननी सुपर्णमिदमब्रवीत् ॥ २१६

कद्रूः—

किमर्थं वैनतेय त्वम आहृत्यामृतमुत्तमम् ।
पुनर्हरसि दुर्बुद्धे मा जातु वृजिनं कृथाः ॥ २१७

सुपर्णः—

अमृताहरणं मेऽद्य यत्कृतं जननीकृते ।

---

1. अ-क्-घ--नास्तीदमर्धम्

भवत्या वचनादेतद् आहरामृतमित्यथ ॥ २१८

आहृतं तदिदं शीघ्रं मुक्ता च जननी मम ।
हराम्येष पुनस्तत्र यत एतन्मयाऽऽहृतम् ॥ २१९

यदि मां भवती ब्रूयाद् अमृतं मे च दीयताम् ।
तथा कुर्यां न वा कुर्यां न हि त्वममृतक्षमा ॥ २२०

मया धर्मेण सत्येन विनता च समुद्धृता ॥ २२०॥

भीष्मः—

ततो गत्वाऽथ गरुडः पुरन्दरमुवाच ह ॥ २२१

गरुडः—

इदं मया वृत्रहंस्तद्धृतं तेऽमृतमुत्तमम ।
मात्रर्थे हि तथैवेदं गृह्णामृतमाहृतम् ॥ २२२

माता च मम देवेश दासीत्वमुपजग्मुषी ।
भुजङ्गमानां मातुर्वै सा मुक्ताऽमृतदर्शनात् ॥ २२३

भीष्मः—

एतच्छ्रुत्वा सहस्राक्षस् सुपर्णमनुमन्यत ।
उवाच च मुदा युक्तो दिष्ट्या दिष्ट्येति वासवः ॥ २२४

ऋषयो ये सहस्राक्षम् उपासन्ते सुरैस्सह ।
ते सर्वे च मुदा युक्ता विश्वे देवास्तथैव च ॥ २२५

ततस्तमृषयस्सर्वे देवाश्च भरतर्षभ ।

ऊचुः [1]पुरन्दरं हृष्टा गरुडो लभतां वरम् ॥ २२६

ततश्शचीपतिर्वाक्यम् उवाच प्रहसन्निव ॥ २२६॥

इन्द्रः—

[2]जनिष्यति हृषीकेशस् स्वयमेवैष पक्षिराट् ।
केशवः पुण्डरीकाक्षश् शूरपुत्रस्य वेश्मनि ॥ २२७॥
स्वयं धर्मस्य रक्षार्थं विभज्य भुजगाशनः ॥ २२८

भीष्मः—

एष ते पाण्डवश्रेष्ठ गरुडोऽथ पतत्रिराट् ।
सुपर्णो वैनतेयश्च कीर्तितो भद्रमस्तु ते ॥ २२९
तदेतद्वदतां श्रेष्ठ मयाऽऽख्यानं प्रकीर्तितम् ।
सुपर्णस्य महाबाहो किं भूयः कथयामि ते ॥ २३०

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां
अनुशासनपर्वणि द्वादशोऽध्यायः ॥ १२ ॥
॥ ८९ ॥ आनुशासनिकपर्वणि द्वादशोऽध्यायः ॥ १२ ॥
[अस्मिन्नध्याये २३० श्लोकाः]

---

1. क-ख—परमसंहृष्टा
2. ख—भजिष्यति हृषीकेशम्

॥ त्रयोदशोऽध्यायः ॥

भीष्मेण युधिष्ठिरं प्रति ब्राह्मणाय प्रतिश्रुतार्थाप्रदानस्यानर्थहेतुतार्थां दृष्टान्ततया सृगालवानरसंवादानुवादः ॥

युधिष्ठिरः—

ब्राह्मणानां तु ये लोके प्रतिश्रुत्य पितामह ।
न प्रयच्छन्ति लोकास्ते के भवन्ति महामते ॥ १

प्रतिश्रुत्य दुरात्मानो न प्रयच्छन्ति ये नराः ॥ १॥

भीष्मः—

यो न दद्यात् प्रतिश्रुत्य स्वल्पं वा यदि वा बहु ।
आशास्तस्य हतास्सर्वाः क्षीवस्येव प्रजाफलम् ॥ २॥

यां रात्रिं जायते पापो यां च रात्रिं विनश्यति ।
एतस्मिन्नन्तरे यद्यत् सुकृतं तस्य भारत ॥ ३॥

यच्च तस्य हुतं किञ्चित् सर्वं तस्योपहन्यते ॥ ४

अत्रैतद्वचनं प्राहुर् धर्मशास्त्रविदो जनाः ।
निशाम्य भरतश्रेष्ठ बुद्ध्या परमयुक्तया ॥ ५

अपि चोदाहरन्तीमं धर्मं धर्मविदो जनाः ।
अश्वानां श्यामकर्णानां सहस्रेण न मुच्यते ॥ ६

अत्राप्युदाहरन्तीमम् इतिहासं पुरातनम् ।

सृगालस्य च संवादं वानरस्य च सत्तम ॥ ७

तौ सहायौ पुरा ह्यास्तां मानुषत्वे परन्तप ।
अन्यां योनिं समुत्पन्नौ सार्गालीं वानरीं तथा ॥ ८

सम्भाषणं ततस्सख्यं तत्र तत्र परस्परम् ॥ ८॥

ततः पुरा सहायं तं सृगालं वानरोऽब्रवीत् ।
श्मशानमध्ये सम्प्रेक्ष्य पूर्वजातिमनुस्मरन् ॥ ९॥

वानरः—

किं त्वया पापकं कर्म कृतं पूर्वं सुदारुणम् ।
यत् त्वं श्मशाने मृतकान पूतिकानत्सि कुत्सितान् ॥ १०॥

भीष्मः—

एवमुक्तः प्रत्युवाच सृगालो वानरं तदा ॥ ११

सृगालः—

ब्राह्मणस्य प्रतिश्रुत्य न मया तदपाकृतम् ।
तत्कृते पापिकां योनिम् आपन्नोऽस्मि प्लवङ्गम ॥ १२

[1]तस्मादेवंविधं भक्ष्यं भक्षयामि बुभुक्षितः ॥ १२॥

भीष्मः—

[2]स चाप्याह ब्राह्मणानां फलाहारः प्लवङ्गमः ॥ १३

वानरः—

तस्मान्न ब्राह्मणस्वं तु हर्त्तव्यं विदुषा सता ।
सीमाविवादे मोक्तव्यम् दातव्यं च प्रतिश्रुतम् ॥ १४

1. क-घ—इदमर्धं नास्ति 2. क-घ—इदमर्धं नास्ति

भीष्मः—

इत्येतद्भवतो राजन् ब्राह्मणस्य मया श्रुतम् ।
[1]तथा कथां कथयतः पुण्यां धर्म्यां पुरातनाम् ॥ १५

श्रुतं चापि मया भूयः कृष्णस्यापि विशां पते ॥ १५॥

न हर्तव्यं विप्रधनं क्षन्तव्यं तेषु नित्यशः ।
बालाश्च नावमन्तव्या दरिद्राः कृपणा अपि ॥ १६॥

एवमेवेह मां नित्यम् ब्राह्मणास्सन्दिशन्ति वै ।
प्रतिश्रुतं भवेद्देयं आशाकामो हि ब्राह्मणः ॥ १७॥

ब्राह्मणो ह्याशया पूर्वं कृतया पृथिवीपते ।
सुसमिद्धो यथा दीप्तः पावकस्तद्विधस्स्मृतः ॥ १८॥

यं निरीक्षति सङ्क्रुद्ध आशया पूर्वयातया ।
प्रदहेत हि तं राजन् कक्षमक्ष्यभुग्यथा ॥ १९॥

स एष च यदा तुष्टो वचसा प्रतिनन्दति ।
भवत्यगदसङ्काशो विषये तस्य भारत ॥ २०॥

पुत्रान् पौत्रान् पशूंश्चैव बान्धवान् सचिवांस्तथा ।
पुरं जनपदं चैव शान्तिरिष्टेव पोषति ॥ २१॥

एतद्धि परमं तेजो ब्राह्मणस्येह दृश्यते ।
सहस्रकिरणस्येव सवितुर्धरणीतले ॥ २२॥

---

1. क-घ—श्रुतं कथाः कथयतो धर्मज्ञस्य पुरातनाः । [पाठान्तरम्]

तस्माद्दातव्यमित्येव प्रतिश्रुत्य युधिष्ठिर ।
यदीच्छेच्छोभनां जातिं प्राप्तुं भरतसत्तम ॥ २३॥

ब्राह्मणस्य हि दत्तेन ध्रुवं स्वर्गो ह्यनुत्तमः ।
शक्यः प्राप्तुं विशेषेण दानं हि महती क्रिया ॥ २४॥

इतो दत्तेन जीवन्ति देवताः पितरस्तथा ।
तस्माद्देयानि दानानि ब्राह्मणानां परन्तप ॥ २५॥

[1]महद्धि भरतश्रेष्ठ ब्राह्मणस्तीर्थमुच्यते ।
वेलायां न तु कस्याञ्चिद् विप्रो गच्छेदपूजितः ॥ २६॥

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां
अनुशासनपर्वणि त्रयोदशोऽध्यायः ॥ १३ ॥
॥ ८९ ॥ आनुशासनिकपर्वणि त्रयोदशोऽध्यायः ॥ १३ ॥
[अस्मिन्नध्याये २६॥ श्लोकाः]

---

1. अ-क-ङ—नास्तीदमर्धम्

॥ चतुर्दशोऽध्यायः ॥

भीष्मेण युधिष्ठिरं प्रति शूद्रोपदेशस्यानर्थहेतुतायां दृष्टान्ततया मुनि-शूद्रयोः कथाकथनम् ॥

युधिष्ठिरः—

मित्रसौहृदभावेन उपदेशं करोति यः ।
जात्याऽवरस्य राजर्षे दोषस्तस्य भवेन्न वा ॥ १

एतदिच्छामि तत्त्वेन व्याख्यातुं वै पितामह ।
सूक्ष्मा गतिर्हि धर्मस्य यत्र मुह्यन्ति [1]मानवाः ॥ २

भीष्मः—

अत्र ते वर्तयिष्यामि शृणु मे भरतर्षभ ।
दुरुक्तवचनं राजन् यथान्यायं यथागमम् ॥ ३

ऋषीणां वदतां पूर्वं श्रुतमार्षमथा पुरा ॥ ३॥

उपदेशो न कर्तव्यो जातिहीनस्य कस्य चित् ।
उपदेशे महान् दोष उपाध्यायस्य उच्यते ॥ ४॥

नाध्यापयेच्छूद्रमिह तथा नैव च याजयेत् ।
निदर्शनमिदं राजञ् शृणु मे भरतर्षभ ॥ ५॥

दुरुक्तवचने राजन् यथापूर्वं युधिष्ठिर ।

1. क-घ—जन्तवः

ब्रह्माश्रमपदे वृत्तं पार्श्वे हिमवतश्शुभे ॥ ६॥

तत्राश्रमपदं पुण्यं नानावृक्षगणायुतम् ।
बहुगुल्मलताकीर्णं मृगद्विजनिषेवितम् ॥ ७॥

सिद्धचारणसङ्घुष्टं रम्यं पुष्पितकाननम् ।
व्रतिभिर्बहुभिः कीर्णं तापसैरुपशोभितम् ॥ ८॥

ब्राह्मणैश्च महाभागैस् सूर्यज्वलनसन्निभैः ।
नियमव्रतसम्पन्नैस् समाकीर्णं तपस्विभिः ॥ ९॥

दीक्षितैर्भरतश्रेष्ठ यताहारैः कृतात्मभिः ।
वेदाध्ययनघोषैश्च नादितं भरर्तपभ ॥ १०॥

वालखिल्यैश्च ऋषिभिर् यतिभिश्च निषेवितम् ॥ ११

तत्र कश्चिन् समुत्साहं कृत्वा शूद्रो मुदाऽन्वितः ।
आगतो ह्याश्रमपदं पूजितश्च तपस्विभिः ॥ १२

तांस्तु दृष्ट्वा मुनिगणान् देवकल्पान् महौजसः ।
वहतो विविधा दीक्षास् सम्प्राहृष्यत भारत ॥ १३

अथास्य बुद्धिरभवत तापस्ये भरतर्षभ ।
ततोऽब्रवीत् कुलपतिं पादौ सङ्गृह्य भारत ॥ १४

शूद्रः—

तव प्रसादादिच्छामि धर्मं चर्तुं द्विजर्षभ ।
तस्मादभिगतं त्वं मां प्रव्राजयितुमर्हसि ॥ १५

वर्णावरोऽहं भगवञ् शूद्रो जात्याऽस्मि सत्तम ।
शुश्रूषां कर्तुमिच्छामि प्रपन्नाय प्रसीद मे ॥ १६

कुलपतिः—

न शक्यमिह शूद्रेण लिङ्गमाश्रित्य वर्तितुम् ।
[1]रम्यतां यदि ते बुद्धिश् शुश्रूषानिरतो भव ॥ १७

भीष्मः—

एवमुक्तस्तु मुनिना स शूद्रोऽचिन्तयन्नृप ॥ १७॥

शूद्रः—

कथमत्र मया शक्यं व्रतं श्रद्धा परा च मे ।
विज्ञानमेव भवतु करिष्ये प्रियमात्मनः ॥ १८॥

भीष्मः—

गत्वाऽऽश्रमपदाद्दूरम् उटजं कृतवांस्तु सः ॥ १९
तत्र भूमिं च वेदिं च देवतायतनानि च ।
निवेश्य भरतश्रेष्ठ नियमस्थोऽभवत् सुखम् ॥ २०
अभिषेकांश्च नियमान् देवतायतनानि च ।
बलिं कृत्वा च हुत्वा च दैवतान्यभ्यपूजयत् ॥ २१
सङ्कल्पनियमोपेतः फलाहारो जितेन्द्रियः ॥ २१॥
नित्यं सन्निहिताभिश्च ओषधीभिः फलैस्तथा ।
अतिथीन् पूजयामास यथावत् समुपागतान् ॥ २२॥
एवं हि सुमहान् कालो व्यत्यक्रामत् स तस्य वै ॥ २३

1. क-घ—गृह्यताम्

अथास्य ऋषिरागच्छत् सङ्कल्पा वै तमाश्रमम् ।
सम्पूज्य स्वागतेनर्षिं विधिवत् पर्यतोषयत् ॥ २४

अनुकूलाः कथाः कृत्वा यथावत् पर्यपृच्छत ।
ऋषिः परमतेजस्वी धर्मात्मा संयतेन्द्रियः ॥ २५

एवं स बहुशस्तस्य शूद्रस्य भरतर्षभ ।
अगच्छदाश्रममृषिश् शूद्रं द्रष्टुं नरर्षभ ॥ २६

अथ तं तापसश्शूद्रस् सोऽब्रवीद्भरतर्षभ ॥ २६॥

शूद्रः—

[1]पितृकार्यं करिष्यामि तत्र मेऽनुग्रहं कुरु ॥ २७

भीष्मः—

अथ ग्राहयितुं विप्रं शूद्रो नीवारतण्डुलान् ।
शुचिर्भूत्वा स शूद्रस्तु तस्यर्षेः पाद्यमानयत् ॥ २८

अथ दर्भांश्च पत्रींश्च ओषधीर्भरतर्षभ ।
पवित्रमासनं चैव बृसीं च समुपानयत् ॥ २९

अथ दक्षिणमाश्रित्य बृसीमपरशार्षिकाम् ।
कृतामन्यायतो दृष्ट्वा ततस्तमृषिरब्रवीत् ॥ ३०

ऋषिः—

कुरुष्वैनां पूर्वशीर्षो भव चोदङ्मुखश्शुचिः ।

भीष्मः—

स च तत् कृतवाञ् शूद्रस् सर्वं यदृषिरब्रवीत् ॥ ३१

1. अ-क-घ—अर्धचतुर्थं नास्ति

यथोपदिष्टं मेधावी दर्भादीनि यथातथम् ।
हव्यकव्यविधिं कृत्स्नम् उक्तं तेन यशस्विना ॥ ३२
ऋषिणा [1]पितृकार्येषु सदा धर्मपथे स्थितः ॥ ३२॥
पितृकार्ये कृते चापि विसृष्टस्स जगाम ह ॥ ३३
अथ दीर्घस्य कालस्य स तप्यञ् शूद्रतापसः ।
वने पञ्चत्वमगमन् सुकृतेन कृतेन वै ॥ ३४
अजायत महाराज राजवंशे महाद्युतिः ॥ ३४॥
तथैव च ऋषिस्नात कालधर्ममवाप्य ह ।
पुरोहितकुले विप्रस् स जातोऽस्य वशानुगः ॥ ३५॥
एवं तौ तत्र सम्भूतावुभौ शूद्रमुनी तदा ।
क्रमेण वर्धितौ चापि विद्यासु कुशलावुभौ ॥ ३६॥
अथर्ववेदे वेदे च बभूवर्षिस्सुनिश्चितः ।
कल्पप्रयोगे चोत्पन्ने ज्योतिष्येव परं गतः ॥ ३७॥
साङ्ग्ये चैव परा प्रीतिस् तयोश्चापि व्यवर्धत ॥ ३८
पितर्युपरते चाथ कृतशौचस्स भारत ।
अभिषिक्तः प्रकृतिभी राजपुत्रस्स पार्थिवः ॥ ३९
अभिषिक्तेन ऋषिभिर् अभिषिक्तः पुरोहितः ॥ ३९॥
स तं पुरोधाय सुखम् अवसद्भरतर्षभ ।

1. ख—धर्मका

राज्यं शशास धर्मेण प्रजाश्च परिपालयन् ॥ ४०॥
पुण्याहवाचने नित्यं धर्मकृत्येषु चासकृत् ।
उत्स्मयन् प्राहसच्चापि दृष्ट्वा राजा पुरोहितम् ॥ ४१॥
एवं स बहुशो राजन् पुरोधसमुपाहसत् ॥ ४२
लक्षयित्वा पुरोधाश्च बहुशस्तं नराधिपम् ।
उत्स्मयन्तं च सततं दृष्ट्वा तं मन्युमानभूत् ॥ ४३
अथ शून्ये पुरोधास्तु सह राज्ञा समागमत् ।
कथाभिरनुरूपाभी राजानमभिराधयन् ॥ ४४
ततोऽब्रवीन्नरेन्द्रं स पुरोधा भरतर्षभ ॥ ४४॥

पुरोहितः—

वरमिच्छाम्यहं त्वेकं त्वया दत्तं महाद्युते ॥ ४५

राजा—

वराणां ते शतं दद्यां किमुतैकं द्विजोत्तम ।
स्नेहाच्च बहुमानाच्च नास्त्यदेयं हि मे तव ॥ ४६

पुरोहितः—

एकं च वरमिच्छामि यदि तुष्टोऽसि पार्थिव ।
यद्ददामि महाराज सत्यं तद्वद माऽनृतम् ॥ ४७

भीष्मः—

बाढमित्येव तं राजा प्रत्युवाच युधिष्ठिर ॥ ४७॥

राजा—

यदि ज्ञास्यामि वक्ष्यामि अज्ञातं न तु संवदे ॥ ४८

पुरोहितः—

पुण्याहवाचने नित्यं धर्मकृत्येषु चासकृत् ।
शान्तिहोमेष्वपि तथा किं त्वं हससि वीक्ष्य माम् ॥ ४९
व्रीव्रितं मे भवति हि मनो मे हसता त्वया ।
स मया शापितो राजन् नान्यथा वक्तुमर्हसि ॥ ५०
भाव्यं हि कारणेनात्र न ते हास्यमकारणम् ।
कौतूहलं मे सुभृशं तत्त्वेन कथयस्व मे ॥ ५१

राजा—

एवमुक्ते त्वया विप्र यदवाच्यं भवेदपि ।
अवश्यमेव वक्तव्यं शृणुष्वैकमना द्विज ॥ ५२
पूर्वदेहे यथा वृत्तं निबोध द्विजसत्तम ।
[1]जातिं स्मराम्यहं ब्रह्मन्नवधानेन मे शृणु ॥ ५३
शूद्रोऽहमभवं पूर्वं तापस्ये कृतनिश्चयः ।
ऋषिरुग्रतपास्त्वं तु तदाऽभूर्द्विजसत्तम ॥ ५४
प्रीयता हि तदा ब्रह्मन ममानुग्रहबुद्धिना ।
पितृकार्ये त्वया ब्रह्मन्नुपदेशः कृतो मम ॥ ५५
बृस्यां दर्भे च हव्ये च कव्ये च द्विजसत्तम ।
एतेन कर्मदोषेण पुरोधास्समजायथाः ॥ ५६
अहं राजा च विप्रेन्द्र पश्य कालस्य पर्ययम् ।

1. ख—अधीतं नास्ति

त्वत्कृतेनोपदेशेन त्वया प्राप्तमिदं फलम् ॥ ५७
एतस्मात् कारणाद्ब्रह्मन् प्रहसे त्वां द्विजोत्तम ।
न त्वां परिभवाद् ब्रह्मन् प्रहसामि गुरुर्भवान् ॥ ५८
विपर्ययेण मे मन्युस् तेन स्मयति मे मतिः ।
जातिं स्मराम्यहं ब्रह्मंस् ततस्त्वां प्रहसामि वै ॥ ५९
एवं तपो गृहीतं व उपदेशेन नाशितम् ।
पुरोहितत्वमुत्सृज्य यतस्व त्वं पुनर्भवे ॥ ६०
क्षत्रस्त्वमसमामन्यां योनिं प्राप्स्यसि स द्विज ।
गृह्यतां द्रविणं विप्र पूतात्मा भव सत्तम ॥ ६१

भीष्मः—

ततो विसृष्टो राज्ञा तु विप्रो धान्यान्यनेकशः ।
ब्राह्मणेभ्यो ददौ वित्तं भूमिं ग्रामाननेकशः ॥ ६२
कृच्छ्राणि कृत्वा च तदा यथोक्तानि द्विजोत्तमैः ।
तीर्थानि चापि गत्वा वै दानानि विविधानि च ॥ ६३
दत्त्वा गाश्चैव विप्राणां पूतात्मा सोऽभवद्द्विजः ॥ ६३॥
तमेव चाश्रमं गत्वा चचार विपुलं तपः ॥ ६४
तपस्सिद्धिं परां प्राप्तो ब्राह्मणो राजसत्तम ।
सत्तमश्चाभवत्तेषाम् आश्रमे श्रमवासिनाम् ॥ ६५
एवं प्राप्तो महत् कृच्छ्रम् ऋषिस्म नृपसत्तम ।
ब्राह्मणेन न वक्तव्यं तस्माद्वर्णावरे जने ॥ ६६

[1]वर्जयेदुपदेशं च सदैव ब्राह्मणो नृप ।
उपदेशं हि कुर्वाणो द्विजः कृच्छ्रमवाप्नुयात् ॥ ६७
नेषितव्यं सदा वाचा द्विजेन नृपसत्तम ।
न च प्रवक्तव्यमिह किञ्चिद्वर्णान्तरे जने ॥ ६८
ब्राह्मणाः क्षत्रिया वैश्यास् त्रयो वर्णा द्विजातयः ।
एतेषु कथयन राजन् ब्राह्मणो न प्रदुष्यति ॥ ६९
तस्मात् सद्भिर्न वक्तव्यं कस्यचित् किञ्चिदग्रतः ।
सूक्ष्मा गतिर्हि धर्मस्य दुर्ज्ञेया ह्यकृतात्मभिः ॥ ७०
तस्मान्मौनानि ऋषयो दीक्षां कुर्वन्ति चानृते ॥ ७०॥
दुरुक्तस्य भयाद्राजन् नाभिभाषेत किञ्चन ॥ ७१
धार्मिका गुणसम्पन्नास् सत्यार्जवगुणान्विताः ।
दुरुक्तवाचाऽभिहिताः प्राप्नुवन्ति ह किल्बिषम् ॥ ७२
उपदेशो न कर्तव्यो ह्यज्ञात्वा यस्य कस्य चित् ।
उपदेशाद्धि तत्पापं ब्राह्मणस्समवाप्नुयात् ॥ ७३
[2]विमृश्य तस्मात् प्राज्ञेन वक्तव्यं धर्ममिच्छता ।
सत्यानृतेन हि कृत उपदेशो हिनस्ति हि ॥ ७४
वक्तव्यमथ पृष्टेन विनिश्चयविपर्ययम् ।

1. ख—इदमार्षं चतुष्टयं नास्ति
2. क-घ—एतत्ते सर्वमाख्यातं यस्मां त्वं परिपृच्छसि । [अधिकः पाठः]

स चोपदेशः कर्तव्यो येन धर्ममवाप्नुयात् ॥ ७५

एतत्ते सर्वमाख्यातम् उपदेशे कृते सति ।
महान् क्लेशो हि भवति तस्मान्नोपदिशेत् क्वचित् ॥ ७६

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां
अनुशासनपर्वणि चतुर्दशोऽध्यायः ॥ १४ ॥
॥ ८९ ॥ आनुशासनिकपर्वणि चतुर्दशोऽध्यायः ॥ १४ ॥
[अस्मिन्नध्याये ७६ श्लोकाः]

॥ पञ्चदशोऽध्यायः ॥

महालक्ष्म्या रुक्मिणीं प्रति स्वावासस्थलनिर्देशः ॥

युधिष्ठिरः—

कीदृशे पुरुषे तात स्त्रीषु वा भरतर्षभ ।
श्रीः पद्मा वसते नित्यं तन्मे ब्रूहि पितामह ॥ १

भीष्मः—

अत्र ते वर्णयिष्यामि यथावृत्तं यथाश्रुतम् ।
रुक्मिणी देवकीपुत्रसन्निधौ पर्यपृच्छत ॥ २

नारायणस्याङ्कगतां ज्वलन्तीं
दृष्ट्वा श्रियं पद्मसमानवक्त्राम् ।

कौतूहलाद्विस्मितचारुनेत्रा
पप्रच्छ माता मकरध्वजस्य ॥ ३

रुक्मिणी—

कानीह भूतान्युपसेवसे त्वं
सन्तिष्ठसे कानि च सेवसे [1]त्वम् ।
तानि त्रिलोकेश्वरभूतकान्ते
तत्त्वेन मे ब्रूहि महर्षिकन्ये ॥ ४

भीष्मः—

एवं तदा श्रीरभिभाष्यमाणा
मात्रा समक्षं मकरध्वजस्य ।
उवाच वाक्यं मधुराभिधानं
मनोरमं चन्द्रमुखी प्रसन्ना ॥ ५

श्रीः—

वसामि सत्त्वे सुभगे प्रगल्भे
दक्षे नरे कर्मणि वर्तमाने ।
नाकर्मशीले पुरुषे वसामि
न नास्तिके साङ्करिके कृतघ्ने ॥ ६

[2]न भिन्नवृत्ते न नृशंसवृत्ते
न चाविनीते न गुरुष्वसूयके ॥ ६॥

1. अ—कम् 2. क-घ—न हीन

ये चाल्पतेजोबलसत्त्वसारा
हृष्यन्ति तुष्यन्ति च यत्र तत्र ।
न देवि तिष्ठामि तथाविधेषु
नरेषु सङ्क्षिप्तमनोरथेषु ॥ ७॥
यश्चात्मनि प्रार्थयते न किञ्चिद्
यश्च स्वभावोपहतान्तरात्मा ।
तेष्वप्यसन्तोषकरेषु नाहं
नरेषु नित्यं निवसामि देवि ॥ ८॥

वसामि धर्मशीलेषु धर्मज्ञेषु महात्मसु ।
[1]वृद्धसेविषु दान्तेषु सर्वज्ञेषु महात्मसु ॥ ९॥
अवन्ध्यकालेषु सदा दानशौचरतेषु च ।
ब्रह्मचर्यतपोज्ञानगोद्विजातिप्रियेषु च ॥ १०॥
[2]वसामि स्त्रीषु कान्तासु देवद्विजपरासु च ।
विशुद्धगृहभाण्डासु गोधान्याभिरतासु च ॥ ११॥
प्रकीर्णभाण्डामनवेक्ष्यकारिणीं
सदा च भर्तुः प्रतिकूलवादिनीम् ।
परस्य वेश्माभिरतामलज्जां
[3]सदाऽशनीयां परिवर्जयामि ॥ १२॥

1. अ-क-घ—नास्तीदमर्धम् 2. अ—नास्तीदमर्धम्
3. अ—सदा शयानां

लोलां मताक्षामवलेपिनीं च
व्यपेतशौचां कलहप्रियां च ।
निद्राभिभूतां सततं शयानाम्
एवंविधां स्त्रीं परिवर्जयामि ॥ १३॥

सत्यासु नित्यं प्रियदर्शनासु
सौभाग्ययुक्तासु बहु[1]श्रुतासु ।
वसामि नारीषु गुणान्वितासु
कल्याणशीलासु विभूषितासु ॥ १४॥

[2]यानेषु कन्यासु विभूषणेषु
[3]वस्त्रेषु मेघेषु च वृष्टिमत्सु ।
वसामि फुल्लासु च पद्मिनीषु
नक्षत्रवीथीषु च शारदीषु ॥ १५॥

शैलेषु गोष्ठेषु तथा वनेषु
सरस्सु फुल्लोत्पलपङ्कजेषु ।
नदीषु हंसस्वरनादितासु
क्रौञ्चान्यपुष्टस्वरनादितासु ॥ १६॥

विस्तीर्णकूलह्रदशोभितासु
तपस्विसिद्धद्विजसेवितासु ।

1. क-घ—व्रतासु
2. ख—धान्येषु
3. क-घ—वस्त्रेषु

वसामि नित्यं च बहूदकासु
सिंहैर्गजैश्चाकुलितोदकासु ॥ १७॥

मत्ते गजे गोवृषभे नरेन्द्रे
सिंहासने सत्पुरुषे च नित्यम् ॥ १८

यस्मिन् गृहे हूयति हव्यवाहो
गोब्राह्मणाश्चाच्युतदेवता च ।
काले च पुष्पैर्बलयः क्रियन्ते
तस्मिन् गृहे नित्यमुपैमि वासम् ॥ १९

स्वाध्यायशीलेषु द्विजेषु नित्यं
क्षत्रे च धर्माभिरते तथैव ।
वैश्ये च कृष्याभिरते वसामि
शूद्रे च शुश्रूषणनित्ययुक्ते ॥ २०

नारायणे त्वेकमना वसामि
[1]सर्वेण भावेन शरीरभूता ।
तस्मिन् हि धर्मस्सुमहान् निविष्टो
ब्रह्मण्यता चात्र तथा प्रियत्वम् ॥ २१

---

1. ख—पादषट्कं नास्ति

नाहं शरीरेण वसामि देवि
नैवं मया शक्यमिहाभिधातुम् ।
यस्मिंस्तु भावेन वसामि पुंसि
स वर्धते धर्मयशोर्थकामैः ॥ २२

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां
अनुशासनपर्वणि पञ्चदशोऽध्यायः ॥ १५ ॥
॥ ८९ ॥ आनुशासनिकपर्वणि पञ्चदशोऽध्यायः ॥ १५ ॥
[अस्मिन्नध्याये २२ श्लोकाः]

॥ षोडशोऽध्यायः ॥

भीष्मेण युधिष्ठिरं प्रति कृतघ्नस्य प्रायश्चित्तविषये दृष्टान्ततया वत्सनाभमुनिचरितकथनम् ॥

युधिष्ठिरः—

प्रायश्चितं कृतघ्नानां प्रतिब्रूहि पितामह ।
मातापितॄन् गुरूंश्चैव येऽवमन्यन्ति मोहिताः ॥ १
ये चाप्यन्ये परे तात कृतघ्ना निरपत्रपाः ।
तेषां गतिं महाबाहो श्रोतुमिच्छामि तत्त्वतः ॥ २

भीष्मः—

कृतघ्नानां गतिस्तात नरके शाश्वतीस्समाः ॥ २॥
मातापितृगुरूणां च ये न तिष्ठन्ति शासने ।

क्रिमिकीटपिपीलेषु जायन्ते स्थावरेषु च ॥ ३॥
दुर्लभो हि पुनस्तेषां मानुष्ये पुनरुद्भवः ॥ ४
अत्राप्युदाहरन्तीमम् इतिहासं पुरातनम् ॥ ४॥
वत्सनाभो महाप्राज्ञो महर्षिस्संशितव्रतः ।
वल्मीकभूतो ब्रह्मर्षिस् तप्यते सुमहत्तपः ॥ ५॥
तस्मिंश्च तप्यति तपो वासवो भरतर्षभ ।
ववर्ष सुमहद्वर्षं सविद्युत्स्तनयित्नुमान ॥ ६॥
तत्र सप्ताहवर्षे तु मुमुचे पाकशासनः ।
निमीलिताक्षस्तद्वर्षं प्रत्यगृह्णात वै द्विजः ॥ ७॥
तस्मिन् पतति वर्षे तु शीतवातसमन्विते ।
विशीर्णध्वस्तशिखरो वल्मीकोऽशनिताडितः ॥ ८॥
ताड्यमाने ततस्तस्मिन् वत्सनाभे महात्मनि ।
कारुण्यात्तस्य धर्मस्त्वम् आनृशंस्यमथाकरोत् ॥ ९॥
चिन्तयानस्य ब्रह्मर्षिं तपन्तमतिधार्मिकम् ।
अनुरूपा मतिः क्षिप्रम् उपजाता स्वभावजा ॥ १०॥
स्वं रूपं माहिषं कृत्वा सुमहान्तं मनोहरम् ।
त्राणार्थं वत्सनाभस्य चतुष्पादुपरि स्थितः ॥ ११॥
यदा त्वपगतं वर्षं वृष्टिवातसमन्वितम् ।
ततो माहिषरूपी स धर्मो धर्मभृतां वर ॥ १२॥

शनैर्वल्मीकमुत्सृज्य प्राद्रवद्भरतर्षभ ॥ १३

स्थितेऽस्मिन् वृष्टिसम्पाते रक्षितस्स महातपाः ॥ १३॥

दिशस्सुविपुलास्तत्र गिरीणां शिखराणि च ।
दृष्ट्वा च पृथिवीं सर्वां सलिलेन परिप्लुताम् ॥ १४॥

जलाशयान् स तान् दृष्ट्वा विप्रः प्रमुदितोऽभवत् ॥ १५

अचिन्तयद्विस्मितश्च वर्षात् केनाभिरक्षितः ।
ततोऽपश्यत्तं महिषम् अवस्थितमदूरतः ॥ १६

तिर्यग्योनावपि कथं दृश्यते धर्मवत्सलः ।
अतो नु भद्रं महिषश् शिलापट्ट इव स्थितः ॥ १७

पीवरश्चैव शूल्यश्च बहुमांसो भवेदयम् ॥ १७॥

तस्य बुद्धिरियं जाता धर्मसंसक्तिजा मुनेः ।
कृतघ्ना नरकं यान्ति ये तु विश्वासघातिनः ॥ १८॥

निष्कृतिं नैव पश्यामि कृतघ्नानां कथञ्चन ।
ऋते प्राणपरित्यागम् धर्मज्ञानां वचो यथा ॥ १९॥

अकृत्वा भरणं पित्रोर् अदत्त्वा गुरुदक्षिणाम् ।
कृतघ्नतां च सम्प्राप्य मरणान्ता च निष्कृतिः ॥ २०॥

आकाङ्क्षायामुपेक्षायां चोपपातकमुत्तमम् ।
तस्मात् प्राणान् परित्यक्ष्ये प्रायश्चित्तार्थमित्युत ॥ २१॥

स मेरुशिखरं गत्वा निस्सङ्गेनान्तरात्मना ।
प्रायश्चित्तं कर्तुकामश् शरीरं त्यक्तुमुद्यतः ॥ २२॥
निगृहीतश्च धर्मात्मा हस्ते धर्मेण धर्मवित् ॥ २३

धर्मः—

वत्सनाभ महाप्राज्ञ बहुवर्षशतायुषः ।
परितुष्टोऽस्मि त्यागेन निस्सङ्गेन तथाऽऽत्मनः ॥ २४
एवं धर्मभृतस्सर्वे विमृशन्ति तथा कृतम् ।
न स कश्चिद्वत्सनाभो यस्य नोपहृतं मनः ॥ २५
यश्चानवद्यश्चरति शक्तो धर्मं तु सर्वशः ।
निवर्तस्व महाप्राज्ञ भूतात्मा ह्यसि शाश्वतः ॥ २६

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां
अनुशासनपर्वणि षोडशोऽध्यायः ॥ १६ ॥
॥ ८९ ॥ आनुशासनिकपर्वणि षोडशोऽध्यायः ॥ १६ ॥
[अस्मिन्नध्याये २६ श्लोकाः]

॥ सप्तदशोऽध्यायः ॥

भीष्मेण युधिष्ठिरं प्रति स्त्रीपुंसयोः समायोगे स्त्रिया एव सुखाधिक्ये संवादतया भङ्गाश्वनोपाख्यानकथनम् ॥

युधिष्ठिरः—

स्त्रीपुंसयोस्समप्रयोगे स्पर्शः कस्याधिको भवेत् ।
एतन्मे संशयं राजन् यथावद्वक्तुमर्हसि ॥ १

भीष्मः—

अत्राप्युदाहरन्तीमम् इतिहासं पुरातनम् ।
भङ्गाश्वनेन शक्रस्य यथा वैरमभूत् पुरा ॥ २

पुरा भङ्गाश्वनो नाम राजर्षिरतिधार्मिकः ।
अपुत्रस्स नरव्याघ्रः पुत्रार्थे यज्ञमाहरत् ॥ ३

[1]अग्निष्टुर्नाम राजर्षिर् इन्द्रद्विष्टो महाबलः ।
प्रायश्चित्तेषु मर्त्यानां पुत्रकामस्य चेष्यते ॥ ४

इन्द्रो ज्ञात्वा तु तं यज्ञं तथाऽऽगत्य सुरेश्वरः ।
अन्तरं तस्य राजर्षेर् अन्विच्छत् प्रयतात्मनः ॥ ५

कस्य चित्त्वथ कालस्य मृगयामटते नृपः ।
इदमन्तरमित्येव शक्रो नृपममोहयत् ॥ ६

1. ख—इदमन्तरमित्येव शक्रो नृपममोहयत् । [अधिकः पाठः]

एकाश्वेन च राजर्षिर् भ्रान्त इन्द्रेण मोहितः ।
न दिशो विन्दति नृपः क्षुत्पिपासार्दितस्तदा ॥ ७
इतश्चेतश्च वै धावञ् श्रमतृष्णार्दितो नृप ।
सरोऽपश्यत् सुरुचिरं पूर्णं परमवारिणा ॥ ८
सोऽवगाह्य [1]सरस्तात पाययामास वाजिनम् ॥ ८॥
अथ पीतोदकं सोऽश्वं बद्ध्वा वृक्षे नृपोत्तमः ।
अवगाह्य ततस्स्नातो राजा स्त्रीत्वमवाप ह ॥ ९॥
आत्मानं स्त्रीकृतं दृष्ट्वा व्रीडितो नृपसत्तमः ।
चिन्तानुगतसर्वात्मा व्याकुलेन्द्रियमानसः ॥ १०॥
आरोहिष्ये कथं त्वश्वं कथं यास्यामि वै पुरम् ॥ ११
अग्निष्टुं नाम इष्टं मे पुत्राणां शतमौरसम् ।
जातं महाबलानां वै तान् प्रवक्ष्यामि किं न्वहम् ॥ १२
दारेषु चास्मदीयेषु पौरजानपदेषु च ।
मृदुत्वं च तनुत्वं च पराधीनत्वमेव च ॥ १३
हावभावादिलावण्यान् स्त्रीगुणाद्वा कुतूहलम् ॥ १३॥
स्त्रीगुणा ऋषिभिः प्रोक्ता धर्मतत्त्वार्थदर्शिभिः ।
व्यायामः कर्कशत्वं च वीर्यं च पुरुषे गुणाः ॥ १४॥
पौरुषं विप्रनष्टं मे स्त्रीत्वं केनापि मेऽभवत् ।

---

1. क-घ—पय

स्त्रीभावात् कथमश्वं तं पुनरारोहुमुत्सहे ॥ १५॥
महता त्वथ खेदेन आरुह्याश्वं नराधिपः ।
पुनरायात् पुरं तात स्त्रीभूतो नृपसत्तमः ॥ १६॥
पुत्रदाराश्च भृत्याश्च पौरजानपदाश्च ते ।
किं न्विदं त्विति विज्ञाय विस्मयं परमं गताः ॥ १७॥
अथोवाच स राजर्षिस् स्त्रीभूतो वदतां वरः ॥ १८

राजा—

मृगयां चास्मि निर्यातो बलैः परिवृतो दृढम् ।
उद्भ्रान्तः प्राविशं घोराम् अटवीं क्षुद्विमोहितः ॥ १९
अटव्यां च सुघोरायां तृष्णार्तो नष्टचेतनः ।
सरस्सुरुचिरप्रख्यम् अपश्यं पक्षिभिर्वृतम् ॥ २०
तत्रावगाढस्त्रीभूतो व्यक्तं दैवान्न संशयः ।
अतृप्त एव पुत्राणां दाराणां च धनस्य च ॥ २१

भीष्मः—

उवाच पुत्रांश्च ततस् स्त्रीभूतः पार्थिवोत्तमः ॥ २१॥

राजा—

सम्प्रीत्या भुज्यतां राज्यं वनं यास्यामि पुत्रकाः ॥ २२

भीष्मः—

स पुत्राणां शतं राजा अभिषिच्य वनं गतः ।
तां चाश्रमे स्त्रियं तात तापसोऽभ्यवपद्यत ॥ २३

तापसेनास्य पुत्राणाम् आश्रमेष्वभवच्छतम् ।
अथ सा तान् सुतान् गृह्य पूर्वपुत्रानभाषत ॥ २४

तापसी—

पुरुषत्वे सुता यूयं स्त्रीत्वे चेमे शतं सुताः ।
एकत्र भुज्यतां राज्यं भ्रातृभावेन पुत्रकाः ॥ २५

भीष्मः—

सहिता भ्रातरस्तेऽथ राज्यं बुभुजिरे तदा ॥ २५॥

तान् दृष्ट्वा भ्रातृभावेन भुञ्जानान् राज्यमुत्तमम् ।
चिन्तयामास देवेन्द्रो मन्युनाऽभिपरिप्लुतः ॥ २६॥

उपकारोऽस्य राजर्षेः कृतो नापकृतं मया ॥ २७

ततो ब्राह्मणवेषेण देवराजश्शतक्रतुः ।
भेदयामास तान् गत्वा नगरेषु नृपात्मजान् ॥ २८

इन्द्रः—

[1]भ्रातॄणां नास्ति सौभ्रात्रं येऽप्येकस्य पितुस्सुताः ।
राज्यहेतोर्विवदिताः काश्यपस्य सुरासुराः ॥ २९

यूयं भङ्गाश्वनापत्यं तापसस्येतरे सुताः ।
युष्माकं पैतृकं राज्यं भुज्यते तापसात्मजैः ॥ ३०

भीष्मः—

इन्द्रेण भेदितास्ते तु युद्धेऽन्योन्यमपातयन् ।
तच्छ्रुत्वा तापसी चापि सन्तप्ता भृशदुःखिता ॥ ३१

1. क-घ—अर्धचतुष्टयं नास्ति

पुनर्ब्राह्मणवेषेण तामिन्द्रोऽथान्वपृच्छत ॥ ३१॥

इन्द्रः—

केन दुःखेन सन्तापं करोषि त्वं वरानने ॥ ३२

भीष्मः—

ब्राह्मणं तु ततो दृष्ट्वा सा स्त्री वचनमब्रवीत् ॥ ३२॥

तापसी—

पुत्राणां द्वे शते ब्रह्मन् कालेन विनिपातिते ॥ ३३

अहं राजाऽभवं विप्र तत्र पुत्रशतं मया ।
समुत्पन्नं सुरूपाणां विक्रान्तानां द्विजोत्तम ॥ ३४

कदाचिन्मृगयाश्रान्त उद्भ्रान्तो गहने वने ।
सरोऽहमवगाढश्च स्त्रीभूतो द्विजसत्तम ॥ ३५

पुत्रान् राज्ये प्रतिष्ठाप्य वनमस्मि ततो गतः ॥ ३५॥

स्त्रियाश्च मे पुत्रशतं तापसेन महात्मना ।
आश्रमे जनितं ब्रह्मन् नीतास्ते नगरं प्रति ॥ ३६॥

तेषां च वैरमुत्पन्नं दैवयोगेन वै द्विज ।
एतच्छोचामि विप्रेन्द्र दैवेनाभिपरिप्लुता ॥ ३७॥

भीष्मः—

इन्द्रस्तां दुःखितां दृष्ट्वा अब्रवीत् परुषं वचः ॥ ३८

इन्द्रः—

पुरा सुदुस्सहं भद्रे मम दुःखं त्वया कृतम् ।

इन्द्रद्विष्टेन यजता मामनादृत्य कर्मणा ॥ ३९

इन्द्रोऽहमस्मि दुर्बुद्धे वैरं ते यातितं मया ॥ ३९॥

भीष्मः—

इन्द्रं दृष्ट्वा तु राजर्षिः पादयोश्शिरसा गतः ॥ ४०

भङ्गाश्वनः—

प्रसीद त्रिदशश्रेष्ठ पुत्रकामेन स क्रतुः ।
इष्टस्त्रिदशशार्दूल तत्र मे क्षन्तुमर्हसि ॥ ४१

भीष्मः—

प्रणिपातेन तस्येन्द्रः परितुष्टो वरं ददौ ॥ ४१॥

इन्द्रः—

पुत्रा वै कतमे राजञ् जीवन्तु तव शंस मे ।
स्त्रीभूतस्य हि ये जाताः पुरुषस्याथ येऽभवन ॥ ४२॥

भीष्मः—

तापसी तु ततश्शक्रम् उवाच प्रयताञ्जलिः ॥ ४३

तापसी—

स्त्रीभूतस्यैव ये जातास् तेऽमी जीवन्तु वासव ॥ ४३॥

भीष्मः—

इन्द्रस्तु विस्मितो हृष्टस् स्त्रियं पप्रच्छ तां पुनः ॥ ४४

इन्द्रः—

पुरुषोत्पादिता ये ते कथं द्वेष्यास्सुतास्तव ।
स्त्रीभूतस्य च ये जातास् तेभ्यस्ते ह्यधिकाः कथम ॥ ४५

कारणं श्रोतुमिच्छामि तन्मे त्वं वक्तुमर्हसि ॥ ४५॥

तापसी—

स्त्रियास्त्वभ्यधिकस्नेहो न तथा पुरुषस्य वै ।
तस्मात्ते शक्र जीवन्तु ये जातास्त्रीकृतस्य वै ॥ ४६॥

भीष्मः—

एवमुक्ते ततस्त्विन्द्रः प्रीतो वाक्यमुवाच ह ॥ ४७

इन्द्रः—

सर्व एवेह जीवन्तु पुत्रास्ते सत्यवादिनः ॥ ४७॥

वरं च वृणु राजेन्द्र यं त्वमिच्छसि सुव्रत ।
पुरुषत्वमथ स्त्रीत्वं मत्तो यदभिकाङ्क्षितम् ॥ ४८॥

तापसी—

स्त्रीत्वमेव वृणे शक्र प्रसन्ने त्वयि वासव ॥ ४९

भीष्मः—

एवमुक्तस्तु देवेन्द्रस् तां स्त्रियं प्रत्युवाच ह ॥ ४९॥

इन्द्रः—

पुरुषत्वं कथं त्यक्त्वा स्त्रीत्वं रोचयसे विभो ॥ ५०

भीष्मः—

एवमुक्तः प्रत्युवाच स्त्रीभूतो राजसत्तमः ॥ ५०॥

तापसी—

स्त्रियाः पुरुषसंयोगे प्रीतिरभ्यधिका सदा ।

एतस्मात् कारणादेव स्त्रीत्वमेव वृणोम्यहम् ॥ ५१॥

रमामि चाधिकं स्त्रीत्वे सत्यं वै देवसत्तम ।

स्त्रीभावेन च तुष्टोऽस्मि गम्यतां त्रिदशाधिप ॥ ५२॥

भीष्मः—

एवमस्त्विति चोक्त्वा ताम् आपृच्छ्य त्रिदिवं ययौ ।

एवं स्त्रिया महाराज अधिका प्रीतिरुच्यते ॥ ५३॥

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां
अनुशासनपर्वणि सप्तदशोऽध्यायः ॥ १७ ॥
॥ ८९ ॥ आनुशासनिकपर्वणि सप्तदशोऽध्यायः ॥ १७ ॥
[अस्मिन्नध्याये ५३॥ श्लोकाः]

॥ अष्टादशोऽध्यायः ॥

भीष्मेण युधिष्ठिरं प्रति मनोवाक्कायरूपकरणैर्दुष्कर्मपरित्यागपूर्वकं शुभकर्मकरणस्य भगवत्प्रसादहेतुत्वोक्तिः ॥

युधिष्ठिरः—

किं कर्तव्यं मनुष्येण लोकयात्राहितार्थिना ।

श्रेयः परं मनुष्येन्द्र किंशीलश्च समाचरेत् ॥ १

भीष्मः—

देवे नारायणे भक्तिश् शङ्करे साधुपूजया ।

ध्यानेनाथ जपः कार्यस् स्वधर्मे शुचिचेतसा ॥ २

कायेन त्रिविधं चापि वाचा चापि चतुर्विधम् ।
मनसा त्रिविधं चापि शुभं कर्म फलं चरेत् ॥ ३

प्राणातिपातं स्तेनत्वं परदाराभिमर्शनम् ।
त्रीणि पापानि कायेन सर्वतः परिवर्जयेत् ॥ ४

असत्प्रलापं पारुष्यं पैशुन्यमनृतं तथा ।
एतानि वाचा राजेन्द्र न जल्पेन्नानुचिन्तयेत् ॥ ५

अनभिध्या परस्वेषु सर्वभूतेषु सौहृदम् ।
कर्मणां फलमस्तीति त्रिविधं मनसा चरेत् ॥ ६

तस्माद्वाक्कायमनसा नाचरेदशुभं नरः ।
शुभान्येवाचरँल्लोके भक्तो नारायणस्य हि ॥ ७

तस्यैव तु पदं सूक्ष्मं प्रसादादश्नुयात् परम् ॥ ७॥

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां
अनुशासनपर्वणि अष्टादशोऽध्यायः ॥ १८ ॥
॥ ८९ ॥ आनुशासनिकपर्वणि अष्टादशोऽध्यायः ॥ १८ ॥
[अस्मिन्नध्याये ७॥ श्लोकाः]

॥ एकोनविंशोऽध्यायः ॥

युधिष्ठिरेण भीष्मं प्रति श्रुतधर्मानन्यूद्य प्राणिनां सांसारिकदुःखानुवर्णनपूर्वकं स्वस्य संसारनिर्वेदनिवेदनेन पुनर्विस्तरेण वैष्णवधर्मकथनप्रार्थना ॥ १ ॥ भीष्मेण युधिष्ठिरं प्रति ब्रह्मादिसर्वजगतामनित्यत्वादिकथनपूर्वकं नारायणस्य नित्यत्वादिकथनेन तदुपासनविधानम् ॥ २ ॥

युधिष्ठिरः—

चित्तं मे दूयते तात लोके परमविन्दतः ॥ ॥

अशाश्वतमिदं सर्वं जगत् स्थावरजङ्गमम् ।
ऋते नारायणं पुण्यं प्रतिभाति पितामह ॥ १॥

नारायणो हि विश्वात्मा पुरुषः पुष्करेक्षणः ।
तस्यास्य देवकीसूनोश् श्रुतं कृत्स्नं त्वयाऽनघ ॥ २॥

भीष्मः—

युधिष्ठिर महाप्राज्ञ मया दृष्टं च सङ्गरे ॥ ३

युधिष्ठिरः—

त्वत्त एव तु राजेन्द्र राजधर्माश्च पुष्कलाः ॥ ३॥

श्रुतं पुराणमखिलं नारदेन निवेदितम् ।
गुह्यं नारायणाख्यानं त्रिविधक्लेशनाशनम् ॥ ४॥

एकान्तिधर्मनियमास् समासव्यासकल्पिताः ।
कथिता वै महाभाग त्वया वै मदनुग्रहात् ॥ ५॥

लोकरक्षणकर्तृत्वं तस्यैव हरिमेधसः ।
आतिथेयविधिश्चैव तपांसि नियमाश्च ये ॥ ६॥
वेदवादप्रसिद्धाश्च वाजपेयादयो मखाः ।
यज्ञा द्रविणनिष्पाद्या अग्निहोत्रानुपालिताः ॥ ७॥
जपयज्ञाश्च विविधा ब्राह्मणानां तपस्विनाम् ।
एकादशविधाः प्रोक्ता हविर्यज्ञा द्विजातिनाम् ॥ ८॥
तेषां फलविशेषाश्च उञ्छधर्मास्तथैव च ।
अहन्यहनि ये प्रोक्ता महायज्ञा द्विजातिनाम् ॥ ९॥
वेदश्रवणधर्माश्च ब्रह्मयज्ञफलं तथा ।
वेदव्रतविधानं च नियमाश्चैव वैदिकाः ॥ १०॥
स्वाहा स्वधा प्रणीते च इष्टापूर्तफलं तथा ।
उत्तरोत्तरसेवायाम् आश्रमाणां च यत् फलम् ॥ ११॥
प्रत्येकशश्च निष्ठायाम् आश्रमाणां महामते ।
मासपक्षोपवासानां सम्यगुक्तं फलं च यत् ॥ १२॥
[1]अनाशितानां ये लोका ये च पञ्चतपा नराः ।
वीराध्वानं प्रपन्नानां [2]या गतिश्चाग्निहोत्रिणाम् ॥ १३॥
[3]ग्रीष्मे पञ्चतपानां च शिशिरे जलचारिणाम् ।

---

1. क-घ—पर्णाशितानां अ—अनाश्रितानां
2. अ—इतः षट् पादा न सन्ति 3. ख—इदमर्धं नास्ति

वर्षे स्थण्डिलशायीनां फलं यत् परिकीर्तितम् ॥ १४॥
लोके चक्रचराणां च द्विजानां यत् फलं स्मृतम् ।
अन्नादीनां च दानानां यत् फलं परिकीर्तितम् १५॥
सर्वतीर्थाभिषिक्तानां नराणां च फलोदयः ।
राज्ञां धर्माश्च ये लोके सम्यक् पालयतां प्रजाः ॥ १६॥
ये च सत्यव्रता लोके ये च तीर्थे कृतश्रमाः ।
मातापितृपरा ये च गुरुवृत्तीश्च संश्रिताः ॥ १७॥
गोब्राह्मणपरित्राणे राष्ट्रातिक्रमणे तथा ।
त्यजन्त्यभिमुखाः प्राणान् निर्भयास्सत्त्वमाश्रिताः ॥ १८॥
सहस्रदक्षिणानां च या गतिर्ददतां वर ।
ये च संध्यामुपासन्ते सम्यगुक्ता महाव्रताः ॥ १९॥
तथा योगविधानं च यद्ग्रन्थेष्वभिशब्दितम् ।
वेदाद्याश्श्रुतयश्चापि श्रुता मे कुरुसत्तम ॥ २०॥
सिद्धान्तनिर्णयाश्चापि द्वैपायनमुखोद्गताः ।
श्रुताः पञ्च महायागा येषु सर्वं प्रतिष्ठितम् ॥ २१॥
तत्प्रभेदेषु ये धर्मास् तेऽपि वै कृत्स्नशश्श्रुताः ।
न च दूषयितुं शक्यास् सद्भिरुक्ता हि ते तथा ॥ २२॥
एतेषां किल धर्माणां उत्तमो वैष्णवो विधिः ।
रक्षते भगवान् विष्णुर् भक्तमात्मशरीरवत् ॥ २३॥

कर्मणो हि कृतस्येह कामितस्य द्विजोत्तमैः ।
फलं ह्यवश्यं भोक्तव्यम् ऋषिर्द्वैपायनोऽब्रवीत् ॥ २४॥
भोगान्ते चापि पतनं गतिः पूर्वं प्रभाषिता ।
न मे प्रीतिकरास्त्वेते विषोदर्का हि मे मताः ॥ २५॥
वधात् कष्टतरं मन्ये गर्भवासं महाद्युते ॥ २६
दिष्टान्ते यानि दुःखानि पुरुषो विन्दते विभो ।
ततः कष्टतराणीह गर्भवासे हि विन्दति ॥ २७
ततश्चाभ्यधिकां तीव्रां वेदनां लभते नरः ।
गर्भापक्रमणे तात कर्मणामुपसर्पणे ॥ २८
तस्मान्मे निश्चयो जातो धर्मेष्वेतेषु भारत ॥ २८॥
तदिच्छामि कुरुश्रेष्ठ त्वत्प्रसादान्महामते ।
तं धर्मं चेह वेत्तुं वै यो जराजन्ममृत्युहा ॥ २९॥
येनोष्णोदा वैतरणी असिपत्रवनं च तत् ।
कुण्डानि चाग्नितप्तानि क्षुरधारापथस्तथा ॥ ३०॥
शाल्मलीं च महाघोराम् आयसीं घोरकण्टकाम् ॥ ३१
मातापितृकृते चापि सुहृन्मित्रार्थकारणात् ।
आत्महेतोश्च पापानि कृतानीह नरैश्च यैः ॥ ३२
तेषां फलोदयं कष्टम् ऋषिर्द्वैपायनोऽब्रवीत् ॥ ३२॥
कुम्भीपाकप्रदीप्तानां शूलार्तानां च क्रन्दताम् ।

रौरवे क्षिप्यमाणानां प्रहारैर्मथितात्मनाम् ॥ ३३॥

स्तनतामपकृत्तानां पिबतामात्मशोणितम् ।
तेषामेवं प्रवदतां कारुण्यं नास्ति यन्त्रतः ॥ ३४॥

तृष्णाशुष्कोष्ठकण्ठानां विह्वलानामचेतसाम् ।
सर्वदुःखाभितप्तानां रुजार्तानां च क्रोशताम् ॥ ३५॥

वेदनार्ता हि क्रन्दन्ति पूरयन्तो दिशो दश ॥ ३६

एकः करोति पापानि सह भोज्यानि बान्धवैः ।
तेषामेकः फलं भुङ्क्ते कष्टे वैवस्वतक्षये ॥ ३७

येन नैतां गतिं गच्छेन् स विण्मूत्रास्थिपिच्छिले ।
विष्ठामूत्रक्रिमीमध्ये बहुजन्तुनिषेविते ॥ ३८

को गर्भवासात् परतो नरकोऽन्यो विधीयते ॥ ३८॥

[1-2]मात्राहारकृता यात्रा विष्ठामूत्रेण सम्पदा ।
को गर्भवासात् परतो नरकोऽन्यो विधीयते ॥ ३९॥

यत्र वासकृतो योगः कुक्षौ वासो विधीयते ॥ ४०

जाते विस्तीर्णदुःखस्याद् भवेदविगतज्वरः ।
न चैष लभ्यते कामो जातमात्रं हि मानवम् ॥ ४१

आविशन्तीह दुःखानि मनोवाक्कायिकानि तु ॥ ४१॥

तैरस्वतन्त्रो भवति पीड्यमानो भयानकैः ।

---

1. ख—इदमार्द्धमेतत् नास्ति 2. क-घ—यत्रा

तैर्गर्भवासं गच्छेत ह्यवशो जायते तथा ॥ ४२॥

अवशश्चेहते जन्तुर् व्रजत्यवश एव तु ।
[1]जरसा रूपविध्वंसं प्राप्नोत्यवश एव तु ॥ ४३॥

शरीरभेदमाप्नोति जीर्यतेऽवश एव तु ।
एवं ह्यनियतो मृत्युर् भवत्येव सदा नृपु ॥ ४४॥

गर्भेषु म्रियते कश्चिज् जायमानस्तथाऽपरः ।
जाता म्रियन्ते बहवो यौवनस्थास्तथाऽपरे ॥ ४५॥

मध्यभावे तु नश्यन्ति स्थविरो मृत एव तु ॥ ४६

को जन्मनो नोद्विजते स्वयम्भूरपि यो भवेत् ।
कुतस्त्वस्मद्विधस्तात मरणस्य वशानुगः ॥ ४७

नित्याविष्टो भयेनाहं मनसा कुरुसत्तम ।
मुहूर्तमप्यहं शर्म न विन्दामि महामते ॥ ४८

कालात्मनि तिरोभूतो नित्यं तद्गुणवर्जितः ॥ ४८॥

अन्नैर्बहुविधैः पुष्टं वस्त्रैर्नानाविधैर्वृतम् ।
चन्दनागरुदिग्धाङ्गं मणिमुक्ताविभूषितम् ॥ ४९॥

यानैर्बहुविधैर्यातम् एकान्तेनैव लालितम् ॥ ५०

यौवनोद्धतरूपाभिर् मदविह्वलगामिभिः ।
इष्टाभिरभिरामाभिर् वरस्त्रीभिश्च यन्त्रितम् ॥ ५१

---

1. क-घ—अधैषट्कं नास्ति

रमितं सुचिरं कालं शरीरममितप्रभम् ॥
अवितृप्ता भविष्यन्ति हित्वा प्राणांस्तथाऽपरे ॥ ५२
स्वर्गोऽप्यनियता भूमिस् तथैवाकाशसंश्रये ।
देवाऽप्यधिष्ठानवशास् तस्माद्देवं न कामये ॥ ५३
कामानां नास्त्यधिष्ठानम् अकामस्तु निवर्तते ।
[1]लोकसङ्ग्रहधर्मास्तु सर्व एव न संशयः ॥ ५४
डोलासधर्मान् धर्मज्ञ ऋषिर्द्वैपायनोऽब्रवीत् ।
कस्मात् को विषमं दुःखम् आरोहेत विचक्षणः ॥ ५५
विद्यमाने समे मार्गे डोलाधर्मविवर्जिते ।
को ह्यात्मानं प्रियं लोके डोलासाधर्म्यतां नयेत् ॥ ५६
चराचरैस्सर्वभूतैर् गन्तव्यमविशङ्कया ।
अस्माल्लोकात् परं लोकम् अपाथेयमदेशिकम् ॥ ५७
घोरं तमः प्रवेष्टव्यम् अत्रातारमबान्धवम् ॥ ५७॥
ये तु तं किल धर्मज्ञा धर्मं नारायणेरितम् ।
अनन्यमनसो दान्तास् स्मरन्ति नियतव्रताः ॥ ५८॥
ततस्तेन च पश्यन्ति प्राप्नुवन्ति परं पदम् ।
रक्षते भगवान् विष्णुर् भक्तानात्मशरीरवत् ॥ ५९॥
कुलालचक्रप्रतिमे भ्राम्यमाणेषु जन्तुषु ।

1. क-घ—अर्धचतुष्टयं नास्ति

मातापितृसहस्राणि सम्प्राप्तानि मया गुरो ॥ ६०॥
स्नेहापन्नेन पीतास्तु मातृणां विविधास्तनाः ॥ ६१
पुत्रदारसहस्राणि इष्टानिष्टशतानि च ।
प्राप्तान्यधिष्ठानवशाद् अतीतानि तथैव च ॥ ६२
न कचिच्च सुखं प्राप्तं न कचिच्छाश्वती गतिः ॥ ६२॥
स्थानैर्महद्भिर्विभ्रंशो दुःखलब्धैः पुनः पुनः ।
धननाशश्च सम्प्राप्तो लब्ध्वा दुःखेन तद्धनम् ॥ ६३॥
अध्वगानामिव पथि च्छायामाश्रित्य सङ्गमः ॥ ६४
एवं कर्मवशो लोको ज्ञातीनां हितसङ्गमः ।
विश्रम्य च पुनर्याति कर्मभिर्देशितां गतिम् ॥ ६५
एतदीदृशकं दृष्ट्वा [1]ज्ञात्वा चैव समागमम् ।
को न बिभ्येत् कुरुश्रेष्ठ विष्ठान्नस्येव भोजनात् ॥ ६६
बुद्धिश्च मे समुत्पन्ना वैष्णवे धर्मविस्तरे ।
तदेष शिरसा पादौ गतोऽस्मि भगवंस्तव ॥ ६७
शरणं च प्रपन्नोऽस्मि [2]गन्ता ते चरणे ध्रुवे ॥ ६७॥
जन्ममृत्युजराखिन्नस् त्रिभिर्दुःखैर्निपीडितः ।

---

1. क-घ—ज्ञानिना सह सङ्गमम्
2. क-घ—गम्तव्ये शरणद्रुमम् ख—हन्तव्ये शरणे ध्रुवे

इच्छामि भवता त्रातुम् एभ्यस्त्वत्तो महा[1]मते ॥ ६८॥

तस्याद्य युगधर्मस्य श्रवणात् कुरुपुङ्गव ।
एतदाद्ययुगोद्भूतं त्रेतायां तत्तिरोहितम् ॥ ६९॥

स एव धर्ममखिलम् ऋषिर्द्वैपायनोऽब्रवीत्* ॥ ७०

भीष्मः—

सदृशं राजशार्दूल वृत्तस्य च कुलस्य च ॥ ७०॥

को राज्यं विपुलं गृह्य स्फीताकारपुरं महत् ।
निर्जितारातिसामन्तं देवराज्योपमं सुखम् ॥ ७१॥

राज्ये राज्यगुणा ये च तान् व्युदस्य नराधिप ।
दोषं पश्यसि राजेन्द्र दोषेऽस्मिन् पञ्चविंशकः ॥ ७२॥

अतिक्रान्तास्त्वया राजन् वृत्तेन प्रपितामहाः ।
धर्मो विग्रहवान् धीरो विदुरश्च महायशाः ॥ ७३॥

[2]सञ्जयश्च महातेजा ये चान्ये दिव्यदर्शनाः ।
प्रवृत्तज्ञानसम्पन्नास् तत्त्वज्ञानविदो नृप ॥ ७४॥

अतिक्रान्ता महाराज ब्रह्माद्यास्ससुरासुराः ॥ ७५
अनित्यं दुःखसन्तप्तं जगदेतन्न संशयः ॥ ७५॥

एवमेतान् महाबाहो ब्रह्माद्यान् ससुरासुरान् ।

---

1. अ-ख—मुने
* सर्वेषु कोशेषु अत्रैवाध्यायसमाप्तिर्दृश्यते
2. क-घ—अर्धचतुष्टयं नास्ति

अनित्यान् सततं पश्य मनुष्यादिषु का कथा ॥ ७६॥

नित्यां तु प्रकृतीमाहुर् याऽसौ प्रसवधर्मिणी ॥ ७७

अरूपिणीमनिर्देश्याम् अकृतां पुरुषातिगाम् ।
तामत्यन्तसुखां सौम्यां निर्वृणामिति संज्ञिताम् ॥ ७८

आहुर्ब्रह्मर्षयो ह्याद्यां भुवि चैव महर्षयः ॥ ७८॥

तया पुरुषरूपिण्या धर्मप्रकृतिकोऽनघ ।
स यात्येव हि निर्वाणं यत्तत् प्रकृतिसंज्ञितम् ॥ ७९॥

स एव प्राकृतो धर्मो भ्राजत्यादियुगे नृप ।
विकारधर्माश्शेषेषु युगेषु भरतर्षभ ॥ ८०॥

भ्राजन्तेऽभ्यधिकं वीर संसारपथगोचराः ॥ ८१

प्रकृतीनां च सर्वासाम् अकृता प्रकृतिस्स्मृता ।
एवं प्रकृतिधर्मा हि वराः प्रकृतिमाश्रिताः ॥ ८२

तदाहुः परमां लोके दृष्टादृष्टानुदर्शिनीम् ॥ ८२॥

सत्त्वादियुगपर्यन्ते त्रेतायुगसमुद्भवे ।
कामं कामयमानेषु ब्राह्मणेषु तिरोहितः ॥ ८३॥

कुपथेषु तु धर्मेषु प्रादुर्भूतेषु कौरव ।
जातो मन्दप्रचारो हि धर्मः कलियुगे नृप ॥ ८४॥

इत्येतद्विष्णुमाश्रित्य संसारग्रहमोक्षणम् ।
कथितं ते महाबाहो किं भूयश्श्रोतुमिच्छसि ॥ ८५॥

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां
अनुशासनपर्वणि एकोनविंशोऽध्यायः ॥ १९ ॥
॥ ८९॥ आनुशासनिकपर्वणि एकोनविंशोऽध्यायः ॥ १९ ॥
[अस्मिन्नध्याये ८५॥ श्लोकाः]

॥ विंशोऽध्यायः ॥

भीष्मेण युधिष्ठिरं प्रति तत्त्वसृष्ट्यादिप्रतिपादकनारदसनत्कुमारसंवादानुवादः ॥ १ ॥ सनत्कुमारेण नारदं प्रति प्रलयप्रकारादिकथनम् ॥ २ ॥ तथा भूतादिनिरूपणम् ॥ ३ ॥

युधिष्ठिरः—

क्ष्यमानेषु भूतेषु यतिर्मरणसागरे ।
यन् प्राप्य क्लेशं नाप्नोति तन्मे ब्रूहि पितामह ॥ १

भीष्मः—

अत्राप्युदाहरन्तीमम् इतिहासं पुरातनम् ।
सनत्कुमारस्य सतस् संवादं नारदस्य च ॥ २

सनत्कुमारो भगवान् ब्रह्मपुत्रो महायशाः ।
पूर्वजातान्त्रयस्तस्य कथ्यन्ते ब्रह्मवादिनः ॥ ३

सनकस्सनन्दनश्चैव तृतीयश्च सनातनः ।
जातमात्राश्च ते सर्वे प्रतिबुद्धा इति श्रुतिः ॥ ४

चतुर्थश्चैव तेषां स भगवान् योगवित्तमः ।
सनत्कुमार इति वै कथयन्ति महर्षयः ॥ ५

हैरण्यगर्भस्स मुनिर् वसिष्ठः पञ्चमस्स्मृतः ।
षष्ठस्स्थाणुस्स भगवान् अमेयात्मा त्रिशूलधृक् ॥ ६

ततोऽपरे समुत्पन्नाः पावका दारुणे क्रतौ ।
मनसा स्वयम्भुवो ह्येमे मरीचिप्रमुखास्तथा ॥ ७

भृगुर्मरीचेरनुजो भृगोरप्यङ्गिरास्तथा ।
अनुजोऽङ्गिरसोऽथात्रिः पुलस्त्योऽत्रेस्तथाऽनुजः ॥ ८

पुलस्त्यस्यानुजो विद्वान् पुलहो नु महा[1]द्युतिः ।
पठ्यन्ते ब्रह्मजा ह्येते विद्वद्भिरमितौजसः ॥ ९

सर्वमेतन्महाराज कुर्वन्नादिगुरुर्महान् ।
प्रभुर्विभुरनन्तश्रीर् ब्रह्मा लोकपितामहः ॥ १०

मूर्तिमन्तोऽमृतीभूतास् तेजसाऽतितपोन्विताः ।
सनकप्रभृतयस्तत्र ये च प्राप्ताः परं पदम् ॥ ११

कृत्स्नक्षयमनुप्राप्य विमुक्ता मूर्तिबन्धनात् ॥ ११॥

सनत्कुमारस्तु विभुर् योगमास्थाय योगवित् ।

---

1. क-घ—क्रतुः

त्रींल्लोकानचरच्छश्वद् ऐश्वर्येण परेण हि ॥ १२॥
रुद्रश्चाप्यष्टगुणितं योगं प्राप्तो महायशाः ॥ १३
सूक्ष्ममष्टगुणं राजन्नितरे नृपसत्तम ।
मरीचिप्रमुखास्तात सर्वे सृष्ट्यर्थमेव ते ॥ १४
नियुक्ता राजशार्दूल तेषां सृष्टिं शृणुष्व मे ॥ १४॥
सप्त ब्रह्माण इत्येते पुराणे निश्चयं गताः ।
सर्वे वेदेषु चैवोक्ताः खिलेषु च न संशयः ॥ १५॥
इतिहासे पुराणे च श्रुतिरेषा सनातनी ।
ब्राह्मणान् वरदानेतान् प्राहुर्वेदान्तपारगाः ॥ १६॥
एतेषां पितरस्तात पुत्रा इत्यनुचक्षते ॥ १७
गणास्सप्त महाराज मूर्तयोऽमूर्तयस्तथा ।
पितॄणां चैव राजेन्द्र पुत्रा देवा इति श्रुतिः ॥ १८
दैवैर्व्याप्ता इमे लोका इत्येवमनुशुश्रुम ॥ १८॥
कृष्णाद्वैपायनाच्चैव देवस्थानात्तथैव च ।
[1]देवलाच्च नरश्रेष्ठ काश्यपाच्च मया श्रुतम् ॥ १९॥
गौतमादथ कौण्डिन्याद् भरद्वाजात्तथैव च ।
मार्कण्डेयात्तथैवैतद् ऋषेर्देवमतात्तथा ॥ २०॥
पित्रा च मम राजेन्द्र श्राद्धकाले प्रभाषितम् ।

1. अ—इदमर्धद्वयं नास्ति

परं रहस्यं वेदान्तं प्रियं हि परमात्मनः ॥ २१॥

अतः परं प्रवक्ष्यामि यन्मां पृच्छसि भारत ।
तदिहैकमनोबुद्धिश् शृणुष्वावहितो नृप ॥ २२॥

स्वायम्भुवस्य संवादं नारदस्य च धीमतः ॥ २३

सनत्कुमारो भगवान् दिवि जज्वाल तेजसा ।
अङ्गुष्ठमात्रो भूत्वा वै विचचार महाद्युतिः ॥ २४

स कदाचिन्महाभागो मेरुपृष्ठं समागमत् ।
नारदेन नरश्रेष्ठ मुनिना ब्रह्मवादिना ॥ २५

जिज्ञासमानावन्योन्यं सकाशे ब्रह्मणस्ततः ।
ब्रह्मभावगतौ तात परमार्थविचिन्तकौ ॥ २६

मतिमान् मतिमच्छ्रेष्ठं बुद्धिमान् बुद्धिमत्तरम् ।
क्षेत्रवित् क्षेत्रविच्छ्रेष्ठं ज्ञानविज्ज्ञानवित्तमम् ॥ २७

सनत्कुमारं तत्त्वज्ञं भगवन्तमरिन्दम ।
लोकविल्लोकविच्छ्रेष्ठम् आत्मविच्चात्मवित्तमम् ॥ २८

सर्ववेदार्थकुशलं सर्वशास्त्रविशारदम् ॥ २८॥

साङ्ख्ययोगं च यो वेद पाणावामलकं यथा ।
नारदोऽथ मुनिश्रेष्ठं तं पप्रच्छ महाद्युतिः ॥ २९॥

नारदः—

त्रयोविंशतितत्त्वस्य अव्यक्तस्य महामुने ।
प्रभवं चाप्ययं चैव श्रोतुमिच्छामि तत्त्वतः ॥ ३०॥

अध्यात्ममधिभूतं च अधिदैवं तथैव च ।
कालसङ्ख्यां च सर्गं च स्रष्टारं पुरुषं प्रभुम् ॥ ३१॥

यं विश्वमुपजीवन्ति येन सर्वमिदं ततम् ।
यं प्राप्य न निवर्तन्ते तद्भवान् वक्तुमर्हति ॥ ३२॥

सनत्कुमारः—

यं विश्वमुपजीवन्ति यमाहुः पुरुषं परम् ।
तं वै शृणु महाबुद्धे नारायणमनामयम् ॥ ३३॥

एष नारायणो नाम यं विश्वमुपजीवति ।
एष स्रष्टा विधाता च [1]हर्ता पालयिता प्रभुः ॥ ३४॥

प्राप्यैनं न निवर्तन्ते यतयोऽध्यात्मचिन्तकाः ।
एतावदेव वक्तव्यं मया नारद पृच्छते ॥ ३५॥

परं न वेद्मि तत्सर्गं यावांश्चायं यथाऽप्यहम् ।
श्रूयतामानुपूर्व्येण नव सर्गान् प्रयत्नतः ॥ ३६॥

यथा कालपरीमाणं तत्त्वानामृषिसत्तम ।
अध्यात्ममधिभूतं च अधिदैवं तथैव च ॥ ३७॥

---

1. क-घ—भ

कालसङ्ख्यां च सर्गं च सर्वमेव महामुने ॥ ३८
तमसः कुर्वतस्सर्गं तामसो ह्यभिधीयते ।
ब्रह्मविद्भिर्द्विजैर्नित्यं नित्यमध्यात्मचिन्तकैः ॥ ३९
पर्यायनामान्येतस्य कथयन्ति मनीषिणः ।
तानि ते सम्प्रवक्ष्यामि तदिहैकमनाश्शृणु ॥ ४०
महार्णवोऽर्णवश्चैव सलिलं च गुणास्तथा ।
वेदास्तपश्च यज्ञाश्च धर्माश्च भगवान् विभुः ॥ ४१
प्राणस्संवर्तकोऽग्निश्च व्योम कालस्तथैव च ।
नामान्येतानि ब्रह्मर्षे शरीरस्येश्वरस्य वै ॥ ४२
कीर्तितानि द्विजश्रेष्ठ मया शास्त्रानुमानतः ॥ ४२॥
चतुर्युगसहस्राणि चतुर्युगमरिन्दम ।
प्राहुः कल्पसहस्रं वै ब्राह्मणास्तत्त्वदर्शिनः ॥ ४३॥
दशकल्पसहस्राणि अव्ययस्य महानिशा ।
तथैव दिवसं प्राहुर् योगास्साङ्ख्याश्च तत्त्वतः ॥ ४४॥
निशां सुप्तोऽथ भगवान् क्षपान्ते प्रत्यबुध्यत ।
पश्चाद्बुद्ध्वा ससर्जापस् तासु वीर्यमवासृजत् ॥ ४५॥
तदण्डमभवद्धैमं सहस्रांशुसमप्रभम् ॥ ४६
अण्डं कृत्वा ततस्तस्मिन् ससर्ज प्रभुरीश्वरः ।
हिरण्यगर्भं विश्वात्मा ब्रह्माणं जलजान्मुनिम् ॥ ४७

भूतभव्यभविष्यस्य कर्तारमनघं विभुम् ।
मूर्तिमन्तं महात्मानं विश्वशम्भुं स्वयम्भुवम् ॥ ४८

अणिमा लघिमा प्राप्तिर् ईशानो ज्योतिषां वरः ।
चक्रे निरोधं भगवान् एतत् कृत्वा महायशाः ॥ ४९

एतस्यापि निशामाहुर् वेदवेदाङ्गपारगाः ।
पञ्चकल्पसहस्राणि अहरेतावदेव च ॥ ५०

स सर्गं कुरुते ब्रह्मा तामसस्यानुपूर्व्यशः ।
सृजतेऽहं त्वहङ्कारं परमेष्ठिनमव्ययम् ॥ ५१

अहङ्कारेण वै लोका व्याप्तास्साहङ्कृतेन वै ।
येनाविष्टानि भूतानि मज्जन्त्यव्यक्तसागरे ॥ ५२

देवर्षिदानवनरा यक्षगन्धर्वकिन्नराः ।
उन्मज्जन्ति निमज्जन्ति ऊर्ध्वाधस्तिर्यगेव च ॥ ५३

एतस्यापि निशामाहुस् तृतीयामथ कुर्वतः ।
त्रीणि कल्पसहस्राणि अहरेतावदेव तु ॥ ५४

अहङ्कारस्तु सृजति महाभूतानि पञ्च वै ।
पृथिवी वायुराकाशम् आपो ज्योतिश्च पञ्चमम् ॥ ५५

एतेषां गुणतत्त्वानि पञ्च प्राहुर्द्विजातयः ।
शब्दे स्पर्शे च रूपे च रसे गन्धे तथैव च ॥ ५६

गुणेष्वेतेष्वभिरताः पङ्कलग्ना इव द्विपाः ।

नोत्तिष्ठन्त्यवशीभूतास् सक्ता अव्यक्तसागरे ॥ ५७

एतेषामिह वै सर्गं चतुर्थमिह कुर्वतः ।
चतुर्युगसहस्रे वै अहोरात्रास्तथैव च ॥ ५८

अनन्त इति विख्यातः पञ्चमस्सर्ग उच्यते ।
इन्द्रियाणि दशैकं च यथाश्रुतिनिदर्शनात् ॥ ५९

मनस्सर्वमिदं तात विश्वं सर्वमिदं जगत् ।
न तथाऽन्यानि भूतानि बलवन्ति यथा मनः ॥ ६०

एतस्यापि हि वै सर्गं षष्ठमाहुर्द्विजातयः ।
अहः कल्पसहस्रं वै रात्रिरेतावती तथा ॥ ६१

ऊर्ध्वस्रोतस्तु वै सर्गं सप्तमं ब्रह्मणो विदुः ।
अष्टमं चाप्यधस्स्रोतस् तिर्यक्तु नवमस्स्मृतः ॥ ६२

एतानि नव सर्गाणि तत्त्वानि च महामुने ।
चतुर्विंशतितत्त्वानि तत्त्वसङ्ख्यानि तेऽनघ ॥ ६३

सर्वस्य प्रभवः पूर्वम् उक्तो नारायणः प्रभुः ।
अव्ययः प्रभवश्चैव अव्यक्तस्य महामुने ॥ ६४

प्रवक्ष्याम्यपरं तत्त्वं यस्य यस्येश्वरश्च यः ॥ ६४॥

अध्यात्ममधिभूतं च अधिदैवं तथैव च ।
यथाश्रुतं यथादृष्टं तत्त्वतो वै निबोध मे* ॥ ६५॥

---

* सर्वेषु कोशेषु अत्रैवाध्यायसमाप्तिर्दृश्यते

अधस्स्रोतसि सर्गे च तिर्यक्स्रोतसि चैव हि ।
एताभ्यामीश्वरं विद्याद् ऊर्ध्वस्रोतस्तथैव च ॥ ६६॥

कर्मेन्द्रियाणां पञ्चानाम् ईश्वरो बुद्धिगोचरः ।
बुद्धीन्द्रियाणामथ तु ईश्वरो मन उच्यते ॥ ६७॥

मनसः पञ्चभूतानि सगुणान्याहुरीश्वरम् ।
भूतानामीश्वरं विद्याद् ब्रह्माणं परमेष्ठिनम् ॥ ६८॥

भवान् हि कुशलश्चैव धर्मेष्वेषु परेषु वै ।
कालाग्निरुद्रः कल्पान्ते जगद्दहति चांशुभिः ॥ ६९॥

ततस्सर्वाणि भूतानि स्थावराणि चराणि च ।
महाभूतानि दग्धानि स्वां योनिं गमितानि वै ॥ ७०॥

कूर्मपृष्ठनिभा भूमिर् निर्दग्धकुशकण्टका ।
निर्वृक्षा निस्तृणा चैव दग्धा कालाग्निना तदा ॥ ७१॥

जगत् प्रलीनं जगति जगच्चाप्सु प्रलीयते ।
नष्टगन्धा तदा सूक्ष्मा जलमेवाभवत्तदा ॥ ७२॥

ततो मयूखजालेन सूर्यस्त्वापीयते जलम् ।
रसात्मा लीयते चार्के तदा ब्राह्मणसत्तम ॥ ७३॥

अन्तरिक्षगतान् भूतान् प्रदहत्यनलस्तदा ।
अग्निभूतं तदा व्योम भवतीत्यभिचक्षते ॥ ७४॥

तं तथा विष्फुरद्वह्निं वायुर्जरयते महान् ।
महता बलवेगेन आदत्ते तं हि भानुमान् ॥ ७५॥

वायोरपि गुणं स्पर्शम् आकाशं ग्रसते यदा ।
प्रशाम्यति ततो वायुः खं तु तिष्ठति नानदत् ॥ ७६॥

तस्य तं निनदं शब्दम् आदत्ते वै मनस्तदा ।
स शब्दगुणहीनात्मा तिष्ठते मूर्तिमांस्तु वै ॥ ७७॥

भुङ्क्ते स च तदा व्योम मनस्तात दिगात्मकम् ।
व्योमात्मनि विनष्टे तु सङ्कल्पात्मा विवर्धते ॥ ७८॥

सङ्कल्पात्मानमादत्ते चित्तं वै स्वेन तेजसा ।
चित्तं ग्रसत्यहङ्कारस् तदा वै मुनिसत्तम ॥ ७९॥

विनष्टे च तदा चित्ते अहङ्कारोऽभवन्महान् ।
अहङ्कारं तदाऽऽदत्ते महान् ब्रह्मा प्रजापतिः ॥ ८०॥

अभिमाने विनष्टे तु महान् ब्रह्मा विराजते ।
तं तदा त्रिषु लोकेषु मूर्तिष्वेवाग्रमूर्तिजम् ॥ ८१॥

येन विश्वमिदं कृत्स्नं निर्मितं वै गुणार्थिना ।
मूर्तिं [1]जलेश्वरमपि व्यवसायगुणात्मकम् ॥ ८२॥

ग्रसिष्णुर्भगवान् ब्रह्मा व्यक्ताव्यक्तमसंशयम् ॥ ८३
एषोऽव्ययस्य प्रलयो मया ते परिकीर्तितः ।

---

1. क-घ—वर

अध्यात्ममधिभूतं च अधिदैवं च श्रूयताम् ॥ ८४

आकाशः प्रथमं भूतं श्रोत्रमध्यात्मं शब्दोऽधिभूतं दिशोधिदैवतम् ॥ ८५

वायुर्द्वितीयं भूतं त्वगध्यात्मं स्पर्शोऽधिभूतं विद्युदधिदैवतं स्यात् ॥ ८६

ज्योतिस्तृतीयं भूतं चक्षुरध्यात्मं रूपमधिभूतं सूर्योऽधिदैवतं स्यात् ॥ ८७

[1]आपश्चतुर्थं भूतं जिह्वाऽध्यात्मं रसोऽधिभूतं [2]वरुणोऽधिदैवतं स्यात् ॥ ८८

पृथिवी पञ्चमं भूतं घ्राणमध्यात्मं गन्धोऽधिभूतं वायुरधिदैवतं स्यात् ॥ ८९

पाञ्चभौतिकमेतच्चतुष्टयमनुवर्णितम् ॥ ९०

अत ऊर्ध्वमिन्द्रियमनुवर्णयिष्यामः ॥ ९१

पादावध्यात्मं गन्तव्यमधिभूतं विष्णुरधिदैवतं स्यात् ॥ ९२

हस्तावध्यात्मं कर्तव्यमधिभूतमिन्द्रोऽधिदैवतं स्यात् ॥ ९३

पायुरध्यात्मं विसर्गोऽधिभूतं मित्रोऽधिदैवतं स्यात् ॥ ९४

---

1. अ—इदं नास्ति 2. क-ख- सोमोऽधि

उपस्थोऽध्यात्ममानन्दोऽधिभूतं प्रजापतिरधिदैवतं स्यात् ॥ ९५

वागध्यात्मं वक्तव्यमधिभूतमग्निरधिदैवतं स्यात् ॥ ९६

[1]मनोऽध्यात्मं मन्तव्यमधिभूतं चन्द्रमा अधिदैवतं स्यात् ॥ ९७

अहङ्कारोऽध्यात्ममभिमानोऽधिभूतं विरिञ्चोऽधिदैवतं स्यात् ॥ ९८

बुद्धिरध्यात्मं व्यवसायोऽधिभूतं ब्रह्माऽधिदैवतं स्यात् ॥ ९९

एवमव्यक्तो भगवान् सकृत् कृत्स्नान् कुरुते संहरते च ॥ १००

कस्मात् क्रीडार्थम् ॥ १०१

यथाऽऽदित्योंशुजालं क्षिपति संहरते च [2]एवमव्यक्तो गुणान् सृजति संहरते च ॥ १०२

यथाऽर्णवादूर्मिमालानिचयश्चोर्ध्वमुत्तिष्ठते संहरते च ॥ १०३

[3]यथा चान्तरिक्षादभ्रकोशमुत्तिष्ठति स्तनितगर्जितोन्मिश्रं तद्वत्तत्रैव प्राणशत् ॥ १०४

---

1. घ—कोशे "मनोऽध्यात्ममिति" "अहङ्कार" इति "बुद्धिरध्यात्ममिति" वाक्यत्रयं नास्ति

2. क-घ—एतद्वाक्यं नास्ति 3. क-घ—इदं वाक्यं नास्ति

एवमव्यक्तो गुणान् सृजति संहरते च ॥ १०५

यथा कूर्मोऽङ्गानि कामात् प्रसारयते पुनश्च प्रवेशयति एवमव्यक्तो लोकान् प्रकाशयते प्रवेशयते च ॥ १०६

एवं चेतनश्च भगवान् पञ्चविंशकश्शुचिस्तेनाधिष्ठिता प्रकृतिश्चेतयति नित्यं सहधर्मा च ॥ १०७

भगवतोऽव्यक्तस्य क्रियावतोऽक्रियावतश्च प्रकृतिः क्रियावानजरामरः क्षेत्रज्ञो नारायणाख्यः पुरुषः ॥ १०८

भीष्मः—

इत्येतन्नारदायोक्तं कुमारेण च धीमता ।
एतच्छ्रुत्वा द्विजो राजन् सर्वयज्ञफलं लभेत् ॥ १०९

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां अनुशासनपर्वणि विंशोऽध्यायः ॥ २० ॥
॥ ८५ ॥ आनुशासनिकपर्वणि विंशोऽध्यायः ॥ २० ॥
[अस्मिन्नध्याये ८५ श्लोकाः २४ वाक्यानि]

॥ एकविंशोऽध्यायः ॥

ब्रह्मणा देवान् प्रति नारायणमहिमप्रतिपादकगरुडकश्यपसंवादानुवादः ॥ १ ॥ ब्रह्मणा देवान् प्रति गरुडस्य बदरीनारायणानुगमनादिप्रतिपादकगरुडमुनिगणसंवादानुवादः ॥ २ ॥ ब्रह्मणा देवान् प्रति श्रीनारायणमहिमप्रतिपादकगरुडमुनिगणसंवादानुवादः ॥ ३ ॥ बदरीनारायणेन गरुडं प्रति स्वमहिमोक्तिः ॥ ४ ॥ गरुडेन मुनिगणान् प्रति स्वानुभूतनारायणमहिमोक्तिः ॥ ५ ॥ भीष्मेण युधिष्ठिरं प्रति ब्रह्मणा देवान् प्रत्यनूदितसुपर्णोपाख्यानकथनसमापनम् ॥ ६ ॥

युधिष्ठिरः—

आत्मन्यग्नीन् समाधाय य एते कुरुनन्दन ।
द्विजातयो व्रतोपेता जपयज्ञपरायणाः ॥ १

यजन्त्यारम्भयज्ञैश्च मानसं यज्ञमास्थिताः ॥ १॥

अग्निभ्यश्च परं नास्ति येषामेषा व्यवस्थितिः ।
तेषां गतिर्महाप्राज्ञ कीदृशी किम्परा च ते ॥ २॥

एतदिच्छामि तत्त्वेन त्वत्तश्श्रोतुं पितामह ॥ ३

भीष्मः—

अत्र ते वर्तयिष्यामि इतिहासं पुरातनम् ।
वैकुण्ठस्य च संवादं सुपर्णस्य च भारत ॥ ४

अमृतस्य समुत्पत्तौ देवानामसुरैस्सह ।

षष्टिर्वर्षसहस्राणि दैवासुरमवर्तत ॥ ५

तत्र देवास्तु दैतेयैर् वध्यन्ते भृशदारुणैः ।
त्रातारं नाधिगच्छन्ति वध्यमाना महासुरैः ॥ ६

आर्तास्ते देवदेवेशं प्रपन्नाश्शरणैषिणः ।
पितामहं महा[1]प्राज्ञं वध्यमानास्सुरेतरैः ॥ ७

ता दृष्ट्वा देवता ब्रह्मा सम्भ्रान्तेन्द्रियमानसः ।
वैकुण्ठं शरणं देवं प्रतिपेदे च तैस्सह ॥ ८

ततस्स देवैस्सहितः पद्मयोनिर्नरेश्वर ।
तुष्टाव प्राञ्जलिर्भूत्वा नारायणमनामयम् ॥ ९

ब्रह्मा—

त्वद्रूपचिन्तनान्नाम्नां स्मरणादर्चनादपि ।
तपोयोगादिभिश्चैव श्रेयो यान्ति मनीषिणः ॥ १०

भक्तवत्सल पद्माक्ष परमेश्वर पापहन् ।
परमात्माऽविकाराद्य नारायण नमोऽस्तु ते ॥ ११

नमस्ते सर्वलोकादे सर्वात्मामितविक्रम ।
सर्वभूतभविष्येश सर्वभूतमहेश्वर ॥ १२

देवानामपि देवस्त्वं सर्वविद्यापरायणः ।
जगद्बीजसमाहार जगतः परमो ह्यसि ॥ १३

---

1. क-ब—त्मानम्

त्रायस्व देवता वीर दानवाद्यैस्सुपीडिताः ।
लोकांश्च लोकपालांश्च ऋषींश्च जयतां वर ॥ १४

वेदास्साङ्गोपनिषदस् सरहस्यास्ससङ्ग्रहाः ।
सोङ्कारास्सवषट्कारा: प्राहुस्त्वां यज्ञमुत्तमम् ॥ १५

पवित्राणां पवित्रं च मङ्गलानां च मङ्गलम् ।
तपस्विनां तपश्चैव दैवतं देवतास्वपि ॥ १६

भीष्मः—

एवमादिपुरस्कारैर् ऋक्सामयजुषां गणैः ।
वैकुण्ठं तुष्टुवुर्देवास् [1]समेत्य ब्रह्मणा सह ॥ १७

ततोऽन्तरिक्षे वागासीन्मेघगम्भीरनिस्वना ।
जेष्यध्वं दानवान् [2]यूयं मयैव सह सङ्गरे ॥ १८

ततो देवगणानां च दानवानां च युध्यताम् ।
प्रादुरासीन्महातेजाश् [3]शङ्खचक्रगदाधरः ॥ १९

सुपर्णपृष्ठमास्थाय तेजसा प्रदहन्निव ॥ १९॥

व्यधमद्दानवान् सर्वान् बाहुद्रविणतेजसा ॥ २०

तं समासाद्य समरे दैत्यदानवपुङ्गवाः ।
व्यनश्यन्त महाराज पतङ्गा इव पावकम् ॥ २१

स विजित्वाऽसुरान् सर्वान् दानवांश्च महामतिः ।

---

1. अ-ख—सर्वे ब्रह्मर्षिभिस्सह 2. क-घ—देवा
3. अ-ख-घ—शाङ्गचक्र

पश्यतामेव देवानां तत्रैवान्तरधीयत ॥ २२

तं दृष्ट्वाऽन्तर्हितं देवं विष्णुं देवामितद्युतिम् ।
विस्मयोत्फुल्लनयना ब्रह्माणमिदमब्रुवन् ॥ २३

देवाः—

भगवन् सर्वलोकेश सर्वलोकपितामह ।
इदमत्यद्भुतं वृत्तं त्वं नश्शंसितुमर्हसि ॥ २४

[1]दैवासुरेऽस्मिन् सङ्ग्रामे त्राता येन वयं प्रभो ।
एतद्विज्ञातुमिच्छामः कुतोऽसौ कश्च तत्त्वतः ॥ २५

कोऽयमस्मान् परित्राय तूष्णीमेव यथागतम् ।
प्रतिप्रयातो दिव्यात्मा तं नश्शंसितुमर्हसि ॥ २६

भीष्मः—

एवमुक्तस्सुरैस्सर्वैर् वचनं वचनार्थवित् ।
उवाचः पद्मनाभस्य पूर्वरूपं प्रति प्रभो ॥ २७

ब्रह्मा—

न ह्येनं वेद तत्त्वेन भुवनं भुवनेश्वरम् ।
सङ्क्षयातुं नैव चात्मानं निर्गुणं गुणिनां वरम् ॥ २८

अत्र [2]वो वर्तयिष्यामि इतिहासं पुरातनम् ।
सुपर्णस्य च संवादम् ऋषीणां चापि देवताः ॥ २९

पुरा ब्रह्मर्षयश्चैव सिद्धाश्च भुवनेश्वरम् ।

1. क-घ—अर्धचतुष्टयं नास्ति 2. अ-ख—ते

आश्रित्य हिमवत्पृष्ठे चक्रिरे विविधाः कथाः ॥ ३०

तेषां कथयतां तत्र कथान्ते पततां वरः ।
प्रादुरासीन्महातेजा वाहश्चक्रगदाभृतः ॥ ३१

स तानृषीन् समासाद्य विनयावनताननः ।
अवतीर्य महावीर्यस् तानृषीनभिजग्मिवान् ॥ ३२

अभ्यर्चितस्स ऋषिभिस् स्वागतेन महाबलः ।
[1]उपाविशत तेजस्वी भूमौ वेगवतां वरः ॥ ३३

तमासीनं महात्मानं वैनतेयं महाद्युतिम् ।
ऋषयः परिपप्रच्छुर् महात्मानं तपस्विनः ॥ ३४

ऋषयः—

कौतूहलं वैनतेय परं नो हृदि वर्तते ।
तस्य नान्योऽस्ति वक्तेह त्वामृते पन्नगाशन ॥ ३५

तदाख्यातमिहेच्छामो भवता प्रश्नमुत्तमम् ॥ ३५॥

ब्रह्मा—

एवमुक्तः प्रत्युवाच प्राञ्जलिर्विनतासुतः ॥ ३६

गरुडः—

धन्योऽस्म्यनुगृहीतोऽस्मि यन्मां ब्रह्मर्षिसत्तमाः ।
प्रष्टव्यं प्रष्टुमिच्छन्ति प्रीतिमन्तोऽनसूयकाः ॥ ३७

1. ख—इदमर्धं नास्ति

किं मया ब्रूत वक्तव्यं कार्यं च वदतां वराः ।
यूयं हि मां यथायुक्तं सर्वे वै देष्टुमर्हथ ॥ ३८

ब्रह्मा—

नमस्कृत्वा ह्यनन्ताय ततस्ते हृदि सत्तमाः ।
प्रष्टुं प्रचक्रमुस्तत्र वैनतेयं महाबलम् ॥ ३९

ऋषयः—

देवदेवं महात्मानं नारायणमनामयम् ।
भवानुपास्ते वरदं कुतोऽसौ कश्च तत्त्वतः ॥ ४०

प्रकृतिर्विकृतिर्वाऽस्य कीदृशी क नु संस्थितिः ।
एतद्ब्रूवन्तं पृच्छामो देवोऽयं क कृतालयः ॥ ४१

एष भक्तप्रियो देवः प्रियभक्तस्तथैव च ।
त्वं प्रियश्चास्य [1]भक्तश्च नान्यः काश्यप विद्यते ॥ ४२

मुष्णन्निव मनश्चक्षूंष्यविभाव्यतनुर्विभुः ।
अनादिमध्यनिधनो न विद्मैनं कुतो ह्यसौ ॥ ४३

वेदेष्वपि च विश्वात्मा गीयते न च विद्महे ।
तत्त्वतस्तत्त्वभूतात्मा विभुर्नित्यस्सनातनः ॥ ४४

पृथिवी वायुराकाशम् आपो ज्योतिश्च पञ्चमम् ।
गुणाश्चैषां यथासङ्ख्यं भावाभावौ तथैव च ॥ ४५

1. क-घ—भक्तानाम्

तमस्सत्त्वं रजश्चैव भावाश्चैव तदात्मकाः ।
मनो बुद्धिश्च तेजश्च बुद्धिगम्यानि तत्त्वतः ॥ ४६
जायन्ते तात तस्माद्धि तिष्ठते तेष्वसौ विभुः ॥ ४६॥
सञ्चिन्त्य बहुधा बुद्ध्या नाध्यवस्यामहे परम् ।
तस्य देवस्य तत्त्वेन तन्नश्शंस यथातथम् ॥ ४७॥
एतमेव परं प्रश्नं कौतूहलसमन्विताः ।
एवं भवन्तं पृच्छामस् तन्नश्शंसितुमर्हसि ॥ ४८॥

सुपर्णः—

स्थूलतो यस्तु भगवांस् तेनैव स्वेन हेतुना ।
त्रैलोक्यस्य तु रक्षार्थं दृश्यते रूपमास्थितः ॥ ४९॥
मया तु महदाश्चर्यं पुरा दृष्टं सनातने ।
देवे श्रीवत्सनिलये तच्छृणुध्वमशेषतः ॥ ५०॥
न स्म शक्यो मया वेत्तुं न भवद्भिः कथञ्चन ।
यथा मां प्राह भगवांस् तथा तच्छ्रूयतां मम ॥ ५१॥
मयाऽमृतं देवतानां मिषतामृषिसत्तमाः ।
हृतं विपाट्य तं मन्त्रं विद्राव्यामृतरक्षिणः ॥ ५२॥
देवता विमुखीकृत्य [1]सेन्द्रास्समरुतो मृधे ।
उन्मथ्याशु गिरींश्चैव विक्षोभ्य च महोदधिम् ॥ ५३॥

1. क—इतः अष्टौ पादा न सन्ति

तं दृष्ट्वा मम विक्रान्तं वागुवाचाशरीरिणी ॥ ५४

अशरीरिणी वाक्—

प्रीतोऽस्मि ते वैनतेय कर्मणाऽनेन सुव्रत ।
अवृथा तेऽस्तु मद्वाक्यं ब्रूहि किं करवाणि ते ॥ ५५

सुपर्णः—

तामेवंवादिनीं वाचम् अहं प्रत्युक्तवांस्तदा ।
ज्ञातुमिच्छामि कस्त्वं हि ततो मे दास्यसे वरम् ॥ ५६

प्रकृतिर्विकृतिर्वा त्वं देवो वा दानवोऽपि वा ॥ ५६॥

ततो जलदगम्भीरं प्रहस्य गदतां वरः ।
उवाच वरदः प्रीतः काले त्वं माऽभिवेत्स्यसि ॥ ५७॥

वाहनं भव मे साधु वरं दद्मि तवोत्तमम् ।
न ते वीर्येण सदृशः कश्चिल्लोके भविष्यति ॥ ५८॥

पतङ्ग पततां श्रेष्ठ न देवो नापि दानवः ।
मत्सखित्वमनुप्राप्तो दुर्धर्षश्च भविष्यसि ॥ ५९॥

तमब्रवं देवदेवं मामेवंवादिनं परम् ।
प्रयतः प्राञ्जलिर्भूत्वा प्रणम्य शिरसा विभुम् ॥ ६०॥

एवमेतन्महाबाहो सर्वमेतद्भविष्यति ।
वाहनं ते भविष्यामि यथा वदति मां भवान् ॥ ६१॥

मम चापि महाबुद्धे निश्चयं श्रूयतामिति ।

ध्वजस्तेऽहं भविष्यामि रथस्थस्य न संशयः ॥ ६२॥

तथाऽस्त्विति स मामुक्त्वा भूयः प्राह महामनाः ।
न ते गतिविघातोऽद्य भविष्यत्यमृतं विना ॥ ६३॥

एवं कृत्वा तु समयं देवदेवस्सनातनः ।
मामुक्त्वा साधयस्वेति यथाऽभिप्रायतो गतः ॥ ६४॥

ततोऽहं कृतसंवादस् तेन केनापि सत्तमाः ।
कौतूहलसमाविष्टः पितरं काश्यपं गतः ॥ ६५॥

सोऽहं पितरमासाद्य प्रणिपत्याभिवाद्य च ।
सर्वमेतद्यथातथ्यम् उक्तवान् पितुरन्तिके ॥ ६६॥

श्रुत्वा तु भगवान् मह्यं ध्यानमेवान्वपद्यत ।
स मुहूर्तमिव ध्यात्वा मामाह वदतां वरः ॥ ६७॥

धन्योऽस्म्यनुगृहीतोऽस्मि यत्त्वं तेन महात्मना ।
संवादं कृतवांस्तात गुह्येन परमात्मना ॥ ६८॥

स्थूलं दृश्यस्स भगवांस् तेन तेनैव हेतुना ।
दृश्यतेऽव्यक्तरूपस्थः प्रधानं प्रभवोऽव्ययः ॥ ६९॥

मया हि स महातेजा नान्ययोगसमाधिना ।
तपसोग्रेण तेजस्वी तोषितस्तपसां निधिः ॥ ७०॥

ततो मे दर्शयामास तोषयन्निव पुत्रक ।
श्वेतपीतारुणनिभः कद्रूकपिलपिङ्गलः ॥ ७१॥

रक्तनीलासितनिभस् सहस्रोदरपाणिमान् ।
द्विसाहस्रमहावक्त्र एकाक्षश्शतलोचनः ॥ ७२॥

अनिष्यन्दा निराहारास् समानास्सूर्यतेजसा ।
तमुपासन्ति परमं गुह्यमक्षरमव्ययम् ॥ ७३॥

समासाद्य तु तं विश्वम् अहं मूर्ध्ना प्रणम्य च ।
ऋग्यजुस्सामभिस्स्तुत्वा शरण्यं शरणं गतः ॥ ७४॥

महामेघौघधीरेण स्वरेण जयतां वरः ।
आभाष्य पुत्र पुत्रेति इदमाह धृतं वचः ॥ ७५॥

त्वयाऽभ्युदयकामेन तपश्चीर्णं महामुने ।
अमुक्तस्त्वं न मां सङ्गैर् अविमुक्तोऽद्य पश्यसि ॥ ७६॥

यदा सङ्गैर्विमुक्तश्च गतमोहो गतस्पृहः ।
भविष्यसि तदा ब्रह्म मामनुध्यास्यसे द्विज ॥ ७७॥

ऐकान्तिकीं मतिं कृत्वा मद्भक्तो मत्परायणः ।
ज्ञास्यसे मां ततो ब्रह्मन् वीतमोहश्च तत्त्वतः ॥ ७८॥

तेन त्वं कृतसंवादस् स्वतस्सर्वहितैषिणा ।
विश्वरूपेण देवेन पुरुषेण महात्मना ॥ ७९॥

तमेवाराधय क्षिप्रं तमाराध्य न सीदसि ॥ ८०

सोऽहमेवं भगवता पित्रा ब्रह्मर्षिसत्तमाः ।

अनुनीतो यथान्यायं स्वमेव भवनं गतः ॥ ८१

सोऽहमामन्त्र्य पितरं तद्भावगतमानसः ।
स्वमेवालयमासाद्य तमेवार्थमचिन्तयम् ॥ ८२

तद्भावगतभावात्मा तद्भूतगतमानसः ।
गोविन्दं चिन्तयन्नासे शाश्वतं परमव्ययम् ॥ ८३

[1]धृतं बभूव हृदयं नारायणदिदृक्षया ॥ ८३॥

सोऽहं वेगं समास्थाय मनोमारुतवेगवान् ।
रम्यां विशालां बदरीं गतो नारायणाश्रमम् ॥ ८४॥

ततस्तत्र हरिं दृष्ट्वा जगतः प्रभवं विभुम् ।
गोविन्दं पुण्डरीकाक्षं प्रणतश्शिरसा हरिम् ॥ ८५॥

ऋग्यजुस्सामभिश्चैनं तुष्टाव परया मुदा ॥ ८६

अथापश्यं सुविपुलम् अश्वत्थं देवसंश्रयम् ॥ ८६॥

चतुर्द्विगुणपीनांसश् शङ्खचक्रगदाधरः ।
प्रादुर्बभूव पुरुषः पीतवासा[2]स्सनातनः ॥ ८७॥

मध्याह्नार्कप्रतीकाशस् तेजसा भासयन् दिशः ॥ ८८

संस्तुतस्संविदं कृत्वा व्रजेति श्रेयसे रतः ।

---

* सर्वेषु कोशेषु अत्रैवाध्यायसमाप्तिः

1. क-घ—धृतिर्बभूव हृदये
2. क-घ—जनार्दनः

प्रागुदीचीं दिशं देवः प्रतस्थे पुरुषोत्तमः ॥ ८९
दिशश्च विदिशश्चैव भासयन् स्वेन तेजसा ॥ ८९॥
तमहं पुरुषं दिव्यं व्रजन्तममितौजसम् ।
अनुवव्राज वेगेन शनैर्गच्छन्तमव्ययम् ॥ ९०॥
योजनानां सहस्राणि षष्टिमष्टौ तथा शतम् ।
तथा शतसहस्रं च शतं द्विगुणमेव च ॥ ९१॥
स गत्वा दीर्घमध्वानम् अपश्यमहमद्भुतम् ।
महान्तं पावकं दीप्तम् अर्चिष्मन्तमनिन्धनम् ॥ ९२॥
शतयोजनविस्तीर्णं तस्माद्द्विगुणमायतम् ।
विवेश स महायोगी पावकं पावकद्युतिः ॥ ९३॥
तत्र शम्भुस्तपस्तेपे महादेवस्सहोमया ।
स तेन संविदं कृत्वा पावकं समतिक्रमत् ॥ ९४॥
श्रमाभिभूतेन मया कथञ्चिदनुगम्यते ॥ ९५
गत्वा स दीर्घमध्वानं भास्करेणावभासितम् ।
अभास्करममर्यादं विवेश सुमहत्तमः ॥ ९६
अथ दृष्टिः प्रतिहता मम तत्र बभूव ह ।
यथास्वभावं भूतात्मा विवेश स महाद्युतिः ॥ ९७
ततोऽहमभवं मूढो जडान्धबधिरोपमः ।
दिशश्च विदिशश्चैव न विजज्ञे तमोवृतः ॥ ९८

अविजानन्नहं किञ्चित् तस्मिंस्तमसि संवृते ।
सुसम्भ्रान्तेन मनसा व्यथां परमिकां गतः ॥ ९९

सोऽहं प्रपन्नश्शरणं देवदेवं सनातनम् ।
प्राञ्जलिर्मनसा भूत्वा वाक्यमेतत्तदोक्तवान् ॥ १००

भगवन् भूतभव्येश भवद्भूतकृदव्यय ।
शरणं सम्प्रपन्नं मां त्रातुमर्हस्यरिन्दम ॥ १०१

अहं तु तत्त्वजिज्ञासुः कोऽसि कस्यासि कुत्र वा ।
सम्प्राप्तः पदवीं देव स मां सन्त्रातुमर्हसि ॥ १०२

आविर्भूतः पुराणात्मा मामेहीति सनातनः ॥ १०२॥

ततोऽपरान्ततो देवो विश्वस्य गतिरात्मवान् ।
मोहयामास मां तत्र दुर्विभाव्य[1]वपुर्विभुः ॥ १०३॥

स्वभावमात्मनस्तत्र दर्शयन् स्वयमात्मना ।
श्रमं मे जनयामास भयं चाभयदः प्रभुः ॥ १०४॥

खिन्न इत्येव मां मत्वा भगवानव्ययोऽच्युतः ।
शब्देनाश्वासयामास जगाहे च तमो महत् ॥ १०५॥

अहं च खेदानुगतश् श्रमाच्चलपदश्चरन ।
मनसा देवदेवेशं ध्यातुं समुपचक्रमे ॥ १०६॥

तथा गतं तु मां ज्ञात्वा भगवानमितद्युतिः ।

1. क-घ—गतिर्विभुः

तमः प्रणाशयामास ममानुग्रहकाङ्क्षया ॥ १०७॥

ततः प्रनष्टे तमसि तमहं दीप्ततेजसम् ।
अपश्यं तेजसा व्याप्तं मध्याह्न इव भास्करम् ॥ १०८॥

स्वयम्प्रभांश्च पुरुषान् स्त्रियश्च परमाद्भुताः ।
अपश्यमहमव्यग्रस् तस्मिन् देशे सहस्रशः ॥ १०९॥

न तत्र द्योतते सूर्यो नक्षत्राणि तथैव च ।
[1]न तत्र चन्द्रमा भाति न वायुर्वाति पांसुलः ॥ ११०॥

तत्र तूर्याण्यनेकानि गीतानि मधुराणि च ।
अदृश्यानि मनोज्ञानि श्रूयन्ते सर्वतोदिशम् ॥ १११॥

स्रवन्ति वैडूर्यलताः पद्मोत्पलझषाकुलाः ।
मुक्तासिकतवप्राश्च सरितो निर्मलोदकाः ॥ ११२॥

अगतिस्तत्र देवानाम् असुराणां तथैव च ।
गन्धर्वनागयक्षाणां राक्षसानां तथैव च ॥ ११३॥

स्वयम्प्रभास्तत्र नरा दृश्यन्तेऽद्भुतदर्शनाः ।
येषां न देवतास्तुल्याः प्रभाभिर्भासितात्मनाम् ॥ ११४॥

स च [2]तानप्यतिक्रम्य दैवतैरपि पूजितः ।
विवेश ज्वलनं दीप्तम् अनिन्धनमनौपमम् ॥ ११५॥

ज्वालाभिर्मां प्रविष्टं च ज्वलन्तं सर्वतोदिशम् ।

1. ख—अर्धसप्तकं नास्ति 2. क-घ—तत्राप्यहं देवो

दैत्यदानवरक्षोभिर् दैवतैश्चापि दुस्सहम् ॥ ११६॥

ज्वालामालिनमासाद्य तमग्निमहमव्ययम् ।
अविषह्यतमं मत्वा मनसेदमचिन्तयम् ॥ ११७॥

मया हि समरेष्वग्निर् अनेकेषु महाद्युतिः ।
प्रविष्टश्चापविद्धश्च न च मां दग्धवान् क्वचित् ॥ ११८॥

अयं च दुस्सहश्शश्वत् तेजसाऽतिहुताशनः ।
अत्यादित्यप्रकाशार्चिर् अनलो दीप्यते महान् ॥ ११९॥

स तथा दह्यमानोऽपि तेजसा दीप्तवर्चसा ।
प्रपन्नश्शरणं देवं शङ्खचक्रगदाधरम् ॥ १२०॥

भक्तश्चानुगतश्चेति त्रातुमर्हसि मां विभो ।
यथा मां न दहेदग्निस् सद्यो देव तथा कुरु ॥ १२१॥

एवं विलपमानस्य ज्ञात्वा मे वचनं प्रभुः ।
मा भैरिति वचः प्राह मेघगम्भीरनिस्वनः ॥ १२२॥

स मामाश्वास्य वचनं प्राहेदं भगवान् विभुः ॥ १२३

श्रीभगवान्—

मम त्वं विदितस्सौम्य यथावत्तत्त्वदर्शने ।
ज्ञापितश्चापि यत् पित्रा तच्चापि विदितं महत् ॥ १२४

वैनतेय न कस्यापि अहं वेद्यः कथञ्चन ।
मां हि विन्दन्ति विद्वांसो ये ज्ञाने परिनिष्ठिताः ॥ १२५

निर्ममा निरहङ्कारा निराशीर्बन्धनायुताः ॥ १२५॥
भवांस्तु सततं भक्तो मन्मनाः पक्षिसत्तम ।
स्थूलं मां वेत्स्यसे तस्माज् जगतः कारणे स्थितम् * ॥ १२६॥

सुपर्णः—

एवं दत्ताभयस्तेन ततोऽहमृषिसत्तमाः ।
नष्टखेदश्रमभयः क्षणेन ह्यभवं तदा ॥ १२७॥
स शनैर्याति भगवान् [1]गत्या लघुपराक्रमः ।
अहं तु सुमहावेगम् आस्थायानुव्रजामि तम् ॥ १२८॥
स गत्वा दीर्घमध्वानम् आकाशममितद्युतिः ।
मनसाऽप्यगमं देशम् आससादात्मतत्त्ववित् ॥ १२९॥
अथ देवस्समासाद्य मनसस्सदृशं जवम् ।
मोहयित्वा च मां तत्र क्षणेनान्तरधीयत ॥ १३०॥
तत्राम्बुधरधीरेण भोशब्देनानुनादिना ।
अयं भोऽहमिति प्राह वाक्यं वाक्यविशारदः ॥ १३१॥
शब्दानुसारी तु ततस् तं देशमहमाव्रजम् ।
[2]तत्रापश्यं ततश्चाहं श्रीमद्धंसयुतं सरः ॥ १३२॥
स तत् सरस्समासाद्य भगवानात्मवित्तमः ।
भोशब्दप्रतिसृष्टेन स्वरेणाप्रतिवादिना ॥ १३३॥

---

* सर्वेषु कोशेषु अत्रैवाध्यायसमाप्तिः
1. क-घ—सत्यं लघु ख—सत्यो 2. क-घ—अर्धपञ्चकं नास्ति

विवेश देवस्त्वां योनिं मामिदं चाभ्यभाषत ॥ १३४

श्रीभगवान्—

विशस्व सलिलं सौम्य सुखमत्र वसामहे ॥ १३४॥

सुपर्णः—

ततश्च प्राविशं तत्र सह तेन महात्मना ।
दृष्टवानद्भुततरं तस्मिन् सरसि भास्वताम् ॥ १३५॥

अग्नीनां सुप्रणीतानाम् इद्धानामिन्धनैर्विना ।
दीप्तानामाज्यसिक्तानां स्थानेष्वर्चिष्मतां सदा ॥ १३६॥

दीप्तिस्तेषामनाज्यानां प्राप्ताज्यानामिवाभवत् ।
अनिद्धानामिव सताम् इद्धानामिव भास्वताम् ॥ १३७॥

अथाहं वरदं देवं नापश्यं तत्र सङ्गतम् ।
ततस्सम्मोहमापन्नो विषादमगमं परम् ॥ १३८॥

अपश्यं चाग्निहोत्राणि शतशोऽथ सहस्रशः ।
विधिना सम्प्रणीतानि धिष्ण्येष्वाज्यवतां तदा ॥ १३९॥

असम्मृष्टतलांश्चैव वेदीन् कुसुमसंस्तृतान् ।
कुशपद्मोत्पलासङ्गान् कलशांश्च हिरण्मयान् ॥ १४०॥

[1]अग्निहोत्राणि चित्राणि शतशोऽथ सहस्रशः ।
अग्निहोत्रोपयोग्यानि यानि द्रव्याणि कानिचित् ॥ १४१॥

तानि चात्र समृद्धानि दृष्टवानस्म्यनेकशः ॥ १४२

1. अ—इदमर्धं नास्ति

मनोहृद्यतमश्चात्र सुरभिः पुण्यलक्षणः ।
आज्यगन्धो मनोग्राही घ्राणचक्षुस्सुखावहः ॥ १४३

तेषां तत्राग्निहोत्राणाम् ईडितानां सहस्रशः ।
समीपे त्वद्भुततमम् अपश्यमहमव्ययम् ॥ १४४

चन्द्रांशुकाशशुभ्राणां तुषारोद्भेदवर्चसाम् ।
विमलादित्यभासानां स्थण्डिलानि सहस्रशः ॥ १४५

दृष्टान्यग्निसमीपे तु [1]द्युतिमन्ति महान्ति च ।
एषु चाग्निसमीपेषु शुश्राव सुपदाक्षराः ॥ १४६

प्रभावान्तरितानां तु प्रस्पष्टाक्षरभाषिणाम् ।
ऋग्यजुस्सामगानां च मधुरास्सुस्वरा गिरः ॥ १४७

सुसम्मृष्टतलैस्तैस्तु बृहद्भिर्दीप्ततेजसैः ॥
पावकैः पावितात्माऽहम् अभवं लघुविक्रमः ॥ १४८

ततोऽहं तेषु धिष्ण्येषु ज्वलमानेषु यज्वनाम् ।
तं देशं प्रणमित्वाऽथ अन्वेष्टुमुपचक्रमे ॥ १४९

तान्यनेकसहस्राणि परीयंस्तु महाजवात् ।
अपश्यमानस्तं देवं ततोऽहं व्यथितोऽभवम् ॥ १५०

ततस्तेष्वग्निहोत्रेषु ज्वलत्सु विमलार्चिषु ।
भानुमत्सु न पश्यामि देवदेवं सनातनम् ॥ १५१

---

1. ख-घ—अयं पादोऽनन्तरश्च न स्तः

ततोऽहं तानि दीप्तानि परीय व्यथितेन्द्रियः ।
नान्तं तेषां प्रपश्यामि येनाहमिह चोदितः ॥ १५२
एवं चिन्तासमापन्नः प्रध्यातुमुपचक्रमे ॥ १५२॥
ततश्चिन्तयतो मह्यं मोहेनाविष्टचेतसः ।
[1]महाञ् शब्दः प्रादुरासीत् सुभृशं मे व्यथाकरः ॥ १५३॥
तथाऽहं सहसा तत्र शृणोमि विपुलध्वनिम् ।
अपश्यं च सुपर्णानां सहस्राण्ययुतानि च ॥ १५४॥
अभ्यद्रवन्त मामेव विपुलद्युतिरंहसः ।
तेषामहं प्रभावेण सर्वथैवापरोऽभवम् ॥ १५५॥
सोऽहं समन्तात् तैस्सर्वैस् सुपर्णैरमितौजसैः ।
दृष्ट्वाऽऽत्मानं परिगतं सम्भ्रमं परमं गतः ॥ १५६॥
विनयावनतो भूत्वा नमश्चक्रे महात्मने ।
अनादिनिधनायैभिर् नामभिः परमात्मने ॥ १५७॥
नारायणाय शुद्धाय शाश्वताय ध्रुवाय च ।
[2]भूतभव्यभवेशाय शिवाय शिवमूर्तये ॥ १५८॥
शिवयोनेरिशवाद्याय शिवपूज्यतमाय च ।
घोररूपाय महते युगान्तकरणाय च ॥ १५९॥
विश्वाय विश्वदेवाय विश्वेशाय महात्मने ।
सहस्रोदरपादाय सहस्रनयनाय च ॥ १६०॥

1. ख—अर्धचतुष्टयं नास्ति 2. क-घ—अर्धपञ्चकं नास्ति

सहस्रबाहवे चैव सहस्रवदनाय च ।
शुचिश्रवाय महते ऋतुसंवत्सराय च ॥ १६१॥

ऋग्यजुस्सामवक्त्राय अथर्वशिरसे नमः ।
[1]हृषीकेशाय कृष्णाय दुहिणोरुक्रमाय च ॥ १६२॥

[2]ब्रह्मेन्द्रकाय तार्क्ष्याय वराहायैकशृङ्गिणे ।
शिपिविष्टाय सत्याय हरयेऽथ शिखण्डिने ॥ १६३॥

हुतायोर्ध्वाय वक्त्राय रौद्रानीकाय साधवे ।
सिन्धवे सिन्धुवर्षघ्ने देवानां सिन्धवे नमः ॥ १६४॥

गरुत्मते त्रिनेत्राय सुधामाय वृषावृषे ।
सम्राडुग्रे सङ्कृतये विरजे सम्भवे भवे ॥ १६५॥

वृषाय वृषरूपाय विभवे भूर्भुवाय च ।
दीप्तसृष्टाय यज्ञाय [3]स्थिराय स्थविराय च ॥ १६६॥

अच्युताय तुषाराय वीराय च समाय च ।
जिष्णवे पुरुहूताय वसिष्ठाय वराय च ॥ १६७॥

सत्येशाय सुरेशाय हरयेऽथ शिखण्डिने ।
बर्हिषाय वरेण्याय वसवे विश्ववेधसे ॥ १६८॥

किरीटिने सुकेशाय वासुदेवाय शुष्मिणे ।

---

1. क—अर्धचतुष्टयं नास्ति
2. ख—ब्रह्मावर्ताय तथ्याय घ वृहद्वेशाय
3. क—संस्थिताय स्थिराय च

बृहदुग्धे सुषेणाय युग्ये दुन्दुभये तथा ॥ १६९॥

भवेसखाय विभवे भरद्वाजाभयाय च ।
भास्कराय वरेन्द्राय पद्मनाभाय भूरिणे ॥ १७०॥

पुनर्वसुभृतत्वाय जीवप्रभविषाय च ।
वषट्काराय स्वाहायै स्वधायै निधनाय च ॥ १७१॥

ऋचे च यजुषे साम्ने त्रैलोक्यपतये नमः ।
श्रीपद्मायात्मसदृशे धरणे धारणे परे ॥ १७२॥

सौम्याय सौम्यरूपाय सौम्ये सुमनसे नमः ।
विश्वाय च सुविश्वाय विश्वरूपधराय च ॥ १७३॥

केशवाय सुकेशाय रश्मिकेशाय भूरिणे ।
हिरण्यगर्भाय नमस् सौम्याय वृषरूपिणे ॥ १७४॥

नारायणाप्रवपुषे पुरुहूताय वज्रिणे ।
धर्मिणे वृषसेनाय धर्मसेनाय रोधसे ॥ १७५॥

मुनये ज्वरमुक्ताय ज्वराधिपतये नमः ।
अनेत्राय त्रिनेत्राय पिङ्गलाय विडूर्मिणे ॥ १७६॥

तपोब्रह्मनिधानाय युगपर्यायिणे नमः ।
शरणाय शरण्याय शक्तेष्टशरणाय च ॥ १७७॥

नमस्सर्वभवेशाय भूतभव्यभवाय च ॥ १७८

पाहि मां देवदेवेश कोऽप्यजोऽसि सनातन ॥ १७८॥

एवं गतोऽस्मि शरणं शरण्यं ब्रह्मयोनिनाम् ॥ १७९
स्तव्यं स्तवं स्तुतवतस् तत्तमो मे प्रणश्यत ।
भयं च मे व्यपगतं पक्षिणोऽन्तर्हिता भवन् ॥ १८०
शृणोमि च गिरं दिव्याम् अन्तर्धानगतां शिवाम् ॥ १८०॥

श्रीभगवान्—

मा भैर्गरुत्मन् दान्तोसि पुनस्सेन्द्रान दिवौकसः ।
स्वं चैव भवनं गत्वा द्रक्ष्यसे पुत्रबान्धवान् ॥ १८१॥

सुपर्णः—

ततस्स्मिन् क्षणेनैव सहसैव महाद्युतिः ।
प्रत्यदृश्यत तेजस्वी पुरस्तान् स ममान्तिके ॥ १८२॥
समागम्य ततस्तेन शिवेन परमात्मना ।
अपश्यं चाहमायान्तं नरनारायणाश्रमे ॥ १८३॥
चतुर्द्विगुणविन्यासं तं च देवं सनातनम् ॥ १८४
यजतस्मानृषीन् देवान् वदतो ध्यायतो मुनीन् ।
युक्तान् सिद्धान् नैष्ठिकांश्च जपतो यजतो गृहान् ॥ १८५
पुष्पपूरपरिक्षिप्तं धूपितं दीपितं हितम् ।
वन्दितं भक्तसम्मृष्टं नरनारायणाश्रमम् ॥ १८६
तदद्भुतमहं दृष्ट्वा विस्मितोऽस्मि तदाऽनघाः ।
जगाम शिरसा देवं प्रयतेनान्तरात्मना ॥ १८७
तदत्यद्भुतसङ्काशं किमेतदिति चिन्तयन ।

नाध्यगच्छं परं दिव्यं तस्य सर्वभवात्मनः ॥ १८८

प्रणिपत्य सुदुर्धर्षं पुनः पुनरुदीक्ष्य च ।
शिरस्यञ्जलिमाधाय विस्मयोत्फुल्ललोचनः ॥ १८९

अवोचं तमदीनार्थं श्रेष्ठानां श्रेष्ठमुत्तमम् ॥ १८९॥

नमस्ते [1]भगवन देव भूतभव्यभवत्प्रभो ।
यदेतदद्भुतं देव मया दृष्टं त्वदाश्रयम् ॥ १९०॥

अनादिमध्यपर्यन्तं किं तच्छंसितुमर्हसि ॥ १९१

यदि जानामि मां भक्तं यदि वाऽनुग्रहो मयि ।
शंस सर्वमशेषेण श्रोतव्यं यदि चेन्मया ॥ १९२

स्वभावस्तव दुर्ज्ञेयः प्रादुर्भावो भवस्य च ।
भवद्भूतभविष्येश सर्वथा गहनं भवान ॥ १९३

ब्रूहि सर्वमशेषेण तदाश्चर्यं महामुने ।
किं तदत्यद्भुतं वृत्तं तेष्वग्निषु समन्ततः ॥ १९४

कानि तान्यग्निहोत्राणि केषां शब्दश्रुतो मया ।
शृण्वतां ब्रह्म सततम् अदृश्यानां महात्मनाम् ॥ १९५

एतन्मे भगवन कृष्ण ब्रूहि सर्वमशेषतः ।
गृणन्त्यग्निसमीपेषु के च ते ब्रह्मराशयः ॥ १९६

1. क—देवदेवेश

* सर्वेषु कोशेषु अतोऽध्यायसमाप्तिरुच्यते

श्रीभगवान्—

मां न देवा न गन्धर्वा [1]न पिशाचा न राक्षसाः ।
विदुस्तत्त्वेन [2]तत्त्वस्थं सूक्ष्मात्मानमवस्थितम् ॥ १९७

चतुर्धाऽहं विभक्तात्मा लोकानां हितकाम्यया ।
भूतभव्यभविष्यादिर् अनादिर्विश्वकृत्तमः ॥ १९८

पृथिवी वायुराकाशम् आपो ज्योतिश्च पञ्चमम् ।
मनो बुद्धिश्च तेजश्च तमस्सत्त्वं रजस्तथा ॥ १९९

प्रकृतिर्विकृतिश्चेति विद्याविद्ये शुभाशुभे ।
मत्त एतानि जायन्ते नाहमेभ्यः कथञ्चन ॥ २००

स किञ्चिच्छ्रेयसा युक्तश् श्रेष्ठभावं व्यवस्यति ।
धर्मयुक्तं च पुण्यं च सोऽहमस्मि निरामयः ॥ २०१

यन स्वभावात्मतत्त्वज्ञैः कारणैरुपलक्ष्यते ।
अनादिमध्यनिधनस् सोऽन्तरात्माऽस्मि शाश्वतः ॥ २०२

यत्तु मे परमं गुह्यं रूपं सूक्ष्मार्थदर्शिभिः ।
गृह्यते सूक्ष्मभावज्ञैस् स विभाव्योऽस्मि शाश्वतः ॥ २०३

यत्तु मे परमं गुह्यं येन व्याप्तमिदं जगत् ।
सोऽहं गतस्सर्वमत्त्वस् सर्वस्य प्रभवोऽव्ययः ॥ २०४

---

1. क-घ—नासुरा न च
2. क-घ—सत्त्वस्थाः

मत्तो जातानि भूतानि मया धार्यन्त्यहर्निशम् ।
मय्येव विलयं यान्ति प्रलये पन्नगाशन ॥ २०५

यो मां यथा वेदयति तस्य तस्यास्मि काश्यप ।
मनोबुद्धिगतश्रेयो विदधामि विहङ्गम ॥ २०६

मां तु ज्ञातुं कृता बुद्धिर् भवता पक्षिसत्तम ।
शृणु योऽहं यतश्चाहं यदर्थं चाहमुद्यतः ॥ २०७

ये केचिन्नियतात्मानस् त्रेताग्निपरमा द्विजाः ।
अग्निकार्यपरा नित्यं जपहोमपरायणाः ॥ २०८

आत्मन्यग्नीन् समाधाय नियता नियतेन्द्रियाः ।
अनन्यमनसस्ते मां सर्वे वै समुपासते ॥ २०९

यजन्तो जपयज्ञैर्मां मानसैश्च सुसंयताः ।
अग्नीनभ्युद्यतुश्चश्वद् अग्निष्वेवाभिसंस्थिताः ॥ २१०

अनन्यकार्याश्शुचयो नित्यमग्निपरायणाः ।
य एवम्बुद्धयो धीरास् ते मां गच्छन्ति तादृशाः ॥ २११

अकामहतसङ्कल्पा ज्ञाने नित्यं समाहिताः ।
[1]आत्मन्यग्नीन् समाधाय निराहारा निराशिषः ॥ २१२

विषयेषु निरारम्भा विमुक्ता ज्ञानचक्षुषः ।
अनन्यमनसो धीरास् स्वभावनियमान्विताः ॥ २१३

1. अ —आत्मन्यभ्युद्यतुश्चश्वदग्निष्वेवाभिसंस्थिताः । [अधिकः पाठः]

यत्तद्विर्यति दृष्टं तत् सरः पद्मोत्पलायुतम् ।
तत्राग्नयस्सन्निहिता दीप्यन्ते स्म निरिन्धनाः ॥ २१४

ज्ञानामलाशयास्तस्मिन् ये च चन्द्रांशुनिर्मलाः ।
उपासीना गृणन्तोऽग्निम् प्रस्पष्टाक्षरभाषिणः ॥ २१५

आकाङ्क्षमाणाश्शुचयस् तेष्वग्निषु विहङ्गम ॥ २१५॥

ये मया भावितात्मानो मय्येवाभिरतास्सदा ।
उपासते च मामेव ज्योतिर्भूता निरामयाः ॥ २१६॥

तैर्हि तत्रैव वस्तव्यम् नीरागात्मभिरच्युतैः ॥ २१७

निराहारा ह्यनिष्यन्दाश् चन्द्रांशुसदृशप्रभाः ।
निर्मला निरहङ्कारा निरालम्बा निराशिषः ॥ २१८

मद्भक्तास्सततं ते वै भक्तस्तानपि चाप्यहम् ॥ २१८॥

चतुर्धाऽहं विभक्तात्मा चरामि जगतो हितः ।
लोकानां धारणार्थाय विधानं विदधामि च ॥ २१९॥

यथावत्तदशेषेण श्रोतुमर्हति मे भवान् ॥ २२०

एका मूर्तिर्निर्गुणाख्या योगं परममास्थिता ।
द्वितीया सृजते तान भूतग्रामं चराचरम् ॥ २२१

सृष्टं संहरते चैका जगत स्थावरजङ्गमम् ।
जातात्मनिष्ठा क्षपयन् मोहयन्निव मायया ॥ २२२

क्षिपन्ती मोहयन्ती च ह्यात्मनिष्ठा स्वमायया ॥ २२२॥

चतुर्थी मे महामूर्तिर् जगद्वृद्धिं ददाति सा ।
रक्षते चापि नियता सोऽहमस्मि नभश्चरः ॥ २२३॥

[1]मया सर्वमिदं व्याप्तं मयि सर्वं प्रतिष्ठितम् ।
अहं सर्वजगद्बीजं सर्वत्रगतिरव्ययः ॥ २२४॥

यानि तान्यग्निहोत्राणि ये च चन्द्रांशुराशयः ।
गृणन्ति वेदं सततं तेष्वग्निषु विहङ्गम ॥ २२५॥

क्रमेण मां समायान्ति सुखिनो ज्ञानसंयुताः ।
तेषामहं तपो दीप्तं तेजस्सम्यक् समाहितम् ॥ २२६॥

नित्यं ते मयि वर्तन्ते तेषु चाहमतन्द्रितः ॥ २२७

सर्वतो मुक्तसङ्गेन मय्यनन्यसमाधिना ।
शक्यस्समासादयितुम् अहं वै ज्ञानचक्षुषा ॥ २२८

मां स्थूलदर्शनं विद्धि जगतः कार्यकारणम् ।
मत्तश्च सम्प्रसूतान् वै विद्धि लोकान् सदैवतान् ॥ २२९

मया चापि चतुर्धाऽऽत्मा विभक्तः प्राणिषु स्थितः ।
आत्मभूतो वासुदेवो ह्यनिरुद्धो मतौ स्थितः ॥ २३०

सङ्कर्षणोऽहङ्कारे च प्रद्युम्नो मनसि स्थितः ।
अन्यथा च चतुर्धा यत् सम्यक् त्वं श्रोतुमर्हसि ॥ २३१

हिरण्यगर्भः पद्माख्यो यत्र ब्रह्मा व्यजायत ।

1. क-घ—मयि सर्वमिदं प्राप्तं

ब्रह्मणश्चापि सम्भूतश् शिव इत्यवधार्यताम् ॥ २३२
शिवान् स्कन्दस्समभूव एतत् सृष्टिचतुष्टयम् ।
दैत्यदानवदर्पघ्नम् एवं मां विद्धि नित्यशः ॥ २३३
दैत्यदानवरक्षोभिर् यदा धर्मः प्रपीड्यते ।
तदाऽहं धर्मवृद्ध्यर्थं मूर्तिमान् भविताऽऽशु वै ॥ २३४
वेदव्रतपरा ये तु धीरा निश्चितबुद्धयः ।
योगिनो योगयुक्ताश्च ते मां पश्यन्ति नान्यथा ॥ २३५
पञ्चभिस्सम्प्रयुक्तोऽहं विप्रयुक्तश्च पञ्चभिः ।
वर्तमानश्च तेष्वेवं निवृत्तश्चैव तेष्वहम् ॥ २३६
ये विदुर्जातसङ्कल्पास् ते मां पश्यन्ति तादृशाः ।
खं वायुरापो ज्योतिश्च पृथिवी चेति पञ्चमम् ॥ २३७
तदात्मकोऽस्मि विज्ञेयो न चान्योऽस्मीति निश्चितम् ॥ २३७॥
वर्तमानमतीतं च पञ्चवर्गेषु निश्चलम् ।
शब्दस्पर्शेषु रूपेषु रसगन्धेषु चाप्यहम् ॥ २३८॥
रजस्तमोभ्यामाविष्टा येषां बुद्धिरनिश्चिता ।
ते न पश्यन्ति मे तत्त्वं तपसा महता ह्यपि ॥ २३९॥
नोपवासैर्न नियमैर् न व्रतैर्विविधैरपि ।
द्रष्टुं वा वेदितुं वाऽपि न शक्या परमा गतिः ॥ २४०॥
महामोहोत्थपङ्के तु निमग्नानां गतिर्हरिः ।

एकान्तिनो ध्यानपरा यतिभावाद्व्रजन्ति माम् ॥ २४१॥

सत्त्वयुक्ता मतिर्येषां केवलाऽऽत्मविनिश्चिता ।
ते पश्यन्ति स्वमात्मानं परमात्मानमव्ययम् ॥ २४२॥

अहिंसा सर्वभूतेषु तेष्ववस्थितमार्जवम् ।
[1]तेष्वेव च समाधाय सम्यगेति स मामजम् ॥ २४३॥

यदेतत् परमं गुह्यम् आख्यानं परमाद्भुतम् ।
यत्नेन तदशेषेण यथावच्छ्रोतुमर्हसि ॥ २४४॥

ये त्वग्निहोत्रनियता जपयज्ञपरायणाः ।
ते मामुपासते शश्वद् एतांस्त्वं दृष्टवानसि ॥ २४५॥

शास्त्रदृष्टविधानज्ञा असक्ताः क्वचिदन्यथा ।
शक्योऽहं वेदितुं तैस्तु यन्मे परममव्ययम ॥ २४६॥

ये तु साङ्ख्यं च योगं च ज्ञात्वाऽप्यधृतनिश्चयाः ।
न ते गच्छन्ति कुशलाः परां गतिमनुत्तमाम् ॥ २४७॥

तस्माज्ज्ञानेन शुद्धेन प्रसन्नात्माऽऽत्मविच्छुचिः ।
आसादयति तद्ब्रह्म यत्र गत्वा न शोचति ॥ २४८॥

शुद्धाभिजनसम्पन्नाश् श्रद्धायुक्तेन चेतसा ।
मद्भक्त्या च द्विजश्रेष्ठा गच्छन्ति परमां गतिम् ॥ २४९॥

यद्गुह्यं परमं बुद्धेर् अलिङ्गग्रहणं च यत् ।

1. क-घ—इदमर्धं नास्ति

तत् सूक्ष्मं गृह्यते विप्रैर् यतिभिस्तत्त्वदर्शिभिः ॥ २५०॥
न वायुः पवते तत्र न तस्मिञ् ज्योतिषां गतिः ।
न चापः पृथिवी नैव नाकाशं न मनोगतिः ॥ २५१॥
तस्माच्चैतानि सर्वाणि प्रजायन्ते विहङ्गम ।
सर्वेभ्यश्च स तेभ्यश्च प्रभवत्यमलो विभुः ॥ २५२॥
स्थूलदर्शनमेतन्मे यद्दृष्टं भवताऽनघ ।
एतत् सूक्ष्मस्य च द्वारं कार्याणां कारणं त्वहम् ॥ २५३॥
दृष्टो वै भवता तस्मात् सरस्यमितविक्रम ।
ब्रह्मणो यदहोरात्रं सङ्ख्यानज्ञैर्विभाव्यते ॥ २५४॥
एष कालस्त्वया तत्र सरस्यहमुपागतः ॥ २५५
मां यज्ञमाहुर्यज्ञज्ञा वेदं वेदविदो जनाः ।
मुनयश्चापि मामेव जपयज्ञं प्रचक्षते ॥ २५६
वक्ता मन्ता रसयिता घ्राता द्रष्टा प्रदर्शकः ।
बोद्धा बोधयिता चाहं गन्ता श्रोता चिदात्मकः ॥ २५७
मामिष्ट्वा स्वर्गमायान्ति तथा चाप्नुवते महत् ।
ज्ञात्वा मामेव चैवं ते निस्सङ्गेनान्तरात्मना ॥ २५८
अहं तेजो द्विजातीनां मम तेजो द्विजातयः ।
मम यस्तेजसा देहस् सोऽग्निरित्यवगम्यताम् ॥ २५९
प्राणपालश्शरीरेऽहं योगिनामहमीश्वरः ।

साङ्ख्यानामिदमेवाग्रे मायि सर्वमिदं जगत् ॥ २६०
धर्ममर्थं च कामं च मोक्षं चैवार्जवं जपम् ।
तमस्सत्त्वं रजश्चैव कर्मजं च भवाप्ययम् ॥ २६१
स तदाऽहं तथारूपस् त्वया दृष्टस्सनातनः ।
ततस्त्वहं परतरश् शक्यः कालेन वेदितुम् ॥ २६२
मम यत् परमं गुह्यं शाश्वतं ध्रुवमव्ययम् ।
तदेवं परमो गुह्यो देवो नारायणो हरिः ॥ २६३
न तच्छक्यं भुजङ्गारे वेत्तुमभ्युदयान्वितैः ॥ २६३॥
निरारम्भनमस्कारा निराशीर्बन्धनास्तथा ।
गच्छन्ति तं महात्मानं परं ब्रह्म सनातनम् ॥ २६४॥
स्थूलोऽहमेवं विहग त्वया दृष्टस्तथाऽनघ ।
एतच्चापि न वेत्त्यन्यस् त्वामृते पन्नगाशन ॥ २६५॥
मा मतिस्तव गान्नाशम् एषा गतिरनुत्तमा ।
मद्भक्तो भव नित्यं त्वं ततो वेत्स्यसि मे पदम् ॥ २६६॥
एतत्ते सर्वमाख्यातं रहस्यं दिव्यमानुषम् ।
एतच्छ्रेयः परं चैतत् पन्थानं विद्धि मोक्षिणाम् ॥ २६७॥

सुपर्णः—

एवमुक्त्वा स भगवांस् तत्रैवान्तरधीयत ।
पश्यतो मे महायोगी जगामात्मगतिर्गतिम् ॥ २६८॥

एतदेवंविधं तस्य महिमानं महात्मनः ।
अच्युतस्याप्रमेयस्य दृष्टवानस्मि यत् पुरा ॥ २६९॥

एतद्वस्सर्वमाख्यातं चेष्टितं तस्य धीमतः ।
मयाऽनुभूतं प्रत्यक्षं दृष्ट्वा चाद्भुतकर्मणः ॥* २७०॥

ऋषयः—

अहो श्रावितमाख्यानं भवताऽत्यद्भुतं महत् ।
पुण्यं यशस्यमायुष्यं स्वर्ग्यं स्वस्त्ययनं महत् ॥ २७१॥

एतत् पवित्रं देवानाम् एतद्गुह्यं परन्तप ।
एतज्ज्ञानवतां ज्ञेयम् एषा गतिरनुत्तमा ॥ २७२॥

य इमां श्रावयेद्विद्वान् कथां पर्वसु पर्वसु ।
स लोकान् प्राप्नुयात् पुण्यान् देवर्षिभिरभिष्टुतान् ॥ २७३॥

श्राद्धकाले च विप्राणां य इमां श्रावयेच्छुचिः ।
न तत्र रक्षसां भागो नासुराणां च विद्यते ॥ २७४॥

अनसूयुर्जितक्रोधस् सर्वसत्त्वहिते रतः ।
यः पठेत् सततं युक्तस् स व्रजेत् तत्सलोकताम् ॥ २७५॥

वेदान् पारयते विप्रो राजा विजयवान् भवेत् ।
वैश्यस्तु धनधान्याढ्यश् शूद्रस्सुखमवाप्नुयात् ॥ २७६॥

भीष्मः—

ततस्ते मुनयस्सर्वे सम्पूज्य विनतासुतम् ।

---

* सर्वेषु कोशेषु अत्रैवाध्यायसमाप्तिर्दृश्यते

स्वानेव चाश्रमाञ्जग्मुर् बभूवुश्शान्तितत्पराः ॥ २७७॥

स्थूलदर्शिभिराकृष्टो दुर्ज्ञेयो ह्यकृतात्मभिः ।
एषा श्रुतिर्महाराज धर्म्या धर्मभृतां वर ॥ २७८॥

सुराणां ब्रह्मणा प्रोक्ता विस्मितानां परन्तप ॥ २७९
ममाप्येषा कथा तात कथिता मातुरन्तिके ।
वसुभिस्सत्त्वसम्पन्नैस् तवाप्येषा मयोच्यते ॥ २८०

तदग्निहोत्रपरमा जपयज्ञपरायणाः ।
निराशीर्बन्धनास्सन्तः प्रयान्त्यक्षर[1]साम्यताम् ॥ २८१

आरम्भयज्ञानुत्सृज्य जपहोमपरायणाः ।
ध्यायन्तो मनसा विष्णुं गच्छन्ति परमां गतिम् ॥ २८२

तदेव परमो मोक्षो मोक्षद्वारं च भारत ।
यदा विनिश्चितात्मानो गच्छन्ति परमां गतिम् ॥ २८३

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां
अनुशासनपर्वणि एकविंशोऽध्यायः ॥ २१ ॥
॥ ८९ ॥ आनुशासनिकपर्वणि एकविंशोऽध्यायः ॥ २१ ॥
[अस्मिन्नध्याये २८३ श्लोकाः]

---

1. अ-ख—साम्यताम्

॥ द्वाविंशोऽध्यायः ॥

भीष्मनियोगात् कृष्णेन युधिष्ठिरं प्रति महादेवमहिमकथनम् ॥

*युधिष्ठिरः—

पितामह महेशाय नामान्याचक्ष्व शम्भवे ।
विदुषे विश्वमायाय महाभाग्यं च तत्त्वतः ॥ १

भीष्मः—

सुरासुरगुरो देव विष्णो त्वं वक्तुमर्हसि ।
शिवाय शिवरूपाय यन्माऽपृच्छद्युधिष्ठिरः ॥ २

नाम्नां सहस्रं देवस्य तद्विदा ब्रह्मवादिना ।
निवेदितं ब्रह्मलोके ब्रह्मणा यत् पुराऽभवत् ॥ ३

द्वैपायनप्रभृतयस् तथैवैते तपोधनाः ।
ऋषयस्सुव्रता दान्ताश् शृण्वन्तु गदतस्तव ॥ ४

ध्रुवाय नन्दिने नेत्रे गोप्त्रे विश्वसृगग्नये ।
महाभाग्यं विभो ब्रूहि मुण्डिनेऽथ कपर्दिने ॥ ५

श्रीभगवान्—

न शक्यं कर्मणा वेत्तुं गतिमीशस्य तत्त्वतः ॥ ५॥
हिरण्यगर्भप्रमुखास् सेन्द्रा देवा महर्षयः ।

---

*इत आरभ्य पञ्चाध्यायाः श्रीभगवतोऽकैलासयात्रानुवादरूपा इति विवेक्तव्यम्; विचिकित्सावतां सम्प्रतिपन्नकोशान्तरदर्शनेन विचिकित्सा समाधेया; वाक्यशैली च सम्यक्परामर्शनीया ॥

न विदुर्यस्य निधनम् आदिं वा सूक्ष्मदर्शिनः ॥ ६॥
स कथं नाममात्रेण शक्यो ज्ञातुं सतां गतिः ॥ ७
तस्याहमसुरघ्नस्य कांश्चिद्भगवतो गुणान् ।
भवतां कीर्तयिष्यामि प्रणम्येशं यथातथम् ॥ ८

वैशम्पायनः—

एवमुक्त्वा स भगवान गुणांस्तस्य महात्मनः ।
उपस्पृश्य शुचिर्भूत्वा कथयामास तत्त्वतः ॥ ९

श्रीभगवान्—

शुश्रूषध्वं ब्राह्मणेन्द्रास् त्वं च तात युधिष्ठिर ।
त्वं चापगेय नामानि निशामय जगत्पतेः ॥ १०

यदवाप्तं च मे पूर्वं साम्बहेतोस्सुदुष्करम् ।
यथा स भगवान् दृष्टो मया पूर्वं समाधिना ॥ ११

शम्बरे निहते पूर्वं रौक्मिणेयेन धीमता ।
अतीते द्वादशे वर्षे जाम्बवत्यब्रवीद्धि माम् ॥ १२

चारुदेष्णप्रभृतिकान् रुक्मिण्या वीक्ष्य वै सुतान् ।
पुत्रार्थिनी मामुपेत्य वाक्यमाह युधिष्ठिर ॥ १३

जाम्बवती—

शूरं बलवतां श्रेष्ठं कीर्तिरूपमकल्मषम् ।
आत्मतुल्यं मम सुतं प्रयच्छाच्युत मा चिरम् ॥ १४

न हि तेऽप्राप्यमस्तीति त्रिषु लोकेषु किञ्चन ।
लोकान् सृजेस्त्वमपरान् इच्छन् यदुकुलोद्वह ॥ १५

त्वया द्वादशवर्षाणि तपस्तप्त्वा जगद्गुरुम् ।
आराध्य पशुभर्तारं रुक्मिण्या जनितास्सुताः ॥ १६

[1]चारुदेष्णस्सुचारुश्च चारुवेषो यशोधनः ।
चारुश्रवाश्चारुयशाः प्रद्युम्नश्शम्भुरेव च ॥ १७

यथा ते जनिताः पुत्रा रुक्मिण्यां चारुविक्रमाः ।
तथा ममापि तनयं प्रयच्छाच्युत मा चिरम् ॥ १८

श्रीभगवान्—

इत्येवं चोदितो देव्या तामवोचं सुमध्यमाम् ।
अनुजानीहि मां राज्ञि करिष्ये वचनं तव ॥ १९

सा च मामब्रवीद्गच्छ विजयाय शिवाय च ।
ब्रह्मा शिवः काश्यपश्च [2]नदा नद्यो मनोनुगाः ॥ २०

[3]क्षेत्रौषध्यो यज्ञवाहश् छन्दांस्यृषिगणास्तथा ।
समुद्रा दक्षिणान्ताश्च ऋक्षाणि पितरो ग्रहाः ॥ २१

देवपत्न्यो देवकन्या देवमातर एव च ।
मन्वन्तराणि गावश्च चन्द्रमास्सविता रविः ॥ २२

---

1. क-ख—एतदादि अर्धत्रयं नास्ति
2. क-ख—वेदा देवाः क्षपास्तव
3. ख—अर्धसप्तकं नास्ति

सावित्री ब्रह्मविद्या च ऋतवो वत्सराः क्षपाः ।
क्षणा लवा मुहूर्ताश्च निमेषा युगपर्ययाः ॥ २३

रक्षन्तु सर्वत्र गतं त्वां यादव सुखावहाः ।
रक्षां कुर्वन्त्वरिष्टं त्वम् अप्रमत्तो व्रजाच्युत ॥ २४

एवं कृतस्वस्त्ययनस्तयाऽहं
तामभ्यनुज्ञाय च राजपुत्रीम् ।
पितुस्समीपे नरसत्तमस्य
मातुश्च राज्ञश्च तथाऽऽहुकस्य ॥ २५

तदर्थमावेद्य यदब्रवीन्मां
विद्याधरेन्द्रस्य सुता भृशं तदा ।
सा मामनुज्ञाय ततोऽतिदुःखान्
सुभ्रूस्तथैवाग्निशयेन तेन ॥ २६

अभ्यनुज्ञां गुरुजनात् प्राप्य तार्क्ष्यमचिन्तयम् ।
सोऽवहद्धिमवन्तं मां प्राप्य चैनं व्यसर्जयम् ॥ २७

तत्राहमद्भुतान् भावान् अपश्यं गिरिसत्तमे ।
क्षेत्रं च तापसश्रेष्ठं पश्याम्याश्रममुत्तमम् ॥ २८

दिव्यं वैयाघ्रपादस्य उपमन्योर्महात्मनः ।
पूजितं देवगन्धर्वैर् ब्राह्म्या लक्ष्म्या समावृतम् ॥ २९

[1]धवककुभकदम्बनारिकेलैः
कुरवककेतकजम्बुपाटलीभिः ।
वटवरुणकवत्सनाभबिल्वैर्
असनकपित्थप्रियालतालसालैः ॥ ३०

बदरेङ्गुदपुन्नागैर् अशोकाम्रातिमुक्तकैः ।
भल्लातकैर्मधूकैश्च चम्पकैः पनसैस्तथा ॥ ३१

अन्यैर्बहुविधैर्वृक्षैः फलपुष्पप्रदैर्युतम् ॥ ३१॥

नित्यपुष्पफलोपेतैर् वृक्षैरविरलैर्वृतम् ।
सुपुष्पैश्च लतागुल्मैर् निर्भयैश्च मृगैर्युतम् ॥ ३२॥

विशालैर्यज्ञशरणैर् यथास्थानाहिताग्निभिः ।
रुरुवारणशार्दूलसिंहद्वीपिसमाकुलम् ॥ ३३॥

कुरङ्गबर्हिणाकीर्णं मार्जारभुजगावृतम् ॥ ३४

नानापुष्परजोमिश्रो गजदानाधिवासितः ।
दिव्यस्त्रीगीतमधुरो मारुतोऽत्र सुखो ववौ ॥ ३५

नानानिनादैर्विहगप्रणादैश्
शुभैस्तथा बृंहितैः कुञ्जराणाम् ।
गीतैस्तथा किन्नराणामुदारैर्
विद्याम्बनैर्भूषितं विप्रमुख्यैः ॥ ३६

1. क-घ—अर्धपद्यकं नास्ति

विभूषितं पुण्यपवित्रतोयया
सर्वत्र जुष्टं नृप जह्नुकन्यया ।
[1]महात्मभिर्धर्मभृतां वरिष्ठैर्
महर्षिभिर्भूषितमग्निकल्पैः ॥ ३७

वाग्वाहारैरम्बुपैर्जप्यनित्यैस्
सम्प्रक्षालैर्यतिभिर्ध्यानमुख्यैः ।
धूमाशनैरुष्णपैः क्षीरपैश्च
विभूषितं ब्राह्मणेन्द्रैस्समन्तात् ॥ ३८

नानाबृन्दैर्वेदषडङ्गपारगैर्
धर्माभिरामैर्मुनिभिस्समाहितैः ॥ ३८॥

तत्राश्रमपदे श्रेष्ठे सर्वभूतमनोरमे ।
सेवितं द्विजशार्दूलैर् वेदवेदाङ्गपारगैः ॥ ३९॥

नानानियमविख्यातैर् ऋषिभिश्च महात्मभिः ॥ ४०

प्रविशन्नेव चापश्यं जटाचीरधरं प्रभुम् ।
[2]तेजसा तपसा चापि दीप्यमानं यथाऽनलम् ॥ ४१

शिष्यमध्यगतं शान्तं युवानं ब्राह्मणर्षभम् ।
शिरसा वन्दमानं माम् उपमन्युरभाषत ॥ ४२

उपमन्युः—
स्वागतं पुण्डरीकाक्ष सफलानि तपांसि नः ।

1. क-घ—अधैवर्य नास्ति 2. क-घ—इदमर्धं नास्ति

यः पूज्यः पूजयसि मां द्रष्टव्यो द्रष्टुमिच्छसि ॥ ४३

मनुष्यतानुवृत्त्या त्वां ज्ञात्वा तिष्ठाम सर्वगम् ॥ ४३॥

श्रीभगवान्—

तमहं प्राञ्जलिर्भूत्वा मृग[1]पक्षिष्वथाग्निषु ।

धर्मे च शिष्यवर्गे च तदाऽवृच्छमनामयम् ॥ ४४॥

ततो मां भगवानाह साम्ना परमवल्गुना ॥ ४५

उपमन्युः—

वेत्स्यसे तनयं कृष्ण आत्मतुल्यं न संशयः ।

तपस्तुमहदास्थाय तोषयेशानमीश्वरम् ॥ ४६

इह देवस्सपत्नीकस् सदा क्रीडत्यधोक्षज ॥ ४६॥

इहैव देवताश्रेष्ठं देवास्सर्षिगणाः पुरा ।

तपसा ब्रह्मचर्येण सत्येन च दमेन च ॥ ४७॥

तोषयित्वा शुभान् कामान् प्राप्नुवंस्ते जनार्दन ॥ ४८

तेजसां तपसां चैव निधिस्स भगवानिह ॥ ४८॥

शुभाशुभान् विभुर्भावान् विसृजन् सङ्क्षिपन्नपि ।

आस्ते देव्या सहाचिन्त्यो यं प्रार्थयसि शत्रुहन् ॥ ४९॥

हिरण्यकशिपुर्योऽभूत् तपसा मेरुकम्पनः ।

तेन सर्वामरैश्वर्यं [2]शर्वात् प्राप्तं समार्बुदम् ॥ ५०॥

तस्यैव पुत्रप्रवरो दमनो नाम विश्रुतः ।

---

1. क-घ—वृक्षेष्व 2. क-घ—सेव्य प्राप्तं

महादेववराच्छक्रं वर्षायुतमयोधयत् ॥ ५१॥

[1]विष्णोश्चक्रं च तद्घोरं वज्रमाखण्डलस्य च ।
शीर्णं तथा भागवतं हरस्यांङ्गेषु केशव ॥ ५२॥

अर्द्यमानाश्च विबुधा ग्रहणेषु बलीयसा ।
शिवदत्तवराद् राजन्नसुरेन्द्रान् सुरा भृशम् ॥ ५३॥

तुष्टो विद्युत्प्रभस्यापि त्रिलोकेश्वरतामदात् ।
शतं वर्षसहस्राणां स च लोकेश्वरोऽभवत् ॥ ५४॥

ममैवानुचरो दैत्य भवितासीति चाब्रवीत् ॥ ५५

तथा पुत्रसहस्राणाम् अयुतं प्रददौ प्रभुः ।
कुशद्वीपं च स ददौ योगं च भगवानजः ॥ ५६

योगेश्वरं वेदगीतं वेत्थ कृष्ण न संशयः ॥ ५६॥

बालखिल्या मघवता अवज्ञताः पुरा भवन् ॥ ५७

तैः क्रुद्धैर्भगवान् रुद्रस् तपसा तोषितोऽभवत् ।
तांश्चापि देवताश्रेष्ठः प्राह प्रीतः प्रजापतिः ॥ ५८

सुपर्णं सोमहर्तारं तपसोत्पादयिष्यथ ॥ ५८॥

[2]महादेवस्य रोषाच्च आपो नष्टाः पुरा भवन् ।
ताश्चापस्सुप्रकालेन देवैरप्यप्रवर्तिताः ॥ ५९॥

---

1. क-घ—अर्धचतुष्टयं नास्ति
2. क—अर्धत्रयं नास्ति घ—अर्धद्वयं नास्ति

[1-2]अत्रेर्भार्या हि भर्तारं सन्त्यज्य ब्रह्मवादिनम् ॥ ६०

नाहं तव मुने भूयो वशगा स्यां कथञ्चन ।
इत्युक्त्वा सा महादेवम् अगमच्छरणं किल ॥ ६१

निराहारा भयादत्रेस् त्रीणि वर्षशतान्यथ ।
अतप्यत तपश्चापि प्रसादार्थं भवस्य ह ॥ ६२

तामब्रवीन्महादेवो भविता वै सुतस्तव ।
सावर्णिश्चैव नाम्ना च ख्यातिं यास्यति चेति ताम् ॥ ६३

सावर्णिश्चापि विख्यात ऋषिरासीत् कृते युगे ।
इह तेन तपस्तप्तं षष्टिं वर्षशतान्यथ ॥ ६४

तमाह भगवान् रुद्रस् साक्षात्तुष्टोऽस्मि तेऽनघ ।
ग्रन्थकृल्लोकविख्यातो भविष्यस्यजरामरः ॥ ६५

शाकल्यो ग्रन्थकर्ता च सावर्णिश्च तदाऽभवत् ॥ ६५॥

बाणस्कन्दसमत्वं च कामो दर्पविमोक्षणम् ।
लवणोऽवध्यतामन्यैर् दशास्यश्च पुनर्बलम् ॥ ६६॥

अन्तकोऽन्तमनुप्राप्तस् तस्मात् कोऽन्यः परः प्रभुः ॥ ६७

मयाऽपि च यथा दृष्टो देवदेवः पुरा विभुः ।
साक्षात् पशुपतिस्तात तच्चापि शृणु माधव ॥ ६८

---

1. क-घ—अत्रिभार्या सुतं दत्तं सोमं दुर्वाससं प्रभो । [अधिकः पाठः]
2. क-घ—एकादशार्धानि न सन्ति

यदर्थं च महादेवः प्रयत्नेन मया पुरा ।
आराधितो वासुदेव तच्चापि शृणु विस्तरात् ॥ ६९

[1]यदवाप्तं च मे पूर्वं महादेवान्महेश्वरात् ।
तत् सर्वमखिलेनाद्य कथयिष्यामि तेऽनघ ॥ ७०

पुरा कृतयुगे तात ऋषिरासीन्महातपाः ।
व्याघ्रपाद इति ख्यातो वेदवेदाङ्गपारगः ॥ ७१

तस्याहमभवं पुत्रो धूम्रश्चापि ममानुजः ॥ ७१॥

केनचित्त्वथ कालेन धूम्रेण सह माधव ।
गतवानाश्रमान् क्रीडन् मुनीनां भावितात्मनाम् ॥ ७२॥

तत्रापि च मया दृष्टा दुह्यमाना पयस्विनी ।
भक्षितं च मया क्षीरं स्वादु तस्यामृतोपमम् ॥ ७३॥

तदाप्रभृति चैवाहम् अरुदं मधुसूदन ।
दीयतां दीयतां क्षीरं मम मातरितीरितम् ॥ ७४॥

ततः पिष्टं समालोड्य तोयेन सह माधव ।
अपाययत् क्षीरमिति पानार्थमुपनीय सा ॥ ७५॥

अथ गव्यं पयस्तात कदाचित् प्राशितं मया ।
ततः पिष्टमयं कृष्ण न मे प्रीतिमुदावहत् ॥ ७६॥

ततोऽहमब्रुवं बाल्याज् जननीमात्मनस्तदा ।

---

1. क-घ—अर्धद्वयं नास्ति

क्षीरान्नेन समायुक्तं भोजनं च प्रयच्छ मे ॥ ७७॥

ततो मामब्रवीन्माता स्नेहाद्दुःखसमन्विता ।
परिष्वज्याङ्कमारोप्य मूर्ध्नि चाघ्राय माधव ॥ ७८॥

उपमन्युजननी—

कुतः क्षीरोदनं वत्स मुनीनां भावितात्मनाम् ।
वने निवसतां तात शाकमूलफलाशिनाम् ॥ ७९॥

अप्रसाद्य विरूपाक्षं वरदं स्थाणुमव्ययम् ।
कुतः क्षीरोदनं वत्स सुखानि गतयोऽपिवा ॥ ८०॥

सर्वकारणभूतोऽयं धाता रुद्रस्त्रिलोचनः ।
अष्टबाहुर्जटी नागभूषणश्चन्द्रशेखरः ॥ ८१॥

नागोपवीती सगणो नीलकण्ठ उमापतिः ।
सुदंष्ट्रस्सुस्मितो नागकुण्डलो भस्मभासितः ॥ ८२॥

सर्वकामप्रदो भक्त्या पूजितः पुष्पमूलकैः ॥ ८३

तं प्रपद्य तदा वत्स सर्वभावेन शङ्करम् ।
भक्त्या प्रत्यक्षतां नीतस् सर्वकामप्रदो हरः ॥ ८४

उपमन्युः—

जनन्यास्तद्वचश्श्रुत्वा तदाप्रभृति शत्रुहन् ।
मम भक्तिर्महादेवे नैष्ठिकी समपद्यत ॥ ८५

ततोऽहं तप आस्थाय तोषयामास शङ्करम् ।

दिव्यं वर्षसहस्रं तु वामाङ्गुष्ठाग्रविष्ठितः ॥ ८६

एकं वर्षशतं चैव फलाहारस्तदाऽभवम् ।
द्वितीयं शीर्णपर्णाशी तृतीयं चाम्बुभोजनः ॥ ८७

शतानि सप्त चैवाहं वायुभक्षस्तदाऽभवम् ॥ ८७॥

ततः प्रीतो महादे[1]वो नीलकण्ठो जगत्प्रभुः ।
शक्ररूपं समास्थाय सर्वैर्देवगणैर्वृतः ॥ ८८॥

ततो मामाह देवेन्द्रः प्रीतस्तेऽहं द्विजोत्तम ।
वरं वृणीष्व मत्तस्त्वं यत्ते मनसि वर्तते ॥ ८९॥

[2]शक्रस्य तद्वचश्श्रुत्वा नाहं प्रीतमना भवम् ।
अब्रवं च तदा कृष्ण देवराजमिदं वचः ॥ ९०॥

नाहं शक्राद् वरं काङ्क्षे न चान्यादिति चाब्रवम् ।
[3]महादेवादृते सौम्य सत्यमेतद्ब्रवीमि ते ॥ ९१॥

पशुपतिवचनाद्ब्रवामि सद्यः
कृमिरथवा तरुरप्यनेकशाखः ।
अपशुपतिवरप्रदानजा मे
त्रिभुवनराज्यविभूतिरप्यनिष्टा ॥ ९२॥

अपि कीटः पतङ्गो वा भवेयं शङ्करात्मया ।

1. क-घ—वः पार्वतीवल्लभः 2. क-घ—इदमर्धद्वयं नास्ति
3. क-घ—वरयामि परे भक्तिं नित्यामेत

न तु शक्र त्वया दत्तं त्रैलोक्यमपि काङ्क्षये ॥ ९३॥

यावच्छशाङ्कशकलामलबद्धमौलिर्
न प्रीयते पशुपतिर्भगवान् ममेशः ।
त्रबज्जरामरणजन्मशताभिघातैर्
दुःखानि देव विहितानि समुद्वहानि ॥ ९४॥

शक्रः—

[1]कः पुनस्तव हेतुर्वै ईशः कारणकारणम् ।
येन देवार्हते सौम्य प्रसादं नाभिकाङ्क्षसे ॥ ९५॥

उपमन्युः—

एष एव महान् हेतुर् ईशः कारणकारणम् ॥ ९६
[2]शुश्रुमो वा यदन्यस्य देवमभ्यर्चितं सुरैः ॥ ९६॥

कस्यान्यस्य सुरैस्सर्वैर् लिङ्गं मुक्त्वा महेश्वरम् ।
अर्च्यतेऽर्चितपूर्वं वा ब्रूहि यद्यस्ति ते श्रुतम् ॥ ९७॥

यस्य ब्रह्मा च विष्णुश्च त्वं च शक्र सहामरैः ।
अर्चयध्वं मदा लिङ्गं तस्माच्छ्रेष्ठतरो हि सः ॥ ९८॥

दिवसकरशशाङ्कवह्निनेत्रं
त्रिभुवनसारमपारमीशमाद्यम् ।

---

1. क-घ—मत्तो लोकस्य हेतुर्वै शक्रात् कारणकारणात् ।
येन देवमृते सौम्य [पाठान्तरम्]
2. क-घ—शुश्रूषामो यदा ह्यस्य देहमभ्यर्चितं सुरैः । [पाठान्तरम्]

अजरममरमप्रसाद्य रुद्रं
जगति पुमानिह को लभेत शान्तिम् ॥ ९९॥
धिक् तेषां धिक् तेषां
पुनरपि धिगस्तु धिक् तेषाम् ।
येषां न वसति हृदये
कुपथगतिविमोक्षको रुद्रः ॥ १००॥

तस्माद्वरमहं काङ्क्षे निधनं वाऽपि कौशिक ।
गच्छ वा तिष्ठ वा शक्र यथेष्टं बलसूदन ॥ १०१॥

काममेवं वरो मेऽस्तु शापो वाऽपि महेश्वरात् ।
न चान्यां देवतां काङ्क्षे सर्वकामफलान्यपि ॥ १०२॥

एवमुक्त्वा तु देवेन्द्रं दुःखादाकुलितेन्द्रियः ।
न प्रसीदति मे रुद्रः किमेतदिति चिन्तयन् ॥ १०३॥

अथापश्यं क्षणेनैव तमेवैरावतं पुनः ।
वृषरूपधरं साक्षात् क्षीरोदमिव सागरम् ॥ १०४॥

कृष्णपुच्छं महाकायं मधुपिङ्गललोचनम् ।
जाम्बूनदेन रत्नैश्च सर्वतस्समलङ्कृतम् ॥ १०५॥

रत्नशृङ्गं सुपादं च [1]सुकण्ठं सुकटीतटम् ।
[2]सुपार्श्वं विपुलस्कन्धं सुरूपं चारुदर्शनम् ॥ १०६॥

1. क-ङ—सुरूपस्कन्धचक्षुषम्
ख—सुकर्णं
2. क-ङ—हृदमर्षं नास्ति

ककुदं तस्य चाभाति स्कन्धमापूर्य विष्ठितम् ।
तुषारगिरिकुन्जाभं सिताभ्रशिखरोपमम् ॥ १०७॥

तमास्थितश्च भगवान् देवदेवस्सहोमया ।
[1]अशोभत महाराज पौर्णमास्यामिवोडुराट् ॥ १०८॥

किरीटं च जटाभारं [2]सर्पाद्याभरणानि च ।
वज्रादिशूलमातङ्गगम्भीरस्मितमागतम् ॥ १०९॥

[3]तस्य तेजोद्भवो वह्निस् समेघस्तनयित्नुमान ।
सहस्रस्येव सूर्याणां तेज आवृत्य तिष्ठति ॥ ११०॥

[4]ईश्वरस्य तदा तेजस् संवर्तक इवानलः ।
युगान्ते सर्वभूतानि दिधक्षुरिव चोद्यतः ॥ १११॥

तेजसा तु तदा व्याप्ते दुर्निरीक्ष्ये महेश्वरे ।
पुनरुद्विग्नहृदयः किं करोमीत्यचिन्तयम् ॥ ११२॥

मुहूर्तेनैव तत्तेजो व्याप्य सर्वा दिशो दश ।
प्रशान्तं च क्षणेनैव देवदेवस्य मायया ॥ ११३॥

अथापश्यं स्थितं तात भगवन्तं महेश्वरम् ।
सौरभेयगतं सौम्यं विधूममिव पावकम् ॥ ११४॥

---

1 क-घ—इदमर्धं नास्ति
2. क-घ—सर्पाद्या भूषणानि च
3. क-घ—इदमर्धं नास्ति
4. क-घ—अर्धद्वयं नास्ति

प्रशान्तमनसं देवं [1]त्रिहेतुमपराजितम् ।
सहितं चारुसर्वाङ्ग्या पार्वत्या परमेश्वरम् ॥ ११५॥

नीलकण्ठं महात्मानं हर्यक्षं तेजसां निधिम् ।
अष्टादशभुजं देवं सर्वाभरणभूषितम् ॥ ११६॥

शुक्लाम्बरधरं देवं शुक्लमाल्यानुलेपनम् ।
शुक्लध्वजमनाधृष्यं शुक्लयज्ञोपवीतिनम् ॥ ११७॥

गायद्भिर्नृत्यमानैश्च उत्पतद्भिरितस्ततः ।
वृतं पारिषदैर्दिव्यैर् आत्मतुल्यपराक्रमैः ॥ ११८॥

त्रिभिर्नेत्रैः कृतोद्योतं त्रिभिस्सूर्यैरिवोदितैः ।
सर्वविद्याधिपं देवं शरच्चन्द्रसमप्रभम् ॥ ११९॥

नयनाह्लादसौभाग्यम् अपश्यं परमेश्वरम् ॥ १२०

अशोभत च देवस्य माला गात्रे सितप्रभा ।
जातरूपमयैः पद्मैर् ग्रथिता रत्नभूषिता ॥ १२१

मूर्तिमन्ति महास्त्राणि तस्य देहोद्भवानि च ।
मया दृष्टानि गोविन्द भवस्यामिततेजसः ॥ १२२

इन्द्रायुधसहस्राभं धनुस्तस्य महात्मनः ।
पिनाकमिति विख्यातं स च वै पन्नगो महान् ॥ १२३

सप्तशीर्षो महाकायस् तीक्ष्णदंष्ट्रो विषोल्बणः ।

---

1. क त्रिशङ्कु घ—इतोऽष्टौ पादा न सन्ति

ज्यावेष्टितमहाग्रीवस् स्थितः पुरुषविग्रहः ॥ १२४

शरश्च सूर्यसङ्काशो दृष्टः पाशुपताह्वयः ।
सहस्रभुजजिह्वास्यो भीषणो नागविग्रहः ॥ १२५

शङ्खशूलासिभिश्चैव पट्टसै रूपवान् स्थितः ।
येन च त्रिपुरं दग्धं सर्वदेवमयश्शरः ॥ १२६

[1]शूलं च यौवनोपेतं लवणस्य करे स्थितम् ।
यत्तदस्त्रं महाघोरं दिव्यं पाशुपतं महत् ॥ १२७

अद्वितीयमनिर्देश्यं सर्वभूतसुखावहम् ।
सस्फुलिङ्गं महाघोरं विसृजन्तमिवार्चिषम् ॥ १२८

एकपादं महादंष्ट्रासहस्रशिरसोदरम् ।
सहस्रभुजजिह्वास्यम उद्विरन्तमिवानलम् ॥ १२९

ब्राह्मान्नारायणादैन्द्राद् आग्नेयाच्च सवारुणात् ।
यत् प्रकृष्टं महाबाहो सर्वशस्त्रविघातकम् ॥ १३०

येन च त्रिपुरं दग्धं क्षणाद्भगवता पुरा ।
शरेणैकेन गोविन्द महादेवेन लीलया ॥ १३१

निर्दहेदपि यत् कृत्स्नं जगत् स्थावरजङ्गमम् ।
महेश्वरभुजोत्सृष्टं निमेषात्तन्न संशयः ॥ १३२

नानावर्णस्य लोकेऽस्मिन् ब्रह्मविष्णुसुरेष्वपि ।

1. क-घ—इत आरभ्य एकचत्वारिंशदर्धानि न सन्ति

तदृष्टवानहं तत्र आश्चर्यमिदमुत्तमम् ॥ १३३

गुह्यमन्यं परञ्चापि तत्तुल्याधिकमेव वा ।
यत्तच्छूलमिति ख्यातं सर्वलोकेषु शूलिनः ॥ १३४

दारयेद्वा महीं कृत्स्नां शोषयेद्वा महोदधीन् ।
संहरेद्वा जगत् कृत्स्नं निर्दिष्टं शूलपाणिना ॥ १३५

यौवनाश्वो हतो येन मान्धाता सबलः पुरा ।
चक्रवर्ती महातेजास् त्रैलोक्यविजयी नृपः ॥ १३६

महाबलो महावीर्यश् शक्रतुल्यपराक्रमः ।
करस्थेनैव गोविन्द लवणस्यैव रक्षसः ॥ १३७

तच्छूलमतितीक्ष्णाग्रं सुभीमं रोमहर्षणम् ।
त्रिशिखां भ्रुकुटिं कृत्वा तर्जयन्तमिव स्थितम् ॥ १३८

सधूमं सार्चिषं कृष्णं कालसूर्यमिवोदितम् ।
सर्पहस्तमनिर्देश्यं पाशहस्तमिवान्तकम् ॥ १३९
दृष्टवानस्मि गोविन्द तदस्त्रं रुद्रसन्निधौ ॥ १३९॥

परमं तीक्ष्णधारं च शस्त्रं तस्यापि यत् पुरा ।
महादेवेन तुष्टेन दत्तं भृगुसुताय च ॥ १४०॥

त्रिस्सप्तकृत्वः पृथिवी येन निःक्षत्रिया कृता ।
जामदग्न्येन वीरेण रामेणाक्लिष्टकर्मणा ॥ १४१॥

तीक्ष्णधारश्च रौद्रश्च सर्पकण्ठार्धवेष्टितः ।

अभवच्छुचिनोऽभ्याशे दीप्तवह्निशिखोपमः ॥ १४२॥

असङ्ख्येयानि चास्त्राणि तस्य दिव्यानि धीमतः ।
प्राधान्यतो मयैतानि कीर्तितानि तवानघ ॥ १४३॥

सव्यदेशे तु देवस्य ब्रह्मा लोकपितामहः ।
दिव्यं विमानमास्थाय हंसयुक्तमवस्थितः ॥ १४४॥

वामपार्श्वगतश्चापि तथा नारायणस्थितः ।
वैनतेयं समास्थाय स्थितो देव्याश्समीपतः ॥ १४५॥

शक्तिं कण्ठे समास्थाय द्वितीय इव पावकः ॥ १४६

पुरस्ताद्देवदेवस्य नन्दिं पश्याम्यवस्थितम् ।
शूलं विष्टभ्य तिष्ठन्तम् द्वितीयमिव शङ्करम् ॥ १४७

स्वायम्भुवाद्या मनवो भृग्वाद्या ऋषयस्तथा ।
शक्राद्या देवताश्चैव सर्व एव समभ्ययुः ॥ १४८

तेऽभिगम्य महात्मानम् परिवार्य समन्ततः ।
अस्तुवन् विविधैस्स्तोत्रैर् महादेवं सुरास्तदा ॥ १४९

जगन्मूर्तिं महालिङ्गम् तन्मध्ये [1]स्फीतरूपिणम् ॥ १४९॥

ब्रह्मा भवं तदा स्तुत्वा रथन्तरमुदीरयन् ।
ज्येष्ठसाम्ना च देवेशम् जगौ नारायणः प्रभुम् ॥ १५०॥

---

1. क-घ—स्थिरमव्ययम्

जगौ शक्रः परं ब्रह्म शतरुद्रीयमुत्तमम् ॥ १५१

[1]ब्रह्मा नारायणश्चैव देवराजश्च कौशिकः ।
अशोभन्त महाबाहो त्रयस्त्रय इवाग्नयः ॥ १५२

तेषां मध्यगतो देवो रराज भगवान् शिवः ।
शरद्घनविनिर्मुक्तः [2]परिविष्ट इवांशुमान् ॥ १५३

ततोऽहमस्तुवं देवं स्तवेनानेन सुव्रत ॥ १५३॥

नमो देवादिदेवाय महादेवाय वै नमः ।
शर्काय शक्ररूपाय शक्रवेषधराय च ॥ १५४॥

नमोऽस्तु वज्रहस्ताय पिङ्गलायारुणाय च ।
[3]पिनाकपाणये नित्यं खड्गचर्मधराय च ॥ १५५॥

नमोऽस्तु कृष्णवासाय कृष्णकुञ्चितमूर्धज ।
कृष्णाजिनोत्तरीयाय कृष्णाष्टमिरताय च ॥ १५६॥

शुक्लाय शुक्लवर्णाय शुक्लाम्बरधराय च ।
शुक्लभस्माङ्गदिग्धाय [4]शुक्लभस्मरताय च ॥ १५७॥

त्वं ब्रह्मा सर्वदेवानां रुद्राणां नीललोहितः ।
आत्मा च सर्वभूतानां साङ्ख्यैः पुरुष उच्यते ॥ १५८॥

---

1. क-घ—इदमर्धद्वयं नास्ति
2. क-घ—सुधांशुरिव निर्मलः
3. क-घ—अर्धचतुष्टयं नास्ति
4. क-घ—जाह्नवीभूषिताय च

[1]ऋषभस्त्वं पवित्राणां योगिनां कपिलश्शिवः ।
आश्रमाणां गृहस्थस्त्वम् ईश्वराणां महेश्वरः ॥ १५९॥

कुबेरस्सर्वयक्षाणां क्रमतां विष्णुरुच्यते ।
पर्वतानां महामेरुर् नक्षत्राणां च चन्द्रमाः ॥ १६०॥

वसिष्ठस्त्वमृषीणां च ग्रहाणां सूर्य उच्यते ।
आरण्यानां पशूनां च सिंहस्त्वं परमेश्वर ॥ १६१॥

[2]ग्राम्याणां गोवृषश्चासि भगवाँल्लोकपूजितः ।
आदित्यानां भवान् विष्णुर् वसूनां चैव पावकः ॥ १६२॥

पक्षिणां वैनतेयश्च अनन्तो भुजगेषु च ॥ १६३

सामवेदश्च वेदानां यजुषां शतरुद्रियम् ।
सनत्कुमारो योगीनां साङ्ख्यानां कपिलो मुनिः ॥ १६४

शक्रो हि मरुतां देव पितॄणां धर्मराडपि ।
ब्रह्मलोकश्च लोकानां गतीनां मोक्ष उच्यते ॥ १६५

क्षीरोदस्सागराणां च शैलानां हिमवान गिरिः ।
वर्णानां ब्राह्मणश्चासि विप्राणां दीक्षितो द्विजः ॥ १६६

आदिस्त्वमसि लोकानां संहर्ता काल एव च ॥ १६६॥

---

1. क-घ—अधैतयं नास्ति

2. क-घ—समिद्धस्तः पवित्राणां योगिनां कपिलश्शिवः ।
आश्रमाणां गृहस्थस्त्वमीश्वराणां महेश्वरः ॥
कुबेरस्सर्वभूतानां क्रमतां विष्णुरुच्यते ॥ [अधिकः पाठः]

यच्चान्यदपि लोकेऽस्मिन् सत्त्वं तेजोधिकं स्मृतम् ।
तत् सर्वं भगवानेव इति मे निश्चिता मतिः ॥ १६७॥

नमस्ते भगवन् देव नमस्ते भक्तवत्सल ।
योगेश्वर नमस्तेऽस्तु नमस्ते विश्वशम्भवे ॥ १६८॥

प्रसीद मम भक्तस्य दीनस्य कृपणस्य च ।
अनैश्वर्येण युक्तस्य गतिर्भव सनातन ॥ १६९॥

यच्चापराधं कृतवान् अज्ञानात् परमेश्वर ।
मद्भक्त इति देवेश तत् सर्वं क्षन्तुमर्हसि ॥ १७०॥

मोहितश्चास्मि देवेश तुभ्यं रूपविपर्ययात् ।
तेन नार्घ्यं मया दत्तं पाद्यं चापि सुरेश्वर ॥ १७१॥

एवमुक्त्वा तमीशानं पाद्यमर्घ्यं च भक्तितः ।
कृताञ्जलिपुटो भूत्वा तस्मै सर्वं न्यवेदयम् ॥ १७२॥

ततश्शीताम्बुसंयुक्ता दिव्यगन्धसमन्विता ।
पुष्पवृष्टिश्शुभा तात मम मूर्धनि चापतत् ॥ १७३॥

दुन्दुभिश्च ततो दिव्यस् ताडितो देवकिङ्करैः ।
ववौ च मारुतः पुण्यश् शुचिगन्धस्सुखावहः ॥ १७४॥

ततः प्रीतो महादेवस् सर्वलोकेश्वरः प्रभुः ।
अब्रवीत् त्रिदशांस्तत्र हर्षयन्निव मां तदा ॥ १७५॥

श्रीमहादेवः—

पश्यध्वं त्रिदशास्सर्वे उपमन्योर्महात्मनः ।
मयि भक्तिं परां दिव्याम् एकभावादवस्थिताम् ॥ १७६॥

उपमन्युः—

एवमुक्तास्ततः कृष्ण सुरास्ते शूलपाणिना ।
ऊचुः प्राञ्जलयो भूत्वा नमस्कृत्वा वृषध्वजम् ॥ १७७॥

देवाः—

भगवन् देवदेवेश लोकनाथ जगत्पते ।
लभतां सर्वकामेभ्यो वरं त्वत्तो द्विजोत्तमः ॥ १७८॥

उपमन्युः—

एवमुक्तस्ततश्शर्वस् सुरैर्ब्रह्मादिभिस्तथा ।
आह मां भगवानीशः प्रहसन्निव शङ्करः ॥ १७९॥

श्रीमहादेवः—

वत्सोपमन्यो प्रीतोऽस्मि पश्य मां मुनिपुङ्गव ।
दृढभक्तोऽसि विप्रेन्द्र मया जिज्ञासितो ह्यसि ॥ १८०॥
अनया चैव भक्त्या वै अत्यर्थं प्रीतिमानहम् ।
तस्मात् सर्वान् ददाम्यद्य कामांस्तव यथेप्सितान् ॥ १८१॥

उपमन्युः—

एवमुक्ते ततस्तात महादेवेन मे विभो ।
हर्षादश्रूण्यवर्तन्त रोमहर्षश्च जायते ॥ १८२॥

अब्रवं च तदा देवं हर्षगद्गदया गिरा ।
जानुभ्यामवनीं गत्वा प्रणम्य च पुनः पुनः ॥ १८३॥
अद्य जातो ह्यहं देव अद्य मे सफलं तपः ।
यन्मे साक्षान्महादेवः प्रसन्नस्त्रिश्रुतेऽग्रतः ॥ १८४॥
यं शक्राद्या न पश्यन्ति देवाश्चामितविक्रमाः ।
तमहं दृष्टवान् देवं कोऽन्यो धन्यतरो मया ॥ १८५॥
एवं ध्यायन्ति विद्वांसः परं तत्त्वं सनातनम् ।
षड्विंशकमिति ख्यातं यत् परात् परमक्षयम् ॥ १८६॥
स एष भगवान् देवस् सर्वसत्त्वादिरव्ययः ।
सर्वतत्त्वविधानज्ञः प्रधानपुरुषेश्वरः ॥ १८७॥
योऽसृजद्दक्षिणादङ्गाद् ब्रह्माणं लोकसम्भवम् ।
वामपार्श्वात् तथा विष्णुं लोकरक्षार्थमीश्वरम् ॥ १८८॥
युगान्ते समनुप्राप्ते रुद्रं प्रभुरथासृजत् ॥ १८९
स रुद्रस्संहरन् कृत्स्नं जगत् स्थावरजङ्गमम् ।
कालो भूत्वा परं ब्रह्म याति संवर्तकानलः ॥ १९०
[1]अयमेव महादेवो जगत् कृत्स्नं चराचरम् ।
कल्पादौ चैव सर्वेषां स्मृतिमाक्रम्य तिष्ठति ॥ १९१
सर्वगस्सर्वभूतात्मा सर्वभूतभवोद्भवः ।

1. क-ब—इदमर्धं नास्ति

आस्ते सर्वगतो नित्यम् अदृश्यस्सर्वदैवतैः ॥ १९२

तं त्वा प्रणम्य शिरसा प्रसाद्य प्रार्थये प्रभो ।
भक्तिर्भवतु मे नित्यं शाश्वती त्वयि शङ्कर ॥ १९३

अतीतानागतं चैव वर्तमानं च नित्यशः ।
जानीयामिति मे बुद्धिस् त्वत्प्रसादात् सुरेश्वर ॥ १९४

क्षीरोदनं च भुञ्जीयां सक्षीरं सह बान्धवैः ।
आश्रमे च सदा मह्यं सान्निध्यं परमस्तु ते ॥ १९५

एवमुक्तस्स मां प्राह भगवाँल्लोकपूजितः ।
ईश्वरोऽयं महातेजाश् चराचरगुरुः प्रभुः ॥ १९६

श्रीमहादेवः—

अजरश्चामरश्चैव भव दुःखविवर्जितः ।
शीलवाञ् श्रुतसम्पन्नस् सर्वज्ञः प्रियदर्शनः ॥ १९७

अक्षयं यौवनं चैव कुलं गोत्रं तथैव च ॥ १९७॥

क्षीरोदस्सागरश्चैव यत्र यत्रेच्छसे मुने ।
तत्र तत्रैव सान्निध्यं करिष्यामि न संशयः ॥ १९८॥

उपभुज्य पयस्तात अमृतेन समन्वितम् ।
बन्धुभिस्सहितः कल्पं ततो मामुपयास्यसि ॥ १९९॥

तिष्ठ वत्स यथाकामं नोत्कण्ठां कर्तुमर्हसि ॥ २००

स्मृतस्स्मृतश्च ते वत्स पुनर्यास्यामि दर्शनम् ।
सान्निध्यमाश्रये नित्यं करिष्यामि तवानघ ॥ २०१

उपमन्युः—

एवमुक्त्वा महादेवस् सूर्यकोटिसमप्रभः ।
ममेशानो वरं दत्त्वा तत्रैवान्तरधीयत ॥ २०२

एवं दृष्टो मया कृष्ण देवदेवस्समाधिना ।
तदवाप्तं च मे सर्वं यदुक्तं तेन धीमता ॥ २०३

प्रत्यक्षं चैव ते कृष्ण पश्य सिद्धानवस्थितान् ।
ऋषीन् विद्याधरान् यक्षान् गन्धर्वानप्सरोगणम् ॥ २०४

पश्य वृक्षाननौपम्यान् सदा पुष्पफलान्वितान् ।
सर्वर्तुकुसुमैर्युक्तान् स्निग्धपत्रान सुशाखिनः ॥ २०५

एवमेतन्महादेवाल्लब्धवानस्मि केशव* ॥ २०५॥

एतान् सहस्रशश्चान्यान् समभिध्यातवान् हरः ।
कस्मान् प्रसादं भगवान् न कुर्यात्तव माधव ॥ २०६॥

त्वादृशेन हि देवानां श्लाघनीयस्समागमः ।
ब्रह्मण्येनानृशंसेन श्रद्दधानेन चाच्युत ॥ २०७॥

जप्यं च ते प्रदास्यामि येन द्रक्ष्यसि शङ्करम् ॥ २०८

* सर्वेषु कोशेषु अस्यैवाध्यायसमाप्तिर्दृश्यते

श्रीभगवान्—

अब्रवं तमहं ब्रह्मन् त्वत्प्रसादान्महामुने ।
द्रक्ष्ये [1]दितिजसङ्घानां मर्दनं त्रिदशेश्वरम् ॥ २०९

दिनेऽष्टमे च विप्रेण दीक्षितोऽहं यथाविधि ।
दण्डी मुण्डी कुशी चीरी घृताक्तो मेखली तथा ॥ २१०

मासमेकं फलाहारो द्वितीयं [2]सलिलाशनः ।
[3]तृतीयं च चतुर्थं च पञ्चमं चानिलाशनः ॥ २११

एकपादेन तिष्ठंश्च ऊर्ध्वबाहुरतन्द्रितः ।
तेजस्सूर्यसहस्रस्य अपश्यं दिवि भारत ॥ २१२

तस्य मध्यगतं चापि तेजसः पाण्डुनन्दन ।
इन्द्रायुधपिनद्धाङ्गं विद्युन्मालाविभूषितम् ॥ २१३

नीलशैलघनप्रख्यं बलाकाभूषितं घनम् ॥ २१३॥

तमास्थितश्च भगवान् देव्या सह महाद्युतिः ।
तपसा तेजसा कान्त्या दीपयन् सह भार्यया ॥ २१४॥

रराज भगवांस्तत्र देव्या सह महेश्वरः ।
सोमेन सहितस्सूर्यो यथा मेघस्थितस्तथा ॥ २१५॥

संहृष्टरोमा कौन्तेय विस्मयोत्फुल्ललोचनः ।

---

1. अ-ख—यमघ 2. क-घ—चानिलाशनः
3. क-घ—इदमर्धं नास्ति

अपश्यं देवसङ्घानां गतिमार्तिहरं हरम् ॥ २१६॥

किरीटिनं [1]जटिलं शूलपाणिं
पिनाकिनं वज्रिणं तीक्ष्णदंष्ट्रम् ।
शुभाङ्गदं व्यालयज्ञोपवीतम्
दिव्यां मालामुरसा नैकवर्णाम् ॥ २१७॥

समुद्वहन्तं गुल्फदेशावलम्बाम्
सूर्यं यथा परिविष्टं ससन्ध्यम् ।
वर्षात्यये तद्वदपश्यमेनं
महेश्वरं नन्दिविनायकाद्यैः ॥ २१८॥

प्रमथानां गणैश्चैव समन्तात् परिवारितम् ।
[2]शरदीव सुदुष्प्रेक्ष्यं परिविष्टं दिवाकरम् ॥ २१९॥

एकादशशताश्चैनं रुद्रास्सगणवान्धवाः ।
अस्तुवन् नियतात्मानः कर्मभिश्शुभकर्मिणः ॥ २२०॥

आदित्या वसवस्साध्या विश्वे देवास्तथाऽश्विनौ ।
विश्वाभिस्स्तुतिभिश्चैनं नीलकण्ठमुमापतिम् ॥ २२१॥

योगेश्वरास्सुबहवो महेशं बहुधाऽस्तुवन् ॥ २२२

महाभूतानि च्छन्दांसि प्रजानां पतयो मखाः ।
सरितस्सागरा नागा गन्धर्वाप्सरसस्तथा ॥ २२३

1. क-घ—गदिनम् 2. क-घ—इदमर्धं नास्ति

विद्याधराश्च गीतेन वाद्यनृत्तादिनाऽर्चयन् ॥ २२३॥

तेजस्विनां मध्यगतम् तेजोराशिं जगत्पतिम् ।
[1]ईक्षितुं च महादेवं न मे शक्तिरभूत् तदा ॥ २२४॥

ततो देवेन पश्येति वदस्वेत्यभिभाषितः ।
दृष्ट्वा देवं तथा देवीम् अस्तुवं संस्तुतं सुरैः ॥ २२५॥

नमोऽस्तु ते शाश्वत सर्वयोगिने
ब्रह्माधिपं त्वामृषयो वदन्ति ।
तपश्च सत्त्वं च रजस्तमश्च
त्वामेव सर्वं प्रवदन्ति सन्तः ॥ २२६॥

त्वं वै ब्रह्मा च रुद्रश्च वरुणोऽग्निर्मनुर्भवः ।
धाता त्वष्टा विधाता च त्वं प्रभुस्सर्वतोमुखः ॥ २२७॥

त्वत्तो जातानि भूतानि स्थावराणि चराणि च ।
त्वमादिस्सर्वभूतानां संहर्ता च त्वमेव हि ॥ २२८॥

ये चेन्द्रियार्थाश्च मनश्च कृत्स्नं
ये वायवस्सप्त तथैव चाग्निः ।
या देहस्था देवताश्चापि पुंसां
तस्मात् परं त्वामृषयो वदन्ति ॥ २२९॥

वेदा यज्ञाश्च सोमाश्च दक्षिणाः पावकः पुनः ।

1. क-घ—इदमर्धं नास्ति

यज्ञोपाङ्गं च यत् किञ्चिद् भगवांस्त्वमसंशयम् ॥ २३०॥
इष्टं दत्तं तपोऽधीतं व्रतानि नियमाश्च ये ।
ह्रीः कीर्तिश्श्रीर्धृतिस्तुष्टिस् सिद्धिश्चैव त्वदर्पणाः ॥ २३१॥
कामः क्रोधो भयं लोभो मदस्तम्भोऽथ मत्सरः ।
आधयो व्याधयश्चैव भगवंस्तनवस्तव ॥ २३२॥
प्रकृतिर्विकारः प्रलयः प्रधानं प्रभवाप्ययः ।
मनसः परमा योनिस् स्वभावश्चेतना धृतिः ॥ २३३॥
[1]अव्यक्तपावन विभो सहस्रांशो हिरण्मय ।
आदिर्गणानां सर्वेषां भवान् वै जीवनाश्रयः ॥ २३४॥
महानात्मा मनुर्ब्रह्मा विश्वं शम्भुस्स्वयम्भुवः ।
बुद्धिः प्रज्ञोपलब्धिश्च संवित् ख्यातिर्धृतिस्मृतिः ॥ २३५॥
पर्यायवाचकैश्शब्दैर् महानात्मा विभाव्यसे ॥ २३६
त्वां बुद्ध्वा ब्राह्मणो विद्वान न प्रमोहं निगच्छति ॥ २३६॥
हृदयं सर्वभूतानां क्षेत्रज्ञस्त्वृषिभिस्तुतः ।
सर्वतः पाणिपादस्त्वम् सर्वतोऽक्षिशिरोमुखः ॥ २३७॥
सर्वतश्श्रुतिमाँल्लोके सर्वमावृत्य तिष्ठसि ॥ २३८
[2]कालस्त्वमसि तिग्मांशोर् निमेषादिषु कर्मसु ।
त्वं वै प्रभार्चिः पुरुषस् सर्वस्य हृदि निश्रितः ॥ २३९

1. क-घ—अर्धचतुष्टयं नास्ति 2. क—फलंत्वमसि

अणिमा लघिमा प्राप्तिर् ईशानो ज्योतिरव्ययः ॥ २३९॥

त्वयि बुद्धिर्मतिर्लोकाः प्रपन्नास्संश्रिताश्च ये ।
ध्यायिनो नित्ययोगाश्च सत्यसन्धा जितेन्द्रियाः ॥ २४०॥

यस्त्वां ध्रुवं वेदयते गुहाशयं
[1]कविं पुराणं पुरुषं विश्वरूपम् ।
हिरण्मयं बुद्धिमतां परां गतिं
[2]स बुद्धिमान् बुद्धिमतीत्य तिष्ठति ॥ २४१॥

विदित्वा सप्त सूक्ष्माणि षडङ्गं त्वां च मूर्तितः ।
प्रधानविधियोगस्थस् त्वामेव विशते बुधः ॥ २४२॥

एवमुक्ते मया पार्थ भवे चार्तिविनाशने ।
चराचरं जगत् सर्वं सिंहनादमथाऽकरोत् ॥ २४३॥

सविप्रसङ्घाश्च सुरासुराश्च
नागाः पिशाचाः पितरो वयांसि ।
रक्षोगणा भूतगणाश्च सर्वे
महर्षयश्चैव तदा प्रणेमुः ॥ २४४॥

मम मूर्धनि दिव्यानां कुसुमानां सुगन्धिनाम् ।
राशयो निपतन्ति स्म वायुश्च सुसुखो ववौ ॥ २४५॥

---

1. ख-घ—प्रभुं
2. क—समाधिमान् घ—समृद्धिमान्

निरीक्ष्य भगवान् देवीं मुखं मां च जगद्धितः ।
शतक्रतुं चाभिवीक्ष्य स्वयं मामाह शङ्करः ॥ २४६॥

श्रीमहादेवः—

विद्वन् कृष्ण परा भक्तिर् अस्मासु तव शत्रुहन् ।
क्रियतामात्मनश्श्रेयः प्रीतिर्हि परमा त्वयि ॥ २४७॥

[1]वृणीष्व च वरान् कृष्ण तव दातास्मि सत्तम ।
ब्रूहि यादवशार्दूल यानिहेच्छसि दुर्लभान् ॥ २४८॥

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां
अनुशासनपर्वणि द्वाविंशोऽध्यायः ॥ २२ ॥
॥ ८९ ॥ आनुशासनिकपर्वणि द्वाविंशोऽध्यायः ॥ २२ ॥
[अस्मिन्नध्याये २४८॥ श्लोकाः]

---

1. अ-ख—वृणीष्व वचनात्

॥ त्रयोविंशोऽध्यायः ॥

कृष्णेन युधिष्ठिरं प्रति पार्वतीपरमेश्वराभ्यां स्वस्मै वरप्रदानकथनम् ॥ १ ॥ उपमन्युना कृष्णं प्रति तण्डिकृतश्रीमहादेवस्तुत्यनुवादः ॥ २ ॥

श्रीभगवान्—

मूर्ध्ना प्रणम्य तु भवं देवमीशानमव्ययम् ।
परमं हर्षमागम्य भगवन्तमथाब्रवम् ॥ १

धर्मे दृढत्वं युधि शत्रुघातं
यशस्तथाऽग्र्यं परमं बलं च ।
योगप्रियत्वं बुधसन्निकर्षं
वृणे सुतानां च शतं शतानि ॥ २

एवमस्त्विति तद्वाक्यं मयोक्तः प्राह शङ्करः ॥ २॥
ततो मां जगतो माता धारिणी सर्वपावनी ।
उवाच मां प्रणिहिता शर्वाणी तपसां निधिः ॥ ३॥

पार्वती—

दत्तो भगवता पुत्रस् साम्बो नाम तदाऽनघ ।
मत्तो हृष्टो वरानिष्टान् गृहाण त्वं ददामि ते ॥ ४॥

श्रीभगवान्—

प्रणम्य शिरसा यावन्मयोक्ता पाण्डुनन्दन ॥ ५

द्विजेष्वकोपं पितृतः प्रसादं
शतं सोमानुपभोगं परं च ।

कुले प्रीतिं मातृतश्च प्रसादं
शमप्राप्तिं प्रवृणे चापि देवि ॥ ६

उमा—

एवं भविष्यत्यमरप्रभाव
नाहं मृषा जातु वदे कदाचिन् ।
भार्यासहस्राणि च षोडशैव
तासु प्रियत्वं च तथाऽक्षयत्वम् ॥ ७

प्रीतिं चाग्र्यां बान्धवानां प्रसादं
ददामि ते वपुषः काम्यतां च ।
भवन्तु नित्यमतिथीनां बहूनि
गृहे च तुभ्यं प्रीतिमतां शतानि ॥ ८

श्रीभगवान्—

एवं दत्त्वा वरान् देवो मम देवी च भारत ।
अन्तर्हितः क्षणे तस्मिन् मगणो मां विसृज्य च ॥ ९

एतदत्यद्भुतं सर्वं ब्राह्मणायातितेजसे ।
उपमन्यवे मया कृत्स्नम् आख्यातं पौरवोत्तम ॥ १०

नमस्कृत्य स तु प्राह देवदेवाय सुव्रत ॥ १०॥

उपमन्युः—

सुप्रसादवरो लोके नास्ति शर्वसमोऽरिहन् ।
नास्ति शर्वसमो देवो नास्ति शर्वसमा गतिः ॥ ११॥

ऋषिरासीन् कृते तात तण्डिरित्येव विश्रुतः ॥ १२

दशवर्षसहस्राणि तेन देवस्समाधिना ।
आराधितोऽभूद्भक्तेन तस्योदर्कं निशामय ॥ १३

स दृष्टवान महादेवम् अस्तौषीच्च स्तवैर्विभुम् ॥ १३॥

तण्डिः—

पवित्राणां पवित्रं च गतिर्गतिमतां वर ।
[1]अत्युग्रतेजसां तेजस् तपसां परमो निधिः ॥ १४॥

विश्वमाय हिरण्याक्ष पुरुहूतनमस्कृत ।
भूरिकल्याणद विभो पुरुहूत नमोऽस्तु ते ॥ १५॥

जन्ममरणभूतानां द्विजानां यततां विभो ।
निर्वाणद महस्रांशो नमस्तेऽस्तु सुखाश्रय ॥ १६॥

ब्रह्मा शतक्रतुर्विष्णुर् विश्वे देवा महर्षयः ।
न विदुस्त्वां समत्वेन कुतो वेत्स्यामहे वयम् ॥ १७॥

त्वत्तः प्रवर्तते कालस् त्वयि कालश्च लीयते ।
कालाख्यः पुरुषाख्यश्च ब्रह्माख्यश्च त्वमेव हि ॥ १८॥

त्वमवस्थास्थितास्तिस्रः पुराणश्च महर्षिभिः ॥ १९

अधिपौरुषमध्यात्मम अधिभूताधिदैवतम ।

1 क-घ—इदमर्धं नास्ति

अधिलोक्यधिविज्ञानम् अधियज्ञस्त्वमेव हि ॥ २०

यं विदित्वाऽऽत्मदेहस्थं दुर्विदं दैवतैरपि ।
विद्वांसो यान्ति निर्मुक्ताः परं भावमनामयम् ॥ २१

अन्विच्छतस्तव विभो जन्ममृत्युन्तरे ततः ।
द्वारं तत् स्वर्गमोक्षाणाम् आक्षेप्ता त्वं ददासि च ॥ २२

त्वमेव मोक्षस्वर्गश्च कामः क्रोधस्त्वमेव हि ।
ब्रह्मा विष्णुश्च रुद्रश्च [1]स्कन्देन्द्रौ सविता यमः ॥ २३

सत्त्वं रजस्तमश्चैव अधश्चोर्ध्वं त्वमेव हि ।
वरुणेन्द्रमरुद्धाता विधाता त्वं धनेश्वरः ॥ २४

भूर्वायुर्ज्योतिरादित्यो वाग्बुद्धिस्त्वं गतिर्मनः ।
कर्म सत्यानृते चोभे त्वमेवास्ति च नास्ति च ॥ २५

इन्द्रियाणीन्द्रियार्थाश्च यत् परं प्रकृतेर्ध्रुवम् ।
विश्वाविश्वे भवो भावश् चिन्त्याचिन्त्यं त्वमेव हि ॥ २६

यच्चैतत् परमं ब्रह्म यच्च भव्यं च यत् परम् ।
[2]योगिभिस्त्वाद्भुतयोगैश्च ध्यातवान् नात्र संशयः ॥ २७

नूनमद्य कृतार्थास्म नूनं प्राप्तास्म तां गतिम् ।
यां गतिं प्राप्नुवन्तीह ज्ञानान्निर्मलबुद्धयः ॥ २८

1. अ—त्वमिन्द्रः
2. क-च—या गतिस्त्वद्भुतयोगिनां स भवान् नात्र

अहो मूढास्म सुचिरम् इमं कालमबुद्धयः ।
यन्न विद्मः परं देवं [1]शङ्करं ये विदुर्बुधाः ॥ २९

योऽयमासादितस्साक्षाद् बहुभि[2]र्जन्मभिर्मया ।
भक्तानुग्रहकृद्देवो यं ज्ञात्वाऽमृतमश्नुते ॥ ३०

देवासुरमनुष्याश्च यत्तद् गुह्यं सनातनम् ।
गुहायां निहितं ब्रह्म दुर्विज्ञेयं सुरैरपि ॥ ३१

स एव भगवान् देवस् सर्वज्ञस्सर्वतोमुखः ।
सर्वात्मा सर्वदर्शी च सर्वगस्सर्ववेदिता ॥ ३२

प्राणकृत् प्राणहृत् प्राणः प्राणधृक् प्राणिनां गतिः ।
देहकृद्देहभृद्देही देहिनां परमा गतिः ॥ ३३

अध्यात्मगतिनिष्ठानां मुनीनामात्मवेदिनाम् ।
अपुनर्जनिकामानां या गतिस्सोऽयमीश्वरः ॥ ३४

अयनं सर्वभूतानां शुभाशुभगतिः प्रभुः ।
अयं च जन्महरणे विदध्यात् सर्वजन्तुषु ॥ ३५

अयं च सर्वकामानाम् ऋषीणां सिद्धिदः प्रभुः ।
अयं हि सिद्धिकामानां द्विजानां मोक्षदः प्रभुः ॥ ३६

भूवाद्यान् सप्त भुवनान् उत्पाद्य त्रिदिवौकसः ।
बिभर्ति देवमनुभिर् अष्टाभिश्च ददाति च ॥ ३७

---

1. क-ङ—सार्वगं यं ख—शाश्वतं यं 2. क-ङ—कर्मभि

अतः प्रवर्तते सर्वम् अस्मिन् सर्वं प्रतिष्ठितम् ।
अस्मिंश्च प्रलयं याति सोऽयमेकस्सनायकः ॥ ३८

अयं च सत्यकामानां सत्यलोकः परस्सताम् ।
अपवर्गश्च मुक्तानां कैवल्यं चात्मवादिनाम् ॥ ३९

अयं ब्रह्मादिभिस्सिद्धैर् गुहायां सेवितः प्रभुः ।
देवासुरमनुष्याणां प्रकाशो न भवेदिति ॥ ४०

तेन देवासुरनरा भूतेशं न विदुर्भवम् ।
मोहिताः खल्वनेनैव हृच्छयेन प्रचोदिताः ॥ ४१

ये चैनं सम्प्रपद्यन्ते भक्तियोगेन भारत ।
तेषामेवात्मनाऽऽत्मानं दर्शयत्येव हृच्छयः ॥ ४२

यं ज्ञात्वा न पुनर्जन्म मरणं वाऽपि विद्यते ।
यं विदित्वा परं वेद्यं वेदितव्यं न [1]विद्यते ॥ ४३

यं लब्ध्वा [2]परमं लाभं मन्यते नाधिकं पुनः ।
प्राणसूक्ष्मां परां बुद्धिं आच्छाद्याक्षय्यमावहाम् ॥ ४४

यं साङ्ख्यं गुणतत्त्वज्ञास् साङ्ख्यशास्त्रविशारदाः ।
सूक्ष्मज्ञानरतास्सर्वे ज्ञात्वा मुच्यन्ति बन्धनैः ॥ ४५

यं च वेदविदो नित्यं ध्यायन्ति विमलाशयाः ।

1 क-घ—रोचते
2. क-घ—परमानन्दं नानन्दं मन्यते परम्

अयं च देवयानानाम् आदित्यो द्वारमुच्यते ॥ ४६

अयं च पितृयानानां चन्द्रमा द्वारमुच्यते ।
एषा तात गतिश्चित्रा संवत्सरयुगादिषु ॥ ४७

भावाभावौ तदा द्वौ च अयने दक्षिणोत्तरे ॥ ४७॥

एवं प्रजापतिः पूर्वम् आराध्य बहुभिस्तवैः ।
वरयामास पुत्रत्वे [1]ताण्डिल्यो द्विजसंज्ञितः ॥ ४८॥

ऋग्भिर्यमनुशंसन्ति नामकर्माणि बह्वृचाः ।
यजुर्भिर्यं हविर्वेद्यां जुह्वुरध्वर्यवोऽध्वरे ॥ ४९॥

[2]सामभिर्यं च गायन्ति सामगाश्शुद्धबुद्धयः ॥ ५०

[3]यज्ञस्य च परा योनिर् यश्चायमपरस्मृतः ।
राज्यहश्शोत्रनयनः पञ्चमामशिरोभुजः ॥ ५१

ऋतुर्वीर्यस्तपोवीर्यः कालवीर्यस्सनातनः ।
मृत्युर्यागो हुताशश्च कालस्संहारवेगवान् ॥ ५२

कालस्य परमा योनिः कालश्चायं सनातनः ॥ ५२॥

चन्द्रादित्यौ सनक्षत्रौ सग्रहौ सह वायुना ।
ध्रुवस्सप्तर्षयश्चैव भुवनास्सप्त एव च ॥ ५३॥

प्रधानं महदव्यक्तं विशेषान्तं सचेतनम् ।

1. घ—ताल्व्यो 2. अ-क-ङ—नाम
3 क-घ—यर्जुषि परमा योनिर् यतिश्चायं परस्मृतः। [पाठान्तरम्]

ब्रह्मादिस्तम्बपर्यन्तं भूतानि निवसन्ति यत् ॥ ५४॥

अष्टौ प्रकृतयश्चैव प्रकृतिभ्यश्च यत् परम् ।
अस्य देवस्य च समं कृत्स्नं सम्परिवर्तते ॥ ५५॥

[1]एतत् तत् परमानन्दम् एतत् तत् परतः परम् ।
एषा गतिर्हि भक्तानाम् एष भावः परस्मताम् ॥ ५६॥

एतत् पदमनुद्विग्नम् एतद्ब्रह्म सनातनम् ।
शास्त्र[2]वेदाङ्गविदुषाम् एतद्ज्ञानं परं पदम् ॥ ५७॥

इयं सा परमा काष्ठा [3]इयं सा परमा कला ।
इयं सा परमा बुद्धिर् इयं सा परमा गतिः ॥ ५८॥

इयं सा परमा शान्तिर् इयं सा निर्वृतिः परा ।
यं प्राप्य कृतकृत्यास्म इति [4]मन्यन्ति मेधसा ॥ ५९॥

इयं तुष्टिरियं सिद्धिर् इयं श्रुतिरियं स्मृतिः ।
अध्यात्मगतिनिष्ठानां विदुषां प्राप्तिरव्यया ॥ ६०॥

[5]यजतां कामकामानां यज्ञैर्विपुलदक्षिणैः ।
या गतिर्दैवतैर्दिव्या या गतिस्त्वं सनातन ॥ ६१॥

जपहोमव्रतैः कृच्छ्रैर् नियमैर्देहतापनैः ।

---

1. क-घ—अर्धद्वयं नास्ति 2. क—वेदान्त
3. क—इतः चत्वारः पादा न सन्ति
4. ख—मन्यन्त्यमेधसः घ—मन्यन्ति मेधसः
5. क-घ—इदमर्धं नास्ति

तप्यतां या गतिर्देव वैराग्ये सा गतिर्भवान् ॥ ६२॥

कामन्यासकृतार्थानां विरक्तानां ततस्ततः ।
या गतिस्सर्वभावेन सा गतिस्त्वं सनातन ॥ ६३॥

[1]अपुनर्जन्मकामानां वैराग्ये वर्ततां परे ।
विकृतीनां लयानां च सा गतिस्त्वं सनातन ॥ ६४॥

ज्ञानविज्ञाननिष्ठाद्या निरूपाख्या निरञ्जना ।
कैवल्ये या गतिर्देव परमा सा गतिर्भवान् ॥ ६५॥

वेदशास्त्रपुराणोक्ताः पञ्चैता गतयो भवान् ।
त्वत्प्रसादात् तु लभ्यन्ते न लभ्यन्तेऽन्यथा विभो ॥ ६६॥

उपमन्युः—

इति तण्डिस्तपोयोगात् तुष्टावेशानमव्ययम् ।
जगौ परमया ब्रह्मन् पुरा लोककृता जगौ ॥ ६७॥

ब्रह्मा शतक्रतुर्विष्णुर् विश्वे देवा महर्षयः ।
न विदुस्त्वामितीतस्ते तुष्टः प्रोवाच तं शिवः ॥ ६८॥

श्रीमहादेवः—

अजरश्चाव्ययश्चैव भविता दुःखवर्जितः ।
यशस्वी तेजसा युक्तो देवज्ञानसमन्वितः ॥ ६९॥

ऋषीणामभिगम्यस्त्वं सूत्रकर्ता सुतस्तव ।

---

1. क-घ—अपुनस्तारका

मत्प्रसादद्विजश्रेष्ठ भविष्यति न संशयः ॥ ७०॥

कं वा सकामं दास्यामि ब्रूहि यद्यच्च काङ्क्षसे ॥ ७१

उपमन्युः—

प्राञ्जलिस्सन्नुवाचेदं त्वयि भक्तिर्दृढाऽस्तु मे ॥ ७१॥

एवं दत्त्वाऽचिराद्देवो वन्द्यमानस्सहर्षिभिः ।
स्तूयमानश्च विबुधैस् तत्रैवान्तरधीयत ॥ ७२॥

अन्तर्हिते भगवति सानुगे यादवेश्वर ।
ऋषिराश्रममासाद्य ममैतत् प्रोक्तवानिह ॥ ७३॥

यानि च प्रथितान्यादौ तण्डिराख्यातवान् मम ।
नामानि माधवश्रेष्ठ तथा त्वं शृणु सिद्धये ॥ ७४॥

दश नामसहस्राणि [1]देवस्याह पितामहः ।
सर्वस्य शास्त्रेषु तथा दश नामशतानि वै ॥ ७५॥

गुह्यानि यानि नामानि तण्डिर्भगवतोऽच्युत ।
देवप्रसादाद्देवेश पुरा प्राह महात्मनः ॥* ७६॥

श्रीभगवान्—

ततस्स प्रयतो भूत्वा मम तात युधिष्ठिर ।
प्राञ्जलिः प्राह विप्रर्षिर् नाम[2]साहस्रमादितः ॥ ७७॥

---

1. घ—देवेष्वाह

* सर्वेषु कोशेषु अत्रैवाध्यायसमाप्तिर्दृश्यते

2. क-घ—संहार

उपमन्युः—

ब्रह्मप्रोक्तैर् ऋषिप्रोक्तैर् वेदवेदाङ्गपारगैः ।
सर्वलोकेषु विख्यातैस् स्थाणुं स्तोष्यामि नामभिः ॥ ७८॥

[1]महद्भिरेतैस्तत्त्वज्ञैस् सिद्धैस्सर्वार्थसाधकैः ।
ऋषीणां तन्महाभक्त्या कृतैर्देवैः कृतात्मनाम् ॥ ७९॥

यथोक्तैर्लोकविख्यातैर् मुनिभिस्तत्त्वदर्शिभिः ।
प्रवरं प्रथमं स्वर्ग्यम् सर्वभूतहितं शुभम् ॥ ८०॥

शुभैस्सर्वत्र जगति ब्रह्मलोकावतारितैः ।
यद्वैतत् परमं गुह्यं ब्रह्मप्रोक्तं सनातनम् ॥ ८१॥

वक्ष्ये यदुकुलश्रेष्ठ शृणुष्वावहितो मम ॥ ८२

परत्वेनास्तुवन् देवं भक्तास्तु परमेश्वरम ।
तेन ते श्रावयिष्यामि यत्तद्ब्रह्म सनातनम् ॥ ८३

न शक्यं विस्तरात् कृत्स्नम वक्तुं शर्वस्य केनचित् ।
युगे युगे विभूतीनाम् अपि वर्षशतैरपि ॥ ८४

यस्यादिमध्यगं सूर्यम सुरैरपि न गम्यते ।
कस्तस्य शक्नुयाद्वक्तुम गुणान् कात्स्न्र्येन माधव ॥ ८५

किन्तु देवस्य महतस् सङ्क्षिप्तार्थपदाक्षरम् ।
शक्तितश्चरितं वक्ष्ये प्रसादात् तस्य चैव हि ॥ ८६

1. क-घ—नमद्भि

अप्राप्य हि ततोऽनुज्ञां न शक्यं स्तोतुमीश्वरम ।
यद्यनेनाप्यनुज्ञातस् स्तुवत्येवं सदाशिवम् ॥ ८७

अनादिनिधनस्याहम् हंसयोनेर्महात्मनः ।
नाम्नां किञ्चित् समुद्देशं वक्ष्ये ह्यव्यक्तयोनिनः ॥ ८८

वरदस्य वरेण्यस्य विश्वरूपस्य धीमतः ।
शृणु नामसमुद्देशम् यदुक्तं पद्मयोनिना ॥ ८९

दश नामसहस्राणि यान्याह प्रपितामहः ।
तानि निर्मथ्य मनसा दध्नो घृतमिवोद्धृतम् ॥ ९०

गिरेस्सारं यथा हेम पुष्पात् सारं यथा मधु ।
घृतात् सारं यथा मण्डस् तथैतत् सारमुद्धृतम ॥ ९१

सर्वपाप्मापहमिदं चतुर्वेदसमन्वितम ।
[1]नियमेनाधिगन्तव्यम धार्यं च प्रयतात्मना ॥ ९२

शान्तिकं पौष्टिकं चैव रक्षोघ्नं पावनं महत् ॥ ९२॥

इदं भक्ताय दातव्यम् श्रद्दधानास्तिकाय च ।
नाश्रद्दधानापूजाय नास्तिकायाजितात्मने ॥ ९३॥

यस्त्वभ्यसूयते देवं भूतात्मानं पिनाकिनम् ।
स कृष्ण नरकं याति सह पूर्वैः [2]स्सहानुगैः ॥ ९४॥

इदं ध्यानमिदं योगम इदं ध्येयमनुत्तमम् ।

1. क-घ—प्रयत्नेना 2. क-घ—:पितामहैः

इदं जप्यमिदं ज्ञानम् रहस्यमिदमुत्तमम् ॥ ९५॥
इदं ज्ञात्वाऽन्तकाले तु गच्छोद्धि परमां गतिम् ।
पवित्रं मङ्गलं पुण्यम् कल्याणमिदमुत्तमम् ॥ ९६॥
निगदिष्ये महाबाहो स्तवानामुत्तमं स्तवम् ॥ ९७
इदं ब्रह्मा पुरा ज्ञात्वा सर्वलोकपितामहः ।
सर्वस्तवानां दिव्यानाम् राजत्वे समकल्पयत् ॥ ९८
तदाप्रभृति चैवायम् ईश्वरस्य महात्मनः ।
स्तवराज इति ख्यातो जगत्यमरपूजितः ॥ ९९
ब्रह्मलोकादयं चैव स्तवराजोऽवतारितः ।
यस्मात् तण्डिः पुरा प्राह तेन तण्डिः पितामहः ॥ १००
स्वर्गलोकात्तु भूलोकम् तण्डिना ह्यवतारितः ।
सर्वमङ्गलमाङ्गल्यम सर्वपापप्रणाशनम ॥ १०१
निगदिष्ये महा[1]पुण्यम स्तवानामुत्तमं स्तवम ।
ब्रह्मणो यत् परं ब्रह्म पुराणमपि यत् परम् ॥ १०२
तेजसामपि यत्तेजस् तपसामप्यथो तपः ।
शान्तीनामपि या शान्तिर् द्युतीनामपि या द्युतिः ॥ १०३
दान्तानामपि यो दान्तो ध्यायतामपि योऽवधिः ।
देवानामपि यो देवो मुनीनामपि यो मुनिः ॥ १०४

1. क-ख—भीमं

यज्ञानामपि यो यज्ञश् शिवानामपि यश्शिवः ।
रुद्राणामपि यो रुद्रः प्रभुः प्रभवतामपि ॥ १०५

योगिनामपि यो योगी कारणानां च कारणम् ।
यतो लोकास्सम्भवन्ति न भवन्ति यतः पुनः ॥ १०६

सर्वभूतात्मभूतस्य हरस्यामिततेजसः ।
अष्टोत्तरसहस्रं तु नाम्नां शर्वस्य मे शृणु ॥ १०७

यच्छ्रुत्वा मनुजश्रेष्ठ सर्वान् कामानवाप्स्यसि ॥ १०७॥

॥ शिवसहस्रनामस्तोत्रम् ॥

स्थिरस्स्थाणुः प्रभुर्भानुः प्रवरो वरदो वरः ।
सर्वात्मा सर्वविख्यातस् सर्वकर्मकरो भवः ॥ १०८॥

जटी चर्मी शिखी खड्गी सर्वाङ्गस्सर्वभावनः ।
हरिणो हरिणाक्षश्च सर्वभूतहितः प्रभुः ॥ १०९॥

[1]महारोपो महारूपो महात्रिभुवनेश्वरः ।
सत्यस्सत्याश्रयस्त्रिद्रश् चन्द्रांशुस्सर्पकुण्डलः ॥ ११०॥

वृषश्च वृषरूपश्च वृषस्थो वृषभाक्षगः ।
भीमश्च शितिकण्ठश्च शिवश्चेतश्शिवोत्तमः ॥ १११॥

निषङ्गी शितिकेशश्च दितिपो नीललोहितः ।
शरभश्शङ्कुकर्णश्च विलासो विश्वकर्तृकः ॥ ११२॥

1. अ-ख—इतः द्वाविंशाधिकानि न सन्ति

परः पाशुपतो भद्रो नीलग्रीवो विभीषणः ।
गङ्गाधरः पृथुश्चैव जनेश्वरकुलेश्वरः ॥ ११३॥

उत्तमस्त्रीसहायश्च मधुविन्दो महाग्रहः ।
दिव्यस्सूक्ष्मः परागश्च वीरभद्रो [1]वियन्नगः ॥ ११४॥

शिवश्शम्भुर्भवो भर्ता श्रीकण्ठस्त्रिदशार्चितः ।
कव्यादः कीर्तिमान क्रीडी कालाग्निः कार्यकारणः ॥ ११५॥

अण्डश्च बहिरण्डश्च विराड्भूतो विशेषकृत् ।
हिरण्यगर्भहेतुश्च बहिर्भूतः प्रयोजकः ॥ ११६॥

जाग्रत्स्वप्नसुषुप्तिश्च तमश्च विधूतनः ।
मनोबुद्धिरहङ्कारो व्यक्तान्तःकरणात्मकः ॥ ११७॥

विशदो विक्रमश्चैव विश्वो विश्वस्य सङ्ग्रहः ।
अरूपश्चण्डरूपश्च वज्रहस्तः पुरन्दरः ॥ ११८॥

जातवेदाश्च जागर्ती विश्वायासो विनायकः ।
आजानुर्वैनतेयश्च विश्वकर्मा विचक्षणः ॥ ११९॥

हिरण्याक्षस्सुकेशश्च ऋक्षकक्षनरस्तमः ।
वृषो वृषाङ्को वृषदो वृषपर्वा प्रजाहरः ॥ १२०॥

प्रवृत्तिश्च निवृत्तिश्च नियतश्शाश्वतो ध्रुवः ।
श्मशानचारी भगवान् खचरेशस्सुमर्दनः ॥ १२१॥

1. ख—विपन्नगः

अभिवाद्यो महाकर्मा तपस्वी भूतभावनः ।
उन्मत्तवेषप्रच्छन्नस् सर्वलोकप्रजापतिः ॥ १२२॥

महारूपो महाकायस् सर्वरूपो महायशाः ।
महात्मा सर्वरूपश्च विरूपो वामनो मनुः ॥ १२३॥

लोकपालो गृहीतात्मा प्रसादाभयकृद्विभीः ।
पवित्रश्च महांश्चैव नियमो नियमाश्रयः ॥ १२४॥

सर्वकर्मा स्वयम्भूश्च आदिरादिकरो निधिः ।
सहस्राक्षो विरूपाक्षस् सोमनक्षत्रसाधकः ॥ १२५॥

चन्द्रसूर्यशनिः केतुर् ग्रहो ग्रहपतिर्वरः ।
अत्रिरत्र्यालयः कर्ता मृगबाणार्पणोऽनलः ॥ १२६॥

महातपा दीर्घतपा [1]अदीनो दीनमानसः ।
संवत्सरकरो मन्त्रः प्रमाणं परमं तपः ॥ १२७॥

योगो योग्यो महाबीजो महारेता महातपाः ।
सुवर्णरेतास्सर्वज्ञस् सुबीजो बृषवाहनः ॥ १२८॥

दशबाहुस्त्वनिमिषो नीलकण्ठ उमापतिः ।
विश्वरूपस्स्वयं श्रेष्ठो वर्धितो रोचनो गणः ॥ १२९॥

गणकर्ता गणपतिर् दिग्वासाः काम्य एव च ।
पवित्रं परमं मन्त्रस् सर्व[2]पापहरो हरः ॥ १३०॥

1. क घ—अधीरो धीर 2. अ-ख—भाव

कमण्डलुधरो धन्वी बाणहस्तः प्रतापवान् ।
अशनीशश्शतघ्नीशः खड्गी चापायुधो महान् ॥[200] १३१॥

शिवहस्तस्स्वरूपश्च तेजस्तेजस्करो निधिः ।
उष्णीषी च सुवक्त्रश्च उदग्रो वितनुस्तथा ॥ १३२॥

दीर्घश्च हरिनेत्रश्च सुतीर्थः कृष्ण एव च ।
मृगालरूपस्सर्वार्थो मुण्डः कुण्डी कमण्डलुः ॥ १३३॥

अजश्च मृगरूपश्च गन्ध[1]धारी कपर्द्यपि ।
ऊर्ध्वरेता गजालिङ्गी गजशार्यी नभस्स्थलः ॥ १३४॥

त्रिजटश्चीरवासाश्च रुद्रस्सेनापतिर्विभुः ।
अहश्चरश्च नक्तञ्च तिग्ममन्युस्सुवर्चसः ॥ १३५॥

गजहा दैत्यहा लोको लोकधाता गणाधिपः ।
सिंहशार्दूलरूपश्च रुरुचर्माम्बरच्छदः ॥ १३६॥

कालयोगी महानादस् सर्वावासश्चतुष्पथः ।
निशाचरः प्रेतचारी [2]भूतचारी महेश्वरः ॥ १३७॥

बहुभूतो बहु[3]वनस् सर्वाधारामृतो गतिः ।
नृत्यप्रियो नित्यनृत्तो नर्तकस्सर्वलासकः ॥ १३८॥

---

1. ख—हारी कपर्द्यपि
2. क-घ—यातु
3. क—वरः + मनोगतिः ङ—बहुश्रुतो बहुवरः + मनोगतिः

घोषो महायशाः [1]पाशो नित्यो गिरिचरो नभः ।
सहस्रहस्तो विजयो व्यवसायो ह्यनिन्दितः ॥ १३९॥

अमर्षणो मर्षणात्मा [2]यज्ञभागानुनाशनः ।
दक्षयज्ञापहारी च [3]सुपहो मध्यमस्तथा ॥ १४०॥

तेजोहारी च बलहा मुदितोऽर्थजितावहः ।
गम्भीरघोषो गम्भीरश् श्वेतश्च गिरिवाहनः ॥ १४१॥

न्यग्रोधरूपो न्यग्रोधो वृक्षकर्णस्थितिर्विभुः ।
दीक्षावाहनहर्षश्च सहायः कालधर्मवित् ॥ १४२॥

विष्णुप्रसादितो यज्ञस् समुद्रो वडवामुखः ।
हुताशनसहायश्च प्रशान्तात्मा हुताशनः ॥ १४३॥

उग्रतेजा महातेजा जयो विजयकालवित् । 300
ज्योतिषामयनं सिद्धिस् सन्धिर्विग्रह एव च ॥ १४४॥

शिखी दण्डी जटी बालो मूर्तिजो दुर्धरो बली ।
वैणवी पणवी तालो कालः कालकटङ्कटः ॥ १४५॥

नक्षत्रविग्रहविधिर् गुणवृद्धिर्लयोऽगमः ।
प्रजापतिर्दिशाबाहुर् दिग्वासास्सर्वतोमुखः ॥ १४६॥

विमोचनस्सुरगणो हिरण्यकवचोद्भवः ।

---

1. क-घ—पारो निरयो निचरो नभः
2. क-घ—यज्ञहा कामनाशनः 3. क-घ—ऋषभो

[1]मेघजो बलवारी च महीचारस्तुतस्तथा ॥ १४७॥
सर्वतूर्यानुनादीशस् सर्वविद्यापरिग्रहः ।
व्यालरूपो बिलावासी हेममाली तरङ्गवित् ॥ १४८॥
त्रिदशस्त्रिदशाध्यक्षो ममतावन्धमोचकः ।
बन्धनस्त्वसुरेन्द्राणां युधि शत्रुविनाशनः ॥ १४९॥
साङ्ग्यप्रसादो दुर्वासास् सर्वसाधुनिषेवितः ।
प्रस्कन्दनो विशाखश्च अतुल्यो यज्ञभागवित् ॥ १५०॥
सर्ववासस्सर्वचारी दुर्वासा वासवोपमः ।
हैमो हेमकरी यज्ञस् सर्वधारी धरोत्तमः ॥ १५१॥
रोहिताक्षो महाक्षश्च विजयाक्षो विशारदः ।
सङ्ग्रहो विग्रहः कर्म सर्व[2]चर्मनिवासकः ॥ १५२॥
[3]मुक्तश्च मुक्तदेहश्च देहारिस्सर्वकामदः ।
सर्वकामप्रसादश्च सुबालो बालरूपधृक् ॥ १५३॥
[4]आकाशनिर्विरूपश्च निपानिरुरगः खगः ।
रौद्ररूपांशुरादित्यो वसुरश्मिस्सुवर्चसः ॥ १५४॥
बहुवेगो महावेगो मनोवेगो निशाचरः ।
सर्वावासश्चिश्रयावासी अपदेशकरो हरः ॥ १५५॥

---

1. घ—नास्तीदमर्धम्
2. घ—धर्म
3. अ—अमुक्तो
4. क-घ—आकाशो

मुनिरात्ममतिर्लोकस् सभोज्यश्च सहस्रभुक् ।
पक्षी च पक्षिरूपी च अतिदीप्तो विशां पतिः ॥ १५६॥

उन्मादमदनाकार अर्थार्थी कररोमशः ।
वामदेवश्च वामश्च प्राग्दक्षिणश्च वामनः ॥[400] १५७॥

सिद्धयोगोपचारी च सिद्धस्सर्वार्थसाधकः ।
भिक्षुश्च भिक्षुरूपी च नृपाणिर्नृपरोऽव्ययः ॥ १५८॥

महासेनो विशाखश्च [1]षष्टिभोगो गवांपतिः ।
[2]शूलहस्तो वेदहस्तश् चक्रस्तम्भन एव च ॥ १५९॥

ऋषी ऋतुक्रमस्तेनो मधुर्मधुकरो मनः ।
वाचस्पत्यो वाजसनो नित्यमाश्रमपूजितः ॥ १६०॥

ब्रह्मचारी लोकचारी सर्वचारी सुचारविन् ।
ईशान ईश्वरः कालो निशाचारी ह्यनेकधृक् ॥ १६१॥

नन्दीश्वरी च नन्दी च नन्दनो मन्त्रवर्धनः ।
भगवानरिहन्ता च कालो ब्रह्मा पितामहः ॥ १६२॥

चतुर्मुखो महालिङ्ग ऊर्ध्वलिङ्गो लयोऽलयः ॥
लिङ्गाध्यक्षस्सुराध्यक्षो लोकाध्यक्षो युगावहः ॥ १६३॥

बीजाध्यक्षो बीजकर्ता अध्यात्मानुगतोऽमलः ।
इतिहासकर्ता कल्पश्च तमोहा जगदीश्वरः ॥ १६४॥

1. क-घ—भागो 2. क-घ—पञ्चदशार्धानि न सन्ति

दम्भो दम्भकरोऽदम्भो वश्यो वशकरः कविः ।
लोककर्ता पशुपतिर् लोकहर्ता ह्यधोक्षजः ॥ १६५॥

अक्षरं परमं ब्रह्म बलवाञ् शक्र एव च ।
नीतिर्ह्यनीतिर्द्वन्द्वात्मा [1]शुद्धात्मानो मनोगतिः ॥ १६६॥

बुद्धिः प्रसाद[2]स्तपनो दर्पणोऽथाप्यमित्रजित् ॥ १६७

वेदकारस्सूत्रकारो विद्वांश्च परमर्दनः ।
महामेघनिनादश्च महामेघवशङ्करी ॥ १६८

अग्निज्वालो महाज्वालो अतिधूमोद्गतायनः ।
वृषणश्शङ्करनित्यश्च वर्चस्वी धूमकेतनः ॥ १६९

नीलस्तडधश्च लुडधश्च शोभनो निरवग्रहः । 500
स्वस्तिदस्स्वस्तिभावश्च भागी भागकरो लघुः ॥ १७०

उत्सङ्गश्च महाङ्गश्च महागर्भः परो युवा ।
कृष्णवर्णस्सुवर्णश्च इन्द्रियस्सर्व[3]प्राणदः ॥ १७१

महापादो महाहस्तो महाकायो महायशाः ।
महामूर्धा महामात्रो महानेत्रो [4]निशालयः ॥ १७२

महादन्तो महाकर्णो महादंष्ट्रो महाहनुः ।
महानासो महाकम्बुर् महाग्रीवः पिनाकधृक् ॥ १७३

---

1. क-ख—युध्यमानो ख—शुद्धमान्यो
2. क-ख—स्वपनो 3. अ—जोवदः
4 ख—ऽनिलाशयः घ—निधालयः

महावक्षा महोरस्क अन्तरात्माऽसृगालयः ।
महाकटिर्महाग्रीवो महाबाहुर्महा[1]भगः ॥ १७४
लम्बमानो लम्बितोष्ठश् चलद्वामी यशोनिधिः ।
महादन्तो महादंष्ट्रो महाजिह्वो महामुखः ॥ १७५
महानखो महारोमा महाकेशो महाजटः ।
असम्पन्नः प्रसादश्च प्रौढयोनि[2]रसायकः ॥ १७६
[3]स्नेहनोऽस्नेहनश्चैव अजितश्च महामुनिः ।
वृक्षाकारो वृक्षकेतुर् अनलो वायुवाहनः ॥ १७७
मण्डली मेरुधामा च देवदानवदर्पहा ।
अथर्वशीर्षस्सामास्य ऋक्सहस्राञ्चितेक्षणः ॥ १७८
[4]यजुर्वेदभुजो गुह्यः प्रकाशो जङ्गमस्तथा ।
अमोघार्थः प्रसादश्च अभिगम्यस्सुदर्शनः ॥ १७९
उपहारप्रियस्सर्वः कनकः काञ्चनच्छदः ।
नदीनदीकरोऽतप्यः पुष्प[5]रात पतिण्डितः ॥ १८०
द्वापरश्च कलिः कालो घृणी वज्रसमाहितः ।
अगुणो गुणकार्यश्च भूतभावनसारथिः ॥ १८१

1. ख—भैकः 2. ख-घ—रसाधकः
3. अ—इदमर्धं नास्ति 4. क-घ—यज्ञवाद
5. क—रातापतण्डितः ख— रातः पतण्डितः घ—कातापदण्डितः

भस्मशायी भस्मगोप्ता भस्मरूपस्तटिद्गुणः ।
सगुणश्चैव लोपश्च महात्मा मन्त्रपूजितः ॥ १८२

शङ्कुस्त्रिशङ्कुस्सम्पन्नश् शुचिर्भूतनिषेवितः । 600
आश्रमस्थः कपोलस्थो विश्वकर्मपतिर्वरः ॥ १८३

शाखो विशाखस्ताम्रोष्ठस् तरुकालस्सुनिश्चलः ।
कपिलोऽकपिलश्शूर आयुश्चैव परावरः ॥ १८४

गन्धर्वो [1]दितिजस्ताक्ष्यो विज्ञेयस्सुरसारथिः ।
[2]परश्वथायुधो देवो ह्यर्थकारी सुबान्धवः ॥ १८५

जह्नुर्वीणो महाक्षेप ऊर्ध्वरेता जलेश्वरः ।
अजैकपात् कपाली च त्रिशङ्कुरजितश्शिवः ॥ १८६

धन्वन्तरिर्धूमकेतुस् स्कन्दो वैश्रवणो यमः ।
धाता शक्रश्च विष्णुश्च मित्रस्त्वष्टा ध्रुवोऽध्रुवः ॥ १८७

प्रभावस्सर्वगो वायुर् अर्यमा सविता रविः ।
उदग्रश्च विधाता च मान्धाता भूतभावनः ॥ १८८

भवस्तीर्थश्च वाग्मी च सर्वकामगुणावहः ।
पद्मवक्त्रो महावक्त्रश् चन्द्रवक्त्रो मनोऽनघः ॥ १८९

बलवांश्चैव [3]शान्तश्च पुराणः पुण्यसञ्चरी ।

---

1. क-ब—ह्यदिति
2. अ-ख—अर्धद्वयं नास्ति
3. अ-क—शास्ता च
ख—शान्तिश्च

क्रूरकर्ता कालरूपो क्रूरभूतमहेश्वरः ॥ १९०

सर्वाशनस्सर्वशायी सर्वेषां प्राणिनां गतिः ।
देवो देवमुखो[1]भर्ता [2]सदसत्सर्वरत्नवित् ॥ १९१

कैलासशिखरावासी हिमवद्गिरिसंश्रयः ।
कूलहारी [3]च कर्ता च बहुयज्ञो बहुप्रदः ॥ १९२

वणिजो वर्धनो वृक्षो नकुलश्चन्दनच्छदः ।
दशग्रीवो महाजत्रुस् सु[4]लभश्च महोषधिः ॥ १९३

सिद्धार्थकारी सिद्धार्थश् छन्दो व्याकरणान्तरः ।
सिंहनादस्सिंहदंष्ट्रस् सिंहकृत् सिंहवाहनः ॥ १९४

प्रभवात्मा जगत्पालो बालो लोकपितामहः । 700
सारङ्गो [5]वरवक्त्राङ्गः केतुमाली स्वभावनः ॥ १९५

भूतशब्दो भूतपतिर् अहोरात्रमचिन्तनः ॥ १९५॥

हिरण्यवासास्स विभुर् गुहावासः प्रवेशितः ।
प्रतिष्ठाधिर्महाहर्षो जितकामो जितेन्द्रियः ॥ १९६॥

गोधारश्च सुरालश्च पतिः कामी रतिर्धनः ।
महाशितो महानृत्तो ह्यप्सरोगणसेवितः ॥ १९७॥

---

1. अ-ख—भक्तस् 2. घ—सदसस्सर्वयज्ञवत्
3. अ—कूलकर्ता ख—कुलः कर्ता
4. अ-ख—लोहश्च महोदधिः 5. अ-ख—मधु

महाकेतुर्धनुर्धाता नैकतानुचराचरः ।
आवेदनीय आवेशस् सर्वगन्धर्वतापहः ॥ १९८॥

तरणस्तारणो वायुः परिधानश्च नैर्ऋतिः ।
संयोगो वर्धनो वृद्धो महावृद्धो गणाधिपः ॥ १९९॥

धन्यो धर्मसहायश्च वेदेश्वरपतिः पतिः ।
मुक्तश्च मुक्तवाहश्च द्विविधश्च सुपर्वणः ॥ २००॥

आषाढश्च महाषाढो ध्रुवो हरिहरो हरः ।
वपुरावर्तमानी च सवशेष्टमहापथः ॥ २०१॥

शिरोहारी नृशंसी च सर्वलक्षणभूषितः ।
अक्षरश्च क्षरो योगी सर्वयोगो महाबलः ॥ २०२॥

समहूयस्समाम्नायस् तीर्थ[1]वेदमहाद्युतिः ।
निर्जीवो जीवनो मन्त्रो ह्यभिध्यो बहुकर्कशः ॥ २०३॥

रत्नभूतोऽथ रत्नाङ्गो महार्णवनिनादवित् ।
मूलो विशाखोऽत्य[2]मृतो व्यक्ताव्यक्तभवो निधिः ॥ २०४॥

आरोहणोऽनिरोहश्च शैलहारी महातपाः ।
सेनाकल्पो महाकल्पो युगो हरिहरो हरः ॥ २०५॥

युगरूपो महारूपो वनानां गहनो नगः ।
न्यायो निर्वापणः पादः पण्डितो ह्यचलो यमः ॥ २०६॥

1. अ—वेदो महामति· 2. क-घ—नृतो

बाहुमालो महामालस् सुमालो बहुलोचनः । 800
विस्तारो लवणः क्षूरश् शुक्रमस्तफलोदनः ॥ २०७॥

वृषभो वृषभारूढः फणी बिल्वजटाधरः ।
इन्दुर्विसर्गस्सुमुखो [1]दूरस्थः परदुस्सहः ॥ २०८॥

निर्वेदनस्सुधन्वा च सुगान्धारो महद्धनुः ।
गन्धमाली च भगवान् प्रस्थानस्सर्वकर्मणाम् ॥ २०९॥

पन्थानो बहुलो बाहुस् सकलस्सर्वलोचनः ।
नमस्ताली चिरस्ताली ऊर्ध्वसंवहनो वहः ॥ २१०॥

चित्रपुत्रस्स विख्यातस् सर्वलोकाश्रयोऽतनुः ।
मुण्डो विरूपो विकृतो डिण्डिश्चन्द्रो विकुर्वणः ॥ २११॥

[2]हर्यक्षः ककुभो वृक्षो दीर्घजिह्वस्सहस्रपात् ।
सहस्रमूर्धा विप्रेन्द्रस् सर्वभूतमयो गुरुः ॥ २१२॥

सहस्रबाहुस्सर्वाङ्गश् [3]शरण्यस्सर्वलोककृत् ।
पवित्रस्तु मधुर्मन्त्रो निविष्टः कृष्णपिङ्गलः ॥ २१३॥

ब्रह्मदण्डविनिर्दान्तश् शतघ्नीशतपर्वधृक् ।
पद्मगर्भो महागर्भो ब्रह्मगर्भो जलोद्भवः ॥ २१४॥

गतश्रीर्ब्रह्मकृद्ब्रह्म ब्रह्मविद्ब्राह्मणो गतिः ।

1. क-घ—शूरस्तु धनदस्सखा 2. क-घ—भयाक्षः
3. क-घ—हतश्चत्वारः पादा न सन्ति

अनन्तभूतो नैकात्मा वातरंहा मनोजवः ॥ २१५॥

चन्दनी पद्ममालाढ्यस् स्थाणुस्संहरणो भवः ।
उमापतिरुमाकान्तो जाह्नवीधृग्दिगम्बरः ॥ २१६॥

वरो वरार्हो वरदो वरेशस्सुमहासुरः ।
महाप्रभावस्त्रितयश् शत्रुभ्यश्चेतपिङ्गलः ॥ २१७॥

भूतात्मा प्रयतात्मा च संयतात्मा प्रधानधृक् ।
सर्वभास्वस्तरुस्तारो धर्मसाधारणो वरः ॥ २१८॥

चराचरात्मा सूक्ष्मात्मा सुवृषो गोवृषेश्वरः । 900
साध्यर्षिर्वसुरादित्यो विवस्वान् सुमहाबलः ॥ २१९॥

व्यासस्सर्वस्सुसङ्क्षेपो विस्तरः पर्ययो नयः ।
ऋतुस्संवत्सरो मासः पक्षस्सङ्ख्यासमागतः ॥ २२०॥

कला काष्ठा लवो मात्रा मुहूर्ताहःक्षपाः क्षणः ।
विश्वक्षेत्रं प्रजाबीजं लिङ्गमाद्यस्त्वनिन्दितः ॥ २२१॥

सदसद्व्यक्तमव्यक्तः पिता माता पितामहः ।
स्वर्गद्वारं प्रजाद्वारं मोक्षद्वारं त्रिविष्टपम् ॥ २२२॥

निर्वाणं ह्लादनश्चैव ब्रह्मलोकः परा गतिः ।
देवासुरविनिर्माता देवासुरपरायणः ॥ २२३॥

देवासुरगुरुर्देवो देवासुरनमस्कृतः ।
देवासुरमहात्मा च देवासुरमहाश्रयः ॥ २२४॥

देवासुरगणाध्यक्षो देवासुरगणाग्रणीः ।
देवादिदेवो देवर्षिर् देवासुरवरप्रदः ॥ २२५॥

देवासुरवरो देवो देवासुरमहेश्वरः ।
सर्वदेवमयोऽचिन्त्यो देवतात्माऽऽत्मसम्भवः ॥ २२६॥

उद्भिज्जस्त्रिक्रमो वैद्यो विरजो विरजेश्वरः ।
उग्रो हस्तिमुखो व्याघ्रो हस्तिसिंहो नरर्षभः ॥ २२७॥

विबुधाग्रचरश्रेष्ठस् सर्वदेवोत्तमोत्तमः ।
[1]गुरुकान्तो जितस्वर्गः पवित्रं सर्ववाहनः ॥ २२८॥

प्रवृत्तिशोभनो वृत्त ईशानः प्रभुरव्ययः ।
शृङ्गी शृङ्गप्रियो वभ्रू राजराजो निरामयः ॥ २२९॥

आपत्सहायो [2]वीरोऽपि श्रीरामस्सर्वसाधनः ।
ललाटाक्षो विश्वरेता हरिणो ब्रह्मवर्चसः ॥ २३०॥

स्थावराणां पतिश्चैव नियमेन्द्रियवर्धनः ।
निधार्यस्सर्वभूतादिः [3]भृत्यस्सत्यव्रतश्शुचिः ॥[1000] २३१॥

व्रताधिपः परं ब्रह्म मुक्तानां परमा गतिः ।
विमुक्तो दीप्ततेजाश्च श्रीमाञ् श्रीवर्धनो गजः ॥[1008] २३२॥

॥ इति शिवसहस्रनाम स्तोत्रं सम्पूर्णम् ॥

---

1. अ—गुह्यः कान्तो
2. ख—धीरोऽपि
3. क-घ—नित्यः

यथाप्रसादो भगवान् इति भक्त्या स्तुतो मया ॥ २३३
यतो ब्रह्मादयो देवा विदुर्यं न महर्षयः ।
तं स्तव्यमर्च्यं वन्द्यं च कस्स्तोष्यति जगत्पतिम् ॥ २३४
भक्तिं त्वेवं पुरस्कृत्य मया यज्ञपतिर्वसुः ।
ततोऽभ्यनुज्ञां प्राप्यैव स्तुतोत्पत्तिमतां गतिः ॥ २३५
शिवमेवं स्तुवन् देवं नामभिः पुष्टिवर्धनम् ।
नित्ययुक्तश्शुचिर्भूत्वा प्राप्नोति पतिमात्मनः ॥ २३६
एतद्धि परमं ब्रह्म स्वयं गीतं स्वयम्भुवा ।
ऋषयश्चैव देवाश्च स्तुवन्त्येतं च तत्परम् ॥ २३७
स्तूयमानो महादेवः प्रीयते चात्मनामभिः ।
भक्तानुकम्पी भगवान् आत्मसंस्थं करोति तम् ॥ २३८
तथैव च मनुष्येषु ये मनुष्याः प्रधानतः ।
आस्तिकाश्श्रद्दधानाश्च बहुभिर्जन्मभिस्तथा ॥ २३९
जाग्रतो ये स्वपन्तश्च व्रजन्तोऽपि शिवं स्थिताः ।
स्तुवन्ति च स्तूयमाने तुष्यन्ति च रमन्ति च ॥ २४०
जन्मकोटिसहस्रेषु नानासंसारयोनिषु ।
जन्तोर्विशुद्धपापस्य भवे भक्तिः प्रजायते ॥ २४१
उत्पन्ना च शिवे भक्तिर् अनन्या सर्वभावतः ।
कारणं भावितं तस्य सर्वमुक्तस्य सर्वतः ॥ २४२

एतद्देवेषु दुष्प्रापं मनुष्येषु न लभ्यते ।
निर्विघ्ना निश्चला रुद्रे भक्तिरव्यभिचारिणी ॥ २४३

तस्यैव च प्रसादेन भक्तिरुत्पद्यते नृणाम् ।
यथा यान्ति परां सिद्धिम् तद्भावेन [1]सुचेतसः ॥ २४४

[2]ये सर्वभावेन गता भवत्वेनाभवन्नराः ।
प्रपन्नवत्सलो देवस् संसारात्तान् समुद्धरेत् ॥ २४५

एवमन्ये न कुर्वन्ति देवास्संसारमोचनम् ।
मनुष्याणां महादेवाद् अन्यत्रापि तपोबलम् ॥ २४६

इति तेनेन्द्रकल्पेन भगवान् सदसत्पतिः ।
कृत्तिवासास्तुतः कृष्ण तण्डिना शुद्धबुद्धिना ॥ २४७

स्तवमेतद्ततो ब्रह्मा स्वयमाराधयन् प्रजाः ।
ब्रह्मोवाच च शक्राय शक्रः प्रोवाच मृत्यवे ॥ २४८

मृत्युः प्रोवाच रुद्राणां रुद्रात्तण्डिरथालभत् ।
महादेवप्रसादात्तु तण्डिना ब्रह्मसद्मनि ॥ २४९

तण्डिः प्रोवाच शुक्राय योगेश्वरमयाय च ।
वैवस्वताय मनवे गौतमः प्राह साधनः ॥ २५०

---

1. क-ख-घ—विचेतसः
2. क—यैः सर्वभावोपहता
ख—ये सर्वभावोपगता
घ—यैः सर्वपापोपहता

नारायणाय साध्याय मनुबिष्टाय धीमते ।
यमाय प्राह भगवान् साध्यो नारायणोऽच्युतः ॥ २५१

नाचिकेताय भगवान् आह वैवस्वतो यमः ।
मार्कण्डेयाय भगवान् नाचिकेतोऽभ्यभाषत ॥ २५२

मार्कण्डेयान्मया प्राप्तम् नियमेन जनार्दन ।
तवाप्यहममित्रघ्न स्तवं तं देवविश्रुतम् ॥ २५३

स्वर्ग्यमारोग्यमायुष्यम् धन्यं बल्यं तथैव च ॥ २५३॥

न चास्य विघ्नं कुर्वन्ति दानवा यक्षराक्षसाः ।
सयातुधाना भूताश्च गुह्यका भुजगास्तथा ॥ २५४॥

यः पठन् स शुचिर्भूत्वा ब्रह्मचारी जितेन्द्रियः ।
अभयं योगसिद्धिं च सोऽश्वमेधमवाप्नुयात् ॥ २५५॥

इति श्रीमहाभारते शतसाहस्र्यां संहितायां वैयासिक्यां
अनुशासनपर्वणि त्रयोविंशोऽध्यायः ॥ २३ ॥
॥ ८९ ॥ आनुशासनिकपर्वणि त्रयोविंशोऽध्यायः ॥ २३ ॥
[अस्मिन्नध्याये २५५॥ श्लोकाः]

॥ चतुर्विंशोऽध्यायः ॥

वैशम्पायनेन जनमेजयं प्रति द्वैपायनादिभिर्युधिष्ठिरं प्रत्युक्तमहादेव-महिमानुवादः ॥

वैशम्पायनः—

महायोगी सुतं प्राह कृष्णद्वैपायनो मुनिः ।

कृष्णद्वैपायनः—

पठस्व पुत्र भद्रं ते प्रीयतां ते महेश्वरः ॥ १

पुरा पुत्र मया मेरौ तप्यता परमं तपः ।
पुत्रहेतोर्महाराज स्तव एषोऽनुकीर्तितः ॥ २

लब्धवानस्मि तं कामं ततोऽहं पाण्डुनन्दन ।
तथा त्वमपि शर्वाद्धि सर्वान् कामानवाप्स्यसि ॥ ३

वैशम्पायनः—

चतुरर्शीर्पस्ततः प्राह शक्रस्य दयितस्सखा ।
नालम्पावन इत्येवं विश्रुतः करुणात्मकः ॥ ४

नालम्पावनः—

मया गोकर्णमासाद्य तपस्तप्त्वा शतं समाः ।
अयोनिजानां दान्तानां धर्मज्ञानां सुवर्चसाम् ॥ ५

अजराणामदुःखानां शतवर्षसहस्रिणाम् ।
लब्धं पुत्रशतं शर्वात् पुरा पाण्डुनृपात्मज ॥ ६

वैशम्पायनः—

वाल्मीकिश्चापि भगवान् युधिष्ठिरमभाषत ॥ ६॥

[1]विवादे साग्नि मुनिभिर् ब्रह्मघ्नो वै भवानिति ।
उक्तः क्षणेन चाविष्टस् तेनाधर्मेण भारत ॥ ७॥

वाल्मीकिः—

सोऽहमीशानमनघम् अस्तौषं शरणं गतः ॥ ८

मुक्तश्चास्म्यवशः पापात् ततो दुःखविनाशनः ।
आह मां त्रिपुरघ्नो वै यशस्तेऽद्य भविष्यति ॥ ९

वैशम्पायनः—

जामदग्न्योऽथ कौन्तेयम् आह धर्मभृतां वरः ।
ऋषिमध्ये स्थितस्तात तपन्निव विभावसुः ॥ १०

जामदग्न्यः—

पुरा क्षत्रवधेनाहम् आर्तो वै पाण्डवाग्रहात् ।
शुचिर्भूत्वा महादेवं गतवाञ् शरणं नृप ॥ ११

नामभिश्चास्तुवं देवं ततस्तुष्टोऽभवद्भवः ।
परशुं च ददौ देवो दिव्यान्यस्त्राणि चैव हि ॥ १२

पापं तेऽद्य न भविता ते जयश्च भविष्यति ।
न ते प्रभविता मृत्युर् यशस्वी च भविष्यसि ॥ १३

आह मां भगवान् देवश् शिखण्डी शिवविग्रहः ।

---

1. क-ख—अर्धद्वयं नास्ति

यदवाप्तं च मे सर्वम् प्रसादात्तस्य धीमतः ॥ १४

वैशम्पायनः—

असितो देवलश्चैव प्राह पाण्डुसुतं नृपम् ॥ १४॥

असितोदेवलः—

शापाच्छक्रस्य कौन्तेय गतो धर्मो महद्यशः ।
तन्मे धर्मं यशश्चाग्र्यम् आयुश्चैवाददद्भवः ॥ १५॥

वैशम्पायनः—

ऋषिर्गृत्समदो नाम शक्रस्य दयितस्सखा ।
प्राहाजमीढं भगवान् बृहस्पतिसमद्युतिः ॥ १६॥
[1]वरिष्ठो नाम भगवांश् चाक्षुपस्य मनोस्सुतः ।
शतक्रतोरचिन्त्यस्य सत्रे वर्षसहस्रिके ॥ १७॥
वर्तमानेऽब्रवीद्वाक्यं साग्नि ह्युच्चारिते मया ॥ १८

वरिष्ठः—

रथन्तरे द्विजश्रेष्ठ न सम्यगनुवर्तते ॥ १८॥
समीक्षस्व पुनर्बुद्ध्या हर्षं त्याज्य द्विजोत्तम ।
प्रज्ञया रहितः पापम् अकार्षीस्त्वं सुदुर्मते ॥ १९॥

वैशम्पायनः—

एवमुक्तो महाक्रोधः प्राह शक्रः पुनर्वचः ॥ २०

---

1. अ—१७॥ श्लोकादारभ्य ५७ श्लोकपर्यन्तं अ—कोश एवास्ति

शक्रः—

प्रज्ञया रहितो दुःखी नित्यं भीतो वनेचरः ॥ २०॥

दशवर्षसहस्राणि शतानि दश चाष्ट च ।
नष्टपानीययवसे मृगैरन्यैश्च वर्जिते ॥ २१॥

अयज्ञीयद्रुमे देशे रुरुसिंहनिषेविते ।
भविता त्वं मृगः क्रूरो महादुःखसमन्वितः ॥ २२॥

वरिष्ठः—

तस्य वाक्यस्य निधने पार्थ जातो ह्यहं मृगः ।
ततो मां शरणं प्राप्तं प्राह योगी महेश्वरः ॥ २३॥

श्रीमहादेवः—

अजरश्चामरश्चैव भविता दुःखवर्जितः ।
सौम्यत्वमस्तु ते सौम्य युवयोर्वर्धतां ऋतुः ॥ २४॥

वरिष्ठः—

अनुग्रहानेवमेष करोति भगवान् विभुः ।
अयं धाता विधाता च सुखदुःखे च सर्वदा ॥ २५॥

अचिन्त्य एष भगवान् कर्मणा मनसा गिरा ॥ २६

जैगीषव्यः—

ममाष्टगुणमैश्वर्यं मनोयज्ञेन तोषितः ।
यत्नेनाल्पेन च विना दत्तवान् भगवान् पुरा ॥ २७

वैशम्पायनः—

पराशरश्चाह मुनिः पुरा मम च तोषितः ।
महातपा महातेजा महायोगी महायशाः ॥ २८
वेदावासः क्रियावासो ब्रह्मण्यः करुणामयः ॥ २८॥

पराशरः—

अपि नामेप्सितः पुत्रो मम स्याद्वै महेश्वरात् ॥ २९
तमभिज्ञाय मामाह शङ्करस्त्रिपुरार्दनः ।
पितृकन्या वसोः पुत्री शापाद्दाशगृहोषिता ॥ ३०
तस्यां हि दुष्कृतानां च विद्यया शोधकस्सुतः ।
वेदानां च स वै कर्ता कुरुवंशकरस्तथा ॥ ३१
इतिहासस्य कर्ता च पुत्रस्ते जगतो हितः ।
भविष्यतीति मामुक्त्वा तत्रैवान्तरधीयत ॥ ३२

वैशम्पायनः—

माण्डव्यश्चाह देवे च भक्तो लोकहितो भवे ॥ ३२॥

माण्डव्यः—

अचोरश्चोरशङ्कायां शूलभिन्नो ह्यहं सदा ॥ ३३
तत्रस्थेन स्तुतो देवः प्राह मां वै महेश्वरः ।

श्रीमहादेवः—

मोक्षं प्राप्स्यसि शूलाग्राद् भविष्यसि समाऽयुतम् ॥ ३४
रुजा शूलकृता चैव न ते विप्र भविष्यति ।
आधिभिर्व्याधिभिश्चैव वर्जितस्त्वं भविष्यसि ॥ ३५

अमर्षं समलङ्कर्तुं शक्तो निर्विघ्नधर्मभाक् ।
तीर्थाभिषेकं सकलं त्वमविघ्नेन चाप्स्यसि ॥ ३६
स्वर्गं चैवाक्षयं विप्र विदधामि तवोर्जितम् ॥ ३६॥

माण्डव्यः—

एवमुक्त्वा स भगवान् वरेण्यो वृषवाहनः ।
महेश्वरो महाराज कृत्तिवासा महाद्युतिः ॥ ३७॥
सगणो देवताश्रेष्ठस् तत्रैवान्तरधीयत ॥ ३८

गालवः—

विश्वामित्राभ्यनुज्ञातो ह्यहं पितरमागतः ।
अब्रवीन्मां ततो माता दृष्ट्वाऽस्मत्पितरं मृतम् ॥ ३९

गालवमाता—

कौशिकेनाभ्यनुज्ञातं पुत्रं वेदविभूषितम् ।
न तात तरुणं दान्तं पिता त्वां पश्यतेऽनघ ॥ ४०

गालवः—

श्रुत्वा जनन्या वचनं शोकाच्छ्वमतोपयम् ।
नियतात्मा महादेवम् अपश्यं सोऽब्रवीच्च माम् ॥ ४१

श्रीमहादेवः—

पिता माता च ते त्वं च पुत्र मृत्युविवर्जिताः ।
भविष्यथ वशं क्षिप्रं द्रष्टासि पितरं क्षये ॥ ४२

गालवः—

अनुज्ञातो भगवता गृहं गत्वा युधिष्ठिर ।
अपश्यं पितरं तात इष्टिं कृत्वा विनिस्सृतम् ॥ ४३

स जीवितश्च मां प्राह पिता साश्राविलेक्षणः ।
प्रणमन्तं परिष्वज्य मूर्ध्नि चाघ्राय पाण्डव ॥ ४४

गालवपिता—
दिष्ट्या दृष्टोऽसि मे पुत्र कृतविद्य इवागतः ॥ ४४॥

वैशम्पायनः—
एतान्यत्यद्भुतान्येव कर्माण्यथ महात्मनः ।
प्रोक्तानि मुनिभिश्श्रुत्वा विस्मयामास पाण्डवः ॥ ४५॥

ततः कृष्णोऽब्रवीद्वाक्यं पुनर्मतिमतां वरः ।
युधिष्ठिरं धर्मनित्यं पुरुहूतमिवेश्वरः ॥ ४६॥

श्रीभगवान्—
आदित्यचन्द्रावनिलानलौ च
द्यौर्भूमिरापो वसवश्च विश्वे ।
धाताऽर्यमा शुक्रबृहस्पती च
रुद्रास्साध्या वरुणो विश्वगोप्ता ॥ ४७॥

ब्रह्मा शक्रो मारुतो ब्रह्म सत्यं
वेदा यज्ञा दक्षिणा यज्ञवाहः ।
सोमो यष्टा यच्च हव्यं हविश्च
रक्षा दीक्षा नियमा ये च केचित् ॥ ४८॥

स्वाहा वेदा ब्राह्मणास्सौरभेयी
धर्म्यं चक्रं कालचक्रं परं च ।

यशो दमो भूतिमतिस्तितिक्षा
शुभाशुभं मुनयो ये च सप्त ॥ ४९॥

अद्भ्या सिद्धिर्मनसो दर्शने च
स्वार्थोऽसिद्धिः कर्मणा या च सिद्धिः ।
गणा देवानामूष्मपास्सोमपाश्च
रेखास्सुयामास्तुषिता ब्रह्मकायाः ॥ ५०॥

अभास्वरा गन्धपा वृष्टिपाश्च
वाचो विरुद्धाश्च मनोविरुद्धाः ।
शुद्धाश्च निर्वाणतराश्च देवास्
स्पर्शाशना दर्शपा आज्यपाश्च ॥ ५१॥

चितागता ये च देवेषु मुख्या
या चाप्यन्या देवता आजमीढ ।
सुपर्णगन्धर्वपिशाचदानवा
यक्षास्तथा पन्नगचारणाश्च ॥ ५२॥

सूक्ष्मं स्थूलं मृदु चातिसूक्ष्मं
सुखं दुःखं सुखदुःखान्तरं च ।
सौख्यं योगो यत् पराणां परं च
सर्वाज्ज्ञातं विद्धि यत् कीर्तितं मे ॥ ५३॥

तत्सम्भूता भूतभूता वरेण्याः
पूर्वे देवा भुवनस्यास्य गोपाः ।
आविश्येमां धरणीं ये ह्यरक्षन्
पुरातनास्तस्य देवस्य सृष्टिम् ॥ ५४॥

तं वै प्रभुं मनसा तोषयामि
किन्तेत्वन्त प्राणहेतोर्नतास्म (?)।
ददातु देवस्स वरानिहेष्टान्
अभिष्टुतो यः प्रभुरव्ययस्सदा ॥ ५५॥

इमं स्तवं सन्नियम्येन्द्रियाणि
शुचिर्भूत्वा यः पुरुषः पठेत ।
अभग्नयोगो नियतस्त्वङ्दमेकं
सम्प्राप्नुयादश्वमेधे फलं यत् ॥ ५६॥

वेदान् कृत्स्नान् ब्राह्मणः प्राप्नुयात्तु
जयेद्राजा पृथिवीं प्राप्य कृत्स्नाम् ।
वैश्यो लाभं प्राप्नुयाद्वै धनं च
शूद्रो यथा प्रेत्य गतिं च राजन् ॥ ५७॥

स्तवराजमिमं भक्त्या रुद्रस्य च महात्मनः ।
सर्वदोषापहं पुण्यम् [1]श्रृणुयाच्छ्रावयेत वा ॥ ५८॥

1. क-ख—पवित्रं च यशस्करम्

यावन्त्यस्य शरीरेषु रोमकूपाणि भारत ।
तावद् वर्षसहस्राणि स्वर्गे वसति मानवः ॥ ५९॥

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां
अनुशासनपर्वणि चतुर्विंशोऽध्यायः ॥ २४ ॥
॥ ८९ ॥ आनुशासनिकपर्वणि चतुर्विंशोऽध्यायः ॥ २४ ॥
[अस्मिन्नध्याये ५९॥ श्लोकाः]

॥ पञ्चविंशोऽध्यायः ॥

भीष्मेण युधिष्ठिरं प्रति स्त्रीस्वभावप्रदर्शनाय दृष्टान्ततयाऽष्टावक्रीयाख्यानकथनारम्भः ॥ १ ॥ अष्टावक्रेण भार्यात्वाय वदान्यं प्रति कन्यायाचनम् ॥ २ ॥ तथा वदान्यनियोगादुत्तरदिगन्तगमनम् ॥ ३ ॥ तथोत्तरदिगभिमानिन्या जरतीरूपधारिण्या संवादः ॥ ४ ॥

युधिष्ठिरः—

यदिदं सहधर्मेति प्रोच्यते भरतर्षभ ।
पाणिग्रहणकाले तु स्त्रीणामेतत् कथं स्मृतम् ॥ १

आर्ष एव भवेद्धर्मः प्राजापत्योऽथवाऽऽसुरः ।
यदेतत् सहधर्मेति पूर्वमुक्तं महर्षिभिः ॥ २

सन्देहस्सुमहानेष विरुद्ध इति मे मतिः ।
इह यस्सहधर्मो वै प्रेत्यायं विहितः क नु ॥ ३

स्वर्गे मृतानां भवति सहधर्मस्सनातनः ।
पूर्वमेकस्य म्रियतः क चैकस्तिष्ठते वद ॥ ४

नानाकर्मबलोपेता नानाकर्मनिवासिनः ।
नानाविधाननिष्ठाना मानुषा बहवो यदा ॥ ५

अनृतास्त्रिय इत्येवम् सूत्रकारो व्यवस्यति ।
अनृतास्त्रिय इत्येवम् वेदेष्वपि हि पठ्यते ॥ ६

धर्मो यः पौर्विको दृष्ट उपचारः क्रियाविधिः ।
गह्वरं प्रतिभात्येतन्मम चिन्तयतोऽनिशम् ॥ ७

निस्सन्देहमिदं सर्वम् पितामह यथाश्रुतम् ॥ ७॥

यथा तद् यादृशं वैतद् यथा चैतन् प्रकीर्तितम् ।
निखिलेन महाप्राज्ञ भवानेतद्ब्रवीतु मे ॥ ८॥

भीष्मः—

अत्राप्युदाहरन्तीमम इतिहासं पुरातनम ।
अष्टावक्रस्य संवादम् दिशया सह भारत ॥ ९॥

निर्वेष्टुकामस्तु पुरा ह्यष्टावक्रो महामनाः ।
ऋषेरथ वदान्यस्य कन्यां वव्रे महात्मनः ॥ १०॥

सुप्रभां नाम वै नाम्ना रूपेणाप्रतिमां भुवि ।
गुणप्रगल्भां शीलेन साध्वीं चारित्रशोभनाम् ॥ ११॥

सा तस्यर्षेर्मनो दृष्ट्वा जहार शुभलोचना ।

वनराजिर्यथा चित्रा वसन्ते कुसुमाचिता ॥ १२॥

ऋषिस्तमाह देया मे सुता तुभ्यं शृणुष्व मे ॥ १३

अनन्यस्त्रीजनः प्राज्ञो ह्यप्रवासी प्रियंवदः ।
सुरूपस्सम्मतो वीरश् शीलवान भोगभुक् छुचिः ॥ १४

दारानुमतयज्ञश्च सुनक्षत्रामथोद्वहेत् ।
[1]स्वभर्त्रास्स्वजनोपेत इह प्रेत्य च मोदते ॥ १५

गच्छ तावद्दिशं पुण्याम् उत्तरां द्रक्ष्यसे ततः ॥ १५॥

अष्टावक्रः—

किं द्रष्टव्यं मया तत्र वक्तुमर्हति मे भवान् ।
तथेदानीं मया कार्यम् यथा वक्ष्यति मां भवान् ॥ १६॥

ऋषिः—

धनदं समतिक्रम्य हिमवन्तं तथैव च ।
रुद्रस्यायतनं दृष्ट्वा सिद्धचारणसेवितम् ॥ १७॥

इष्टैः पारिषदैर्जुष्टम् नृत्यद्भिर्विविधाननैः ।
दिव्याङ्गरागैः पैशाचैर् अन्यैर्नानाविधैस्तथा ॥ १८॥

पाणितालसतालैश्च शम्यातालैस्समैस्तथा ।
सम्प्रहृष्टैः प्रनृत्यद्भिश् शर्वस्तत्र निषेव्यते ॥ १९॥

इष्टं किल गिरौ स्थानम् तद्दिव्यमनुशुश्रुम ।

---

1. अ-ख—सभृत्यस्

नित्यं सन्निहितो देवस् तथा पारिषदाश्शुभाः ॥ २०॥

अत्र देव्या तपस्तप्तम् शङ्करार्थं सुदुश्चरम् ।
तथैतदिष्टं देवस्य तथोमाया इति श्रुतिः ॥ २१॥

ततः कोपो महान् पार्श्वे देवस्योत्तरतस्तथा ॥ २२

ऋतवः कालरात्रिश्च ये दिव्या ये च मानुषाः ।
सर्वे देवमुपासन्ते रूपिणः किल तत्र ह ॥ २३

तदतिक्रम्य भवनं त्वया यातव्यमेव हि ॥ २३॥

ततो नीलं वनोद्देशं द्रक्ष्यसे नीलसन्निभम् ।
रमणीयं मनोग्राहि तत्र द्रक्ष्यसि वै स्त्रियम् ॥ २४॥

तपस्विनीं महाभागां वृद्धां दीक्षामनुष्ठिताम् ॥ २५

द्रष्टव्या सा त्वया तत्र सम्पूज्या चैव यत्नतः ॥ २५॥

तां दृष्ट्वा विनिवर्तस्व ततः पाणीं ग्रहीष्यसि ।
यद्येष समय[1]स्सम्यक् साध्यते तत्र गम्यताम् ॥* २६॥

अष्टावक्रः—

तथा तत् साधयिष्यामि तत्र यास्याम्यसंशयम् ।
यत्र त्वं वदसे साधो भवान् भवतु सत्यवाक् ॥ २७॥

भीष्मः—

ततोऽगच्छत् स भगवान् उत्तरामुत्तरां दिशम् ।

---

1. अ-ख—सद्यस्

* सर्वेषु कोशेषु अत्रैवाध्यायसमाप्तिः

हिमवन्तं गिरिश्रेष्ठं सिद्धचारणसेवितम् ॥ २८॥

स गत्वा द्विजशार्दूलो हिमवन्तं महागिरिम् ।
अध्यगच्छन्नदीं पुण्यां बाहुदां पुण्यदायिनीम् ॥ २९॥

अशोके विमले तीर्थे स्नात्वा तर्प्य च देवताः ।
तत्र वासाय शयने कौशे सुखमुवास ह ॥ ३०॥

ततो रात्र्यां व्यतीतायां प्रातरुत्थाय स द्विजः ।
स्नात्वा प्रादुश्चकाराग्निं हुत्वा चव विधानतः ॥ ३१॥

रुद्राणीकूपमासाद्य ह्रदे तत्र समाश्वसत् ॥ ३२
विश्रान्तश्च समुत्थाय कैलासमभितो ययौ ॥ ३२॥

सोऽपश्यत् काञ्चनद्वारं पुरं दीप्तमिव श्रिया ।
मन्दाकिनीं च नलिनीं धनदस्य महात्मनः ॥ ३३॥

अथ ते राक्षसास्सर्वे ये तां रक्षन्ति पद्मिनीम् ।
अभ्युत्थिता भोगवन्तो माणिभद्रपुरोगमाः ॥ ३४॥

स तान् प्रत्यर्चयामास राक्षसान भीमविक्रमान् ।
निवेदयत मां क्षिप्रं धनदायेति चात्रवीत् ॥ ३५॥

ते राक्षसास्तथा राजन् भगवन्तमथात्रुवन् ॥ ३६

राक्षसाः—

असौ वैश्रवणो राजा स्वयमायाति तेऽन्तिकम् ॥ ३६॥

वेदितो भगवानस्य कार्यमागमने च यत् ।

पश्यैनं च महाभागं ज्वलन्तमिव तेजसा ॥ ३७॥

भीष्मः—

ततो वैश्रवणोऽभ्येत्य अष्टावक्रमनिन्दितम् ।
विधिवत् कुशलं पृष्ट्वा ततो ब्राह्मणमब्रवीत् ॥ ३८॥

कुबेरः—

सुखं प्राप्तो भवान् किं स्वित् किं वा मत्तश्चिकीर्षसि ।
ब्रूहि सर्वं करिष्यामि यन्मां त्वं वक्ष्यसे द्विज ॥ ३९॥
भवनं प्रविश त्वं मे यथाकामं द्विजोत्तम ।
सत्कृतः कृतकार्यश्च भवान् यास्यत्यविघ्नतः ॥ ४०॥

भीष्मः—

प्राविशद्भवनं स्वं स गृहीत्वा तं द्विजोत्तमम् ।
आसनं स्वं ददौ चैव पाद्यमर्घ्यं तथैव च ॥ ४१॥
अथोपविष्टयोस्तत्र माणिभद्रपुरोगमाः ।
निषेदुस्तत्र कौबेरा यक्षगन्धर्वराक्षसाः ॥ ४२॥
ततस्तेषां निषण्णानां धनदो वाक्यमब्रवीत् ॥ ४३

कुबेरः—

भवच्छन्दं समाज्ञाय नृत्येरन् पुंश्चलीरिह ।
आतिथ्यं परमं कार्यं शुश्रूषा भवतस्तथा ॥ ४४

भीष्मः—

संवर्त्यतामित्युवाच मुनिर्मधुरया गिरा ॥ ४४॥

अथाप्सरा मिश्रकेशी रम्भा चैवोर्वशी तथा ।
अलम्बुसा घृताची च चित्रा चित्राङ्गदा शुचिः ॥ ४५॥

मनोहरा सुकेशी च सुमुखी हासिनी प्रभा ।
विद्युत्प्रभा शमा दान्ता रताना रतिरेव च ॥ ४६॥

एताश्चान्याश्च बह्व्यश्च प्रनृत्ताप्सरसश्शुभाः ।
अवादयंश्च गन्धर्वा वाद्यानि विविधानि च ॥ ४७॥

अथ प्रवृत्ते गान्धर्वे दिव्ये सर्षिरुपावसत् ।
दिव्यं संवत्सरं तत्रारमद्वै सुमहातपाः ॥ ४८॥

ततो वैश्रवणो राजा भगवन्तमुवाच ह ॥ ४९

कुबेरः—

साग्रस्संवत्सरो यातस् तव विप्रेह पश्यतः ।
हार्यं विषयो ब्रह्मन् गान्धर्वो नाम नामतः ॥ ५०

छन्दतो वर्ततां विप्र यथा वदतु मा भवान् ॥ ५०॥

अतिथिः पूजनीयस्त्वम् इदं च भवतो गृहम् ।
सर्वमाज्ञाप्यतामाशु परवन्तो वयं त्विति ॥ ५१॥

भीष्मः—

अथ वैश्रवणं प्रीतो भगवान् प्रत्यभाषत ॥ ५२

अष्टावक्रः—

अर्चितोऽस्मि यथान्यायं गमिष्यामि धनेश्वर ।

प्रीतोऽस्मि सदृशं चैतत् तव सर्वं धनेश्वर ॥ ५३

तव प्रसादाद्भगवन् महर्षेश्च महात्मनः ।
नियोगादद्य यास्यामि वृद्धिमान्वृद्धिमान् भव ॥ ५४

भीष्मः—

अथ निष्क्रम्य भगवान् प्रययावुत्तरामुखः ।
कैलासे शङ्करावासम् अभिवीक्ष्य प्रणम्य च ॥ ५५

गौरीशं शङ्करं दान्तम् शरणागतवत्सलम् ।
गङ्गाधरं गोपतिगं गणावृतमकल्मषम् ॥ ५६

कैलासं मन्दरं हैमम् सर्वाननुचचार ह ॥ ५६॥

तानतीत्य महाशैलान् कैलासस्थानमुत्तमम् ।
प्रदक्षिणं ततश्चक्रे प्रयतश्शिरसा नमन् ॥ ५७॥

धरणीमवतीर्याथ पूतात्मा स तदाऽभवन् ॥ ५८

स तं प्रदक्षिणं कृत्वा निर्यातश्चोत्तरामुखः ।
समेन भूमिभागेन ययौ प्रीतिपुरस्कृतः ॥ ५९

ततोऽपरं वनोद्देशम् रमणीयमपश्यत ।
सर्वर्तुफलकैर्वृक्षैः पक्षिभिश्चाभिसंवृतम् ॥ ६०

रमणीयैर्वनोद्देशैस् तत्रतत्र युधिष्ठिर ॥ ६०॥

तत्राश्रमपदं दिव्यम् ददर्श भगवानथ ।
शैलांश्च विविधाकारान् काञ्चनोद्भूषणानथ ॥ ६१॥

मणिभूमौ निविष्टाश्च पुष्करिण्यस्तथैव च ।
अन्यान्यांपे च रम्याणि ददर्श सुबहून्यथ ॥ ६२॥

भृशं तस्य मनो रेमे महर्षेर्भावितात्मनः ॥ ६३

स तत्र काञ्चनं दिव्यं सर्वरत्नमयं गृहम् ।
ददर्शाद्भुतसङ्काशम् धनदस्य गृहाद्वरम् ॥ ६४

महान्तो यत्र विविधाः काञ्चनाः पर्वतोत्तमाः ।
विमानानि च रम्याणि रत्नानि विविधानि च ॥ ६५

मन्दारपुष्पसङ्कीर्णा तथा मन्दाकिनी नदी ।
स्वयम्प्रभाश्च मणयो वज्रैर्भूमिश्च भूषिता ॥ ६६

नानाविधैश्च भवनैर् विचित्रमणि[1]तोरणैः ।
मुक्ताजालपरिक्षिप्तैर् मणिरत्नविभूषितैः ॥ ६७

मनोदृष्टिहरैः रम्यैस् सर्वतस्संवृतश्चुभैः ।
ऋषिस्समन्ततोऽपश्यत् तत्र तत्र मनोहरम् ॥ ६८

ततोऽभवत्तस्य चिन्ता क मे वासो भवेदिति ।
अथ द्वारं समभितो गत्वा स्थित्वा ततोऽब्रवीत् ॥ ६९

अष्टावक्रः—

अतिथिं मामनुप्राप्तम् अनुजानन्तु येऽत्र ते ॥ ६९॥

1. क—गोपुरैः

भीष्मः—

अथ कन्याः परिवृता गृहात्तस्माद्विनिस्सृताः ।
नानारूपास्सप्त विभो कन्यास्तत्र मनोहराः ॥ ७०॥

यां यामपश्यत् कन्यां स सा सा तस्य मनोऽहरत् ।
नाशक्नुवद्धारयितुं मनोऽथास्यावसीदति ॥ ७१॥

ततो धृतिस्समुत्पन्ना तस्य विप्रस्य धीमतः ।
अथ तं प्रमदाः प्राहुर् भगवान् प्रविशत्विति ॥ ७२॥

अथ तासां स्वरूपेण तस्यैव भवनस्य च ।
कौतूहलसमाविष्टः प्रविवेश गृहं द्विजः ॥ ७३॥

तत्रापश्यज्जरायुक्तां विरजोम्बरधारिणीम् ।
वृद्धां पर्यङ्क आसीनां सर्वाभरणभूषिताम् ॥ ७४॥

[1]स्वस्ति चास्त्विति तेनोक्ता सा च स्त्री स्मावदद्यथा ।
प्रत्युत्थाय च तं विप्रम् आस्यतामित्युवाच ह ॥ ७५॥

अष्टावक्रः—

सर्वास्त्वानालयान् यान्तु एका मामुपतिष्ठतु ।
सुप्रज्ञाना सुप्रशान्ता शेषा गच्छन्तु च्छन्दतः ॥ ७६॥

भीष्मः—

ततः प्रदक्षिणीकृत्य कन्यास्तास्तमृषिं तदा ।
निराक्रामन् गृहात्तस्मात् सा वृद्धा चाथ तिष्ठति ॥ ७७॥

1. ख—अर्धचतुष्टयं नास्ति

तया सम्पूजितस्तत्र शयने चापि निर्मले ॥ ७८

अथ तां संविशन् प्राह शयने भास्वरे तदा ॥ ७८॥

अष्टावक्रः—

त्वयाऽपि सुप्यतां भद्रे रजनी ह्यतिवर्तते ॥ ७९

भीष्मः—

संलापान्तेन विप्रेण तथा सा तत्र भाषिता ।
द्वितीये शयने दिव्ये सा विवेश महाप्रभे ॥ ८०

अथ सा वेपमानाङ्गी निमित्तं शीतजं तदा ।
व्यपदिश्य महर्षेर्वै शयनं साऽध्यरोहत ॥ ८१

स्वागतेनागतं तेऽस्तु भगवांस्तामभाषत ॥ ८१॥

सा जुगूहे भुजाभ्यां तम् ऋषिं प्रीत्या नरर्षभ ॥ ८२

निर्विकारमृषिं चापि काष्ठकुड्योपमं तदा ।
दुःखिता प्रेक्ष्य सञ्जल्पम् अकार्षीद्दर्पिणा सह ॥ ८३

वृद्धा—

ब्रह्मन् न कामकारोऽस्ति स्त्रीणां पुरुषतो धृतिः ।
कामेन मोहिता चाहं त्वां भजन्तीं भजस्व माम् ॥ ८४

[1]प्रहृष्टो भव विप्रर्षे समागच्छ मया सह ।
उपगूह च मां विप्र कामार्तां सुभृशं त्वया ॥ ८५

एतद्धि तव धर्मात्मंस् तपसः पूज्यते फलम् ।

1. ख—अर्धचतुष्टयं नास्ति

प्रार्थितं दर्शनादेव भजमानां भजस्व माम् ॥ ८६

सद्म चेदं वनं चेदं यच्चान्यदपि पश्यसि ।
प्रभुत्वं तव सर्वत्र मयि चैव न संशयः ॥ ८७

सर्वान् कामान् विधास्यामि रमस्व सहितो मया ।
रमणीये वने विप्र सर्वकामफलप्रदे ॥ ८८

त्वद्वशाऽहं भविष्यामि क्रीडन्निह मया सह ।
सर्वान् कामानवाप्नोपि ये दिव्या ये च मानुषाः ॥ ८९

नातः परं हि नारीणां विद्यते कार्यमण्वपि ।
यथा पुरुषसंसर्गः फलमेतद्धि नः परम् ॥ ९०

आत्मच्छन्देन वर्तन्ते नार्यो मन्मथचोदिताः ।
न च दह्यन्ति गच्छन्त्यस् सुतप्तैरपि पांसुभिः ॥ ९१

अष्टावक्रः—

परदारानहं भद्रे न गच्छेयं कथञ्चन ।
दूषितं धर्मशास्त्रेषु परदाराभिमर्शनम् ॥ ९२

शुद्धक्षेत्रे ब्रह्महत्याप्रायश्चित्तमथोच्यते ।
पुनश्च पातकं दृष्टम् विप्रक्षेत्रे विशेषतः ॥ ९३

भद्रे निर्वेष्टुकामोऽहम् तत्रापचरणं मम ।
प्रायश्चित्तं महद्दहो दारग्रहणपूर्वकम् ॥ ९४

बीजं न शुद्ध्यते वोढुर् अस्य चाकृतनिष्कृतेः ।

मातृतः पितृतश्शुद्धो ज्ञेयः पुत्रो यथार्थतः ॥ ९५

विषयेष्वनभिज्ञोऽहं आत्मार्था किल सन्ततिः ।
एवं लोकान् गमिष्यामि पुत्रैरिति न संशयः ॥ ९६

भद्रे धर्मं विजानीष्व ज्ञात्वा चोपरमस्व ह ॥ ९६॥

वृद्धा—

नानिलोऽग्निर्न वरुणो न चान्ये त्रिदशा द्विज ।
प्रियास्त्रीणां यथा कामो रतिशीला हि योषितः ॥ ९७॥

सहस्रैर्न रतिं नारी प्राप्नोतीह कदाचन ।
तथा शतसहस्रेषु यदि काचित् पतिव्रता ॥ ९८॥

न हि जानन्ति पितरं न कुलं न च मातरम् ।
न भ्रातृन् न च भर्तारं न पुत्रान् न च देवरान् ॥ ९९॥

लीलायिताः कुलं घ्नन्ति कूलानीव सरिद्वराः ।
दोषानमन्दान् मन्दासु प्रजापतिरभापत ॥ १००॥

भीष्मः—

ततस्स ऋषिरेकाग्रस् तां स्त्रियं प्रत्यभापत ॥ १०१

अष्टावक्रः—

आस्यतां रुचिरश्छन्दः किं वा कार्यं ब्रवीमि ते ॥ १०१॥

भीष्मः—

सा स्त्री प्रोवाच यत् कार्यं ज्ञास्यसे देशकालतः ।
वस तावन्महाप्राज्ञ कृतकृत्यो गमिष्यसि ॥ १०२॥

ब्रह्मर्षिस्तामथोवाच स तथेति युधिष्ठिर ॥ १०३

अष्टावक्रः—

वसेऽहं तावदुत्सङ्गे भवत्या नात्र संशयः ॥ १०३॥

भीष्मः—

अर्थर्षिरभिसम्प्रेक्ष्य स्त्रियं तां जरयाऽन्विताम् ।
चिन्तां परमिकां भेजे सन्तप्त इव चाभवत् ॥ १०४॥

यत् तदङ्गं हि सोऽपश्यत् तस्या विप्रर्षभस्तदा ।
नारमत् तत्र तस्यास्य दृष्टी रूपपराजिता ॥ १०५॥

देवतेयं गृहस्यास्य शापान्नूनं विरूपिणी ।
अस्याश्च कारणं वेत्तुं न शक्यं सहसा मया ॥ १०६॥

इति चिन्ताविषक्तस्य तमर्थं श्रोतुमिच्छतः ।
व्यगमद्रात्रिशेषस्स मनसा व्याकुलेन तु ॥ १०७॥

अथ सा स्त्री तथोवाच भगवन्नस्य वै रवेः ।
रूपं सन्ध्याभ्रसंरक्तम् किमुपस्थाप्यतां तव ॥ १०८॥

स उवाच तदा तां स्त्रीं स्नानोदकमिहानय ।
उपासिष्ये ततस्सन्ध्यां वाग्यतो नियतेन्द्रियः* ॥ १०९॥

अथ सा स्त्री तमुक्त्वा तु विप्रमेवं भवत्विति ।
तैलं दिव्यमुपानीय स्नानशाटीमुपानयत् ॥ ११०॥

---

* सर्वेषु कोशेषु अत्रैवाध्यायसमाप्तिर्दृश्यते

अनुज्ञाता च मुनिना सा स्त्री तेन महात्मना ।
अथास्य तैलेनाङ्गानि सर्वाण्येव [1]व्यमृक्षयत् ॥ १११॥

शनैश्चाच्छादितस्तत्र स्नानशालामुपागमत् ।
भद्रासनं ततश्चित्रम् ऋषिरन्वविशन्नवम् ॥ ११२॥

अथोपविष्टश्च यदा तस्मिन् भद्रासने तदा ।
स्नापयामास शनकैस् तमृषिं सुखहस्तवत् ॥ ११३॥

दिव्यं च विधिवच्चक्रे सोपचारं मुनेस्तदा ।
जलेन सुसुखोष्णेन तस्या हस्तसुखेन च ॥ ११४॥

व्यतीतां रजनीं कृत्स्नां नाजानात् स महाव्रतः ॥ ११५
तत उत्थाय स मुनिस् तदा परमविस्मितः ।
पूर्वस्यां दिशि सूर्यं च सोऽपश्यदुदितं दिवि ॥ ११६
सन्ध्योपासनमित्याहो सर्वपापहरं न मे ।
तस्य बुद्धिरियं किं नु मोहस्तत्त्वमिदं भवेत् ॥ ११७
अथोपास्य सहस्रांशुं किं करोमीत्युवाच ताम् ।
सा चामृतरसप्रख्यम् ऋषेरन्नमुपाहरत् ॥ ११८
तस्य स्वादुतयाऽन्नस्य न प्रभूतं चकार सः ।
व्यगमच्चाप्यहश्शेषस् ततस्सन्ध्याऽऽगमत् पुनः ॥ ११९
अथ स्त्री भगवन्तं सा सुप्यतामित्यचोदयत् ।

1. ख—व्यमर्दयत्

तत्र वै शयने दिव्ये तस्य तस्याश्च कल्पिते ॥ १२०

अष्टावक्रः—

न भद्रे परदारेषु मनो मे सम्प्रसज्जति ।
उत्तिष्ठ भद्रे भद्रं ते स्वापं वै विरमस्व च ॥ १२१

भीष्मः—

सा तदाऽनेन विप्रेण तदा धृत्या निवर्तिता ।
स्वतन्त्राऽस्मीत्युवाचेदं न धर्मच्छलमस्ति ते ॥ १२२

अष्टावक्रः—

नास्ति स्वतन्त्रता स्त्रीणाम् अस्वतन्त्रा हि योषितः ।
प्रजापतिमतं ह्येतन्न स्त्री स्वातन्त्र्यमर्हति ॥ १२३

वृद्धा—

बाधते मैथुनं विप्र मम भक्तिं च पश्य वै ।
अधर्मं प्राप्यसे विप्र [1]यन्मां त्वं नाभिनन्दसि ॥ १२४

अष्टावक्रः—

हरन्ति दोषजातानि नरमिन्द्रियकिङ्करम् ।
प्रभवामि स्वयं धृत्या भद्रे स्वं शयनं व्रज ॥ १२५

वृद्धा—

शिरसा प्रणमे विप्र प्रसादं कर्तुमर्हसि ।
भूमौ हि पतमानायाश् शरणं भव मेऽनघ ॥ १२६

1- क-ख-घ—इतः षट् पादा न सन्ति

यदि वा दोषजातं त्वं परदारेषु पश्यसि ।
आत्मानं स्पर्शयाम्यद्य पाणिं गृह्णीष्व मेऽनघ ॥ १२७
न दोषो भविता चैव सत्येनैतद्ब्रवीम्यहम् ।
स्वतन्त्रां मां विजानीहि योऽधर्मस्सोऽस्तु वो मयि ॥ १२८

अष्टावक्रः—

स्वतन्त्रा स्त्री कथं भद्रे ब्रूहि कारणमत्र मे ।
नास्ति लोकेषु स्त्री काचिद् या वै स्वातन्त्र्यमर्हति ॥ १२९
पिता रक्षति कौमारे भर्ता रक्षति यौवने ।
पुत्रस्तु स्थाविरे भावे न स्त्री स्वातन्त्र्यमर्हति ॥ १३०
न वृद्धामक्षतां मन्ये न चेच्छा त्वयि मेऽनघे ॥ १३०॥

वृद्धा—

कौमारं ब्रह्मचर्यं मे कन्यैवास्मि न संशयः ।
कुरु मा विमतिं विप्र श्रद्धां जहिहि मा मयि ॥ १३१॥
यथा मह्यं तथा तुभ्यम् यथा तव तथा मम ॥ १३२

भीष्मः—

जिज्ञासेयमृषेस्तस्य विघ्नस्सत्यं नु किं भवेत् ।
आश्चर्यं परमं हीदम् किं नु श्रेयो हि मे भवेत् ॥ १३३
दिव्याभरणवस्त्रा हि कन्येयं समुपस्थिता ॥ १३३॥
किं त्वस्याः परमं रूपम् जीर्णमासीत् कथं पुनः ।

कन्यारूपमिहाद्यैव किमिहात्रोत्तरं भवेत् ॥ १३४॥
यथा मे परमा शक्तिर् न ह्युत्थास्ये कथञ्चन ।
न रोचयेहाभ्युत्थानं धृत्यैनां साधयाम्यहम् ॥* १३५॥

युधिष्ठिरः—

न बिभेति कथं सा स्त्री शापस्य परमद्युतेः ।
कथं निवृत्तो भगवांस् तद्भवान् प्रब्रवीतु मे ॥ १३६॥

भीष्मः—

अष्टावक्रोऽन्वपृच्छत् तां रूपं विकुरुषे कथम् ।
न चानृतं ते वक्तव्यम् ब्रूहि ब्राह्मणकाम्यया ॥ १३७॥

वृद्धा—

द्यावापृथिवीमात्रैषा काम्या ब्राह्मणसत्तम ।
शृणुष्वावहितस्सर्वम् यदिदं सत्यविक्रम ॥ १३८॥

उत्तरां मां दिशं विद्धि दृष्टं स्त्रीचापलं च ते ।
अभ्युत्थानेन ते लोका जितास्सत्यपराक्रम ॥ १३९॥

जिज्ञासेयं प्रयुक्ता मे स्थैर्यं कर्तुं तवानघ ।
स्थविराणामपि स्त्रीणां बाधते मैथुनज्वरः ॥ १४०॥

अविश्वासान्न व्यसनी नातिसक्तोऽप्रवासकः ।
विद्वान् सुशीलः पुरुषस् सदारस्सुखमश्नुते ॥ १४१॥

---

* सर्वेषु कोशेषु अत्रैवाध्यायसमाप्तिर्दृश्यते

तुष्टाः पितामहास्तेऽद्य तथा देवास्सवासवाः ॥ १४२

सत्यं येन च कार्येण सम्प्राप्तो भगवानिह ।
प्रेषितस्तेन विप्रेण कन्यापित्रा द्विजर्षभ ॥ १४३

निकृतिस्त्री भोगपरा प्रियवादाप्रवासनात् ।
रक्ष्यते चा कुचेलाद्यैर् अप्रसङ्गानुवर्तनैः ॥ १४४

[1]अपर्वस्वनिषिद्धासु रात्रिष्वप्यनृतौ व्रजेत् ।
रात्रौ च नातिनियमो [2]न वै ह्यनियमो भवेत् ॥ १४५

प्रेषितश्चोपदेशाय तच्च सर्वं श्रुतं मया ॥ १४५॥

क्षेमी गमिष्यसि गृहान् श्रमश्च न भविष्यति ।
कन्यां त्वं प्राप्स्यसे विप्र पुत्रिणी च भविष्यति ॥ १४६॥

काम्यया पृष्टवांस्त्वं मां ततो व्याहृतमुत्तरम् ।
अनतिक्रमणीयैषा कृत्स्नैर्लोकैस्त्रिभिस्सदा ॥ १४७॥

गच्छस्व कृतकृत्यस्त्वम् किं वाऽन्यच्छ्रोतुमिच्छसि ।
यावद्ब्रवीमि विप्रर्षे अष्टावक्र यथातथम् ॥ १४८॥

ऋषिप्रवासिता चास्मि तव हेतोर्द्विजर्षभ ।
तस्य सम्माननार्थं तु त्वयि वाक्यं प्रभाषितम् ॥ १४९॥

---

1. क-घ—सर्वास्वपि च निन्द्यासु रात्रिष्व
2. क-घ—नये ह्यनवमो

भीष्मः—

श्रुत्वा तु वचनं तस्यास् स विप्रस्साञ्जलिस्थितः ।
अनुज्ञातस्तया चापि स्वगृहं पुनराव्रजत् ॥ १५०॥

गृहमागत्य विश्रान्तस् स्वजनं परिपूज्य च ।
अभ्यगच्छत तं विप्रम् न्यायतः कुलनन्दनः ॥ १५१॥

पृष्टश्च तेन विप्रेण दृष्टं त्वेतन्निदर्शनम् ।
प्राह विप्रं तदा विप्रस् सुप्रीतेनान्तरात्मना ॥ १५२॥

अष्टावक्रः—

भवताऽहमनुज्ञातः प्रस्थितो गन्धमादनम् ।
अस्य चोत्तरतो देशे दृष्टं तद् दैवतं महत् ॥ १५३॥

तया चाहमनुज्ञातो भगवांश्चापि कीर्तितः ।
श्रावितश्चापि तद्वाक्यम् गृहमभ्यागतः प्रभो ॥ १५४॥

भीष्मः—

तमुवाच ततो विप्रः प्रतिगृह्णीष्व मे सुताम् ॥ १५५

विप्रः—

नक्षत्रतिथिसंयोगे पात्रं हि परमं भवान् ॥ १५५॥

भीष्मः—

अष्टावक्रस्तथेत्युक्त्वा प्रतिगृह्य च तां विभो ।
कन्यां प्रगृह्य धर्मात्मा प्रीतिमांश्चाभवत्तदा ॥ १५६॥

कन्यां तां प्रतिगृह्यैव भार्यां परमशोभनाम् ।
उवास मुदितस्तत्र आश्रमे स्वे गतज्वरः ॥ १५७॥

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां
अनुशासनपर्वणि पञ्चविंशोऽध्यायः ॥ २५ ॥
॥ ८९ ॥ आनुशासनिकपर्वणि पञ्चविंशोऽध्यायः ॥ २५ ॥
[अस्मिन्नध्याये १५७॥ श्लोकाः]

॥ षड्विंशोऽध्यायः ॥

भीष्मेण युधिष्ठिरं प्रति ऋष्यादीनां वियोनिजत्वेऽपि तपोविद्यादीनामेव माहात्म्यप्रयोजकत्वे निदर्शनतया तादृशानां सम्भवप्रकारादिकथनम् ॥

युधिष्ठिरः—

वैश्ययोन्यां समुत्पन्नाश् शूद्रयोन्यां तथैव च ।
ब्रह्मर्षय इति प्रोक्ताः पुराणा द्विजसत्तमाः ॥ १

कथमेतन्महाराज तत्त्वं शंसितुमर्हसि ।
विरुद्धमिह पश्यामि वियोनौ ब्राह्मणो भवेत् ॥ २

भीष्मः—

अलं कौतूहलेनात्र निबोध त्वं युधिष्ठिर ।
शुभेतरं शुभं वाऽपि न चिन्तयितुमर्हसि ॥ ३

ईशन्त्यात्मन इत्येतद् गतिश्चैषां न सज्जते ।

ब्रह्मभूयांस इत्येव ऋषयश्श्रुतिचोदिताः ॥ ४

निन्द्या न चैते राजेन्द्र [1]प्रमाणं हि प्रमाणिनाम् ।
लोकोऽनुमन्यते चैतान् प्रमाणं ह्यत्र वै तपः ॥ ५

एवं महात्मभिस्तात तपोज्ञानसमन्वितैः ।
प्रवर्तितानि कार्याणि प्रमाणान्येव सत्तम ॥ ६

भार्याश्चतस्रो राजेन्द्र ब्राह्मणस्य स्वधर्मतः ।
ब्राह्मणी क्षत्रिया वैश्या शूद्रा च भरतर्षभ ॥ ७

[2]राज्ञस्तु क्षत्रिया वैश्या शूद्रा च भरतर्षभ ।
वैश्यस्य वैश्या विहिता शूद्रा च भरतर्षभ ॥ ८

शूद्रस्यैका स्मृता भार्या प्रतिलोमो हि सङ्करः ।
शूद्रायास्तु नरश्रेष्ठ चत्वारः पतयस्स्मृताः ॥ ९

वर्णोत्तमायास्तु पतिस् सवर्णस्त्वेक एव सः ।
द्वौ क्षत्रियाया विहितौ ब्राह्मणः क्षत्रियस्तथा ॥ १०

वैश्यायास्तु नरश्रेष्ठ विहिताः पतयस्त्रयः ।
सवर्णः क्षत्रियश्चैव ब्राह्मणश्च विशां पते ॥ ११

एवं विधिमनुस्मृत्य ततस्ते ऋषिभिः पुरा ।
उत्पादिता महात्मानः पुत्रा ब्रह्मर्षयः पुरा ॥ १२

पुराणाभ्यामृषिभ्यां तु मित्रेण वरुणेन च ।

1. क—अष्टौ पादा न सन्ति 2. अ-ख—नास्तीदमर्धम्

वसिष्ठोऽथ तथाऽगस्त्यो बहुमिस्तु तथैव च ॥ १३

कक्षीवानार्ष्टिषेणश्च पुरुषः कप एव च ।
[1]मार्क्षतेयस्य वै पुत्रा गौतमस्यात्मजास्स्मृताः ॥ १४

वत्सप्रियश्च भगवान् स्थूलरश्मिस्तथा क्षणिः ।
गौतमस्यैव तनया ये दास्यां जनिताऽप्युत ॥ १५

कपिञ्जलादो ब्रह्मर्षिश् चाण्डाल्यामुदपद्यत ।
वैनतेयस्तथा पक्षी तुर्यायाश्च वसिष्ठतः ॥ १६

प्रसादाच्च वसिष्ठस्य शुक्लाभ्युपगमेन च ।
अदृश्यन्त्याः पिता वैश्यो नाम्ना चित्रमुखः पुरा ॥ १७

ब्राह्मणत्वमनुप्राप्तो ब्रह्मर्षित्वं च कौरव ॥ १७॥

वैश्यश्चित्रमुखः कन्यां वसिष्ठतनयस्य वै ।
शुभां प्रादाद्यतो जातो ब्रह्मर्षिस्तु पराशरः ॥ १८॥

तथैव दाशकन्यायां सत्यवत्यां महानृषिः ।
पराशरात् प्रसूतश्च व्यासो [2]वेदमयो मुनिः ॥ १९॥

[3]विभण्डकस्य मृग्यां च तपोयोगात्मको मुनिः ।
ऋश्यशृङ्गस्समुत्पन्नो ब्रह्मचारी महायशाः ॥ २०॥

शाङ्गर्यौ च मन्दपालस्य चत्वारो ब्रह्मवादिनः ।

---

1. क-घ—माम
2. क-ख-घ—योग
3. अ—इदमर्धं नास्ति

जाता ब्रह्मर्षयः पुण्या यैरस्तुतो हव्यवाहनः ॥ २१॥

द्रोणश्च स्तम्बमित्रश्च शारिसृक्श्च बुद्धिमान् ।
जरितारिश्च विख्यातश् चत्वारस्सूर्यसन्निभाः ॥ २२॥

महर्षेः कालवृक्षस्य [1]शकुन्यामेव जज्ञिवान् ।
हिरण्यहस्तो भगवान् महर्षिः काञ्चनप्रभः ॥ २३॥

पावकात्तात सम्भूता मनसा च महर्षयः ।
पितामहस्य राजेन्द्र पुलस्त्यपुलहादयः ॥ २४॥

सवर्णश्चापि राजर्षिस् सवर्णायामजायत ।
मृण्मय्यां भरतश्रेष्ठ आदित्येन विवस्वता ॥ २५॥

शाण्डिल्यश्चाग्नितो जातः काश्यपस्यात्मजः प्रभुः ।
शरद्वतश्शरस्तम्बात् कृपश्च कृपया सह ॥ २६॥

पद्माच्च जज्ञे राजेन्द्र सोमपस्य महात्मनः ।
रेणुश्च रेणुका चैव राममाता यशस्विनी ॥ २७॥

यमुनायां समुद्भूतस् सोमकेन महात्मना ।
अर्कदत्तो महानृषिः प्रथितः पृथिवीतले ॥ २८॥

अग्नेराहवनीयाच्च द्रुपदस्येन्द्रवर्चसः ।
धृष्टद्युम्नश्च सम्भूतो वेद्यां कृष्णा च भारत ॥ २९॥

[2]व्याघ्रयोन्यां ततो जाता वसिष्ठस्य महात्मनः ।

---

1. अ-क—कुशन्त्या 2. क-घ—विप्रयो

एकोनविंशतिः पुत्राः ख्याता व्याघ्रपदादयः ॥ ३०॥

मन्धश्च बादलोमश्च जाबालिश्च महानृषिः ।
मन्युश्चैवोपमन्युश्च सेतुकर्णस्तथैव च ॥ ३१॥

एते चान्ये च विख्याताः पृथिव्यां गोत्रतां गताः ॥ ३२

विश्वाकाशस्य राजर्षेर् इक्ष्वकोस्तु महात्मनः ।
बालाश्वो नाम पुत्रोऽभूच् छिखां भित्त्वा विनिस्सृतः ॥ ३३

मान्धाता चैव राजर्षिर् युवनाश्वेन धीमता ।
स्वयं धृतोऽथ गर्भेण दिव्यास्त्रबलसंयुतः ॥ ३४

[1]गौरतश्चापि राजर्षिश् चक्रवर्ती महायशाः ।
बाहुदायां समुत्पन्नो नद्यां राज्ञा सुबाहुना ॥ ३५

भूमेश्च पुत्रो नरकस् संवर्तश्चैव पुष्कलः ।
अद्भिश्चैव महातेजा ऋषिर्गार्ग्यो ह्यजायत ॥ ३६

एते चान्ये च बहवो राजन्या ब्राह्मणास्तथा ।
प्रभावेनाभिसम्भूता महर्षीणां महात्मनाम् ॥ ३७

नासाध्यं तपसा तेषां विद्यया ऽऽत्मगुणैः परैः ॥ ३७॥

अस्मिन्नर्थे च मनुना गीतश्श्लोको नराधिप ।
धर्मं प्रथयता राजंस् तं निबोध युधिष्ठिर ॥ ३८॥

1 अ-ब—गौरिक

ऋषीणां च नदीनां च साधूनां च महात्मनाम् ।
प्रभवो नाधिगन्तव्यस् स्त्रीणां दुश्चरितस्य च ॥ ३९॥

तन्नात्र चिन्ता कर्तव्या महर्षीणां समुद्भवे ।
यथा सर्वगतो ह्यग्निस् तथा तेजो महात्मसु ॥ ४०॥

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां
अनुशासनपर्वणि षड्विंशोऽध्यायः ॥ २६ ॥
॥ ८९ ॥ आनुशासनिकपर्वणि षड्विंशोऽध्यायः ॥ २६ ॥
[अस्मिन्नध्याये ४०॥ श्लोकाः]

॥ सप्तविंशोऽध्यायः ॥

भीष्मेण युधिष्ठिरं प्रति युगचतुष्टयधर्मादिप्रतिपादकनारदमार्कण्डेय-संवादानुवादः ॥

युधिष्ठिरः—

पुत्रैः कथं महाराज पुरुषस्तारितो भवेत् ।
यावन्न लब्धवान् पुत्रम् अफलः पुरुषो नृप ॥ १

भीष्मः—

अत्राप्युदाहरन्तीमम् इतिहासं पुरातनम् ।
नारदेन पुरा गीतम् मार्कण्डेयाय पृच्छते ॥ २
पर्वतं नारदं चैवम् असितं देवलं च तम् ।

आरुणेयं च रैभ्यं च एतानत्रागतान् पुरा ॥ ३
गङ्गायमुनयोर्मध्ये भोगवत्यास्समागमे ।
दृष्ट्वा पूर्वं समासीनान् मार्कण्डेयोऽभ्यगच्छत ॥ ४
ऋषयस्तु मुनिं दृष्ट्वा समुत्थायोन्मुखास्स्थिताः ।
अर्चयित्वाऽर्हतो विप्रम् किं कुर्म इति चाब्रुवन् ॥ ५

मार्कण्डेयः—

अयं समागमस्सद्भिर् यत्नेनासादितो मया ।
अत्र प्राप्स्यामि धर्माणाम् आचारस्य च निश्चयम् ॥ ६
ऋजुः कृतयुगे धर्मस् तस्मिन् क्षीणे विमुह्यति ।
युगे युगे महर्षिभ्यो धर्ममिच्छामि वेदितुम् ॥ ७

भीष्मः—

ऋषिभिर्नारदः प्रोक्तो ब्रूहि यत्रास्य संशयः ।
धर्माधर्मेषु तत्त्वज्ञ त्वं विच्छेत्ताऽसि संशयान् ॥ ८
ऋषिभ्योऽनुमतो वाक्यं नियोगान्नारदोऽब्रवीत् ।
सर्वधर्मार्थतत्त्वज्ञं मार्कण्डेयं ततोऽब्रवीत् ॥ ९

नारदः—

दीर्घायो तपसा दीप्त वेदवेदाङ्गतत्त्ववित् ।
यत्र ते संशयो ब्रह्मन् समुत्पन्नस्स उच्यताम् ॥ १०
धर्मं लोकोपकारं वा यच्चान्यच्छ्रोतुमिच्छसि ।
तदहं कथयिष्यामि ब्रूहि त्वं सुमहातपाः ॥ ११

मार्कण्डेयः—

युगे युगे व्यतीतेऽस्मिन् धर्मसेतुः प्रणश्यति ।
कथं धर्मच्छलेनाहम् प्राप्नुयामिति मे मतिः ॥ १२

नारदः—

आसीद्धर्मः पुरा विप्र चतुष्पादः कृते युगे ।
ततो ह्यधर्मः कालेन प्रवृत्तः किञ्चिदुन्नतः ॥ १३

ततस्त्रेतायुगं नाम प्रवृत्तं धर्मदूषणम् ॥ १३॥

तस्मिन् व्यतीते सम्प्राप्तम् तृतीयं द्वापरं युगम् ।
तदा धर्मस्य द्वौ पादावधर्मो नाशयिष्यति ॥ १४॥

द्वापरे तु परिक्षीणे [1]नन्दिके समुपस्थिते ।
लोकवृत्तं च धर्मं च उच्यमानं निबोध मे ॥ १५॥

चतुर्थं नन्दिकं नाम धर्मः पादावशेषितः ।
ततः प्रभृति जायन्ते क्षीणप्रज्ञायुषो नराः ॥ १६॥

क्षीणप्राणधना लोके धर्माचारबहिष्कृताः ॥ १७

मार्कण्डेयः—

एवं विलुलिते धर्मे लोके चाधर्मसंयुते ।
[2]किं चतुर्वर्णनियतं हव्यं कव्यं न नश्यति ॥ १८

---

1. ख—चान्तिके
2. अ—चातुर्वर्ण्यस्य नियतं+नियच्छति
ख—चातुर्वर्ण्यस्य निधनं हव्यं क

नारदः—
मन्त्रपूतं सदा हव्यं कव्यं चैव न नश्यति ।
प्रतिगृह्णन्ति तद्देवा दातुर्न्यायान प्रयच्छतः ॥ १९
सत्त्वयुक्तश्च दाता च सर्वान् कामानवाप्नुयात् ।
अवाप्तकामस्स्वर्गे च महीयेत यथेप्सितम् ॥ २०

मार्कण्डेयः—
चत्वारो ह्यथ ये वर्णा हव्यं कव्यं प्रदास्यते ।
मन्त्रहीनमवज्ञातम् तेषां दत्तं क्व गच्छति ॥ २१

नारदः—
[1]असुरान् गच्छते दत्तं विप्रै रक्षांसि क्षत्रियैः ।
वैश्यैः प्रेतानि वै दत्तम् शूद्रैर्भूतानि गच्छति ॥ २२

मार्कण्डेयः—
अथ वर्णावरे जाताश् चातुर्वर्ण्योपदेशिनः ।
दास्यन्ति हव्यकव्यानि तेषां दत्तं क्व गच्छति ॥ २३

नारदः—
वर्णावराणां भूतानां हव्यकव्यप्रदातृणाम् ।
नैव देवा न पितरः प्रतिगृह्णन्ति तत् स्वयम् ॥ २४
यातुधानाः पिशाचाश्च भूता ये चापि नैर्ऋताः ।
तेषां सा विहिता वृत्तिः पितृदैवतनिर्गता ॥ २५

1. क-ङ—अर्धचतुष्टयं नास्ति

तेषां सर्वप्रदातॄणां हव्यकव्यं समाहिताः ।
यत् प्रयच्छन्ति विधिवत् तद्वै भुञ्जन्ति देवताः ॥* २६

मार्कण्डेयः—

श्रुतं वर्णावरैर्दत्तम् हव्यं कव्यं च नारद ।
सम्प्रयोगे च पुत्राणां कन्यानां च ब्रवीहि मे ॥ २७

नारदः—

कन्याप्रदानं पुत्राणां स्त्रीणां संयोगमेव च ।
आनुपूर्व्यान्मया सम्यग् उच्यमानं निबोध मे ॥ २८
जातमात्रा तु दातव्या कन्यका सदृशे वरे ।
काले दत्तासु कन्यासु पिता धर्मेण युज्यते ॥ २९
यस्तु पुष्पवतीं कन्यां बान्धवो न प्रयच्छति ।
मासि मासि गते बन्धुस् तस्या भ्रौणह्यमाप्नुते ॥ ३०
यस्तु कन्यां गृहे रुन्ध्याद् ग्राम्यैर्भोगैर्विवर्जिताम् ।
अवध्यातस्स कन्याया बन्धुः प्राप्नोति भ्रूणहाम् ॥ ३१
दूषिता पाणिमात्रेण मृते भर्तरि दारिका ।
[1]संस्कारं लभते नारी द्वितीये सा पुनः पतौ ॥ ३२
पुनर्भूर्नाम सा कन्या सपुत्रा हव्यकव्यदा ।
अदूष्या सा प्रसूतीषु प्रजानां दारकर्मणि ॥ ३३

---

* सर्वेषु कोशेषु अत्रैवाध्यायसमाप्तिर्दृश्यते
1. क-घ—सन्तानं

मार्कण्डेयः—

या तु कन्या प्रसूयेत गर्भिणी या तु वा भवेत् ।
कथं दारक्रियां भूयस् सा भजेदृषिसत्तम ॥ ३४

नारदः—

तत्त्वार्थनिश्चितं शब्दं कन्यका नयतेऽग्नये ।
तस्मात् कुर्वन्ति भावं याः कुमार्यस्ता न कन्यकाः ॥ ३५

ब्रह्महत्यात्रिभागेन गर्भाधानविशोधितः ।
गृह्णीयात् तां चतुर्भागं विशुद्धां सर्जनात् पुनः ॥ ३६

मार्कण्डेयः—

कथं कन्यासु ये जाता बन्धूनां दूषितास्सदा ।
कस्य ते हव्यकव्यानि प्रदास्यन्ति महामुने ॥ ३७

नारदः—

कन्यायास्तु पितुः पुत्राः कानीना हव्यकव्यदाः ।
अन्तर्वत्न्यास्तु यः पाणिं गृह्णीयात् स सहोढजः ॥ ३८

मार्कण्डेयः—

अथ येनाहितो गर्भः कन्यायां तत्र नारद ।
कथं पुत्रफलं तस्य भवेदेतत् प्रचक्ष्व मे ॥ ३९

नारदः—

धर्माचारेषु ते नित्यं दूषकाः कृतशोधनाः ।
बीजं च नश्यते तेषां मोघचेष्टा भवन्ति ते ॥ ४०

मार्कण्डेयः—

अथ काचिद् भवेत् कन्या क्रीता दत्ता हृताऽपि वा ।
कथं पुत्रकृतं तस्यास् तद्भवेदपिसत्तम ॥ ४१

नारदः—

क्रीता दत्ता हृता चैव या कन्या पाणिवर्जिता ।
कौमारी नाम सा भार्या प्रसवेदौरसान् सुतान् ॥ ४२
न पत्न्यर्थे शुभा प्रोक्ता तत्कर्मण्यपवर्जिते ॥ ४२॥

मार्कण्डेयः—

केन मङ्गलकृत्येषु विनियुज्यन्ति कन्यकाः ।
एतदिच्छामि विज्ञातुं तत्त्वेनेह महामुने ॥ ४३॥

नारदः—

नित्यं निवसते लक्ष्मीः कन्यकासु प्रतिष्ठिता ।
शोभना शुभयोग्या च पूज्या मङ्गलकर्मसु ॥ ४४॥

आकरस्थं यथा रत्नं सर्वकामफलोपगम् ।
तथा कन्या महालक्ष्मीस् [1]सर्वलोकस्य मङ्गलम् ॥ ४५॥

एवं कन्या परा लक्ष्मी [2]रतिस्तोषश्च देहिनाम् ।
महाकुलानां चारित्रं वृत्तेन निकषोपलम् ॥ ४६॥

आनयित्वा स्वकाद्वर्णात् कन्यकां यो भजेन्नरः ।

1. घ—अयं पादोऽनन्तरश्च न स्तः 2. क—अयं पादोऽनन्तरश्च न स्तः

दातारं हव्यकव्यानां पुत्रकं या प्रसूयते ॥ ४७॥

साध्वी कुलं वर्धयति साध्वी पुष्टिर्गृहे परा ।
साध्वी लक्ष्मी रतिस्साक्षात् प्रतिष्ठा सन्ततिस्तथा ॥* ४८॥

मार्कण्डेयः—

श्रुतं बहुविधं वृत्तं कन्यकानां महामते ।
इच्छामि योषितां श्रोतुं धर्माधर्मौ परिग्रहे ॥ ४९॥

नारदः—

अष्टौ भार्यागमा धर्म्या नराणां दारकर्मणि ।
प्रेत्येह च हिता यास्तु सपुत्रा हव्यकव्यदाः ॥ ५०॥

साध्वी पाणिगृहीता या कौमारी पाणिवर्जिता ।
भ्रातृभार्या स्वभार्येति प्रसूयेत पुत्रमौरसम् ॥ ५१॥

मार्कण्डेयः—

त्रयो भार्यागमा ज्ञेया यत्र धर्मो न नश्यति ।
पञ्चान्याः पश्चिमा ब्रूहि भार्यास्तासां च ये सुताः ॥ ५२॥

नारदः—

सगोत्रभार्या क्रीता च परभार्या च कारिता ।
गतागता च या भार्या आश्रमादाहृता च या ॥ ५३॥

एता भार्यागमाः पञ्च पुनर्भार्या भवन्ति याः ।

---

* सर्वेषु कोशेषु अत्रैवाध्यायसमाप्तिर्दृश्यते

एता भार्या नृणां गम्यास् तत्पुत्रा हव्यकव्यदाः ॥* ५४॥

मार्कण्डेयः—

श्रुता भार्याश्च पुत्राश्च विस्तरेण महामुने ।
आश्रमस्थाः कथं नार्यो न दुष्यन्तीति ब्रूहि भो ॥ ५५॥

नारदः—

आश्रमस्थासु नारीषु बान्धवत्वं प्रणश्यति ।
नष्टबंधूया भवन्त्येता [1]बन्धूनामथ भर्तृणाम् ॥ ५६॥

परदारा मुक्तदोषास् ता नार्यो श्रमसंस्थिताः ।
स्वयमीशास्स्वदेहानां काम्यास्तद्गतमानसाः ॥ ५७॥

एवं नार्यो न दुष्यन्ति नराणां तत्प्रसूतिषु ।
धर्मपत्न्यो भवन्त्येतास् सपुत्रा हव्यकव्यदाः ॥ ५८॥

मार्कण्डेयः—

परस्य भार्या या पूर्वं मृते भर्तरि या पुनः ।
अन्यं भजति भर्तारं ससुता ह्यसुता कथम् ॥ ५९॥

नारदः—

असुता वा प्रसूता वा गृहस्थानां परस्त्रियः ।
परामृष्टेति ता वर्ज्या धर्माचारेषु दूषिताः ॥ ६०॥

---

* सर्वेषु कोशेषु अलैवाभ्यायसमाप्तिर्दृश्यते

1. क-घ—हृतः अष्टौ पादा न सन्ति

न चासां हव्यकव्यानि प्रतिगृह्णन्ति देवताः ।
यस्तासु जनयेत् पुत्रान् न तैः पुत्रमवाप्नुयात् ॥ ६१॥

मार्कण्डेयः—

[1]परक्षेत्रेषु यो बीजं चापल्याद्विसृजेन्नरः ।
कथं पुत्रफलं तस्य भवेत्तद्ब्रूहि सत्तम ॥ ६२॥

नारदः—

अस्वामिके परक्षेत्रे यो नरो बीजमुत्सृजेत् ।
स्वयंवृतो श्रमस्थायां तद्बीजं न विनश्यति ॥ ६३॥

परक्षेत्रेषु यो बीजं नरो दर्पात् समुत्सृजेत् ।
क्षेत्रिकस्यैव तद्बीजं न बीजी लभते फलम् ॥ ६४॥

नातः परमधर्म्यं चाप्यधर्म्यं तथोत्तरम् ।
गर्भादीनां च [2]बहुभिषु ताश्च त्याज्यास्समेष्वपि ॥ ६५॥

मार्कण्डेयः—

अथ ये परदारेषु पुत्रा जायन्ति नारद ।
कस्य ते बन्धुदायादा भवन्ति परमद्युते ॥ ६६॥

नारदः—

परदारेषु जायेते द्वौ पुत्रौ कुण्डगोलकौ ।
जीवत्यथ पतौ कुण्डो मृते भर्तरि गोलकः ॥ ६७॥

---

1. ख-घ-अर्धचतुष्टयं नास्ति 2. क—सर्वेषां

ते च जाताः परक्षेत्रे देहिनां प्रेत्य चेह च ।
दत्तानि हव्यकव्यानि नाशयन्त्यथ दातृणाम् ॥ ६८॥

पितुर्हि नरकायैते गोलकस्तु विशेषतः ।
चण्डालतुल्यौ तज्ज्ञौ हि परत्रेह च नश्यतः ॥ ६९॥

मार्कण्डेयः—

कस्य ते गर्हिताः पुत्राः पितृणां हव्यकव्यदाः ।
यस्य क्षेत्रे प्रसूयन्ते यो वा ताञ्जनयेत् सुतान् ॥ ७०॥

नारदः—

क्षेत्रिकश्चैव बीजी च द्वावेतौ निरयं गतौ ।
न रक्षति च यो दारान् परदारांश्च गच्छति ॥ ७१॥

गर्हितास्ते नरा नित्यं धर्माचारबहिष्कृताः ।
कुण्डो भोक्ता च भोजी च कुत्सितः पितृदैवतैः ॥ ७२॥

मार्कण्डेयः—

तथैते गर्हिताः पुत्रा हव्यकव्यानि नारद ।
कस्य नित्यं प्रयच्छन्ति धर्मो वा तेषु किं फलम् ॥ ७३॥

नारदः—

यातुधानाः पिशाचाश्च प्रतिगृह्णन्ति तैर्हुतम् ।
हव्यं कव्यं च तैर्दत्तं ये च भूता निशाचराः ॥ ७४॥

मार्कण्डेयः—

अथ ते राक्षसाः प्रीताः किं प्रयच्छन्ति दातृणाम् ।
किं वा धर्मफलं तेषां भवेत्तदृषिसत्तम ॥ ७५॥

नारदः—

न दत्तं नश्यते किञ्चित् सर्वभूतेषु दातृणाम् ।
प्रेत्य चेह च तां पुष्टिम् उपाश्नन्ति प्रदायिनः ॥ ७६॥

मार्कण्डेयः—

अथ गोलककुण्डाभ्यां सन्ततिर्या भविष्यति ।
तयोर्ये बान्धवाः केचिन् प्रदास्यन्ति कथं तु तत् ॥ ७७॥

नारदः—

साध्वीजातास्सुतास्तेषां तां वृत्तिमनुतिष्ठताम् ।
प्रीणन्ति पितृदैवत्यम् हव्यकव्यं समाहिताः ॥ ७८॥

एवं गोलककुण्डाभ्यां ये च वर्णापदेशिनः ।
हव्यं कव्यं च शुद्धानां प्रतिगृह्णन्ति देवताः ॥ ७९॥

मार्कण्डेयः—

श्रुतं नराणां चापल्यं परस्त्रीषु प्रजायताम् ।
प्रमदानां तु चापल्ये दोषमिच्छामि वेदितुम् ॥ ८०॥

---

* सर्वेषु कोशेषु अत्रैवाध्यायसमाप्तिर्दृश्यते

नारदः—

एकवर्णे विदोषं तु गमनं पूर्वकालिकम् ।
धाता च समनुज्ञातो विष्णुना तत्तथाऽकरोत् ॥ ८१॥

भगलिङ्गे महाप्राज्ञ पूर्वमेव प्रजापतिः ।
ससर्ज ताभ्यां संयोगम् अनुज्ञातश्चकार सः ॥ ८२॥

अथ विष्णुप्रसादेन भगो दत्तवरः किल ।
तेन चैव प्रसादेन सर्वाँल्लोकानुपाश्नुते ॥ ८३॥

तस्मात्तु पुरुषे दोषो ह्यधिको नात्र संशयः ।
विना गर्भं सवर्णेषु न त्याज्या गमनात् स्त्रियः ॥ ८४॥

प्रायश्चित्तं यथान्यायं दण्डं कुर्यात् स पण्डितः ।
[1]बहिर्वा दर्शनं स्नानं स्वनयं त्रितयं निशि ॥ ८५॥

भूमौ च भस्मशयनं दानं भोगविवर्जितम् ।
[2]दोषगौरवतः कालो द्रव्यगौरवमेव च ॥ ८६॥

मर्यादा स्थापिता पूर्वम् इति तीर्थान्तरं गते ॥ ८७

तद्योषितां तु दीर्घायो नास्ति दोषो व्यतिक्रमे ।
भगस्तीर्थान्तरे शुद्धो विष्णोस्तु वचनादिह ॥ ८८

---

1. क—श्चभिर्वा दंशनं स्नानं स्वनयं
2. ख—कस्य ते गर्हिताः पुत्राः पितॄणां हव्यकव्यदाः ।
यस्य क्षेत्रे प्रसूयन्ते यो वा तान् जनयेत् सुतान् ॥

[अधिकः पाठः]

रक्ष्यश्चैवान्वसंवादैर् अन्य[1]देहाद्विमोक्षणैः ।
आसां शुद्धौ विशेषेण कर्मणा फलमश्नुते ॥ ८९

नैता वाच्या न वै वध्या न क्रेश्याश्शुभमिच्छता ।
विष्णुप्रसादादित्येष भगस्तीर्थान्तरं गतः ॥ ९०

मासि मासि ऋतुस्तासां दुष्कृतान्यपकर्षति ॥ ९०॥

स्त्रियस्तोषकरा नृणां स्त्रियः पुष्टिप्रदास्सदा ।
पुत्रसेतुप्रतिष्ठाश्च स्त्रियो लोके महाद्युते ॥ ९१॥

मार्कण्डेयः—

श्रुतं बलं प्रभावश्च योषितां मुनिसत्तम ।
एकस्य बहुभार्यस्य धर्ममिच्छामि वेदितुम् ॥ ९२॥

नारदः—

बहुभार्यासु सक्तस्य नारी[2]भोगेषु देहिनः ।
ऋतौ विमुञ्चमानस्य सान्निध्ये भ्रूणहा स्मृतः ॥ ९३॥

वृद्धां वन्ध्यां [3]सुव्रतां च मृतापत्यामपुष्पिणीम् ।
कन्यां च बहुपुत्रां च वर्जयन् मुच्यते भयात् ॥ ९४॥

व्याधितो बन्धनस्थो वा प्रवासेष्वथ पर्वसु ।
ऋतुकाले तु नारीणां भ्रूणहत्यां प्रमुञ्चति ॥ ९५॥

---

1. क-घ—गर्भा ख—गेहा
* सर्वेषु कोशेषु अत्रैवाध्यायसमाप्तिर्दृश्यते
2. क-घ—भोग्येषु भोगिनः 3. क-ख-घ—सुवृत्तां

मार्कण्डेयः—

वैश्यनारीषु वै जाताः परप्रेष्यासु वा सुताः ।
कस्य ते बन्धुदायादा भवन्ति हि महामुने ॥ ९६॥

नारदः—

पण्यस्त्रीषु प्रसूता ये यस्य स्त्री तस्य ते सुताः ।
क्रयाच्च कृत्रिमाः पुत्राः प्रदानाच्चैव दत्रिमाः ॥ ९७॥

मार्कण्डेयः—

[1]पण्यनारीष्वनियतः पुंसोऽर्थो वर्तते ध्रुवम् ।
अत्र चाहितगर्भायाः कस्य पुत्रं वदन्ति तम् ॥ ९८॥

नारदः—

तीर्थव्रतासु नारीषु न्यायतो योऽभिगच्छति ।
ऋतौ तस्य भवेद्गर्भो यं वा नारी न शङ्कते ॥ ९९॥

मार्कण्डेयः—

नराणां त्यजतां भार्यां कामक्रोधगुणान्विताम् ।
अप्रसूतां प्रसूतां वा तेषां पृच्छामि निष्कृतिम् ॥ १००॥

नारदः—

अपापां त्यजमानस्य साध्वीं मत्त्वैवमादितः ।
[2]आत्मवंशस्वधर्मौ तु त्यजतां निष्कृतिर्न तु ॥ १०१॥

---

1. क-ख—अर्धचतुष्टयं नास्ति
2. क-घ—आत्मवश्यां हि त्यजतो निष्कृतिर्नोपलभ्यते [पाठान्तरम्]

[1]यो नरस्त्यजते भार्यां पुष्पिणीमप्रसूतिकाम् ।
स नष्टवंशः पितृभिर् युक्तस्त्यज्येत दैवतैः ॥ १०२॥

भार्यामपत्यसञ्जातां प्रसूतां पुत्रपौत्रिणीम् ।
पुत्रदारपरित्यागी न सम्प्राप्नोति निष्कृतिम् ॥ १०३॥

एवं हि भार्यां त्यजतां नराणां नास्ति निष्कृतिः ।
नार्हन्ति प्रमदास्त्यक्तुं पुत्रपौत्रप्रतिष्ठिताः ॥ १०४॥

मार्कण्डेयः—

कीदृशीं सन्त्यजन् भार्यां नरो दोषैर्न लिप्यते ।
एतदिच्छामि तत्त्वेन विज्ञातुमृषिसत्तम ॥ १०५॥

नारदः—

मोक्षधर्मस्थितानां तु अन्योन्यमनुजानताम् ।
भार्यापतीनां मुक्तानाम् अधर्मो न विधीयते ॥ १०६॥

अन्यसङ्गां गतापत्यां शूद्रगां पर[2]गामिनीम् ।
परीक्ष्य त्यजमानानां नराणां नास्ति पातकम् ॥ १०७॥

पातकेऽपि तु भर्तव्यौ द्वौ तु माता पिता तथा ॥ १०८

मार्कण्डेयः—

भार्यायां व्यभिचारिण्यां नरस्य त्यजतो रुषा ।
कथं धर्मोऽप्यधर्मो वा भवतीह महामते ॥ १०९

1. घ—पञ्चार्धानि न सन्ति 2. क-घ—हारिणीम्

नारदः—

अनृतेऽपि हि सत्ये वा यो नारीं दूषितां त्यजेत् ।
अरक्षमाणस्त्वां भार्यां नरो भवति भ्रूणहा ॥ ११०

अपत्यहेतोर्या नारी भर्तारमतिलङ्घयेत् ।
लोलेन्द्रियेति सा रक्ष्या न सन्त्याज्या कथञ्चन ॥ १११

नद्यश्च नार्यश्च समस्वभावा
नैता दुष्यन्ति नरावगाढाः ।
स्रोतांसि नद्यो वहते निपातं
नारी रजोभिः पुनरेति शौचम् ॥ ११२

एवं नार्यो न दुष्यन्ति व्यभिचारेऽपि भर्तृणाम् ।
मासि मासि भवेद्रागस् ततश्शुद्धा भवन्त्युत ॥ ११३

मार्कण्डेयः—

कानि तीर्थानि भगवन् नृणां देहाश्रितानि वै ।
तानि वै शंस भगवन् याथातथ्येन पृच्छतः ॥ ११४

सर्वतीर्थेषु [1]तीर्थज्ञ किं तीर्थं परमं नृणाम् ।
[2]यत्रोपस्पृश्य पूतो यो नरो भवति नित्यशः ॥ ११५

नारदः—

देवर्षिपितृतीर्थानि ब्राह्मं मध्येऽथ वैष्णवम् ।

1. क-घ—सर्वज्ञ 2. क-घ—अर्धचतुष्टयं नास्ति

नृणां तीर्थानि पञ्चाहुः पाणौ सन्निहितानि वै ॥ ११६
आद्यतीर्थं तु तीर्थानां वैष्णवो भाग उच्यते ।
यत्रोपस्पृश्य वर्णानां चतुर्णां वर्धते कुलम् ॥ ११७
पितृदैवतकार्याणि वर्धन्ते प्रेत्य चेह च ॥ ११७॥

मार्कण्डेयः—

[1]नराणां कामवृत्तानां या नार्यो निरवग्रहाः ।
यासामभिग्रहो नास्ति ता मे कथय नारद ॥ ११८॥

नारदः—

पशुर्वश्या नटी गोपी तान्तुकी तुन्नवायिकी ।
नारी किराती शबरी नर्तकी चानवग्रहा ॥ ११९॥

मार्कण्डेयः—

एतासु जाता नारीषु सर्ववर्णेषु ये सुताः ।
[2]तेषु के बन्धुदायादा भवन्ति ऋषिसत्तम ॥ १२०॥

नारदः—

य एताः परिगृह्णन्ति तेषामेव हि ते सुताः ।
सर्वत्र तु प्रवृत्तासु बीजं नश्यति देहिनाम् ॥ १२१॥

मार्कण्डेयः—

सर्वस्त्रीषु प्रवृत्ताश्च साधुवेदविवर्जिताः ।
मानवाः काण्डपृष्ठाश्च [3]वेदमन्त्रबहिष्कृताः ॥ १२२॥

1. क-घ—नारीणां 2. अ—केषु
3. घ—अयं पादो नास्ति

नियुक्ता हव्यकव्येषु [1]तेषां दत्तं कथं भवेत् ॥ १२३

नारदः—

नार्हन्ति हव्यकव्यानि सावित्रीवर्जिता द्विजाः ।
दौत्यं नाम प्रदानं तद् यथा शूद्रेषु वै तथा ॥ १२४

मार्कण्डेयः—

धर्मेष्वधिकृतानां तु नराणां मुह्यते मनः ।
कथं न विघ्नं भवति एतदिच्छामि वेदितुम् ॥ १२५

नारदः—

अर्थाश्च नार्यश्च समानमेतच्
छ्रेयांसि पुंसामिह मोहयन्ति ।
रतिप्रमोदात् प्रमदा हरन्ति
भोगैर्धनं चाप्युपहन्ति धर्मान् ॥ १२६

हव्यं कव्यं च [2]धर्मात्मा सर्वं तच्छ्रोत्रियोऽर्हति ।
दत्तं हि श्रोत्रिये साधौ ज्वलिताग्नाविवाहुतिः ॥ १२७

मार्कण्डेयः—

श्रोत्रियाणां कुले जाता वेदार्थविदितात्मनाम् ।
हित्वा कस्मात् त्रयीं विद्यां वार्तां वृत्तिमुपाश्रिताः ॥ १२८

नारदः—

चातुर्वर्ण्ये पुरा न्यस्तं सुविद्वत्सु द्विजातिषु ।

1. क-ख—इतः अष्टौ पादा न सन्ति 2. क-घ—यत् किञ्चि

तस्माद्वर्णैस्संविभज्या वृत्तिस्सङ्करवर्जिता ॥ १२९

मार्कण्डेयः—

ये चान्ये श्रोत्रिया जातास् संस्कृताः पुत्रगृध्नुभिः ।
असंस्कृताश्श्रोत्रियजास् संस्कृता [1]ज्ञानिजाः कथम् ॥ १३०

नारदः—

असंस्कारो वैदिकश्च स मान्योऽश्रोत्रियात्मजः ।
शुद्धान्वयश्श्रोत्रियस्तु सुविद्वद्भिस्समोऽन्यथा ॥ १३१

अनधीयानधीयांश्च वेदसंस्कारवर्जिताः ।
तस्मात्ते वेदविज्ञाऽपि विप्राश्श्रुतिनिकारिणः ॥ १३२

ब्रह्मराशौ पुरा सृष्टा वेदसंस्कारसंस्कृताः ।
तस्मात्तेष्वेव ते जातास् साधवः कुलधारिणः ॥ १३३

मार्कण्डेयः—

स्वयं क्रीतासु प्रेष्यासु प्रसूयन्ते तु ये नराः ।
कस्य नार्यस्सुताश्चैव भवन्ति ऋषिसत्तम ॥ १३४

नारदः—

स्वदास्यां यो नरो मोहात् प्रसूयेत स पापकृत् ।
इहाभिनिन्दितः प्रेत्य अपत्यं प्रेष्यतां नयेत् ॥ १३५

सा तस्य भार्या पुत्रा ये हव्यकव्यप्रदा न च ।
तस्या ये बान्धवाः केचिद् विषक्ताः प्रेष्यतां गताः ॥ १३६

1. क—ज्ञानजाः अ-ख—ज्ञानिनः

सर्वे तस्यास्तु सम्बन्धान्मुच्यन्ते प्रेष्यकर्मसु ॥ १३६॥

एतत्ते कथितं सर्वं यदभिव्याहृतं त्वया ।
अथवा संशयः कश्चिद् भूयस्सम्प्रष्टुमर्हसि ॥ १३७॥

मार्कण्डेयः—

अमिथ्यादर्शनो लोके नारदस्सर्वकोविदः ।
प्रत्यक्षदर्शी लोकानां स्वयम्भूरिव सत्तमः ॥ १३८॥

भीष्मः—

इति सम्भाष्य ऋषिभिर् मार्कण्डेयो महातपाः ।
नारदं चापि सत्कृत्य तेन चैवाभिसत्कृतः ॥ १३९॥

आमन्त्रयित्वा ऋषिभिः प्रययावाश्रमं मुनिः ॥ १४०

ऋषयश्चापि तीर्थानां परिचर्यां प्रचक्रमुः ॥ १४०॥

[1]सुक्षेत्रबीजसंस्कारविशुद्धो ब्रह्मचर्यया ।
नित्यनैमित्तिकात् स्नातो मनश्शुद्ध्या च शुद्ध्यति ॥ १४१॥

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां
अनुशासनपर्वणि सप्तविंशोऽध्यायः ॥ २७ ॥
॥ ८९॥ आनुशासनिकपर्वणि सप्तविंशोऽध्यायः ॥ २७ ॥
[अस्मिन्नध्याये १४१॥ श्लोकाः]

---

1. क-घ—इदमर्धद्वयं नास्ति

॥ अष्टाविंशोऽध्यायः ॥

भीष्मेण युधिष्ठिरं प्रति दाने पात्राणां लक्षणादिकथनम् ॥

युधिष्ठिरः—

किमाहुर्भरतश्रेष्ठ पात्रं विप्रास्सनातनम् ।
ब्राह्मणं लिङ्गिनं चेह ब्राह्मणं वाऽप्यलिङ्गिनम् ॥ १

भीष्मः—

[1]श्रद्धापूतो नरस्तात दुर्दान्तोऽपि न संशयः ।
पूतो भवति सर्वत्र किं पुनस्त्वं महामते ॥ २

युधिष्ठिरः—

न ब्राह्मणं परीक्षेत दैवेषु सततं नरः ।
[2]कव्यप्रदाने तु बुधाः परीक्ष्यं ब्राह्मणं विदुः ॥ ३

भीष्मः—

दैवप्रमादादिज्यन्ते [3]द्विजन्मानो न संशयः ॥ ३॥

[4]सुवृत्तमभिपन्नाय लिङ्गिने चेतराय वा ।
देयमाहुर्महाराज उभावेतौ तपस्विनौ ॥ ४॥

---

1. क-घ—शुद्धः पूतो
2. क-घ—अथ कन्याप्रदानेषु
3. क-घ—यजमाना न
4. घ—इदमर्धचतुष्टयं नास्ति घ—अर्धपञ्चकं नास्ति

युधिष्ठिरः—

श्रद्धया परया पूतो यः प्रयच्छेद्द्विजातये ।
हव्यं कव्यं तथा दानं न दोषस्यात् पितामह ॥ ५॥

भीष्मः—

ब्राह्मणाः पात्रभूताश्च शुद्धा नैवं पितृष्विह[1] ॥ ६

युधिष्ठिरः—

अपूर्वोऽप्यथवा विद्वान् सम्बन्धी वाऽथ योभवेत् ।
तपस्वी यज्ञशीलो वा कथं पात्रं भवेच्च सः ॥ ७

भीष्मः—

कुलीनः कर्मकृद्विद्वांस् तथा चाप्यनृशंसवान् ।
ह्रीमानृजुस्सत्यवादी पात्रं पूर्वे तु ते त्रयः ॥ ८

अत्रेदं शृणु मे पार्थ चतुर्णां तेजसां मतम् ।
पृथिव्याः काश्यपस्याग्नेर् मार्कण्डेयस्य चैव हि ॥ ९

पृथिवी—

यथा महार्णवे क्षिप्तस् स्फीतो लोष्टो विनश्यति ।
तथा दुश्चरितं सर्वम् त्रयीनित्ये निमज्जति ॥ १०

---

1. घ—पूतो भवति सर्वत्र किं पुनस्त्वं महामते ।
ब्राह्मणाः पात्रभूताश्च शुद्धा नैवं पितृष्वपि ॥ [अधिकः पाठः]

काश्यपः—

सर्वे च वेदास्सह षड्भिरङ्गैस्
साङ्ग्यं पुराणं च कुले च जन्म ।
नैतानि सर्वाणि गतिर्भवन्ति
शीलव्यपेतस्य नृप द्विजस्य ॥ ११

अग्निः—

अधीयानः पण्डितंमन्यमानो
यो विद्यया हन्ति यशः परेषाम् ।
ब्रह्मन् स तेन लभते ब्रह्मवध्यां
लोकास्तस्य घ्नन्तवन्तो भवन्ति ॥ १२

मार्कण्डेयः—

अश्वमेधसहस्रं च सत्यं च तुलया धृतम् ।
[1]नाभिजानामि यज्ञं तु सत्यस्यार्धमवाप्नुयात् ॥ १३

भीष्मः—

इत्युक्त्वा ते तथा जग्मुश्चत्वारोऽमिततेजसः ।
पृथिवी काश्यपोऽग्निश्च प्रकृष्टायुश्च भार्गवः ॥ १४

युधिष्ठिरः—

यदिदं ब्राह्मणा लोके व्रतिनो भुञ्जते हविः ।
[2]भुक्तं ब्राह्मणकामाय कथं तत् सुकृतं भवेत् ॥ १५

---

1. क-घ—अभिजानामि
2. क—भक्तं घ—भक्त

भीष्मः—

[1]अदृष्टतो ये राजेन्द्र ब्राह्मणा वेदपारगाः ।
[2]भुञ्जते ब्रह्मकामाय व्रतलुप्ता भवन्ति ते ॥ १६

युधिष्ठिरः—

अनेकान्तं बहुद्वारं धर्ममाहुर्मनीषिणः ।
किं निमित्तं भवेत्तत्र तन्मे ब्रूहि पितामह ॥ १७

भीष्मः—

अहिंसा सत्यमस्तेयम् आनृशंस्यं दमश्शमः ।
आर्जवं चैव राजेन्द्र निश्चितं धर्मलक्षणम् ॥ १८

ये तु धर्मं प्रशंसन्तश् चरन्ति पृथिवीमिमाम् ।
अनाचरन्तस्तद्धर्मं [3]सङ्करानियताः प्रभाः ॥ १९

तेभ्यो रत्नं हिरण्यं वा गाश्चाश्वांश्च ददाति यः ।
दशवर्षाणि विष्ठां स भुङ्क्ते निरयमाश्रितः ॥ २०

धनेन पुल्कसानां च तथैवान्तावसायिनाम् ।
कृतं कर्माकृतं वाऽपि रागमोहेन जल्पताम् ॥ २१

वैश्वदेवं च ये मूढा विप्राय ब्रह्मचारिणे ।
न ददन्तीह राजेन्द्र ते लोकान् भुञ्जतेऽशुभान् ॥ २२

---

1. अ-क-ख—आदिष्टितो
2. घ—न भुञ्जते ब्रह्मकामा व्रतलुब्धा
3.—सङ्करे नियताः प्रभो-इतिचेत् साधीयान् त्यस्तिपाठः

युधिष्ठिरः—

किं परं ब्रह्मचर्यं स्यात् किं परं ब्रह्मलक्षणम् ।
किं च श्रेष्ठतमं शौचं तन्मे ब्रूहि पितामह ॥ २३

भीष्मः—

[1]ब्रह्मचर्यं परं तात मधुमांसस्य वर्जनम् ।
मर्यादायां स्थितो धर्मश् शमश्शौचस्य लक्षणम् ॥ २४

युधिष्ठिरः—

कस्मिन् काले चरेदर्थं कस्मिन् काले शमं चरेत् ।
कस्मिन् काले सुखी च स्यात् तन्मे ब्रूहि पितामह ॥ २५

भीष्मः—

काल्यमर्थं निषेवेत [2]ततो धर्ममनन्तरम् ।
पश्चात् कामं निषेवेत न च गच्छेत् ससङ्गताम् ॥ २६

ब्राह्मणान् बहु मन्येत गुरूंश्चैवाभिपूजयेत् ।
सर्वभूतानुलोमश्च मृदुशीलः प्रियंवदः ॥ २७

अधिकारो यदनृतं राजगामि च पैशुनम् ।
गुरोश्चालीकनिर्बन्धस् समानि ब्रह्महत्यया ॥ २८

प्रहरेन्न नरेन्द्रेषु न गां हन्यान्न पीडयेत् ।
भ्रूणहत्यासमं चैतद् उभयं यो निषेवते ॥ २९

1. अ—इदमर्धचतुष्टयं नास्ति
2. अ—अयं पादोऽनन्तरश्च न स्तः

नाग्निं परित्यजेज्जातु न च [1]देवान् परित्यजेत् ।
न च ब्राह्मणमाक्रोशेत् समं तद्ब्रह्महत्यया ॥ ३०

युधिष्ठिरः—

कीदृशानां च दातव्यं केषां दत्तं महत् फलम् ।
कीदृशास्साधवो विप्रास् तन्मे ब्रूहि पितामह ॥ ३१

भीष्मः—

अक्रोधना धर्मपरास् सत्यनित्या दमे रताः ।
तादृशास्साधवो विप्रास् तेषां दत्तं महत् फलम् ॥ ३२

अमानिनस्सर्वसहा दृष्टान्ता विजितेन्द्रियाः ।
सर्वभूतहिता मैत्रास् तेभ्यो दत्तं महत् फलम् ॥ ३३

अलुब्धाश्शुचयो वैद्या ह्रीमन्तस्सत्यवादिनः ।
स्वकर्मनिरता ये च तेभ्यो दत्तं महत् फलम् ॥ ३४

साङ्गांश्च चतुरो वेदान् योऽधीते वेदपारगः ।
षड्भ्योऽनिवृत्तः कर्मभ्यो वेदस्य जपतत्परः ॥ ३५

सहस्रगुणमाप्नोति गुणार्हाय प्रदायकः ॥ ३५॥

प्रज्ञाश्रुताभ्यां वृत्तेन शीलेन च समन्वितः ।
तारयेत कुलं कृत्स्नं [2]एकोऽपीह द्विजर्षभः ॥ ३६॥

गामश्वं वित्तमन्नं वा तद्विधे प्रतिपादयेत् ।

---

1. अ-ख—वेदान्
2. क-घ—इतः षट् पादा न सन्ति

द्रव्याणि चान्यानि तथा प्रेत्यभावे न शोचति ॥ ३७॥

तारयेत कुलं कृत्स्नं तृप्त एको द्विजोत्तमः ।
तृप्ते तृप्तास्सर्वदेवाः पितरो मुनयोऽपि च ॥ ३८॥

निशम्य च गुणोपेतान् ब्राह्मणान् साधुसम्मतान् ।
दूरादप्यानयेत् कृत्ये सर्वतश्चापि पूजयेत् ॥ ३९॥

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां
अनुशासनपर्वणि अष्टाविंशोऽध्यायः ॥ २८ ॥
॥ ८९ ॥ आनुशासनिकपर्वणि अष्टाविंशोऽध्यायः ॥ २८ ॥
[अस्मिन्नध्याये ३९॥ श्लोकाः]

॥ एकोनत्रिंशोऽध्यायः ॥

भीष्मेण युधिष्ठिरं प्रति श्राद्धे निमन्त्रणार्हानर्हब्राह्मणलक्षणादिकथनम्॥

युधिष्ठिरः—

श्राद्धकाले च दैवे च धर्मे चापि पितामह ।
इच्छामि तत् त्वयाऽऽख्यातुं विहितं यत् सुरर्षिभिः ॥ १

भीष्मः—

दैवं पौर्वाह्णिके कुर्याद् अपराह्णे तु पैतृकम् ।
मङ्गलाचारसम्पन्नः कृतशौचः प्रयत्नवान् ॥ २

मनुष्याणां तु मध्याह्ने प्रदद्यादुपपत्तितः ।
कालहीनं च यद्दानं तद्भागं रक्षसां विदुः ॥ ३

[1]परोच्छिष्टं यत्तु कृतं परिभुक्तं च यद्भवेत् ।
दैवे पित्र्ये च सततं तद्भागं रक्षसां विदुः ॥ ४

लङ्घितं चावलीढं च कालपूर्वं च यत् कृतम् ।
रजस्वलाभिमृष्टं च तद्भागं रक्षसां विदुः ॥ ५

[2]केशकीटावपतितं क्षुतं श्वभिरवेक्षितम् ।
रुदितं चावधूतं च तद्भागं रक्षसां विदुः ॥ ६

निरोङ्कारेण यद्दुक्तं सशस्त्रेण च भारत ।
दुरात्मना च यद्दुक्तं तद्भागं रक्षसां विदुः ॥ ७

आज्याहुतिं विना चैव यत् किञ्चित् परिविष्यते ।
दुराचारैश्च यद्दुक्तं तद्भागं रक्षसां विदुः ॥ ८

ये भागा रक्षसां प्रोक्तास् त उक्ता भरतर्षभ ।
अत ऊर्ध्वं विसर्गस्य परीक्षां ब्राह्मणे शृणु ॥ ९

यावन्तः पतिताः प्रोक्ता जडोन्मत्तास्तथैव च ।
दैवे चाप्यथ वा पित्र्ये राजन्नार्हन्ति केतनम् ॥ १०

श्वित्री कुष्ठी च क्लीवश्च तथा यक्ष्महतश्च यः ।

1. अ—अर्धद्वयं नास्ति
2. अ—अर्धद्वयं नास्ति

अपस्मारी च यश्चापि राजन् नार्हन्ति सत्कृतिम् ॥ ११

चिकित्सका देवलका वृथा नियमधारिणः ।
सोमविक्रयिणश्चैव श्राद्धे नार्हन्ति केतनम् ॥ १२

गायका नर्तकाश्चैव प्लवका वादकास्तथा ।
दूतका यौतकाश्चैव राजन् नार्हन्ति केतनम् ॥ १३

[1]होतारो वृषलानां च वृषलाध्यापकास्तथा ।
तथा वृषलमित्राश्च वृषलान्नभुजस्तथा ॥ १४

[2]अनग्नयश्च ये विप्रा मृतनिर्यातकास्तथा ।
स्तेना मित्रद्रुहश्चैव राजन् नार्हन्ति केतनम् ॥ १५

[3]अपरिज्ञातपूर्वश्च गणपूर्वश्च भारत ।
पुत्रिकापूर्वपुत्रश्च श्राद्धे नार्हन्ति केतनम् ॥ १६

ऋणकर्ता च यो राजन् यश्च वार्धुषिको द्विजः ।
प्राणिविक्रयवृत्तिश्च राजन् नार्हन्ति केतनम् ॥ १७

अनुयोक्ता च यो विप्रो ह्यनुयुक्तश्च भारत ।
नार्हतस्तावपि श्राद्धं ब्रह्मविक्रयिकौ हि तौ ॥ १८

अग्रणीर्यः कृतः पूर्वं वर्णावरपरिग्रहः ।
ब्राह्मणस्सर्वविद्योऽपि राजन् नार्हति केतनम् ॥ १९

1. अ—इदमर्धद्वयं नास्ति 2. अ-क-घ—नास्त्यर्धद्वयमिदम्
3. क-घ—अर्धचतुष्टयं नास्ति

[1]स्त्रीपूर्वाः परपुत्राश्च [2]यावन्तो भरतर्षभ ।
अजपा ब्राह्मणाश्चैव श्राद्धे नार्हन्ति केतनम् ॥ २०

श्राद्धे दैवे च निर्दिष्टा ब्राह्मणा भरतर्षभ ।
दातुः प्रतिग्रहीतुश्च शृणुष्वानुग्रहं पुनः ॥ २१

चीर्णव्रता गुणैर्युक्ता भवेयुर्ये च [3]कर्शिताः ।
सावित्रीज्ञाः क्रियावन्तस् ते राजन् केतनक्षमाः ॥ २२

क्षत्रधर्माणमप्यादौ केतयेत् कुशलं पुनः ।
न त्वेव वणिजं तात श्राद्धेषु परिकल्पयेत् ॥ २३

अग्निहोत्री च यो विप्रो ग्रामयाजी च यो भवेत् ।
अस्तेनश्चातियज्ञश्च स राजन् केतनक्षमः ॥ २४

[4]अकल्कः क्रोधकल्कश्च ब्राह्मणो भरतर्षभ ।
ससंज्ञो भैक्षवृत्तिश्च स राजन् केतनक्षमः ॥ २५

अव्रती कितवस्तेनः प्राणिविक्रयिको वणिक् ।
सनिष्कृतिः पुनस्सोमं पीतवान् केतनक्षमः ॥ २६

आर्जयित्वा धनं पूर्वं दारुणैः [5]क्रूरकर्मभिः ।
भवेत् सर्वातिथिः पश्चात् सोऽपि केतनमर्हति ॥ २७

---

1. अ—नास्त्यर्धद्वयम्
2. ख-घ—सन्ध्योपासनवर्जिताः
3. क-घ—कर्षकाः
4. क-घ—अकल्ककोऽथ कल्कश्च
5. क-ख-घ—कृतक

ब्रह्मविक्रयनिर्विष्टं स्त्रिया यच्चार्जितं धनम् ।
अदेयं पितृदेवेभ्यो यच्च क्लीबादुपार्जितम् ॥ २८

क्रियमाणेऽ[1]पवर्गे तु यो द्विजो भरतर्षभ ।
न व्याहरति यद्युक्तं तस्याधर्मो गवानृतम् ॥ २९

श्राद्धस्य ब्राह्मणः कालः प्राप्तं दधि घृतं तथा ।
सोमक्षयश्च मांसं च यदारण्यं युधिष्ठिर ॥ ३०

[2]मुहूर्तानां त्रयं पूर्वम् अह्नः प्रातरिति स्मृतम् ।
जपध्यानादिभिस्तस्मिन् विप्रैः कार्यं शुभव्रतम् ॥ ३१

सङ्गवाख्यं त्रिभागं तु मध्याह्नस्त्रिमुहूर्तकः ।
लौकिकं सङ्गवेऽर्थं च स्नानादि ह्यथ मध्यमे ॥ ३२

चतुर्थमपराह्णं तु त्रिमुहूर्तं तु पित्र्यकम् ।
सायाह्नस्त्रिमुहूर्तं च मध्यमं कविभिस्स्मृतम् ॥ ३३

चतुर्थे त्वपराह्णाख्ये श्राद्धं कुर्यात् सदा नृप ॥ ३३॥

प्रागुदीचीमुखा विप्रास् स्युर्विश्वेदेवदक्षिणाः ।
श्रावितेषु सुतृप्तेषु पिण्डं दद्यात् सदक्षिणम् ॥ ३४॥

श्राद्धापवर्गे विप्रस्य दातारो वोऽस्त्विति वीरयेत् ।
क्षत्रियस्याप्यथो ब्रूयात् प्रीयन्तां पितरस्त्विति ॥ ३५॥

---

1. क-घ—विमर्शे तु
2. क-घ—नवार्धानि न सन्ति

अपवर्गे तु वैश्यस्य श्राद्धकर्मणि भारत ।
अक्षय्यं त्वभिधातव्यं स्वस्ति शूद्रस्य भारत ॥ ३६॥

एतदेव निरोङ्कारं शूद्रस्य तु विधीयते ॥ ३७

गोहिंसायां चतुर्भागं पूर्वं विप्रादिकेतनम् ।
वर्णावरेषु भुञ्जानं क्रमाच्छूद्रे चतुर्गुणम् ॥ ३८

नान्यत्र ब्राह्म[1]णोऽश्नीयात् पूर्वं विप्रेण केतितः ॥ ३८॥

अभोजने च दोषस्याद् वर्जयेच्छूद्रकेतनम् ।
शूद्रान्नरसपुष्टाङ्गो द्विजो नोर्ध्वां गतिं व्रजेत् ॥ ३९॥

अशौचिनैव चाश्नीयान्नास्तिको मानवर्जितः ।
न पूर्वं लङ्घयेल्लोभाद् एकवर्णोऽपि पार्थिव ॥ ४०॥

विप्रास्स्मृता भूमिदेवा उपकुर्वाण[2]धर्मिताः ॥ ४१

कर्मणामानुपूर्व्यं च विधिपूर्वं कृतं शृणु ॥ ४१॥

जातकर्मादिकं सर्वं त्रिषु वर्णेषु भारत ।
ब्रह्मक्षत्रेषु मन्त्रोक्ता वैश्यस्य च युधिष्ठिर ॥ ४२॥

विप्रस्य रशना मौञ्जी मौर्वी राजन्यगामिनी ।
बिल्वजा चैव वैश्यस्य धर्म एष युधिष्ठिर ॥ ४३॥

[3]पालाशो द्विजदण्डस्याद् अश्वत्थः क्षत्रियस्य तु ।

---

1. अ-ख-घ—णोऽन्नीयात्
2. घ—वर्जिताः
3. क-घ—अर्धद्वयं नास्ति

औदुम्बरश्च वैश्यस्य धर्म एष युधिष्ठिर ॥ ४४॥

दातुः प्रतिग्रहीतुश्च धर्माधर्माविमौ शृणु ।
ब्राह्मणस्यानृतेऽधर्मः प्रोक्तः पातकसंज्ञितः ॥ ४५॥

चतुर्गुणः क्षत्रियस्य वैश्यस्याष्टगुणस्स्मृतः ॥ ४६

नान्यत्र ब्राह्मणोऽश्नीयात् पूर्वं विप्रेण केतितः ।
अज्ञातो ब्राह्मणो राजंस् तस्याधर्मोऽनृतं स्मृतम् ॥ ४७

अवेदव्रतचारित्रैस् त्रिभिर्वर्णैर्युधिष्ठिर ।
मन्त्रवत् परिविष्यन्ते तेष्वधर्मो गवानृतम् ॥* ४८

युधिष्ठिरः—

पित्र्यं वाऽप्यथ वा दैवं दीयते यत् पितामह ।
एतदिच्छाम्यहं [1]ज्ञातुं दत्तं येषु महाफलम् ॥ ४९

भीष्मः—

[2]येषां दाराः प्रतीक्षन्ते पर्जन्यमिव कर्षकाः ।
उच्छेषपरिशेषं हि तान् भोजय युधिष्ठिर ॥ ५०

चारित्रनिरता राजन् ये कृशाः कृशवृत्तयः ।
अर्थिनश्चोपगच्छन्ति तेषु दत्तं महाफलम् ॥ ५१

---

* सर्वेषु कोशेषु अत्रैवाध्यायसमाप्तिर्दृश्यते

1. क-घ—श्रोतुं 2. अ—इदमर्धचतुष्टयं नास्ति

तद्भुक्ता[1]स्तद्धना राजंस् तद्गृहा तदपाश्रयाः ।
अर्थिनश्च भवन्त्यर्थे तेभ्यो दत्तं महाफलम् ॥ ५२

तस्करेभ्यः परेभ्यो ये [2]हृतस्वा भयदुःखिताः ।
अर्थिनो [3]भोक्तुमिच्छन्ति तेषु दत्तं महत् फलम् ॥ ५३

नित्यार्जवस्य विप्रस्य भैक्षाहारकृतात्मनः ।
साधवो यस्य भिक्षन्ति तस्य दत्तं महाफलम् ॥ ५४

व्रतिनो नियमस्थाश्च ये विप्राश्श्रुतिसम्मताः ।
तत्समाप्त्यर्थमीप्सन्ते तेषु दत्तं महत् फलम् ॥ ५५

अव्युत्क्रान्तास्स्वधर्मेषु पाषण्डसमयेषु च ।
कृशप्रा[4]णाः कृशाहारास् तेषु दत्तं महाफलम् ॥ ५६

व्रतानां पारणार्थाय [5]गुर्वर्थे यज्ञदक्षिणाम् ।
निवेशार्थं च विद्वांसस् तेषां दत्तं महाफलम् ॥ ५७

पित्रोश्च रक्षणार्थाय पुत्रदारार्थमेव वा ।
महाव्याधिविमोक्षाय तेषु दत्तं महाफलम् ॥ ५८

बालास्स्त्रियश्च वाञ्छन्ति सुभक्तं चाप्यसाधनाः ।
स्वर्गमायान्ति दत्त्वैषां निरयान् नोपयान्ति ते ॥ ५९

---

1. क-घ—स्तद्भवा राजंस् तज्जनास्तद
2. क-घ—जातास्तु
3. क-घ—हातु
4. क-घ—पाशाः
5. क-घ—इतः चत्वारः पादा न सन्ति

महानेष विधिर्दाने श्रुतस्ते भरतर्षभ ।
निरयं ये तु गच्छन्ति स्वर्गं चावहितश्शृणु ॥ ६०

गुर्वर्थं [1]भवनार्थं वा वर्जयित्वा युधिष्ठिर ।
येऽनृतं कथयन्त्यन्ये ते वै निरयगामिनः ॥ ६१

[2]परदाराभिहर्तारः परदाराभिमर्शकाः ।
परदारप्रयोक्तारस् ते वै निरयगामिनः ॥ ६२

ये परस्वापहर्तारः परस्वानां च नाशकाः ।
सूचकाश्च परेषां ये ते वै निरयगामिनः ॥ ६३

प्रपाणां च सभानां च सङ्क्रमाणां च भारत ।
आश्रमाणां च भेत्तारो नरा निरयगामिनः ॥ ६४

शूलैर्वा शङ्कुभिर्वाऽपि श्वभ्रैर्वा भरतर्षभ ।
ये मार्गमवतन्वन्ति ते वै निरयगामिनः ॥ ६५

उपाध्यायांश्च भृत्यांश्च रक्तांश्च भरतर्षभ ।
ये त्यजन्ति समर्थांस्तांस् ते वै निरयागामिनः ॥ ६६

वृत्तिच्छेदं गृहच्छेदं दारच्छेदं च भारत ।
मन्त्रच्छेदं तथाऽऽशायास् ते वै निरयगामिनः ॥ ६७

वेदविक्रयिणश्चैव वेदानां चैव दूषकाः ।

---

1. क—हवना
2. अ-क-घ—नास्त्यर्धचतुष्टयम्

[1]लेखिनश्चैव वेदानां ते वै निरयगामिनः ॥ ६८

अप्राप्तदण्डकाश्चैव नासानां वेधकास्तथा ।
वधकाश्च पशूनां च ते वै निरयगामिनः ॥ ६९

क्षान्तान् दान्तांस्तथा प्राज्ञान् दीर्घकालं सहोषितान् ।
त्यजन्ति कृतकृत्या ये ते वै निरयगामिनः ॥ ७०

सूचकास्सन्धिभेत्तारः परवृत्त्युपजीविनः ।
अकृतज्ञाश्च मित्राणां ते वै निरयगामिनः ॥ ७१

अनाथां प्रमदां बालां वृद्धां भीतां तपस्विनीम् ।
वञ्चयन्ति नरा ये च ते वै निरयगामिनः ॥ ७२

[2]पाषण्डा दूषकाश्चैव समयानां च दूषकाः ।
ये प्रत्यवसिताश्चैव ते वै निरयगामिनः ॥ ७३

विषमव्यवहाराश्च विषमाश्चैव वृद्धिषु ।
लाभेषु विषमाश्चैव ते वै निरयगामिनः ॥ ७४

दूतसंव्यवहाराश्च निष्परीक्षाश्च मानवाः ।
प्राणिहिंसाप्रवृत्ताश्च ते वै निरयगामिनः ॥ ७५

कृताशं कृतनिर्देशं कृतभक्तं कृतश्रमम् ।
भेदैर्ये व्यपकर्षन्ति ते वै निरयगामिनः ॥ ७६

---

1. ख-घ—इदमर्धं नास्ति
2. अ—अर्धाष्टकं नास्ति

पर्यश्नन्ति च ये दाराञ् शिशून् [1]भृत्यातिथींस्तथा ।
उत्सन्नपितृदेवेज्यास् ते वै निरयगामिनः ॥ ७७

स्ववर्णाश्रमबाह्याश्च [2]ये लोके नास्तिका नराः ।
[3]विकर्मभिश्च जीवन्ति ते वै निरयगामिनः ॥ ७८

केशविक्रयिणो राजन् विषविक्रयिणस्तथा ।
क्षीरविक्रयिकाश्चैव ते वै निरयगामिनः ॥ ७९

ब्राह्मणानां गवां चैव कन्यानां च युधिष्ठिर ।
[4]येऽन्तरा यान्ति कार्येषु ते वै निरयगामिनः ॥ ८०

शस्त्रविक्रयिकाश्चैव कर्तारश्च युधिष्ठिर ।
शल्यानां धनुषां चैव नरा निरयगामिनः ॥ ८१

शिलाभिश्शङ्कुभिर्वाऽपि श्वभ्रैर्वा भरतर्षभ ।
ये मार्गमुपरुन्धन्ति ते वै निरयगामिनः ॥ ८२

अगोप्तारः फलद्रव्यं बलिषड्भागतत्पराः ।
सन्निन्दकाश्च राजेन्द्र ते वै निरयगामिनः ॥ ८३

[5]संश्रुत्य चाप्रदातारो दरिद्राणां विनिन्दकाः ।

---

1. क-घ—भृत्यान् द्विजांस्तथा
2. क-घ—श्रुतिबाह्याश्च ये नराः
3. ख—अर्धपद्यकं नास्ति
4. क-घ—ये नरा यान्त्यकामेषु
5. क-घ—इदमर्धं नास्ति

श्रोत्रियाणां विनीतानां दरिद्राणां विशेषतः ॥ ८४
क्षमिणां निन्दकाश्चैव ते वै निरयगामिनः ॥ ८४॥
एते पूर्वैर्पिभिर्दृष्टाः प्रोक्ता निरयगामिनः ॥ ८५
शुश्रूषाभिस्तपोभिश्च श्रुतमादाय भारत ।
ये प्रतिग्रहनिस्स्नेहास् ते नरास्स्वर्गगामिनः ॥ ८६
मातरं पितरं चैव शुश्रूषन्ति जितेन्द्रियाः ।
भ्रातॄणां चैव सस्नेहास् ते नरास्स्वर्गगामिनः ॥ ८७
आढ्याश्च बलवन्तश्च यौवनस्थाश्च भारत ।
ये वै जितेन्द्रिया धीरास् ते नरास्स्वर्गगामिनः ॥ ८८
भयात् पापात्तथा बाधाद् दारिद्र्याद्व्याधिकर्षणात् ।
तत्कृते धनमीप्सन्तस् ते नरास्स्वर्गगामिनः ॥ ८९
क्षमावन्तश्च धीराश्च धर्मकार्येषु चोदिताः ।
मङ्गलाचारयुक्ताश्च पुरुषास्स्वर्गभागिनः ॥ ९०
निवृत्ता मद्यमांसेभ्यः परदारेभ्य एव च ।
निवृत्ताश्चैव मद्येभ्यस् ते नरास्स्वर्गगामिनः ॥ ९१
[1]आश्रमाणां च भर्तारः कुलानां चैव भारत ।
देशानां नगराणां च ते नरास्स्वर्गभागिनः ॥ ९२
वस्त्राभरणदातारो भक्ष्यपानान्नदास्तथा ।

1. ख—अर्धषट्कं नास्ति

कुटुम्बानां च भर्तारस् ते नरास्स्वर्गगामिनः ॥ ९३

सर्वहिंसानिवृत्ताश्च नरास्सर्वसहाश्च ये ।
सर्वस्याश्रयभूताश्च ते नरास्स्वर्गगामिनः ॥ ९४

अवरुद्धेषु सस्नेहा मृदवो मित्रवत्सलाः ।
अपराधसहाश्चैव ते नरास्स्वर्गभागिनः ॥ ९५

सहस्रपरिवेष्टारस् तथैव च सहस्रदाः ।
त्रातारश्च सहस्राणां पुरुषास्स्वर्गभागिनः ॥ ९६

सुवर्णस्य च दातारो गवां च भरतर्षभ ।
यानानां वाहनानां च ते नरास्स्वर्गभागिनः ॥ ९७

[1]वैवाहिकानां कन्यानां प्रेष्याणां भरतर्षभ ।
दातारो वाससां चैव ते नरास्स्वर्गभागिनः ॥ ९८

विहारावसथोद्यानकूपारामसभाप्रदाः ।
प्रपाणां चैव कर्तारस् ते नरास्स्वर्गभागिनः ॥ ९९

[2]निवेशनानां क्षेत्राणां वसतीनां च भारत ।
[3]दातारश्चतुराणां च ते नरास्स्वर्गभागिनः ॥ १००

रसानां चाथ बीजानां धान्यानां च युधिष्ठिर ।

1. अ—इदमर्धद्वयं नास्ति
2. अ—इदमर्धचतुष्टयं नास्ति
3 ख—दातारश्च कृशानां च रक्षकास्स्वर्गं

स्वयमुत्पाद्य दातारस् ते नरास्स्वर्गभागिनः ॥ ॥ १०१

यस्मिन् कस्मिन् कुले जाता बहुपुत्राश्शतायुषः ।
सानुक्रोशा जितक्रोधाः पुरुषास्स्वर्गभागिनः ॥ १०२

एतदुक्तममुत्रार्थं दैवं पित्र्यं च भारत ।
धर्माधर्मौ वदान्यस्य यथा पूर्वर्षिभिः कृतौ ॥ १०३

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां
अनुशासनपर्वणि एकोनत्रिंशोऽध्यायः ॥ २९ ॥
॥ ८९ ॥ आनुशासनिकपर्वणि एकोनत्रिंशोऽध्यायः ॥ २९ ॥
[अस्मिन्नध्याये १०३ श्लोकाः]

॥ त्रिंशोऽध्यायः ॥

भीष्मेण युधिष्ठिरं प्रति हिंसाभावेऽपि ब्रह्महत्याप्राप्तिप्रतिपादकव्यास-वचनानुवादः ॥

युधिष्ठिरः—

इदं मे तत्त्वतो राजन् वक्तुमर्हसि भारत ।
अहिंसयित्वा केनेह ब्रह्महत्या विधीयते ॥ १

भीष्मः—

व्यासमामन्त्र्य राजेन्द्र पुरा यत् पृष्टवानहम् ।
तत्तेऽहं सम्प्रवक्ष्यामि तदिहैकमनाश्शृणु ॥ २

चतुर्थस्त्वं वसिष्ठस्य तत्त्वमाख्याहि मे मुने ।
अहिंसयित्वा केनेह ब्रह्महत्या विधीयते ॥ ३

इति पृष्टो महाराज पराशरशरीरजः ।
अब्रवीन्निपुणो धर्मं निस्संशयमनुत्तमम् ॥ ४

व्यासः—

ब्राह्मणं स्वयमाहूय भैक्षार्थे कृशवृत्तिनम् ।
ब्रूयान्नास्तीति यः पश्चात् तं विद्याद्ब्रह्मघातकम् ॥ ५

मध्यस्थस्येह विप्रस्य योऽनूचानस्य भारत ।
वृत्तिं हरति दुर्बुद्धिस् तं विद्याद्ब्रह्मघातिनम् ॥ ६

गोकुलस्य तृषार्तस्य जलार्थमभिधावतः ।
उत्पादयति यो विघ्नं तं विद्याद्ब्रह्मघातिनम् ॥ ७

यः प्रवृत्तां श्रुतिं सम्यक् शास्त्रं वा मुनिभिः कृतम् ।
[1]दूषयत्यनभिज्ञाय तं विद्याद्ब्रह्मघातिनम् ॥ ८

[2]जातितो ब्राह्मणानां हि महापरिभवात्तथा ।
तद्वृत्तिच्छेदनाच्चैव तद्दारपरिभावनात् ॥ ९

आत्मजां रूपसम्पन्नां बृहतीं सदृशे वरे ।
न प्रयच्छति यः कन्यां तं विद्याद्ब्रह्मघातकम् ॥ १०

अधर्मनिरतो मूढो मिथ्या यो वै द्विजातिषु ।

1. अ—इदमर्धं नास्ति 2. क-घ—इदमर्धद्वयं नास्ति

दद्यान्मर्मातिगं शोकं तं विद्याद्ब्रह्मघातिनम् ॥ ११

चक्षुषा विप्रहीणस्य पङ्गोरथ जडस्य वा ।
हरेत यश्च वित्तानि तं विद्याद्ब्रह्मघातिनम् ॥ १२

आश्रमे वा वने वा यो ग्रामे वा यदि वा पुरे ।
अग्निं समुत्सृजेत् क्रोधात तं विद्याद्ब्रह्मघातिनम् ॥ १३

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां
अनुशासनपर्वणि त्रिंशोऽध्यायः ॥ ३० ॥
॥ ८९ ॥ आनुशासनिकपर्वणि त्रिंशोऽध्यायः ॥ ३० ॥
[अस्मिन्नध्याये १३ श्लोकाः]

॥ एकत्रिंशोऽध्यायः ॥

भीष्मेण युधिष्ठिरं प्रति नद्यादितीर्थानां तत्तन्नामविशेषनिर्देशेन तत्सेवनफलप्रतिपादकगौतमाङ्गिरस्संवादानुवादः ॥

युधिष्ठिरः—

तीर्थानां दर्शनं श्रेयस् स्नानं च भरतर्षभ ।
श्रवणं च महाप्राज्ञ श्रोतुमिच्छामि तत्त्वतः ॥ १

पृथिव्यां यानि तीर्थानि पुण्यानि भरतर्षभ ।
वक्तुमर्हसि मे तात श्रोतास्मि नियतः प्रभो ॥ २

भीष्मः—

इममङ्गिरसा प्रोक्तं तीर्थवंशं महा[1]मते ।
श्रोतुमर्हसि धर्मज्ञ प्राप्स्यसे धर्ममुत्तमम् ॥ ३
तपोवनगतं विप्रम् अभिवाद्य महामुनिम् ।
पप्रच्छाङ्गिरसं वीर गौतमस्संशितव्रतम् ॥ ४

गौतमः—

अस्ति मे भगवन् कश्चित् तीर्थेभ्यो धर्मसंशयः ।
तन् सर्वं श्रोतुमिच्छामि तन्मे शंस महामुने ॥ ५
उपस्पृश्य फलं किं स्यात् केषु तीर्थेषु वै मुने ।
प्रेत्यभावे महाप्राज्ञ तद्यथाऽस्ति तथा वद ॥ ६

अङ्गिराः—

सप्ताहं चन्द्रभागां वै वितस्तामूर्मिमालिनीम् ।
विगाह्य वै निराहारो निर्मलो मुनिवद्भवेत् ॥ ७
काश्मीरमण्डले नद्यो याः पतन्ति महास्वनम् ।
ता नदीस्मिन्धुमासाद्य शीलवान् स्वर्गमाप्नुयात् ॥ ८
पुष्करं च प्रभासं च नैमिशं सागरोदकम् ।
देविकामिन्द्रमार्गं च स्वर्गबिन्दुं विगाह्य च ॥ ९
विबुध्यते विमानस्थस् सोऽप्सरोभिरभिष्टुतः ॥ ९॥
हिरण्य[2]बिन्दुमालक्ष्य प्रयतश्चाभिवाद्य तम् ।

1. क-घ—च्युते 2. क-घ—बिन्दुंप्रक्षोभ्य

कुशेशये च देवत्वं पूयते तस्य किल्बिषम् ॥ १०॥
इन्द्रतोयां समासाद्य गन्धमादनसन्निधौ ।
करतोयां कुरङ्गेषु त्रिरात्रोपोषितो नरः ॥ ११॥
अश्वमेधमवाप्नोति विगाह्य नियतश्शुचिः ॥ १२
गङ्गाद्वारे कुशावर्ते बिल्वके कुलपर्वते ।
ततः कनखले स्नात्वा धूतपाप्मा दिवं व्रजेत् ॥ १३
अपांह्रदमुपस्पृश्य वाजपेयफलं लभेत् ।
ब्रह्मचारी जितक्रोधस् सत्यसन्धश्चहिंसकः ॥ १४
यत्र भागीरथी गङ्गा वहते दिशमुत्तराम् ।
महेश्वरस्य निष्ठाने यो नरस्त्वभिषिच्यते ॥ १५
एकमासं निराहारस् स्वयं पश्यति देवताः ।
सप्तगङ्गेति गङ्गेति चन्द्रमार्गेति तर्पयेत् ॥ १६
अर्थान् वै लभते तत्र भोक्तुं योऽभिलषेन्नरः ॥ १६॥
विम्बाश्रममुपस्पृश्य [1]योऽग्निहोत्रपरश्शुचिः ।
एकमासं निराहारस् सिद्धिं मासेन स व्रजेत् ॥ १७॥
महाह्रदमुपस्पृश्य भृगुतुन्दमलोलुपः ।
त्रिरात्रोपोषितो भूत्वा मुच्यते ब्रह्महत्यया ॥ १८॥
कन्याहोत्रमुपस्पृश्य योऽग्निहोत्रपरश्शुचिः ।

1. ख—इतः अर्धपद्यं नास्ति

देवेषु कीर्तिं लभते यशसा च विराजते ॥ १९॥

एककालमुपस्पृश्य तथा सुन्दरिकाह्रदे ।
अश्विभ्यां रूपवर्चस्त्वं प्रेत्यासौ लभते नरः ॥ २०॥

महागङ्गामुपस्पृश्य कृत्तिकाङ्गारके तथा ।
पक्षमेकं निराहारस् स्वर्गमाप्नोति कर्मतः ॥ २१॥

वैतानिकमुपस्पृश्य कर्णिकस्याश्रमे तथा ।
निवासेऽप्सरसां दिव्ये कामचारी महीयते ॥ २२॥

कालिकाश्रममासाद्य विपाशायां कृतोदकः ।
ब्रह्मचारी जितक्रोधस् त्रिरात्रं मुच्यते भयात् ॥ २३॥

[1]आश्रमे कृत्तिकानां तु स्नात्वा यस्तर्पयेत् पितॄन् ।
तोषयित्वा महादेवं निर्मलस्स्वर्गमाप्नुयात् ॥ २४॥

महाकूपमुपस्पृश्य त्रिरात्रोपोषितो नरः ।
[2]त्रसानां स्थावराणां च द्विपदत्वाद्भयं त्यजेत् ॥ २५॥

देवदारुवने स्नात्वा धूतपापः कृतोदकः ।
देवशब्दमवाप्नोति त्रिरात्रोपोषितो नरः ॥ २६॥

केशाब्दे तु शरस्तम्बे द्रोणशर्मपदे तथा ।
आपः प्रवर्तने सौम्ये सेव्यते चाप्सरोगणैः ॥ २७॥

---

1. क-घ—आयामे
2. अ—अर्धत्रयं नास्ति

चित्रकूटे जनस्थाने तथा मन्दाकिनीजले ।
विगाह्य वै निराहारो राजलक्ष्मीं निगच्छति ॥ २८॥

श्यामायास्त्वाश्रमं गत्वा उपोष्यैवाभिषिच्य च ।
एकपक्षं निराहारो ह्यन्तर्धानफलं लभेत् ॥ २९॥

कौशिकीपारमासाद्य वायुभक्षस्त्वलोलुपः ।
एकविंशतिरात्रेण स्वर्गमारोहते नरः ॥ ३०॥

मतङ्गवाप्यां यस्स्नायाद् एकरात्रेण सिध्यति ।
विगाहितोऽप्यनालम्बे अन्वक्षं वै सनातनम् ॥ ३१॥

नैमिशे स्वर्गप्रस्थेषु उपस्पृश्य जितेन्द्रियः ।
फलं पुरुषमेधस्य लभेन्मासं कृतोदकः ॥ ३२॥

गङ्गाह्रदमुपस्पृश्य तथा चैवोत्पलावृतम् ।
[1]अर्धाश्वमेधमाप्नोति तत्र मासं कृतोदकः ॥ ३३॥

गङ्गायमुनयोर्मध्ये तीर्थे कालञ्जने गिरौ ।
दशाश्वमेधानाप्नोति तत्र मासं कृतोदकः ॥ ३४॥

यष्टिह्रदमुपस्पृश्य [2]दानं नान्यद्विशिष्यते ॥ ३५

दशतीर्थसहस्राणि तिस्रः कोट्यस्तथाऽपराः ।
समागच्छन्त्यमावास्यां प्रयागे भरतर्षभ ॥ ३६

माघमासप्रयागे तु नियतस्संशितव्रतः ।

---

1. क-घ—अश्वमेधमवा 2. क-घ—इतः अर्धपञ्चकं नास्ति

स्नात्वा तु भरतश्रेष्ठ निर्मलस्स्वर्गमाप्नुयात् ॥ ३७

मरुद्गण उपस्पृश्य पितृणामाश्रमे शुचिः ।
वैवस्वते च तीर्थे च तीर्थभूतो भवेन्नरः ॥ ३८

अथ ब्रह्मशिरस्स्नात्वा भागीरथ्यां कृतोदकः ।
एकमासं निराहारस् सोमलोकमवाप्नुयात् ॥ ३९

कपोतके नरस्स्नात्वा अष्टावक्रे कृतोदकः ।
तृतीयकौश्चपादे च ब्रह्महत्यां विशोधयेत् ॥ ४०

कलापिकामुपस्पृश्य वेदांश्च बहुशो जलम् ।
अग्नेः पुरे नरस्स्नात्वा विशालायां कृतोदकः ॥ ४१

[1]द्वादशाहं विशेषेण कल्मषाद्विप्रमुच्यते ॥ ४१॥

महाह्रदमुपस्पृश्य शुद्धेन मनसा नरः ।
एकमासं निराहारो जमदग्निगतिं लभेत् ॥ ४२॥

विन्ध्ये सन्ताप्य चात्मानं सत्यसन्धस्त्वहिंसकः ।
द्वादशाहं निराहारो नरमेधफलं लभेत् ॥ ४३॥

मुण्डे ब्रह्मगवां चैव [2]निरिचिं देवपर्वतम् ।
देवह्रदमुपस्पृश्य ब्रह्मभूतो विराजते ॥ ४४॥

[3]तथा प्रवृत्तनन्दां च महानन्दां च सेवते ।

---

1. ख—अर्धसप्तकं नास्ति 2. घ—निनिचिम्
3. ख—अर्धत्रयं नास्ति

नन्दने सेव्यते दान्तस्त्वप्सरोभिरहिंसकः ॥ ४५॥

ऊर्वशीकृत्तिकायोगे कृतवासस्समाहितः ।
लौहित्ये विधिवत् स्नात्वा पौण्डरीकफलं लभेत् ॥ ४६॥

रामह्रदमुपस्पृश्य विशालायां कृतोदकः ।
एकपक्षं निराहारः कल्मषाद्विप्रमुच्यते ॥ ४७॥

कुमारपदमास्थाय मासेनैकेन शुध्यति ॥ ४८

नर्मदायामुपस्पृश्य तथा शूर्पाकरोदके ।
एकपक्षं निराहारो राजपुत्रो विधीयते ॥ ४९

जम्बूमार्गे त्रिभिर्मासैस् संयतस्सुसमाहितः ।
अहोरात्रेण चैकेन सिद्धिं समधिगच्छति ॥ ५०

कोकामुखे विगाह्यापो गत्वा तण्डुलिकाश्रमम् ।
[1]शाकभक्षश्चीरवासाः कुमार्यो विन्दते दश ॥ ५१

वैवस्वतस्य सदनं न गच्छेद्वै कदाचन ।
यस्य कन्याह्रदे वासो देवलोकं स गच्छति ॥ ५२

प्रभासे त्वेकरात्रेण अमावास्यां समाहितः ।
सिद्ध्यत्यत्र महाबाहो यो नरो जायते नरः ॥ ५३

[2]गुञ्जानदमुपस्पृश्य आर्ष्टिषेणस्य चाश्रमे ।

---

1. क-घ—एकभ
2. क-घ—भुञ्जानद

गङ्गायाश्चाश्रमे स्नात्वा सर्वपापैः प्रमुच्यते ॥ ५४

कुल्यायां समुपस्पृश्य जप्त्वा चैवाघमर्षणम् ॥

अश्वमेधमवाप्नोति त्रिरात्रोपोषितश्शुचिः ॥ ५५

पिण्डारक उपस्पृश्य त्रिरात्रोपोषितो नरः ।

[1]अग्निष्टोममवाप्नोति प्रभातां शर्वरीं शुचिः ॥ ५६

तथा ब्रह्मसरो गत्वा धर्मारण्योपशोभितम् ।

पुण्डरीकमवाप्नोति प्रभातां शर्वरीं शुचिः ॥ ५७

मैनाके पर्वते स्नात्वा तथा सन्ध्यामुपास्य च ।

कामं जित्वा च वै मोहं सर्वमेधफलं लभेत् ॥ ५८

विख्यातो हिमवान् पुण्यश् शङ्करश्वशुरो गिरिः ।

आकरस्सर्वरत्नानां सिद्धचारणसेवितः ॥ ५९

दर्शनाद्गमनात् पूतो भवेदनशनादपि ॥ ५९॥

अध्रुवं जीवितं ज्ञात्वा यो वै वेदान्तगो द्विजः ।

अभ्यर्च्य देवांस्तत्रस्थो नमस्कृत्य मुनींस्तथा ॥ ६०॥

[2]ततस्सिद्धो मुनिर्गच्छेद् ब्रह्मलोकं सनातनम् ॥ ६१

कामं क्रोधं च लोभं च यो जित्वा तीर्थमावसेत् ।

न तेन किञ्चिदप्राप्यं तीर्थाभिगमनाद्भवेत् ॥ ६२

1. क-घ—अर्धचतुष्टयं नास्ति

2. व—नास्तीदमर्धम्

[1]यान्यगम्यानि तीर्थानि दुर्गाणि विषमाणि च ।
मनसा तानि गम्यानि सर्वतीर्थे समासतः ॥ ६३

इदं मेध्यमिदं मान्यम इदं स्वर्गस्य वै मुखम् ।
इदं रहस्यं देवानाम्[2]आप्तानां च पावनम् ॥ ६४

इदं दद्याद्द्विजातीनां साधूनामात्मजस्य वा ।
सुहृदां च जपेत् कर्णे शिष्यस्यानुगतस्य वा ॥ ६५

भीष्मः—

दत्तवान् गौतमस्येदम् अङ्गिरा वै महातपाः ।
गुरुभिस्सममनुज्ञातः काश्यपेन च धीमता ॥ ६६

महर्षीणामिदं जप्यं पावनानां तथोत्तमम् ।
जपंश्चाभ्युत्थितस्सम्यङ् निर्मलस्स्वर्गमाप्नुयात् ॥ ६७

य इदं चापि शृणुयाद् रहस्यं त्वङ्गिरोदितम् ।
उत्तमे च कुले जन्म लभेज्जातिं च संस्मरेत् ॥ ६८

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां
अनुशासनपर्वणि एकत्रिंशोऽध्यायः ॥ ३१ ॥
॥ ८९ ॥ आनुशासनिकपर्वणि एकत्रिंशोऽध्यायः ॥ ३१ ॥
[अस्मिन्नध्याये ६८ श्लोकाः]

---

1. क-घ—प्राणिग
2. क-घ—पावनानां च पावनम्

॥ द्वात्रिंशोऽध्यायः ॥

भीष्मेण युधिष्ठिरं प्रति गङ्गामहिमप्रतिपादकसिद्धशिलवृत्तिसंवादानुवादः ॥

वैशम्पायनः—

बृहस्पतिसमं बुद्ध्या क्षमया ब्रह्मणस्समम् ।
पराक्रमे शक्रसमम् आदित्यसमतेजसम् ॥ १

गाङ्गेयमर्जुनेनाजौ निहतं भूरिवर्चसम् ।
भ्रातृभिस्सहितोऽन्यैश्च पर्युपासद्युधिष्ठिरः ॥ २

शयानं वीरशयने कालाकाङ्क्षिणमच्युतम् ।
आजग्मुर्भरतश्रेष्ठं द्रष्टुकामा महर्षयः ॥ ३

अत्रिर्वसिष्ठोऽथ भृगुः पुलस्त्यः पुलहः क्रतुः ।
अङ्गिरा गौतमोऽगस्त्यस् सुमतिस्त्वायुरात्मवान् ॥ ४

विश्वामित्रस्स्थूलशिरास् संवर्तः प्रतिमर्दनः ।
उशना बृहस्पतिर्व्यासश् च्यवनः काश्यपो ध्रुवः ॥ ५

[1]दुर्वासा जमदग्निश्च मार्कण्डेयोऽथ गालवः ।
भरद्वाजश्च [2]रैभ्यश्च यवक्रीतस्तथा ॥ ६

1. घ—अर्वावसुर्जमदग्निः
2. क—वायुश्च

स्थूलाक्षश्शकटाक्षश्च कण्वो मेधातिथिः कृतः ।
नारदः पर्वतश्चैव सुधन्वा चैकतो द्विजः ॥ ७

नितन्तुः कवषो धौम्यश् शतानन्दोऽकृतव्रणः ।
जामदग्न्यस्तथा रामः [1]कचश्चेत्येवमादयः ॥ ८

समागता महात्मानो भीष्मं द्रष्टुं महर्षयः ॥ ८॥

तेषां महात्मनां पूजाम् आगतानां युधिष्ठिरः ।
भ्रातृभिस्सहितश्चक्रे यथावदनुपूर्वशः ॥ ९॥

ते पूजितास्समासीनाः कथाश्चक्रुर्महर्षयः ।
भीष्माश्रितास्सुमधुरास् सर्वेन्द्रियमनोहराः ॥ १०॥

भीष्मस्तेषां कथाश्श्रुत्वा ऋषीणां भावितात्मनाम् ।
मेने दिविष्टमात्मानं तुष्ट्या परमया युतः ॥ ११॥

ततस्ते भीष्ममामन्त्र्य पाण्डवांश्च महर्षयः ।
अन्तर्धानं गतास्सर्वे सर्वेषामेव पश्यताम ॥ १२॥

तानृषीन् सुमहाभागान् अन्तर्धानगतानपि ।
पाण्डवास्तुष्टुवुस्सर्वे प्रणेमुश्च मुहुर्मुहुः ॥ १३॥

प्रसन्नमनसस्सर्वे गाङ्गेयं कुरुसत्तमाः ।
उपतस्थुर्यथोद्यन्तम् आदित्यं मन्त्रकोविदाः ॥ १४॥

प्रभावं तपसस्तेषाम् ऋषीणां वीक्ष्य पाण्डवाः ।

1. ख—कण्व

प्रकाशन्तो दिशस्सर्वा विस्मयं परमं ययुः ॥ १५॥

महाभाग्यं परं तेषाम् ऋषीणामनुचिन्त्य ते ।
पाण्डवास्सह भीष्मेण कथाश्चक्रुस्तदाश्रयाः ॥ १६॥

कथान्ते शिरसा स्पृष्ट्वा पादौ भीष्मस्य धीमतः ।
धर्म्यं धर्मसुतः प्रश्नं पर्यपृच्छद्युधिष्ठिरः ॥ १७॥

के देशाः के जनपदाः केऽऽश्रमाः के च पर्वताः ।
प्रकृष्टाः पुण्यदाः कास्विद् याश्च नद्यस्तदुच्यताम् ॥ १८॥

भीष्मः—

[1]अत्राप्युदाहरन्तीमम् इतिहासं पुरातनम् ।
सिलोञ्छवृत्तेस्संवादं सिद्धस्य च युधिष्ठिर ॥ १९॥

इह कश्चिन् परिक्रम्य पृथिवीं शैलभूषिताम् ।
असकृद्विपदां श्रेष्ठश् श्रेष्ठस्य गृहमेधिनः ॥ २०॥

सिलवृत्तेर्गृहं प्राप्तस् स तेन विधिनाऽर्चितः ।
कृतकृत्य उपातिष्ठत् सिद्धं तमतिथिं गृही ॥ २१॥

तौ समेत्य महात्मानौ सुखासीनौ कथाश्शुभाः ।
चक्रतुर्वेदसम्बद्धास् तच्छीलकृतलक्षणाः ॥ २२॥

सिलवृत्तिः कथान्ते तु सिद्धमामन्त्र्य भारत ।
प्रश्नं पप्रच्छ मेधावी यन्मां त्वं परिपृच्छसि ॥ २३॥

1. अ—इदमर्धं नास्ति

सिलोञ्छवृत्तिः—

के देशाः के जनपदाः केऽऽश्रमाः के च पर्वताः ।
प्रकृष्टाः पुण्यतः कास्विज् ज्ञेया नद्यस्तदुच्यताम् ॥ २४॥

सिद्धः—

ते देशास्ते जनपदास् तेऽऽश्रमास्ते च पर्वताः ।
येषां भागीरथी गङ्गा मध्येनैति सरिद्वरा ॥ २५॥

तपसा ब्रह्मचर्येण यज्ञैस्त्यागेन वा पुनः ।
गतिं तां न लभेद्राजन गङ्गां संसेव्य यां लभेत् ॥ २६॥

स्पृष्टानि येषां गाङ्गेयैस् तोयैर्गात्राणि देहिनाम् ।
त्यक्तानि यानि वै येषां त्यागात् स्वर्गो विधीयते ॥ २७॥

ये वा यथाविधि स्नाता गङ्गायां सावमर्षणाः ।
गां त्यक्त्वा मानवा विप्रा दिवि तिष्ठन्ति तेऽचलाः ॥ २८॥

पूर्वे वयसि कर्माणि कृत्वा पापानि ये नराः ।
पश्चाद्गङ्गां निषेवन्ते तेऽपि यान्ति परां गतिम् ॥ २९॥

युक्ताश्च पातकैस्त्यक्त्वा देहं शुद्धा भवन्ति ते ।
मुच्यन्ते देहसन्त्यागाद् गङ्गायमुनसङ्गमे ॥ ३०॥

स्नातानां प्रयतैस्तोयैर् गाङ्गेयैः प्रयतात्मनाम् ।
व्युष्टिर्भवति या पुंसां न सा क्रतुशतैरपि ॥ ३१॥

यावदस्थि मनुष्याणां गङ्गातोयेषु तिष्ठति ।

तावद्वर्षसहस्राणि स्वर्गे प्राप्य महीयते ॥ ३२॥

अपहत्य तमस्तीव्रं यथा भात्युदये रविः ।
तथाऽपहत्य पाप्मानं भाति गङ्गाजलोक्षितः ॥ ३३॥

विसोमा इव शर्वर्यो विपुष्पास्तरवो यथा ।
तद्वद्देशा दिशश्चैव हीना गङ्गाजलैश्शुभैः ॥ ३४॥

वर्णाश्रमा यथा सर्वे स्वधर्मा ज्ञानवर्जिताः ।
क्रतवश्च यथाऽसोमास् तथा गङ्गां विना जगत् ॥ ३५॥

यथा हीनं नभोऽर्केण भूश्शैलैः खं च वायुना ।
तथा देशा दिशश्चैव गङ्गाहीना न संशयः ॥ ३६॥

त्रिषु लोकेषु ये केचित् प्राणिनस्सर्व एव ते ।
तर्प्यमाणाः परां तृप्तिं यान्ति गङ्गाजलैश्शुभैः ॥ ३७॥

अन्ये च देवा मुनयः प्रेतानि पितृभिस्सह ।
तर्पितास्तृप्तिमायान्ति त्रिषु लोकेषु सर्वशः ॥ ३८॥

यथा सूर्यांशुनिष्टप्तं गाङ्गेयं पिबते जलम ।
गवां नीहारनिर्वृत्ताद् यावकात्तद्विशिष्यते ॥ ३९॥

इन्दुव्रतसहस्रं तु चरेद्यः कायशोधनम् ।
पिबेद्यश्चापि गङ्गाम्भस् समौ स्यातां न वा समौ ॥ ४०॥

[1]तिष्ठेद्युगसहस्रं तु पदेनैकेन यः पुमान् ।

1. अ—इदमर्धद्वयं नास्ति

एकाहं वा स गङ्गायां समौ स्यातां न वा समौ ॥ ४१॥

लम्बेद्वाक्शिरा यस्तु युगानामयुतं पुनः ।
[1]संवत्सरं जले वासं गङ्गायां तत्समं मतम् ॥ ४२॥

अग्नौ प्रास्तं प्रदूयेत यथा तूलं द्विजोत्तम ।
तथा गङ्गावगाढस्य सर्वपापं प्रदूयते ॥ ४३॥

भूतानामिह सर्वेषां दुःखोपहतचेतसाम् ।
[2]गतिमन्वेषमाणानां न गङ्गासदृशी गतिः ॥ ४४॥

भवन्ति निर्विषास्सर्पा यथा तार्क्ष्यस्य दर्शनात् ।
गङ्गाया दर्शनात् सद्यः पापानि विविधानि च ॥ ४५॥

अप्रतिष्ठाश्च ये केचिद् अधर्मशरणाश्च ये ।
तेषां प्रतिष्ठा गङ्गेह शरणं शर्म वर्म च ॥ ४६॥

प्रकृष्टैरशुभैर्ग्रस्तान् अनेकैः पुरुषाधमान् ।
पततो नरके गङ्गा संश्रितान् प्रेत्य तारयेत् ॥ ४७॥

ते संविभक्ता मुनिभिर् नूनं देवैस्सवासवैः ।
ये हि गच्छन्ति सततं गङ्गामभिगतां सुरैः ॥ ४८॥

विनयाचारहीनाश्चाप्यशिवाश्च नराधमाः ।
न भवन्त्यशिवा विप्रा ये वै गङ्गामुपाश्रिताः ॥ ४९॥

1. क-घ—चरेद्यथेष्टं गङ्गायां यश्चापि स विशिष्यते । [पाठान्तरम्]
2. क-घ—अर्धचतुष्टयं नास्ति

यथा सुराणाममृतं पितृणां च यथा स्वधा ।
यथा सुधा च नागानां तथा गङ्गाजलं नृणाम् ॥ ५०॥

उपासते यथा बाला मातरं क्षुधयाऽर्दिताः ।
श्रेयस्कामास्तथा गङ्गाम् उपासन्ति हि देहिनः ॥ ५१॥

[1]उपजीव्या यथा धेनुर् लोकानां ब्राह्ममेव वा ।
हविषां च यथा सोमस् तारणेषु यथाक्षयम् ॥ ५२॥

स्वायम्भुवं यथा स्थानं सर्वेषां श्रेष्ठमुच्यते ।
स्थानानां सरितां श्रेष्ठा गङ्गा तद्वदिहोच्यते ॥ ५३॥

यथोपजीविनां धेनुर् देवादीनां परा स्मृता ।
तथोपजीविनां गङ्गा सर्वप्राणभृतामिह ॥ ५४॥

देवास्सोमार्कसंस्थाभिर् यथा सङ्ख्यादिभिर्मखैः ।
अमृतान्युपजीवन्ति तथा गङ्गाजलं नराः ॥ ५५॥

जाह्नवीपुलिनोत्थाभिस् सिकताभिस्समुक्षितम् ।
मन्यते पुरुषोऽऽत्मानं दिविष्ठमिव शोभितम् ॥ ५६॥

जाह्नवीतीरसम्भूतां मृदं मूर्ध्ना बिभर्ति यः ।
बिभर्ति रूपं सोऽर्कस्य तमोनाशात् सुनिर्मलम् ॥ ५७॥

गङ्गोर्मिभिरथो दिग्धः पुरुषं पवनो यदा ।
स्पृशते सोऽपि तेनाघं सद्य एवाभिमार्जति ॥ ५८॥

---

1. क-घ—इदमर्धद्वयं नास्ति

व्यसनैरभितप्तस्य नरस्य विनशिष्यतः ।
गङ्गादर्शनजा प्रीतिर् व्यसनान्यपमार्जति ॥ ५९॥

[1]हंसकारण्डवातालैर् नादैरन्यैश्च पक्षिणाम् ।
पस्पर्ध गङ्गा गन्धर्वान् पुलिनैश्च शिलोच्चयान् ॥ ६०॥

हंसादिभिस्सुबहुभिर् विविधैः पक्षिभिर्वृताम् ।
गङ्गां गोकुलसम्पन्नां दृष्ट्वा स्वर्गोऽपि विस्मृतः ॥ ६१॥

न सा प्रीतिर्दिविष्ठस्य सर्वकामानुपाश्नतः ।
अभवद्या परा प्रीतिर् गङ्गायाः पुलिने नृणाम् ॥ ६२॥

वाङ्मनःकायजैर्ग्रस्तः पापैरपि पुमानिह ।
वीक्ष्य गङ्गां भवेत् पूतस् तत्र मे नास्ति संशयः ॥ ६३॥

सप्तावरान् सप्त परान पितॄंस्तेभ्यश्च ये परे ।
सर्वांस्तारयते गङ्गां वीक्ष्य स्पृश्यावगाह्य च ॥ ६४॥

श्रुताऽभिलषिता दृष्टा स्पृष्टा पीताऽवगाहिता ।
गङ्गा तारयते नृणाम् उभौ वंशौ विशेषतः ॥ ६५॥

[2]तत्तीरगानां तपसा श्राद्धपारायणादिभिः ।
गङ्गाद्वारप्रभृतिभिस् तत्तीर्थैर्न परं नृणाम् ॥ ६६॥

सायं प्रातस्स्मरेद्गङ्गां नित्यं स्नाने तु कीर्तयेत् ।

---

1. क-घ—भास
2. क-घ—अर्धचतुष्टयं नास्ति

तर्पणे पितृपूजासु मरणे चापि संस्मरेत् ॥ ६७॥

दर्शनात् स्पर्शनात् पानात् तथा गङ्गेति कीर्तनात् ।
पुनात्यपुण्यान् पुरुषाञ् शतशोऽथ सहस्रशः ॥ ६८॥

य इच्छेत् सफलं जन्म जीवितं श्रुतमेव च ।
स पितॄंस्तर्पयेद्गङ्गाम् अभिगम्य सुरांस्तथा ॥ ६९॥

न श्रुतेन च वृत्तेन कर्मणा न च तत् फलम् ।
प्राप्नुयात् पुरुषोऽत्यन्तं गङ्गां प्राप्य यदाप्नुयात् ॥ ७०॥

जात्यन्धैरेव तुल्यास्ते नराः पङ्गुभिरेव च ।
समर्था ये न पश्यन्ति गङ्गां पुण्यजलाशयाम् ॥ ७१॥

भूतभव्यभविष्यज्ञैर् महर्षिभिरुपस्थिताम् ।
देवैस्सेन्द्रैश्च को गङ्गां नोपसेवेत मानवः ॥ ७२॥

वानप्रस्थैर्गृहस्थैश्च यतिभिर्ब्रह्मचारिभिः ।
विद्यावद्भिश्च श्रुतां गङ्गां पुमान् को नाम नाश्रयेत् ॥ ७३॥

उत्क्रामद्भिश्च यः प्राणैः प्रयतश्शिष्टसम्मतैः ।
चिन्तयेन्मनसा गङ्गां स गतिं परमां लभेत् ॥ ७४॥

न भयेभ्यो भयं तस्य न पापेभ्यो न राजतः ।
आदेहपतनाद्गङ्गाम् उपास्ते यः पुमानिह ॥ ७५॥

गगनाद्गां पतन्तीं वै महापुण्यां महेश्वरः ।

दधार शिरसा देवीं तामेव दिवि देवताः ॥ ७६॥

अलङ्कृतास्त्रयो लोकाः पथिभिर्विमलैस्थिताः ॥ ७७
यस्तु तस्या जलं सेवेत् कृतकृत्यः पुमानिह ।
दिवि ज्योतिष्विवादित्यः पितृणामिव चन्द्रमाः ॥ ७८

नरेन्द्रश्च यथा नृणां गङ्गेह सरितां वरा ॥ ७८॥

मातापितृसुतैर्दारैर् वियुक्तस्य धनेन वा ।
न भवेत् तु तथा दुःखं यथा गङ्गावियोगतः ॥ ७९॥

न पुण्यैर्नेष्टविषयैर् न धनैर्न सुतागमैः ।
तथा प्रसादो भवति गङ्गां वीक्ष्य यथा नृणाम् ॥ ८०॥

पूर्णमिन्दुं यथा दृष्ट्वा नृणां बुद्धिः प्रसीदति ।
[1]गङ्गां त्रिपथगां दृष्ट्वा तथा दृष्टिः प्रसीदति ॥ ८१॥

तन्नित्यस्तद्गतमनास् तन्निष्ठस्तत्परायणः ।
गङ्गां योऽनुगतो वीक्ष्य स तस्याः प्रियतां व्रजेत् ॥ ८२॥

भूस्थैस्वस्थैर्दिविष्ठैश्च भूतैरुच्चावचैरपि ।
गङ्गा विगाह्या सततम् एतत् कार्यतमं मतम् ॥ ८३॥

त्रिषु लोकेषु [2]पुण्यत्वाद् गङ्गायाः प्रश्रितं यशः ॥ ८४

---

1. क-घ—इदमर्धं नास्ति
2. क-घ—वन्द्यत्वात् + प्रथितम्

दुर्मृताननपत्यांश्च सा मृताननयद्दिवम् ॥

[1]या पुत्रान् सगरस्यैतान् भस्माख्याननयद्दिवम् ॥ ८५

वातेरिताभिस्सुमनोरमाभिर्
द्रुताभिरत्यर्थसमुच्छ्रिताभिः ।
गङ्गोर्मिभिर्भानुमतीभिरिद्धास्
सहस्ररश्मिप्रतिमा विभान्ति ॥ ८६

पयस्विनीं ह्लादिनीमत्युदारां
संवर्धिनीं वेगिनीं दुर्विषह्याम् ।
गङ्गां गत्वा यैश्शरीरं विसृष्टं
गता वीरास्ते विबुधैस्समत्वम् ॥ ८७

अन्धाञ् जडान द्रव्यहीनांश्च गङ्गा
पयस्विनी बृहती विश्वरूपा ।
दैवैस्सेन्द्रैर्मुनिभिर्दानवैश्च
निषेविता सर्वकामैर्युनक्ति ॥ ८८

ऊर्जस्वतीं मधुमतीं महापुण्यां त्रिवर्त्मिनाम् ।
त्रिलोकगोप्त्रीं ये गङ्गां संश्रितास्त्रिदिवं गताः ॥ ८९

यो योक्ष्यते द्रक्ष्यते योऽपि मर्त्यस्
तस्मै प्रयच्छन्ति सुखानि देवाः ।

---

1. ब—नास्तीदमर्धम्

तद्भावितस्पर्शनदर्शने च
तस्मै देवा गतिमिष्टां दिशन्ति ॥ ९०
दक्षां पृथ्वीं बृहतीं विप्रकृष्टां
शिवामृतां सुरसां सुप्रसन्नाम् ।
विभावरीं सर्वभूतप्रतिष्ठां
गङ्गां गता ये त्रिदिवं गतास्ते ॥ ९१
ख्यातिर्यस्याः खं दिवं गां च नित्याम
ऊर्ध्वं दिशो विदिशश्चाधितिष्ठेत् ।
तस्या जलं सेव्य सरिद्वराया
मर्त्यास्सर्वे कृतकृत्या भवन्ति ॥ ९२
इयं गङ्गेति नियता प्रतिष्ठा
गुह्यस्य रुद्रस्य च गर्भयोषा ।
प्रातस्त्रिमार्गेषु कृतावगाहा
[1]पापापहा पापिनां विश्वभोक्त्री ॥ ९३
नारायणादक्षयात् पूर्वजाता
विष्णोः पादाच्छिशुमाराद्ध्रुवाच्च ।
सोमात् सूर्यान्मेरुरूपाच्च विष्णोस्
समागता शिवमूर्ध्नो हिमाद्रिम ॥ ९४

1. क-च—विपाप्मानां वितता विश्वभोक्त्री
ख—पाप्मापहा पापिनां विश्वभोक्त्री

सत्यावती द्रव्यपरस्य वर्या
दिवो भुवश्चापि रक्ष्यानुरूपा ॥
[1]भव्या पृथिव्यां पावनी भाति ब्रह्मन्
गङ्गा लोकानां पुण्यदा वै त्रयाणाम् ॥ ९५

मधुप्रवाहा धृतरागोद्धताभिर्
महोर्मिभिश्शोधिता ब्राह्मणैश्च ।
दिवश्च्युता विधृता या भवेन
गङ्गाऽभिमान्या त्रिदिवस्य मान्या ॥ ९६

योनिर्वरिष्ठा विरजा वितन्वी
पुण्यापहा परिवाहा यशोदा ।
विश्वाकृती चाकृतिरृद्धिरिद्धा
गङ्गोक्षितानां भुवनस्य पन्थाः ॥ ९७

क्षान्त्या मह्याश्शोभते धारणेन
दीप्त्या कृशानोस्तपनस्य चैव ।
तुल्या गङ्गा सम्मता ब्राह्मणानां
गुहाऽस्य ब्रह्मण्यतया च नित्यम् ॥ ९८

ऋषिष्टुतां विष्णुपदीं पुराणीं
सुपुण्यतोयां मनसाऽपि लोके ।

1. क-ख-घ—गव्या पृथ्व्या भावनी भाति ब्रह्मन्

सर्वात्मना जाह्नवीं ये प्रपन्नास्
ते ब्रह्मणस्सदनं सम्प्रयाताः ॥ ९९

लोकानिमान् नयति या जननीव पुत्रान्
सर्वात्मना सर्वगुणोपपन्ना ।
स्वस्थानमेभिर्हि समीप्समानैर्
गङ्गा सदैवात्मवशैरुपास्या ॥ १००

नदैर्जुष्टां नृशतीं विश्वतोयाम्
इरावज्ञां रेवतीं भूधराणाम् ।
शिष्टाश्रयाममृतां [1]पुण्यकान्तां
गङ्गां श्रयेदार्जवान् सिद्धिकामः ॥ १०१

प्रसाद्य देवान् स विभुस्समस्तान्
भगीरथस्तपसोग्रेण गङ्गाम् ।
गामानयद्यामभिगम्य शश्वत्
पुंसां भयं नेह नामुत्र विद्यात् ॥ १०२

उदाहृतस्सर्वथा ते गुणानां
मयैकदेशः प्रसमीक्ष्य बुद्ध्या ।
शक्तिर्न मे काचिदिहास्ति वक्तुं
सर्वान गुणान् परिमातुं तथैव ॥ १०३

---

1. क-घ—ब्रह्म

[1]मेरोस्समुद्रस्य च सर्वरत्न-
सङ्घ्योदधीनामुदकस्य चैव ।
वक्तुं शक्या नेह गङ्गागुणानां
सङ्घ्यातुं वा परिमातुं तथैव ॥ १०४

तस्मादिमान् परया श्रद्धयोक्तान्
सर्वान् गुणाञ् जाह्नवीस्तथैव ।
भजेद्वाचा मनसा कर्मणा च
भक्त्या युक्तः परया श्रद्दधानः ॥ १०५

लोकानिमांस्त्रीन् विजित्येह सिद्धस्
सिद्धिं प्राप्तो महतीं तां दुरापाम् ।
गङ्गाकृतानचिरेणैव लोकान्
यथेष्टमिष्टान् विहरिष्यसे त्वम् ॥ १०६

तव मम च गुणैर्महानुभावा
जुषतु मतिं सततं स्वधर्मयुक्ताम् ।
अभिजनगुणवत्सला हि गङ्गा
भजति युनक्ति सुखैश्च भक्तिमन्तम् ॥ १०७

भीष्मः—

इति परमगुणाननेकभेदाञ्
सिलरतये त्रिपथाश्रयानुरूपान् ।

---

1. अ-क-घ—नास्त्यर्धद्वयमिदम्

बहुविधमनुगम्य तस्य रूपान्
गगनतलं द्युतिमान् विवेश सिद्धः ॥ १०८

सिलवृत्तिस्तु सिद्धस्य वाक्यैस्सम्भावितस्तदा ।
गङ्गामुपास्य विधिवत् सिद्धिं प्राप्तस्सुदुर्लभाम् ॥ १०९

तस्मात् त्वमपि कौन्तेय भक्त्या परमया युतः ।
गङ्गामभ्येत्य सततं प्राप्स्यसे सिद्धिमुत्तमाम् ॥ ११०

वैशम्पायनः—

श्रुत्वेतिहासं भीष्मोक्तं गङ्गायास्तवसंयुतम् ।
युधिष्ठिरः परां प्रीतिम् अगच्छद्भ्रातृभिस्सह ॥ १११

इतिहासमिमं पुण्यं शृणुयाच्च पठेत वा ।
गङ्गायास्तवसंयुक्तं स मुच्येद्व्याधिकिल्बिषैः ॥ ११२

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां
अनुशासनपर्वणि द्वात्रिंशोऽध्यायः ॥ ३२ ॥
॥ ८५ ॥ आनुशासनिकपर्वणि द्वात्रिंशोऽध्यायः ॥ ३२ ॥
[अस्मिन्नध्याये ११२ श्लोकाः]

॥ त्रयस्त्रिंशोऽध्यायः ॥

भीष्मेण युधिष्ठिरं प्रति मानवेषु पूज्यताप्रयोजकगुणप्रतिपादककृष्णनारदसंवादानुवादः ॥

युधिष्ठिरः—

के सम्पूज्यास्त्रिलोकेऽस्मिन मानवा भरतर्षभ ।
विस्तरेण तदाचक्ष्व न हि तृप्यामि कथ्यताम ॥ १

भीष्मः—

अत्राप्युदाहरन्तीमम् इतिहासं पुरातनम् ।
नारदस्य च संवादं वासुदेवस्य चाभि भो ॥ २

नारदं प्राञ्जलिं दृष्ट्वा पूजया च द्विजर्षभम् ।
केशवः परिपप्रच्छ भगवन् कान् नमस्यसि ॥ ३

बहुमानः परः केषु भवतो यान् नमस्यसि ।
श्रोतुमिच्छामि तत्त्वेन ब्रूहि तद्धर्मवित्तम ॥ ४

नारदः—

शृणु गोविन्द यानेतान् पूजयाम्यरिमर्दन ।
त्वत्तोऽन्यः कः पुमाँल्लोके श्रोतुमेतदिहार्हति ॥ ५

वरुणं वायुमादित्यं पर्जन्यं जातवेदसम् ।
स्थाणुं स्कन्दं महालक्ष्मीं विष्णुं ब्रह्माणमेव च ॥ ६

वाचस्पतिं चन्द्रमसम् अपः पृथ्वीं तथैव च ।
सततं ये नमस्यन्ति तान् नमस्याम्यहं प्रभो ॥ ७

तपोधनान् वेदविदो नित्यं वेदपरायणान् ।
महार्हान् वृष्णिशार्दूल सदा सम्पूजयाम्यहम् ॥ ८

अभुक्त्वा देवकार्याणि ये कुर्वन्त्यविकत्थनाः ।
सन्तुष्ट्याऽथ समायुक्तास् तान् नमस्याम्यहं विभो ॥ ९

सम्यग्ददति ये चेष्टान् क्षान्तान् दान्तान् जितेन्द्रियाः ।
सस्यं धनं क्षितिं गां च तान् नमस्यामि यादव ॥ १०

[1]ये वै तपसि वर्तन्ते वने मूलफलाशनाः ।
[2]असञ्चयाः क्रियावन्तस् तान् नमस्याम्यहं विभो ॥ ११

ये भृत्यभरणे सक्तास् सततं चातिथिव्रताः ।
भुञ्जते देवशेषाणि तान् नमस्यामि यादव ॥ १२

ये [3]वेदं प्राप्य दुर्धर्षं युवानो ब्रह्मवादिनः ।
याजनाध्यापनैर्युक्ता नित्यं तान् पूजयाम्यहम् ॥ १३

प्रसन्नहृदया ये च ब्रह्मण्यास्सत्यसङ्गराः ।
वोढारो हव्यकव्यानां तान् नमस्यामि यादव ॥ १४

---

1. क-घ—अधैद्वर्यं नास्ति
2. ख—असंशयाः
3. क-घ—देवं प्राप्य दुर्धर्षं वशिनो ब्रह्मवादिनः

भैक्षमेव सदाऽश्नन्ति सदा गुरुकुलालयाः ।
निस्सुखा निर्धना ये च तान् नमस्यामि यादव ॥ १५

निर्ममा निष्प्रतिद्वन्द्वा निष्टिता निष्प्रयोजनाः ।
अहिंसानिरता ये च तान् नमस्याम्यहं सदा ॥ १६

देवतातिथिपूजायां प्रसक्ता गृहमेधिनः ।
कपोतवृत्तयो नित्यं तान् नमस्याम्यहं सदा ॥ १७

[1]अवन्ध्यकाला येऽलुब्धास् त्रिवर्गे साधनेषु वा ।
विशिष्टाचारयुक्ताश्च [2]सन्ततं च नमामि तान् ॥ १८

अदभक्षा वायुभक्षाश्च सुधाभक्षाश्च ये सदा ।
व्रतैश्च विविधैर्युक्तास् तान् नमस्याम्यहं सदा ॥ १९

अदयोनीनग्नियोनींश्च ब्रह्मयोनींस्तथैव च ।
सर्वभूतात्मयोनींश्च तान नमस्याम्यहं सदा ॥ २०

नित्यमेतान् नमस्यामि कृष्ण लोककरान्नृपान ।
लोकज्येष्ठाञ् ज्ञाननिष्ठांस् तस्मात्ताँल्लोकभास्वरान् ॥ २१

तस्मात् त्वमपि वार्ष्णेय द्विजान् पूजय नित्यदा ।
पूजिताः पूजनार्हा हि सुखं दास्यन्ति तेऽनघ ॥ २२

अस्मिँल्लोके सदा ह्येते परत्र च सुखप्रदाः ।

1. क-ध—अर्धद्वयं नास्ति
2. ख—नारायण नमामि तान्

त एते वन्द्यमाना वै प्रदास्यन्ति सुखं तव ॥ २३

ये सर्वातिथयो नित्यं गोषु च ब्राह्मणेषु च ।
नित्यं जप्येषु निरता दुर्गाण्यतितरन्त्यपि ॥ २४

तथैव विप्रप्रवरान् नमस्कृत्य यतव्रतान् ।
भवन्ति ये दानपरा दुर्गाण्यतितरन्ति ते ॥ २५

प्राप्तास्सोमाहुतीश्चैव दुर्गाण्यतितरन्ति ते ।
मातापित्रोर्गुरुषु च सम्यग्वर्तन्ति ये सदा ॥ २६

यथा त्वं वृष्णिशार्दूलेत्युक्त्वैव विरराम ह ।
तस्मात् त्वमपि कौन्तेय पितृदेवद्विजातिथीन् ॥ २७

सम्यक् पूजय नित्यं हि गतिमिष्टामवाप्स्यसि ॥ २७॥

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां
अनुशासनपर्वणि त्रयस्त्रिंशोऽध्यायः ॥ ३३ ॥
॥ ८९ ॥ आनुशासनिकपर्वणि त्रयस्त्रिंशोऽध्यायः ॥ ३३ ॥
[अस्मिन्नध्याये २७॥ श्लोकाः]

॥ चतुस्त्रिंशोऽध्यायः ॥

भीष्मेण युधिष्ठिरं प्रति ब्राह्मणमहिमकथनम् ॥

युधिष्ठिरः—

किं राज्ञस्सर्वकृत्यानां गरीयस्त्यात् पितामह ।
किं कुर्वन् कर्म नृपतिर् उभौ लोकौ समश्नुते ॥ १

भीष्मः—

एतद्राज्ञः कृत्यतमम् अभिषिक्तस्य भारत ।
ब्राह्मणानां रक्षणं च पूजा च सुखमिच्छतः ॥ २

श्रोत्रियान् ब्राह्मणान् वृद्धान नित्यमेवाभिपूजयेत् ।
पौरजानपदांश्चापि ब्राह्मणांश्च बहुश्रुतान् ॥ ३

सान्त्वेन भोगदानेन नमस्कारैस्सदाऽर्चयेत ॥ ३॥

एतत् कृत्यतमं राज्ञे नित्यमेवेति लक्षयेत ।
यथाऽऽत्मानं यथा पुत्रांस् तथैतान् परिपालयेत् ॥ ४॥

ये चाप्येषां पूज्यतमास् तादृशान् प्रतिपूजयेत् ।
तेषु शान्तेषु तद्राष्ट्रं सर्वमेव विराजते ॥ ५॥

ते पूज्यास्ते नमस्कार्यास् सततं पितरो यथा ।
तेष्वेव यात्रा लोकस्य भूतानामिव वासवे ॥ ६॥

आभिचारैरुपायैश्च हरेयुर्बलतेजसी ।
निश्शेषं कुपिताः कुर्युर् उग्रास्सत्यपराक्रमाः ॥ ७॥

नान्तमेषां प्रपश्यामि न दिशश्चाप्यपावृताः ।
कुपितास्समुदीर्यन्ते दावेष्वग्निशिखा इव ॥ ८॥

बिभ्यत्येषां साहसिका गुणास्तेषामतीव हि ।
कूपा इव तृणच्छन्ना [1]निगूढा द्यौरिवाम्बुदैः ॥ ९॥

प्रसह्यकारिणः केचिन् कार्पण्यमृदवोऽपरे ।
[2]मान्यास्तेषां साधवो ये न निन्द्याश्चाप्यसाधवः ॥ १०॥

सन्ति चैषामति[3]शठास् तथा चान्ये तपस्विनः ॥ ११

कृषिगोरक्षमप्यन्ये भैक्षमन्ये प्रतिष्ठिताः ।
चोराश्चान्ये भृताश्चान्ये तथाऽन्ये नटनर्तकाः ॥ १२

सर्वकर्मसु दृश्यन्ते प्रशान्तेष्वितरेषु च ।
विविधाचारयुक्ताश्च ब्राह्मणा भरतर्षभ ॥ १३

नानाकर्मसु युक्तानां बहुकर्मोपजीविनाम् ।
सर्वज्ञानां सतां ह्येषां नित्यमेवानुवर्तयेत् ॥ १४

पितॄणां देवतानां च मनुष्योरगरक्षसाम् ।

---

1. अ-क—विशुद्धा द्यौरिवापरे
2. क-ख—नास्तीदमर्धम्
3. क-घ—शमास्तथा

पुरोहिता महाभागा ब्राह्मणा वै नराधिप ॥ १५

नैते देवैर्न पितृभिर् न गन्धर्वैर्न राक्षसैः ।
नासुरैर्न पिशाचैश्च शक्या जेतुं द्विजातयः ॥ १६

अदैवं दैवतं कुर्युर् दैवतं चाप्यदैवतम् ।
यमिच्छेयुस्स राजा स्याद् यं द्विष्युस्स पराभवेत् ॥ १७

[1]अतिवादं च ये कुर्युर् ब्राह्मणानामचेतसः ।
निन्दाप्रशंसाकुशलाः कीर्त्यकीर्तिपरायणाः ॥ १८

परिकुप्यन्ति ते राजन् सततं द्विषतां द्विजाः ॥ १८॥

ब्राह्मणा यं [2]प्रशंसन्ति पुरुषस्स प्रवर्तते ।
ब्राह्मणैर्यः पराकुष्टः पराभूयान् क्षणाद्धि सः ॥ १९॥

शका यवनकाम्भोजास् तास्ताः क्षत्रियजातयः ।
वृषलत्वं परिगता ब्राह्मणानामदर्शनात् ॥ २०॥

द्रमिळाश्च कलिङ्गाश्च पुलिन्दाश्चाप्युशीनराः ।
कौलास्सर्वा माहिषिकास् तास्ताः क्षत्रियजातयः ॥ २१॥

वृषलत्वं परिगता ब्राह्मणानामदर्शनात् ॥ २२

श्रेयान् पराजयस्तेभ्यो न जयो जयतां वर ॥ २२॥

यत्तु सर्वमिदं हन्याद् ब्राह्मणांश्च न तत्समम् ।

1. क—अपोहितं ङ—अनिपातम्
2. ख-ङ—प्रपश्यन्ति

ब्रह्मवध्या महान् दोष इत्याहुः परमर्षयः ॥ २३॥

परिवादो द्विजाग्र्याणां न श्रोतव्यः कथञ्चन ।
आसीताधोमुखस्तूष्णीं समुत्थाय व्रजेत वा ॥ २४॥

न स जातो जनिष्यो वा पृथिव्यामिह कश्चन ।
यो ब्राह्मणविरोधेन सुखं जीवितुमुत्सहेत् ॥ २५॥

दुर्ग्रहो मुष्टिना वायुर् अस्पर्शः पाणिना शशी ।
दुर्धरा पृथिवी मूर्ध्ना दुर्जया ब्राह्मणा भुवि ॥ २६॥

ब्राह्मणानेव सुभृशं सततं परिपूजयेत् ।
एते हि सोमराजान ईश्वरास्सुखदुःखयोः ॥ २७॥

एते भोगैरलङ्कारैर् अन्यैश्चैव किमिच्छकैः ।
प्रतिपूज्या नमस्कार्या रक्ष्याश्च पितृवन्नृपैः ॥ २८॥

अतो राष्ट्रस्य शान्तिर्हि भूतानामिव वासवात् ॥ २९

ज्ञानवान् ब्रह्मवर्चस्वी राष्ट्रे यो ब्राह्मणश्शुचिः ।
महारथश्च राजन्य एष्टव्यश्शत्रुतापनः ॥ ३०

ब्राह्मणं जातिसम्पन्नं धर्मज्ञं संशितव्रतम् ।
भोजयीत गृहे राजन् न तस्मात् परमस्ति वै ॥ ३१

ब्राह्मणेभ्यो हविर्दत्तं प्रतिगृह्णन्ति देवताः ।
पितरस्सर्वभूतानां नैतेभ्यो विद्यते परम् ॥ ३२

---

* सर्वेषु कोशेषु अत्रैवाध्यायसमाप्तिर्दृश्यते

आदित्यश्चन्द्रमा विष्णुश् शङ्करोऽग्निः प्रजापतिः ।
सर्वे ब्राह्मणमाविश्य सदाऽन्नमुपभुञ्जते ॥ ३३

[1]न तस्याश्नन्ति पितरो यस्य विप्रा न भुञ्जते ।
देवताश्चास्य नाश्नन्ति पापस्य ब्राह्मणद्विषः ॥ ३४

ब्राह्मणेषु सुतुष्टेषु प्रीयन्ते पितरस्सदा ।
तथैव देवता राजन् नात्र कार्या विचारणा ॥ ३५

तथैव तेऽपि प्रीयन्ते येषां भवति तद्धविः ।
न च प्रेत्य विनश्यन्ति गच्छन्ति परमां गतिम् ॥ ३६

येनैव हविषा राजन् ब्राह्मणांस्तर्पयेद्द्विजः ।
ते तेनैव तृप्यन्ते पितरो दैवतानि च ॥ ३७

ब्राह्मणो वेद तद्भूतं प्रभवन्ति यतः प्रजाः ।
यतश्चायं प्रभवति प्रेत्य यत्रापि गच्छति ॥ ३८

वेदैष मार्गं स्वर्गस्य नरकस्य तथैव च ।
आगतानागते चोभे ब्राह्मणो द्विपदां वरः ॥ ३९

ब्राह्मणो द्विपदां श्रेष्ठस् स्वधर्मं वेद मेधया ।
[2]ये नैनमनुवर्तन्ते ते न यान्ति परां गतिम् ॥ ४०

न ते प्रेत्य विनश्यन्ति गच्छन्ति परमां गतिम् ॥ ४०॥

---

1. अ-घ—इदमर्धं नास्ति
2. क-घ—ये चैन + पराभवम्

ये ब्राह्मणमुखान् प्राप्तं प्रतिगृह्णन्ति चैव हि ।
कृतात्मानो महात्मानस् ते यान्ति परमां गतिम् ॥ ४१॥

क्षत्रियाणां प्रतपतां तेजसा च बलेन च ।
ब्राह्मणेष्वेव शाम्यन्ति तेजांसि च तपांसि च ॥ ४२॥

भृगवोऽजयंस्तालजङ्घान् नीपानाङ्गिरसोऽजयन् ।
भरद्वाजो वैतहव्यान ऐलांश्च भरतर्षभ ॥ ४३॥

चित्रायुधांश्चाप्यजयन्नेते कृष्णाजिनध्वजाः ॥ ४४

प्रक्षिप्य यश्च कुम्भ्यां वै पुरगामिनमाहरेत् ॥ ४४॥

यत् किञ्चिन् कथ्यते लोके श्रूयते दृश्यतेऽपि वा ।
सर्वं तद्ब्राह्मणेष्वेव गूढोऽग्निरिव दारुषु ॥ ४५॥

अत्राप्युदाहरन्तीमम् इतिहासं पुरातनम् ।
संवादं वासुदेवस्य पृथिव्या भरतर्षभ ॥ ४६॥

श्रीभगवान्—

मातरं सर्वभूतानां पृच्छे त्वां संशयं शुभे ।
केनस्वित् कर्मणा पापं व्यपोहति नरो गृही ॥ ४७॥

पृथिवी—

ब्राह्मणानेव सेवेत सततं ह्येतदुत्तमम् ।
ब्राह्मणान् सेवमानस्य पापं सर्वं प्रयास्यति ॥ ४८॥
अतो भूरितरा कीर्तिर् अतो बुद्धिः प्रजायते ।

परेषामपरेषां च परेभ्यश्चैव ये परे ॥ ४९॥

ब्राह्मणा यं प्रशंसन्ति पुरुषस्स प्रवर्धते ।
अथ यो ब्राह्मणान् क्रुष्टः पराभवति सोऽचिरात् ॥ ५०॥

यथा महार्णवे क्षिप्त आमलोष्टो विनश्यति ।
तथा दुश्चरितं विप्रे पराभावाय कल्पते ॥ ५१॥

पश्य चन्द्रे कृतं लक्ष्म समुद्रे लवणोदकम् ।
तथा भगसहस्रेण महेन्द्रः परिचिह्नितः ॥ ५२॥

तेषामेव प्रभावेन सहस्रनयनोऽभवत् ।
शतक्रतुस्समभवत पश्य माधव यादृशम् ॥ ५३॥

इच्छन् भूतिं च कीर्तिं च [1]भोगांश्च मधुसूदन ।
ब्राह्मणानुमते तिष्ठेन् पुरुषश्शुचिरात्मवान् ॥ ५४॥

भीष्मः—

इत्येतद्वचनं श्रुत्वा मेदिन्या मधुसूदनः ।
साधु साध्विति तामुक्त्वा मेदिनीं पर्यपूजयत् ॥ ५५॥

एतां श्रुत्वोपमां पार्थ प्रयतो ब्राह्मणर्षभान् ।
सततं पूजयेथास्त्वं तत्र श्रेयोऽभिपत्स्यसे* ॥ ५६॥

जन्मनैव महाभागो ब्राह्मणो नाम जायते ।
नमस्यस्सर्वभूतानाम् अतिथिः प्रसृताग्रभुक् ॥ ५७॥

---

1. क-घ—लोकांश्च

* सर्वेषु कोशेषु अत्रैवाध्यायसमाप्तिर्दृश्यते

सर्वेषां [1]सुखदास्तात ब्राह्मणास्सुमनोमुखाः ।
सर्वानेते हनिष्यन्ति ब्राह्मणा जातमन्यवः ॥ ५८॥
गीर्भिर्मङ्गल्ययुक्ताभिर् अनुध्येयुस्सुपूजिताः ॥ ५९
सर्वान् नो द्विषतस्तात ब्राह्मणा जातमन्यवः ।
गीर्भिर्दारुणयुक्ताभिर् हन्युश्चैते ह्यपूजिताः ॥ ६०
अत्र गाथा ब्रह्मगीताः कीर्तयन्ति पुराविदः ।
सृष्ट्वा द्विजातीन् धाता हि यथापूर्वं समादधत् ॥ ६१
धाता—
न वोऽन्यदिह कर्तव्यं किञ्चिदूर्ध्वायनं [2]विधि ।
युक्ता गोपायत ब्रह्म श्रेयो वस्त्वस्तु शोभनम् ॥ ६२
स्वमेव कुर्वतां कर्म श्रीर्वो ब्राह्मी भविष्यति ।
ब्राह्मण्यं सर्वभूतानां प्रग्रहं च गमिष्यथ ॥ ६३
न शूद्रकर्म कर्तव्यं ब्राह्मणेन विपश्चिता ।
शौद्रं हि कुर्वतः कर्म ब्राह्मी श्रीरुपरुध्यते ॥ ६४
श्रीश्च बुद्धिश्च तेजश्च विभूतिश्च प्रतापिनी ।
[3]स्वाध्यायेनैव माहात्म्यं विमलं प्रतिपत्स्यथ ॥ ६५
हुत्वा चाहवनीयादि महाभाग्ये प्रतिष्ठिताः ।
अग्रभोज्याः प्रसूतीनां श्रिया ब्राह्म्याऽनुकल्पिताः ॥ ६६

1. क-घ—सुहृद 2. अ-क-ख—विधिः
3. क-घ—सुध्यानेन

श्रद्धया परया युक्ता ह्यनभिद्रोहलब्धया ।
दमस्वाध्यायनिरतास् सर्वान् कामानवाप्स्यथ ॥ ६७

यच्चैव मानुषे लोके यच्च देवेषु किञ्चन ।
सर्वं वस्तपसा साध्यं ज्ञानेन विनयेन च ॥ ६८

युष्मत्सम्माननात् प्रीतिं पावनैः क्षत्रियाश्रियम् ।
अमुत्रेह समायान्ति वैश्यशूद्रादिकास्तथा ॥ ६९

अरक्षिताश्च युष्माभिर् विरुद्धा यान्ति विप्लवम् ।
युष्मत्तेजोवृता लोकास् तद्रक्षथ जगत्त्रयम् ॥ ७०

भीष्मः—

इत्येता ब्रह्मगीतास्तास् समाख्याता मया तव ।
विप्रानुकम्पार्थमिदं तेन प्रोक्तं हि धीमता ॥ ७१

भूयस्तेषां फलं मन्ये यथा राज्ञस्समुत्थितम् ।
दुरासदाश्च चण्डाश्च तपसा क्षिप्रकारिणः ॥ ७२

सन्त्येषां सिंहसत्त्वाश्च व्याघ्रसत्त्वास्तथाऽपरे ।
वराहमृगसत्त्वाश्च गजसत्त्वास्तथैव च ॥ ७३

कार्पासमृदवः केचिन् तथाऽन्ये मकरस्पृशः ।
विभाव्यभाविनः केचिन् तथा चक्षुर्हणः परे ॥ ७४

[1]विविधानीह वृत्तानि ब्राह्मणानां युधिष्ठिर ॥ ७४॥

1. क-घ—इदमर्धं नास्ति

मेखला[1]द्रमिलाः काचाः पुण्ड्राः कोकाङ्गिरास्तथा ।
शौण्डिका गरदा दर्पाश् चोलाश्च कृशतस्कराः ॥ ७५॥

किराता यवनाश्चैव तास्ताः क्षत्रियजातयः ।
वृषलत्वमनुप्राप्ता ब्राह्मणानामदर्शनात् ॥ ७६॥

ब्राह्मणानां परिभवाद् असुरास्सलिलेशयाः ।
ब्राह्मणानां प्रसादाच्च देवास्स्वर्गनिवासिनः ॥ ७७॥

अशक्यं स्प्रष्टुमाकाशम् अचाल्यो हिमवान् गिरिः ।
अवार्या सेतुना गङ्गा दुर्जया ब्राह्मणा भुवि ॥ ७८॥

न ब्राह्मणविरोधेन शक्यं शास्तुं वसुन्धराम् ।
ब्राह्मणा हि महात्मानो देवानामपि देवताः ॥ ७९॥

तान् पूजयस्व सततं दानेन परिचर्यया ।
यदीच्छसि महीं भोक्तुम् इमां सागरमेखलाम् ॥ ८०॥

प्रतिग्रहेण तेजो हि विप्राणां शाम्यतेऽनघ ।
प्रतिग्रहं ये नेच्छेयुस् तेऽपि रक्ष्यास्त्वयाऽनघ ॥ ८१॥

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां
अनुशासनपर्वणि चतुस्त्रिंशोऽध्यायः ॥ ३४ ॥
॥ ८९ ॥ आनुशासनिकपर्वणि चतुस्त्रिंशोऽध्यायः ॥ ३४ ॥
[अस्मिन्नध्याये ८१॥ श्लोकाः]

---

1 क-घ—प्रमिलाः

॥ पञ्चत्रिंशोऽध्यायः ॥

भीष्मेण युधिष्ठिरं प्रति ब्राह्मणमाहात्म्यप्रतिपादकशक्रशम्बरसंवादानुवादः ॥

भीष्मः—

अत्राप्युदाहरन्तीमम् इतिहासं पुरातनम् ।
शक्रशम्बरसंवादं तं निबोध युधिष्ठिर ॥ १

शक्रो ह्यज्ञातरूपेण जटी भूत्वा सुदारुणः ।
विप्ररूपं समास्थाय प्रश्नं पप्रच्छ शम्बरम् ॥ २

शक्रः—

केन शम्बर रूपेण स्वजात्यानधितिष्ठसि ।
श्रेष्ठं त्वां केऽनुमन्यन्ते तन्मे ब्रूहीह पृच्छते ॥ ३

शम्बरः—

नासूयामि सदा विप्रान् ब्राह्मणं च पितामहम् ।
शास्त्राणि वदतो विप्रान् मानयामि यथासुखम् ॥ ४

श्रुत्वा च नावजानामि नापविध्यामि कर्हिचित् ।
अभ्यर्चयामि पृच्छामि पादौ गृह्णामि धीमताम् ॥ ५

ते विस्रब्धाः प्रभाषन्ते संयच्छान्ति च मां सदा ।
प्रमत्तेष्वप्रमत्तोऽस्मि सदा सुप्तेषु जागृमि ॥ ६

ते मां शास्त्रपदे सक्तं ब्रह्मवर्त्मानसूयकम् ।
समासिञ्चन्ति शास्तारः क्षौद्रं मक्षिव मक्षिकाः ॥ ७

यच्च भाषन्ति ते तुष्टास् तत्तद् [1]गृह्णामि मेधया ।
समाधिमात्मनो नित्यम् अतुलामनुचिन्तयन् ॥ ८

सोऽहं वाग्ग्रयमृष्टानां रसानामनुलेहिनाम् ।
स्वजात्यानधितिष्ठामि नक्षत्राणीव चन्द्रमाः ॥ ९

एतत् पृथिव्याममृतम् एतच्चक्षुरनुत्तमम् ।
यद्ब्राह्मणमुखाच्छास्त्रम् इह श्रुत्वा प्रवर्तते ॥ १०

एतत् कारणमाज्ञाय दृष्ट्वा देवासुरं पुरा ।
युद्धं पिता मे हृष्टात्मा विस्मितः प्रत्यपद्यत ॥ ११

दृष्ट्वा च ब्राह्मणानां तु महिमानं महात्मनाम् ।
पर्यपृच्छत् कथमिमे सिद्धा इति निशाकरम् ॥ १२

सोमः—

ब्राह्मणास्तपसा सिद्धा दृश्यन्ते वाग्बलास्सदा ।
भुजवीर्या हि राजानो वाग्बलाश्च द्विजातयः ॥ १३

प्रवसन् वाऽप्यधीयीत बह्वीर्दुर्वसतीर्वसन् ।
निर्मन्युरपि निर्मानो यदि स्यात् समदर्शनः ॥ १४

अपि चेज्ज्ञानसम्पन्नस् सर्वान् वेदान् पितृर्गृहे ।

---

1. क-घ—गृह्णाम्यमायया

[1]मेरोस्समुद्रस्य च सर्वरत्न-
सङ्घोदधीनामुदकस्य चैव ।
वक्तुं शक्या नेह गङ्गागुणानां
सङ्घातुं वा परिमातुं तथैव ॥ १०४

तस्मादिमान् परया श्रद्धयोक्तान्
सर्वान् गुणाञ् जाह्नवीस्तथैव ।
भजेद्वाचा मनसा कर्मणा च
भक्त्या युक्तः परया श्रद्दधानः ॥ १०५

लोकानिमांस्त्रीन् विजित्येह सिद्धस्
सिद्धिं प्राप्तो महतीं तां दुरापाम् ।
गङ्गाकृतानचिरेणैव लोकान्
यथेष्टमिष्टान् विहरिष्यसे त्वम् ॥ १०६

तव मम च गुणैर्महानुभावा
जुषतु मतिं सततं स्वधर्मयुक्ताम् ।
अभिजनगुणवत्सला हि गङ्गा
भजति युनक्ति सुखैश्च भक्तिमन्तम् ॥ १०७

भीष्मः—

इति परमगुणाननेकभेदाञ्
शिलरतये त्रिपथाश्रयानुरूपान् ।

1. अ-क-घ—नास्त्यर्धद्वयमिदम्

बहुविधमनुगम्य तस्य रूपान्
गगनतलं द्युतिमान् विवेश सिद्धः ॥ १०८

सिलवृत्तिस्तु सिद्धस्य वाक्यैस्सम्भावितस्तदा ।
गङ्गामुपास्य विधिवत् सिद्धिं प्राप्तस्सुदुर्लभाम् ॥ १०९

तस्मात् त्वमपि कौन्तेय भक्त्या परमया युतः ।
गङ्गामभ्येत्य सततं प्राप्स्यसे सिद्धिमुत्तमाम् ॥ ११०

वैशम्पायनः—

श्रुत्वेतिहासं भीष्मोक्तं गङ्गायास्तवसंयुतम् ।
युधिष्ठिरः परां प्रीतिम् अगच्छद्भ्रातृभिस्सह ॥ १११

इतिहासमिमं पुण्यं शृणुयाच्च पठेत वा ।
गङ्गायास्तवसंयुक्तं स मुच्येद्व्याधिकिल्बिषैः ॥ ११२

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां
अनुशासनपर्वणि द्वात्रिंशोऽध्यायः ॥ ३२ ॥
॥ ८९ ॥ आनुशासनिकपर्वणि द्वात्रिंशोऽध्यायः ॥ ३२ ॥
[अस्मिन्नध्याये ११२ श्लोकाः]

॥ त्रयस्त्रिंशोऽध्यायः ॥

भीष्मेण युधिष्ठिरं प्रति मानवेषु पूज्यताप्रयोजकगुणप्रतिपादककृष्ण-नारदसंवादानुवादः ॥

युधिष्ठिरः—

के सम्पूज्यास्त्रिलोकेऽस्मिन मानवा भरतर्षभ ।
विस्तरेण तदाचक्ष्व न हि तृप्यामि कथ्यताम ॥ १

भीष्मः—

अत्राप्युदाहरन्तीमम इतिहासं पुरातनम् ।
नारदस्य च संवादं वासुदेवस्य चाभि भो ॥ २

नारदं प्राञ्जलिं दृष्ट्वा पूजया च द्विजर्षभम ।
केशवः परिपप्रच्छ भगवन् कान नमस्यसि ॥ ३

बहुमानः परः केषु भवतो यान् नमस्यसि ।
शक्यं चेच्छ्रोतुमिच्छामि ब्रूहि तद्धर्मवित्तम ॥ ४

नारदः—

शृणु गोविन्द यानेतान पूजयाम्यरिमर्दन ।
त्वत्तोऽन्यः कः पुमाँल्लोके श्रोतुमेतदिहार्हति ॥ ५

वरुणं वायुमादित्यं पर्जन्यं जातवेदसम ।
स्थाणुं स्कन्दं महालक्ष्मीं विष्णुं ब्रह्माणमेव च ॥ ६

वाचस्पतिं चन्द्रमसम् अपः पृथ्वीं तथैव च ।
सततं ये नमस्यन्ति तान् नमस्याम्यहं प्रभो ॥ ७

तपोधनान् वेदविदो नित्यं वेदपरायणान् ।
महार्हान् वृष्णिशार्दूल सदा सम्पूजयाम्यहम् ॥ ८

अभुक्त्वा देवकार्याणि ये कुर्वन्त्यविकत्थनाः ।
सन्तुष्ट्याऽथ समायुक्तास् तान् नमस्याम्यहं विभो ॥ ९

सम्यग्ददति ये चेष्टान् क्षान्तान् दान्तान् जितेन्द्रियाः ।
सम्यं धनं क्षितिं गां च तान नमस्यामि यादव ॥ १०

[1]ये वै तपसि वर्तन्ते वने मूलफलाशनाः ।
[2]असञ्चयाः क्रियावन्तस् तान् नमस्याम्यहं विभो ॥ ११

ये भृत्यभरणे सक्तास् सततं चातिथिव्रताः ।
भुञ्जते देवशेषाणि तान् नमस्यामि यादव ॥ १२

ये [3]वेदं प्राप्य दुर्धर्षं युवानो ब्रह्मवादिनः ।
याजनाध्यापनैर्युक्ता नित्यं तान् पूजयाम्यहम् ॥ १३

प्रसन्नहृदया ये च ब्रह्मण्यास्सत्यसङ्गराः ।
वोढारो हव्यकव्यानां तान् नमस्यामि यादव ॥ १४

---

1. क-घ—अधृष्यं नास्ति
2. ख—असंशयाः
3. क-घ—देवं प्राप्य दुर्धर्षं वशिनो ब्रह्मवादिनः

भैक्षमेव सदाऽश्नन्ति सदा गुरुकुलालयाः ।
निस्सुखा निर्धना ये च तान् नमस्यामि यादव ॥ १५

निर्ममा निष्प्रतिद्वन्द्वा निष्ठिता निष्प्रयोजनाः ।
अहिंसानिरता ये च तान् नमस्याम्यहं सदा ॥ १६

देवतातिथिपूजायां प्रसक्ता गृहमेधिनः ।
कपोतवृत्तयो नित्यं तान् नमस्याम्यहं सदा ॥ १७

[1]अवन्ध्यकाला येऽलुब्धास् त्रिवर्गे साधनेषु वा ।
विशिष्टाचारयुक्ताश्च [2]सन्ततं च नमामि तान् ॥ १८

अब्भक्षा वायुभक्षाश्च सुधाभक्षाश्च ये सदा ।
व्रतैश्च विविधैर्युक्तास् तान् नमस्याम्यहं सदा ॥ १९

अयोनीनग्नियोनींश्च ब्रह्मयोनींस्तथैव च ।
सर्वभूतात्मयोनींश्च तान् नमस्याम्यहं सदा ॥ २०

नित्यमेतान् नमस्यामि कृष्ण लोककरानृषीन् ।
लोकज्येष्ठाञ् ज्ञाननिष्ठांस् तस्मात्ताँल्लोकभास्वरान् ॥ २१

तस्मात् त्वमपि वार्ष्णेय द्विजान् पूजय नित्यदा ।
पूजिताः पूजनार्हा हि सुखं दास्यन्ति तेऽनघ ॥ २२

अस्मिँल्लोके सदा ह्येते परत्र च सुखप्रदाः ।

---

1. *क-घ—अर्धद्वयं नास्ति*
2. *ख—नारायण नमामि तान्*

त एते वन्द्यमाना वै प्रदास्यन्ति सुखं तव ॥ २३

ये सर्वातिथयो नित्यं गोषु च ब्राह्मणेषु च ।
नित्यं जप्येषु निरता दुर्गाण्यतितरन्त्यपि ॥ २४

तथैव विप्रप्रवरान् नमस्कृत्य यतव्रतान् ।
भवन्ति ये दानपरा दुर्गाण्यतितरन्ति ते ॥ २५

प्राप्तास्सोमाहुतीश्चैव दुर्गाण्यतितरन्ति ते ।
मातापित्रोर्गुरुषु च सम्यग्वर्तन्ति ये सदा ॥ २६

यथा त्वं वृष्णिशार्दूलेत्युक्त्वैव विरराम ह ।
तस्मात् त्वमपि कौन्तेय पितृदेवद्विजातिथीन् ॥ २७

सम्यक् पूजय नित्यं हि गतिमिष्टामवाप्स्यसि ॥ २७॥

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां
अनुशासनपर्वणि त्रयस्त्रिंशोऽध्यायः ॥ ३३ ॥
॥ ८९ ॥ आनुशासनिकपर्वणि त्रयस्त्रिंशोऽध्यायः ॥ ३३ ॥
[अस्मिन्नध्याये २७॥ श्लोकाः]

॥ चतुस्त्रिंशोऽध्यायः ॥

भीष्मेण युधिष्ठिरं प्रति ब्राह्मणमहिमकथनम् ॥

युधिष्ठिरः—

किं राज्ञस्सर्वकृत्यानां गरीयस्स्यात् पितामह ।
किं कुर्वन् कर्म नृपतिर् उभौ लोकौ समश्नुते ॥ १

भीष्मः—

एतद्राज्ञः कृत्यतमम् अभिषिक्तस्य भारत ।
ब्राह्मणानां रक्षणं च पूजा च सुखमेच्छतः ॥ २

श्रोत्रियान् ब्राह्मणान् वृद्धान् नित्यमेवाभिपूजयेत् ।
पौरजानपदांश्चापि ब्राह्मणांश्च बहुश्रुतान् ॥ ३

सान्त्वेन भोगदानेन नमस्कारैस्सदाऽर्चयेत् ॥ ३॥

एतत् कृत्यतमं राज्ञे नित्यमेवेति लक्षयेत् ।
यथाऽऽत्मानं यथा पुत्रांस् तथैतान् परिपालयेत् ॥ ४॥

ये चाप्येषां पूज्यतमास् तादृशान् प्रतिपूजयेत् ।
तेषु शान्तेषु तद्राष्ट्रं सर्वमेव विराजते ॥ ५॥

ते पूज्यास्ते नमस्कार्यास् सततं पितरो यथा ।
तेष्वेव यात्रा लोकस्य भूतानामिव वासवे ॥ ६॥

आभिचारैरुपायैश्च हरेयुर्बलतेजसी ।
निश्शेषं कुपिताः कुर्युर् उग्रास्सत्यपराक्रमाः ॥ ७॥

नान्तमेषां प्रपश्यामि न दिशश्चाप्यपावृताः ।
कुपितास्समुदीर्यन्ते दावेष्वग्निशिखा इव ॥ ८॥

विभ्यत्येषां साहसिका गुणास्तेषामतीव हि ।
कूपा इव तृणच्छन्ना [1]निगूढा द्यौरिवाम्बुदैः ॥ ९॥

प्रसह्यकारिणः केचित् कार्पण्यमृदवोऽपरे ।
[2]मान्यास्तेषां साधवो ये न निन्द्याश्चाप्यसाधवः ॥ १०॥

सन्ति चैषामति[3]शठास् तथा चान्ये तपस्विनः ॥ ११

कृषिगोरक्षमप्यन्ये भैक्षमन्ये प्रतिष्ठिताः ।
चोराश्चान्ये भृताश्चान्ये तथाऽन्ये नटनर्तकाः ॥ १२

सर्वकर्मसु दृश्यन्ते प्रशान्तेष्वितरेषु च ।
विविधाचारयुक्ताश्च ब्राह्मणा भरतर्षभ ॥ १३

नानाकर्मसु युक्तानां बहुकर्मोपजीविनाम् ।
सर्वज्ञानां सतां ह्येषां नित्यमेवानुवर्तयेत् ॥ १४

पितॄणां देवतानां च मनुष्योरगरक्षसाम् ।

---

1. अ-क—विशुद्धा द्यौरिवापरे
2. क-ख—नास्तीदमर्धम्
3. क-घ—शमास्तथा

पुरोहिता महाभागा ब्राह्मणा वै नराधिप ॥ १५

नैते देवैर्न पितृभिर् न गन्धर्वैर्न राक्षसैः ।
नासुरैर्न पिशाचैश्च शक्या जेतुं द्विजातयः ॥ १६

अदैवं दैवतं कुर्युर् दैवतं चाप्यदैवतम् ।
यमिच्छेयुस्स राजा स्याद् यं द्विष्युस्स पराभवेत् ॥ १७

[1]अतिवादं च ये कुर्युर् ब्राह्मणानामचेतसः ।
निन्दाप्रशंसाकुशलाः कीर्त्यकीर्तिपरायणाः ॥ १८

परिकुप्यन्ति ते राजन् सततं द्विषतां द्विजाः ॥ १८॥

ब्राह्मणा यं [2]प्रशंसन्ति पुरुषस्स प्रवर्तते ।
ब्राह्मणैर्यः पराकृष्टः पराभूयात् क्षणाद्धि सः ॥ १९॥

शका यवनकाम्भोजास् तास्ताः क्षत्रियजातयः ।
वृषलत्वं परिगता ब्राह्मणानामदर्शनात् ॥ २०॥

द्रमिळाश्च कलिङ्गाश्च पुलिन्दाश्चाप्युशीनराः ।
कौलास्सर्वा माहिषिकास् तास्ताः क्षत्रियजातयः ॥ २१॥

वृषलत्वं परिगता ब्राह्मणानामदर्शनात् ॥ २२

श्रेयान् पराजयस्तेभ्यो न जयो जयतां वर ॥ २२॥

यत्तु सर्वमिदं हन्याद् ब्राह्मणांश्च न तत्समम् ।

---

1. क—अपोहितं घ—अनिपातम्
2. ख-च—प्रपश्यन्ति

ब्रह्मवध्या महान दोष इत्याहुः परमर्षयः ॥ २३॥

परिवादो द्विजाग्र्याणां न श्रोतव्यः कथञ्चन ।
आसीताधोमुखस्तूष्णीं समुत्थाय व्रजेत वा ॥ २४॥

न स जातो जनिष्यो वा पृथिव्यामिह कश्चन ।
यो ब्राह्मणविरोधेन सुखं जीवितुमुत्सहेत् ॥ २५॥

दुर्ग्रहो मुष्टिना वायुर् अस्पर्शः पाणिना शशी ।
दुर्धरा पृथिवी मूर्ध्ना दुर्जया ब्राह्मणा भुवि ॥ २६॥

ब्राह्मणानेव सुभृशं सततं परिपूजयेत् ।
एते हि सोमराजान ईश्वरास्सुखदुःखयोः ॥ २७॥

एते भोगैरलङ्कारैर् अन्यैश्चैव किमिच्छकैः ।
प्रतिपूज्या नमस्कार्या रक्ष्याश्च पितृवन्नृपैः ॥ २८॥

अतो राष्ट्रस्य शान्तिर्हि भूतानामिव वासवात् ॥ २९

ज्ञानवान् ब्रह्मवर्चस्वी राष्ट्रे यो ब्राह्मणश्शुचिः ।
महारथश्च राजन्य एष्टव्यश्शत्रुतापनः ॥ ३०

ब्राह्मणं जातिसम्पन्नं धर्मज्ञं संशितव्रतम् ।
भोजयीत गृहे राजन् न तस्मात् परमस्ति वै ॥ ३१

ब्राह्मणेभ्यो हविर्दत्तं प्रतिगृह्णन्ति देवताः ।
पितरस्सर्वभूतानां नैतेभ्यो विद्यते परम् ॥ ३२

---

* सर्वेषु कोशेषु अत्रैवाध्यायसमाप्तिर्दृश्यते

आदित्यश्चन्द्रमा विष्णुश् शङ्करोऽग्निः प्रजापतिः ।
सर्वे ब्राह्मणमाविश्य सदाऽन्नमुपभुञ्जते ॥ ३३

[1]न तस्याश्नन्ति पितरो यस्य विप्रा न भुञ्जते ।
देवताश्चास्य नाश्नन्ति पापस्य ब्राह्मणद्विषः ॥ ३४

ब्राह्मणेषु सुतुष्टेषु प्रीयन्ते पितरस्सदा ।
तथैव देवता राजन् नात्र कार्या विचारणा ॥ ३५

तथैव तेऽपि प्रीयन्ते येषां भवति तद्धविः ।
न च प्रेत्य विनश्यन्ति गच्छन्ति परमां गतिम् ॥ ३६

येनैव हविषा राजन् ब्राह्मणांस्तर्पयेद्द्विजः ।
ते तेनैव तृप्यन्ते पितरो दैवतानि च ॥ ३७

ब्राह्मणो वेद तद्भूतं प्रभवन्ति यतः प्रजाः ।
यतश्चायं प्रभवति प्रेत्य यत्रापि गच्छति ॥ ३८

वेदैष मार्गं स्वर्गस्य नरकस्य तथैव च ।
आगतानागते चोभे ब्राह्मणो द्विपदां वरः ॥ ३९

ब्राह्मणो द्विपदां श्रेष्ठस् स्वधर्मं वेद मेधया ।
[2]ये नैनमनुवर्तन्ते ते न यान्ति परां गतिम् ॥ ४०

न ते प्रेत्य विनश्यन्ति गच्छन्ति परमां गतिम् ॥ ४०॥

---

1. अ-घ—इदमर्धं नास्ति
2. क-घ—ये चैन + पराभवम्

ये ब्राह्मणमुखान् प्राप्तं प्रतिगृह्णन्ति चैव हि ।
कृतात्मानो महात्मानस् ते यान्ति परमां गतिम् ॥ ४१॥

क्षत्रियाणां प्रतपतां तेजसा च बलेन च ।
ब्राह्मणेष्वेव शाम्यन्ति तेजांसि च तपांसि च ॥ ४२॥

भृगवोऽजयंस्तालजङ्घान् नीपानाङ्गिरसोऽजयन् ।
भरद्वाजो वैनहव्यान ऐलांश्च भरतर्षभ ॥ ४३॥

चित्रायुधांश्चाप्यजयन्नेते कृष्णाजिनध्वजाः ॥ ४४

प्रक्षिप्य यश्च कुम्भ्यां वै पुरुषामिनमाहरेत् ॥ ४४॥

यत् किञ्चित् कथ्यते लोके श्रूयते दृश्यतेऽपि वा ।
सर्वं तद्ब्राह्मणेष्वेव गूढोऽग्निरिव दारुषु ॥ ४५॥

अत्राप्युदाहरन्तीमम् इतिहासं पुरातनम् ।
संवादं वासुदेवस्य पृथिव्या भरतर्षभ ॥ ४६॥

श्रीभगवान्—
मातरं सर्वभूतानां पृच्छे त्वां संशयं शुभे ।
केनस्वित् कर्मणा पापं व्यपोहति नरो गृही ॥ ४७॥

पृथिवी—
ब्राह्मणानेव सेवेत सततं ह्येतदुत्तमम् ।
ब्राह्मणान् सेवमानस्य पापं सर्वं प्रणश्यति ॥ ४८॥
अतो भूरितरा कीर्तिर् अतो बुद्धिः प्रजायते ।

परेषामपरेषां च परेभ्यश्चैव ये परे ॥ ४९॥

ब्राह्मणा यं प्रशंसन्ति पुरुषस्स प्रवर्धते ।
अथ यो ब्राह्मणान् क्रुष्टः पराभवति सोऽचिरात् ॥ ५०॥

यथा महार्णवे क्षिप्त आमलोष्टो विनश्यति ।
तथा दुश्चरितं विप्रे पराभावाय कल्पते ॥ ५१॥

पश्य चन्द्रे कृतं लक्ष्म समुद्रे लवणोदकम् ।
तथा भगसहस्रेण महेन्द्रः परिचिह्नितः ॥ ५२॥

तेषामेव प्रभावेन सहस्रनयनोऽभवत् ।
शतक्रतुस्समभवत् पश्य माधव यादृशम् ॥ ५३॥

इच्छन् भूतिं च कीर्तिं च [1]भोगांश्च मधुसूदन ।
ब्राह्मणानुमते तिष्ठेत् पुरुषश्शुचिरात्मवान् ॥ ५४॥

भीष्मः—

इत्येतद्वचनं श्रुत्वा मेदिन्या मधुसूदनः ।
साधु साध्विति तामुक्त्वा मेदिनीं पर्यपूजयत् ॥ ५५॥

एतां श्रुत्वोपमां पार्थ प्रयतो ब्राह्मणर्षभान् ।
सततं पूजयेथास्त्वं तत्र श्रेयोऽभिपत्स्यसे* ॥ ५६॥

जन्मनैव महाभागो ब्राह्मणो नाम जायते ।
नमस्यस्सर्वभूतानाम् अतिथिः प्रसृताग्रभुक् ॥ ५७॥

---

1. क-घ—लोकांश्च

* सर्वेषु कोशेषु अत्रैवाध्यायसमाप्तिर्दृश्यते

सर्वेषां [1]सुखदास्तात ब्राह्मणास्सुमनोमुखाः ।
सर्वानेते हनिष्यन्ति ब्राह्मणा जातमन्यवः ॥ ५८॥

गीर्भिर्मङ्गलयुक्ताभिर् अनुध्येयुस्सुपूजिताः ॥ ५९

सर्वान् नो द्विषतस्तात ब्राह्मणा जातमन्यवः ।
गीर्भिर्दारुणयुक्ताभिर् हन्युश्चैते ह्यपूजिताः ॥ ६०

अत्र गाथा ब्रह्मगीताः कीर्तयन्ति पुराविदः ।
सृष्ट्वा द्विजातीन् धाता हि यथापूर्वं समादधत् ॥ ६१

धाता—

न वोऽन्यदिह कर्तव्यं किञ्चिदूर्ध्वायनं [2]विधि ।
युक्ता गोपायत ब्रह्म श्रेयो वस्त्वस्तु शोभनम् ॥ ६२

स्वमेव कुर्वतां कर्म श्रीर्वो ब्राह्मी भविष्यति ।
ब्राह्मण्यं सर्वभूतानां प्रग्रहं च गमिष्यथ ॥ ६३

न शूद्रकर्म कर्तव्यं ब्राह्मणेन विपश्चिता ।
शौद्रं हि कुर्वतः कर्म ब्राह्मी श्रीरुपरुध्यते ॥ ६४

श्रीश्च बुद्धिश्च तेजश्च विभूतिश्च प्रतापिनी ।
[3]स्वाध्यायेनैव माहात्म्यं विमलं प्रतिपत्स्यथ ॥ ६५

हुत्वा चाहवनीयादि महाभाग्ये प्रतिष्ठिताः ।
अग्रभोज्याः प्रसूतीनां श्रिया ब्राह्म्याऽनुकल्पिताः ॥ ६६

1. क-घ—सुहृद 2. अ-क-ख—विधिः
3. क-घ—सुध्यानेन

श्रद्धया परया युक्ता ह्यनभिद्रोहलब्धया ।
दमस्वाध्यायनिरतास् सर्वान् कामानवाप्स्यथ ॥ ६७

यच्चैव मानुषे लोके यच्च देवेषु किञ्चन ।
सर्वं वस्तपसा साध्यं ज्ञानेन विनयेन च ॥ ६८

युष्मत्सम्माननात् प्रीतिं पावनैः क्षत्रियाश्रियम् ।
अमुत्रेह समायान्ति वैश्यशूद्रादिकास्तथा ॥ ६९

अरक्षिताश्च युष्माभिर् विरुद्धा यान्ति विप्लवम् ।
युष्मत्तेजोधृता लोकास् तद्रक्षथ जगत्त्रयम् ॥ ७०

भीष्मः—

इत्येता ब्रह्मगीतास्तास् समाख्याता मया तव ।
विप्रानुकम्पार्थमिदं तेन प्रोक्तं हि धीमता ॥ ७१

भूयस्तेषां फलं मन्ये यथा राज्ञस्समुत्थितम् ।
दुरासदाश्च चण्डाश्च तपसा क्षिप्रकारिणः ॥ ७२

सन्त्येषां सिंहसत्त्वाश्च व्याघ्रसत्त्वास्तथाऽपरे ।
वराहमृगसत्त्वाश्च गजसत्त्वास्तथैव च ॥ ७३

कार्पासमृदवः केचिन् तथाऽन्ये मकरस्पृशः ।
विभाव्यभाविनः केचिन् तथा चक्षुर्हणः परे ॥ ७४

[1]विविधानीह वृत्तानि ब्राह्मणानां युधिष्ठिर ॥ ७४॥

1. क-घ—इदमर्धं नास्ति

मेखला[1]द्रमिलाः काचाः पुण्ड्राः कोकाङ्गिरास्तथा ।
शौण्डिका गरदा दर्पाश् चोलाश्च कृशतस्कराः ॥ ७५॥

किराता यवनाश्चैव तास्ताः क्षत्रियजातयः ।
वृषलत्वमनुप्राप्ता ब्राह्मणानामदर्शनात् ॥ ७६॥

ब्राह्मणानां परिभवाद् असुरास्सलिलेशयाः ।
ब्राह्मणानां प्रमादाच्च देवास्स्वर्गनिवासिनः ॥ ७७॥

अशक्यं स्पष्टुमाकाशम् अचाल्यो हिमवान गिरिः ।
अवार्या सेतुना गङ्गा दुर्जया ब्राह्मणा भुवि ॥ ७८॥

न ब्राह्मणविरोधेन शक्यं शास्तुं वसुन्धराम् ।
ब्राह्मणा हि महात्मानो देवानामपि देवताः ॥ ७९॥

तान् पूजयस्व सततं दानेन परिचर्यया ।
यदीच्छसि महीं भोक्तुम् इमां सागरमेखलाम् ॥ ८०॥

प्रतिग्रहेण तेजो हि विप्राणां शाम्यतेऽनघ ।
प्रतिग्रहं ये नेच्छेयुस् तेऽपि रक्ष्यास्त्वयाऽनघ ॥ ८१॥

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां
अनुशासनपर्वणि चतुस्त्रिंशोऽध्यायः ॥ ३४ ॥
॥ ८९ ॥ आनुशासनिकपर्वणि चतुस्त्रिंशोऽध्यायः ॥ ३४ ॥
[अस्मिन्नध्याये ८१॥ श्लोकाः]

---

1 क-घ—प्रमिलाः

॥ पञ्चत्रिंशोऽध्यायः ॥

भीष्मेण युधिष्ठिरं प्रति ब्राह्मणमाहात्म्यप्रतिपादकशक्रशम्बरसंवादानुवादः ॥

भीष्मः—

अत्राप्युदाहरन्तीमम् इतिहासं पुरातनम् ।
शक्रशम्बरसंवादं तं निबोध युधिष्ठिर ॥ १

शक्रो ह्यज्ञातरूपेण जटी भूत्वा सुदारुणः ।
विप्ररूपं समास्थाय प्रश्नं पप्रच्छ शम्बरम् ॥ २

शक्रः—

केन शम्बर रूपेण स्वजात्यानधितिष्ठसि ।
श्रेष्ठं त्वां केऽनुमन्यन्ते तन्मे ब्रूहीह पृच्छते ॥ ३

शम्बरः—

नासूयामि सदा विप्रान् ब्राह्मणं च पितामहम् ।
शास्त्राणि वदतो विप्रान् मानयामि यथासुखम् ॥ ४

श्रुत्वा च नावजानामि नापविध्यामि कर्हिचित् ।
अभ्यर्चयामि पृच्छामि पादौ गृह्णामि धीमताम् ॥ ५

ते विस्रब्धाः प्रभाषन्ते संयच्छन्ति च मां सदा ।
प्रमत्तेष्वप्रमत्तोऽस्मि सदा सुप्तेषु जागृमि ॥ ६

ते मां शास्त्रपदे सक्तं ब्रह्मवर्त्मानमूयकम् ।
समामिक्षन्ति शास्तारः क्षौद्रं मक्षिव मक्षिकाः ॥ ७

यच्च भाषन्ति ते तुष्टास् तत्तद् [1]गृह्णामि मेधया ।
समाधिमात्मनो नित्यम् अतुलामनुचिन्तयन् ॥ ८

सोऽहं वाग्यमृष्टानां रसानामनुलेहिनाम् ।
स्वजात्यानधितिष्ठामि नक्षत्राणीव चन्द्रमाः ॥ ९

एतन् पृथिव्याममृतम् एतच्चक्षुरनुत्तमम् ।
यद्ब्राह्मणमुखाच्छास्त्रम् इह श्रुत्वा प्रवर्तते ॥ १०

एतन् कारणमाज्ञाय दृष्ट्वा देवासुरं पुरा ।
युद्धं पिता मे हृष्टात्मा विस्मितः प्रत्यपद्यत ॥ ११

दृष्ट्वा च ब्राह्मणानां तु महिमानं महात्मनाम् ।
पर्यपृच्छत् कथमिमे सिद्धा इति निशाकरम् ॥ १२

सोमः—

ब्राह्मणास्तपसा सिद्धा दृश्यन्ते वाग्बलास्सदा ।
भुजवीर्या हि राजानो वाग्बलाश्च द्विजातयः ॥ १३

प्रवसन् वाऽप्यधीयीत बह्वीर्दुर्वसतीर्वसन् ।
निर्मन्युरपि निर्मानो यदि स्यात् समदर्शनः ॥ १४

अपि चेज्ज्ञानसम्पन्नस् सर्वान् वेदान् पितृगृहे ।

---

1. क-घ—गृह्णाम्यमायया

श्लाघमान उपाधीयाद् ग्राम्य इत्येव तं विदुः ॥ १५

भूमिरेतौ निगिरति सर्पो बिलशयाविव ।
राजानं चाप्ययोद्धारं ब्राह्मणं चाप्रवासिनम् ॥ १६

अतिमानश्रियं हन्ति पुरुषस्याल्पमेधसः ।
गर्भेण दुष्यते कन्या गृहवासेन च द्विजः ॥ १७

विद्याविदो लोकविदस् तपोबलसमन्विताः ।
नित्यपूज्याश्च वन्द्याश्च द्विजा [1]लोकद्वयेच्छुभिः ॥ १८

शम्बरः—

इत्येतन्मे श्रावयित्वा सोमादद्भुतदर्शनात् ।
ब्राह्मणान् पूजयामास [2]तथैवाहं महाव्रतान् ॥ १९

भीष्मः—

श्रुत्वैतद्वचनं शक्रो दानवेन्द्रमुखाच्युतम् ।
द्विजान् सम्पूजायामास महेन्द्रत्वमवाप च ॥ २०

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां
अनुशासनपर्वणि पञ्चत्रिंशोऽध्यायः ॥ ३५ ॥
॥ ८९ ॥ आनुशासनिकपर्वणि पञ्चत्रिंशोऽध्यायः ॥ ३५ ॥
[अस्मिन्नध्याये २० श्लोकाः]

---

1. क-घ—लोके श्रिये
2. क-घ—इतश्चत्वारः पादा न सन्ति

॥ षट्त्रिंशोऽध्यायः ॥

भीष्मेण युधिष्ठिरं प्रति दानपात्रलक्षणादिकथनम् ॥

युधिष्ठिरः—

अपूर्वं वा भवेत् पात्रम् अथ वाऽपि चिरोषितम् ।
दूरादभ्यागतं वाऽपि किं पात्रं स्यात् पितामह ॥ १

भीष्मः—

क्रिया भवति केषाञ्चिद् उपांशु व्रतमुत्तमम् ।
यो नो याचेत यत् किञ्चित् सर्वं दद्याम इत्युत ॥ २
अपीडयन् भृत्यवर्गम् इत्येवमनुशुश्रुम ॥ २॥
पीडयन् भृत्यवर्गं हि आत्मानमपकर्षति ॥ ३
अपूर्वं चापि यत् पात्रं यच्चापि स्याच्चिरोषितम् ।
दूरादभ्यागतं चापि न तत् पात्रं विदुर्बुधाः ॥ ४

युधिष्ठिरः—

अपीडया च भृत्यानां धर्मस्याहिंसया तथा ।
पात्रं विद्याम तत्त्वेन यस्मै दत्तं न सन्तपेत् ॥ ५

भीष्मः—

ऋत्विक्पुरोहिताचार्याश् शिष्यास्सम्बन्धिबान्धवाः ।
सर्वे पूज्याश्च मान्याश्च श्रुतवृत्तोपसंहिताः ॥ ६

अतोऽन्यथा वर्तमानास् सर्वे नार्हन्ति सत्क्रियाम् ।
तस्माद् गुणैः परीक्षेत पुरुषान् प्रणिधाय वै ॥ ७

अक्रोधस्सत्यवचनम् अहिंसा दम आर्जवम् ।
अद्रोहो नातिमानश्च ह्रीस्तितिक्षा तपश्शमः ॥ ८

यस्मिन्नेतानि दृश्यन्ते न चाकार्याणि भारत ।
भावतो विनिविष्टानि तत् पात्रं मानमर्हति ॥ ९

तथा चिरोषितं चापि सम्प्रत्यागतमेव च ।
अपूर्वं चैव पूर्वं च तत् पात्रं मानमर्हति ॥ १०

अप्रामाण्यं च वेदानां शास्त्राणां चातिलङ्घनम् ।
सर्वत्र चानवस्थानम् एतन्नाशनमात्मनः ॥ ११

भवेत् पण्डितमानी यो ब्राह्मणो वेदनिन्दकः ।
आन्वीक्षिकीं तर्कविद्याम् अनुरक्तो निरर्थिकाम् ॥ १२

हेतुवादान् ब्रुवन् सत्सु विजेताऽहेतु[1]वादिनः ।
आक्रोष्टा चातिवक्ता च ब्राह्मणानां सदैव हि ॥ १३

सर्वानुशङ्की मूढश्च बालकः कटुवागपि ।
बोद्धव्यस्तादृशस्तात नरश्वानं हि तं विदुः ॥ १४

यथा श्वा भषितुं चैव हन्तुं चैवोपसृज्यते ।
एवं सम्भाषणार्थाय सर्वशास्त्रवधाय च ॥ १५

1. अ-ख—वादकः

अल्पश्रुताः कुतर्काश्च दृष्टास्मृष्टाः कुपण्डिताः ॥ १५॥

श्रुतिस्मृती चेतिहासपुराणारण्यवेदिनः ।
अनुरुन्ध्याद्बहुज्ञांश्च सारज्ञांश्चैव पण्डितः ॥ १६॥

लोकयात्रा च प्रष्टव्या धर्मश्चात्महिताय च ।
एवं नरो वर्तमानश् शाश्वतीरेधते समाः ॥ १७॥

ऋणमुद्यम्य देवानाम् ऋषीणां च महात्मनाम् ।
पितृणामथ भूतानाम् अतिथीनां च पञ्चमम् ॥ १८॥

पर्यायेण विमुक्तो यस् सुनिर्णिक्तेन कर्मणा ।
एवं गृहस्थः कर्माणि कुर्वन् धर्मान्न हीयते ॥ १९॥

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां
अनुशासनपर्वणि षट्त्रिंशोऽध्यायः ॥ ३६ ॥
॥ ८९ ॥ आनुशासनिकपर्वणि षट्त्रिंशोऽध्यायः ॥ ३६ ॥
[अस्मिन्नध्याये १९॥ श्लोकाः]

॥ सप्तत्रिंशोऽध्यायः ॥

भीष्मेण युधिष्ठिरं प्रति स्त्रीस्वभावप्रतिपादकनारदपञ्चचूडासंवादानुवादः ॥

युधिष्ठिरः—

स्त्रीणां स्वभावमिच्छामि श्रोतुं भरतसत्तम ।
स्त्रियो हि मूलं दोषाणां लघुचित्ताः पितामह ॥ १

भीष्मः—

अत्राप्युदाहरन्तीमम् इतिहासं पुरातनम् ।
नारदस्य च संवादं पुंश्चल्या पञ्चचूडया ॥ २

लोकाननुचरन् धीमान् देवर्षिर्नारदः पुरा ।
ददर्शाप्सरसं ब्राह्मीं पञ्चचूडामनिन्दिताम् ॥ ३
तां दृष्ट्वा चारुसर्वाङ्गीं पप्रच्छाप्सरसं मुनिः ॥ ३॥

नारदः—

संशयो हृदये कश्चित् तन्मे ब्रूहि सुमध्यमे ॥ ४

भीष्मः—

एवमुक्ता तु सा विप्रं प्रत्युवाचाथ नारदम् ॥ ४॥

पञ्चचूडा—

विषये सति वक्ष्यामि समर्थां मन्यसे च माम् ॥ ५

नारदः—

न त्वामविषये भद्रे नियोक्ष्यामि कथञ्चन ।
स्त्रीणां स्वभावमिच्छामि त्वत्तश्श्रोतुं वरानने ॥ ६

भीष्मः—

एतच्छ्रुत्वा वचस्तस्य देवर्षेरप्सरोत्तमा ।
प्रत्युवाच न शक्ष्यामि स्त्री निन्दितुमहं स्त्रियः ॥ ७

विदितास्ते स्त्रियस्ताश्च यादृशाश्च स्वभावतः ।
न मामर्हसि देवर्षे नियोक्तुं प्रश्न ईदृशे ॥ ८

तामुवाच स देवर्षिस् सत्यं वद सुमध्यमे ।
मृषावादे भवेद्दोषस् सत्ये दोषो न विद्यते ॥ ९

इत्युक्ता सा कृतमतिर् अभवच्चारुहासिनी ।
स्त्रीदोषांश्च मतान् सत्यान् भाषितुं सा प्रचक्रमे ॥ १०

पञ्चचूडा—

कुलीना रूपवत्यश्च नाथवत्यश्च योषितः ।
मर्यादासु न तिष्ठन्ति स दोषस्त्रीषु नारद ॥ ११

न स्त्रीभ्यः किञ्चिदन्यद्वै पापीयस्तरमस्ति वै ।
स्त्रियो हि मूलं दोषाणां तथा त्वमपि वेत्थ हि ॥ १२

समाज्ञातानभिमतान् प्रतिरूपान् वशे स्थितान् ।
पतीनन्तरमासाद्य नालं नार्यः परीक्षितुम् ॥ १३

असद्धर्मस्त्वयं स्त्रीणाम् अस्माकं भविता प्रभो ।
पापीयसो नरान् यान् वै लज्जां त्यक्त्वा भजामहे ॥ १४

स्त्रियं हि यः प्रार्थयति सन्निकर्षं च गच्छति ।
इषद्वा कुरुते सेवां तं तमिच्छन्ति योषितः ॥ १५

[1]अनर्थित्वान्मनुष्याणां भयात् परिभवस्य च ।
मर्यादायाममर्यादास् स्त्रियस्तिष्ठन्ति भर्तृषु ॥ १६

[2]नासां कश्चिदगम्योऽस्ति नासां वयसि संस्थितिः ।
विरूपं रूपवन्तं वा पुमानित्येव भुञ्जते ॥ १७

न भयान्नाप्यनुक्रोशान्नार्थहेतोः कथञ्चन ।
न ज्ञातिबन्धुसम्बन्धात् स्त्रियस्तिष्ठन्ति भर्तृषु ॥ १८

यौवने वर्तमानानां मृष्टाभरणवाससाम् ।
नराणां स्वैरवृत्तानां स्पृहयन्ति कुलस्त्रियः ॥ १९

या हि शश्वद्बहुमता रक्ष्यन्ते दयितास्स्त्रियः ।
अपि तास्सम्प्रसज्जन्ते कुब्जान्धजड[3]वामनैः ॥ २०

पङ्गुष्वपि च देवर्षे ये चान्ये कुत्सिता नराः ।
स्त्रीणामगम्यो लोकेऽस्मिन् नास्ति कश्चिन्महामुने ॥ २१

---

1. क-घ—अरस्यत्वा
2. क-घ—अर्धचतुष्टयं नास्ति
3. घ—पामरैः

इति स्त्रीणां गतिर्ब्रह्मन् कथञ्चिन्नोपलभ्यते ।
अप्यन्योन्यं प्रवर्तन्ते न हि तिष्ठन्ति भर्तृषु ॥ २२

दुष्टाचाराः पापरता [1]असत्यो मायया वृताः ।
अदृष्टबुद्धिबहुलाः प्रायेणेत्यवगम्यताम् ॥ २३

अलाभात् पुरुषाणां हि भयात् परिभवस्य च ।
वधबन्धभयाच्चापि स्वयं गुप्ता भवन्ति ताः ॥ २४

चलस्वभावा दुस्सेव्या दुर्ग्रहा भावतस्तथा ।
प्राज्ञस्य पुरुषस्येह यथा भावास्तथा स्त्रियः ॥ २५

नाग्निस्तृप्यति काष्ठानां नापगानां महोदधिः ।
नान्तकस्सर्वभूतानां न पुंसां वामलोचनाः ॥ २६

इदमन्यच्च देवर्षे रहस्यं सर्वयोषिताम् ।
दृष्ट्वैव पुरुषं ह्यन्यं योनिः प्रक्लिद्यते स्त्रियाः ॥ २७

कामानामपि दातारं कर्तारं मानसान्वयोः ।
रक्षितारं न मृष्यन्ति भर्तारं स्वमसत्स्त्रियः ॥ २८

[2]न कामभोगान् बहुलान् नालङ्कारार्थसञ्चयान् ।
तथैव बहुमन्यन्ते यथा रत्यामनुग्रहम् ॥ २९

अन्तकश्शमनो मृत्युः पातालं बडवामुखम् ।

---

1. ख—असत्या घ—असत्या × स्मृताः
2 क-घ—अर्धचतुष्टयं नास्ति

क्षुरधारा विषं सर्पो वह्निरित्येकतस्स्त्रियः ॥ ३०

यतश्च भूतानि महान्ति पञ्च
यतश्च लोका विहिता विधात्रा ।
यतः पुमांसः प्रमदाश्च निर्मिताः
ततश्च दोषाः प्रमदासु नारद ॥ ३१

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां
अनुशासनपर्वणि सप्तत्रिंशोऽध्यायः ॥ ३७ ॥
॥ ८९ ॥ आनुशासनिकपर्वणि सप्तत्रिंशोऽध्यायः ॥ ३७ ॥
[अस्मिन्नध्याये ३१ श्लोकाः]

॥ अष्टात्रिंशोऽध्यायः ॥

भीष्मेण युधिष्ठिरं प्रति स्त्रीणां दुश्चरितकथनम् ॥

युधिष्ठिरः—

इमे वै मानवा लोके स्त्रीषु सज्जन्त्यभीक्ष्णशः ।
मोहेन परमाविष्टा दैवदृष्टेन कर्मणा ॥ १

स्त्रियश्च पुरुषेष्वेव प्रत्यक्षं लोकसाक्षिकम् ।
अत्र मे संशयस्तीव्रो हृदि सम्परिवर्तते ॥ २

कथं तासु नरास्सङ्गं कुर्वन्ति कुरुनन्दन ।

स्त्रियो वा तेषु रज्यन्ते विरज्यन्तेऽपि वा पुनः ॥ ३

इति ताः पुरुषव्याघ्र कथं शक्यास्तु रक्षितुम् ।
प्रमदाः पुरुषेणेह तन्मे व्याख्यातुमर्हसि ॥ ४

भीष्मः—

एता हि मयमायाभिर् वञ्चयन्तीह मानवान् ।
न चासां मुच्यते कश्चिन् पुरुषो हस्तमागतः ॥ ५

गावो नवतृणानीव गृह्णन्त्येव नवान नवान् ॥ ५॥

शम्बरस्य च या माया या माया नमुचेरपि ।
[1]कुहकानीव वार्ष्णेय सर्वास्ता योषितो विदुः ॥ ६॥

हसन्तं प्रहसन्त्येता रुदन्तं प्ररुदन्ति च ।
अप्रियं प्रियभावैश्च गृह्णते कालयोगतः ॥ ७॥

यदि जिह्वासहस्रं स्याज् जीवेच्च शरदां शतम् ।
अनन्यकर्मा स्त्रीदोषान् अनुक्त्वा निधनं व्रजेत् ॥ ८॥

उशना वेद यच्छास्त्रं यच्च वेद बृहस्पतिः ।
स्त्रीबुद्ध्या न विशिष्येत तास्म रक्ष्याः कथं नरैः ॥ ९॥

अनृतं सत्यमित्याहुस् सत्यं चापि तथाऽनृतम् ।
इति यास्ताः कथं वीर संरक्ष्याः पुरुषैरिह ॥ १०॥

दोषास्पदेऽशुचौ देहे ह्यासां रक्तास्त्वहो नराः ॥ ११

---

1. क-ब—बलेः कुम्भेन वार्ष्णेश्च

स्त्रीणां बुद्धाऽपि निष्कर्षाद् अर्थशास्त्राणि शत्रुहन् ।
बृहस्पतिप्रभृतिभिर् मन्ये सन्ति कृतानि वै ॥ १२
सम्पूज्यमानाः पुरुषैर् विकुर्वन्ति मनो नृपु ॥ १२॥
अपास्ताश्च तथा राजन् विकुर्वन्ति मनस्स्त्रियः ॥ १३

युधिष्ठिरः—

कस्मात्स्त्रियश्शिक्षितुं स्याद् इति मे संशयो महान् ।
तन्मे ब्रूहि महाबाहो कुरूणां वंशवर्धन ॥ १४
यदि शक्या कुरुश्रेष्ठ रक्षा तासां कथञ्चन ।
कर्तुं वा कृतपूर्वा वा तन्मे व्याख्यातुमर्हसि ॥ १५

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां
अनुशासनपर्वणि अष्टात्रिंशोऽध्यायः ॥ ३८ ॥
॥ ८९ ॥ आनुशासनिकपर्वणि अष्टात्रिंशोऽध्यायः ॥ ३८ ॥
[अस्मिन्नध्याये १५ श्लोकाः]

॥ एकोनचत्वारिंशोऽध्यायः ॥

भीष्मेण युधिष्ठिरं प्रति स्त्रीणां पुरुषचित्तप्रमथनाय शक्तिविशेषदानपूर्वकं ब्रह्मणा सृष्टतया तद्रक्षणस्य दुष्करत्वकथनम् ॥ १ ॥ स्त्रीणां रक्षणस्य दुश्शकत्वे दृष्टान्ततया विपुलोपाख्यानकथनारम्भः ॥ २ ॥ गुरुणा स्वभार्यारक्षणं नियुक्तेन विपुलनाम्ना तदर्थं योगेन तच्छरीरप्रवेशः ॥ ३ ॥ इन्द्रेण देवशर्ममुन्यसन्निधाने तद्भार्याविलोभनाय तदाश्रमाभिगमनम् ॥ ४ ॥ तथा विपुलतपोऽभिभूतेन भयात्ततो निर्गमनम् ॥ ५ ॥ विपुलेन शक्रवृत्तान्तनिवेदनमुष्टादुरोर्वरग्रहणपूर्वकं तपश्चरणम् ॥ ६ ॥ गुरुनियोगाद्दिव्यपुष्पानयनार्थं गतेन विपुलेन मध्येमार्गं नरवरमिथुनात् स्वगतिनिन्दाश्रवणम् ॥ ७ ॥ निन्दितगतिप्रापकस्वदुश्चरितं चिन्तयता तेन चिराय तदनुस्मरणम् ॥ ८ ॥ देवशर्मणा स्वशिष्यं विपुलं प्रति तद्दृष्टानां मिथुनानां षट्पुरुषाणां च क्रमेणाहोरात्रऋत्वभिमानिदेवतात्वकथनम्॥ ९ ॥ तथा स्वस्मिन् स्वदाररक्षणाय योगेन तच्छरीरप्रवेशानिवेदनस्य दुर्गतिहेतुत्वकथनम् ॥ १० ॥ तथा तत्कृतस्वदाररक्षणपरितोषेण तदुरितदूरीकरणपूर्वकं तेन स्वभार्यया च सह स्वर्गे सुखविहरणम् ॥ ११ ॥

भीष्मः—

एवमेतन्महाबाहो नास्ति मिथ्याऽत्र किञ्चन ।
यथा ब्रवीषि कौरव्य नारीं प्रति नराधिप ॥ १

अत्र ते वर्तयिष्यामि इतिहासं पुरातनम् ।
यथा रक्षा कृता पूर्वं विपुलेन महात्मना ॥ २

स्त्रीणां बुद्धाऽपि निष्कर्षाद् अर्थशास्त्राणि शत्रुहन् ।
बृहस्पतिप्रभृतिभिर् मन्ये सन्ति कृतानि वै ॥ १२
सम्पूज्यमानाः पुरुषैर् विकुर्वन्ति मनो नृपु ॥ १२॥
अपास्ताश्च तथा राजन् विकुर्वन्ति मनस्स्त्रियः ॥ १३

युधिष्ठिरः—

कस्तास्स्त्रियश्शिक्षितुं स्याद् इति मे संशयो महान् ।
तन्मे ब्रूहि महाबाहो कुरूणां वंशवर्धन ॥ १४
यदि शक्या कुरुश्रेष्ठ रक्षा तासां कथञ्चन ।
कर्तुं वा कृतपूर्वा वा तन्मे व्याख्यातुमर्हसि ॥ १५

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां
अनुशासनपर्वणि अष्टात्रिंशोऽध्यायः ॥ ३८ ॥
॥ ८९ ॥ आनुशासनिकपर्वणि अष्टात्रिंशोऽध्यायः ॥ ३८ ॥
[अस्मिन्नध्याये १५ श्लोकाः]

॥ एकोनचत्वारिंशोऽध्यायः ॥

भीष्मेण युधिष्ठिरं प्रति स्त्रीणां पुरुषचित्तप्रमथनाय शक्तिविशेषदानपूर्वकं ब्रह्मणा सृष्टतया तद्रक्षणस्य दुष्करत्वकथनम् ॥ १ ॥ स्त्रीणां रक्षणस्य दुश्शकत्वे दृष्टान्ततया विपुलोपाख्यानकथनारम्भः ॥ २ ॥ गुरुणा स्वभार्यारक्षणं नियुक्तेन विपुलनाम्ना तदर्थं योगेन तच्छरीरप्रवेशः ॥ ३ ॥ इन्द्रेण देवशर्ममुन्यसन्निधाने तद्भार्याविलोभनाय तदाश्रमाभिगमनम् ॥ ४ ॥ तथा विपुलतपोऽभिभूतेन भयात्ततो निर्गमनम् ॥ ५ ॥ विपुलेन शक्रवृत्तान्तनिवेदननुष्टाद्गुरोर्वरग्रहणपूर्वकं तपश्चरणम् ॥ ६ ॥ गुरुनियोगाद्दिव्यपुष्पानयनार्थं गतेन विपुलेन मध्येमार्गं नरवरमिथुनात् स्वगतिनिन्दाश्रवणम् ॥ ७ ॥ निन्दितगतिप्रापकस्वदुश्चरितं चिन्तयता तेन चिराय तदनुस्मरणम् ॥ ८ ॥ देवशर्मणा स्वशिष्यं विपुलं प्रति तदृष्टानां मिथुनानां षट्पुरुषाणां च क्रमेणाहोरात्रऋत्वभिमानिदेवतात्वकथनम्॥ ९ ॥ तथा स्वस्मिन् स्वदाररक्षणाय योगेन तच्छरीरप्रवेशानिवेदनस्य दुर्गतिहेतुत्वकथनम् ॥ १० ॥ तथा तत्कृतस्वदाररक्षणपरितोषेण तद्दुरितदूरीकरणपूर्वकं तेन स्वभार्यया च सह स्वर्गे सुखविहरणम् ॥ ११ ॥

भीष्मः—

एवमेतन्महाबाहो नास्ति मिथ्याऽत्र किञ्चन ।
यथा ब्रवीषि कौरव्य नारीं प्रति नराधिप ॥ १

अत्र ते वर्तयिष्यामि इतिहासं पुरातनम् ।
यथा रक्षा कृता पूर्वं विपुलेन महात्मना ॥ २

प्रमदाश्च यथा सृष्टा ब्रह्मणा भरतर्षभ ।
यदर्थं तच्च ते तात प्रवक्ष्ये [1]भरतर्षभ ॥ ३

न हि स्त्रीभ्यः परं पुत्र पापीयः किञ्चिदस्ति वै ।
अस्ति हि प्रमदा दीप्ता माया च मयजा विभो ॥ ४

क्षुरधारा विषं सर्पो मृत्युरित्येकतस्स्त्रियः ॥ ४॥

इमाः प्रजा महाबाहो धार्मिका इति नश्श्रुतम् ।
स्वयं गच्छन्ति देवत्वं ततो देवानियाद्भयम् ॥ ५॥

अथाभ्यगच्छन् देवास्ते पितामहमरिन्दम ।
निवेद्य मानसं चापि तूष्णीमासन्नवाङ्मुखाः ॥ ६॥

तेषामन्तर्गतं ज्ञात्वा देवानां प्रपितामहः ।
[2]मानवानां प्रमोहार्थं कृत्या नार्योऽसृजत् प्रभुः ॥ ७॥

पूर्वसर्गे हि कौन्तेय साध्व्यो नार्य इहाभवन् ।
असाध्व्यस्तु समुत्पन्नाः कृत्यासर्गात् प्रजापतेः ॥ ८॥

ताभ्यः कामान् यथाकामं प्रादाद्धि स पितामहः ।
ताः कामलुब्धाः प्रमदाः प्रमथ्नन्ति नरांस्तदा ॥ ९॥

क्रोधं कामस्य देवेशस् सहायं चासृजत् प्रभुः ।
असज्जन्त प्रजास्तस्मान् कामक्रोधवशङ्गताः ॥ १०॥

---

1. क-घ—वसुधाधिप
2. ख—अर्धचतुष्टयं नास्ति

[1]द्विजानां च गुरूणां च महागुरुनृपादिनाम् ।
क्षणान् स्त्रीसङ्गकामोत्था यातनाऽहो निरन्तरा ॥ ११॥

अरक्तमनसां नित्यं ब्रह्मचर्यामलात्मनाम् ।
तपोदमार्चनध्यानयुक्तानां शुद्धिरुत्तमा ॥ १२॥

न च स्त्रीणां क्रिया काचिद् इति धर्मो व्यवस्थितः ।
निरिन्द्रिया ह्यमन्त्राश्च स्त्रियो नित्यमिति श्रुतिः ॥ १३॥

शय्यासनमलङ्कारम् अन्नपानमनार्यताम् ।
दुर्वाग्भावं रतिञ्चैव ददौ स्त्रीभ्यः प्रजापतिः ॥ १४॥

न तासां रक्षणं कर्तुं पुंसां शक्यं कथञ्चन ।
अपि विश्वकृता तात कुतस्तु पुरुषैरिह ॥ १५॥

वाचा वाऽप्यथ बन्धैर्वा क्लेशैर्वा विविधैस्तथा ।
न शक्या रक्षितुं नार्यस् ता हि नित्यमसंयताः ॥ १६॥

इदं तु पुरुषव्याघ्र पुरस्ताच्छ्रुतवानहम् ।
यथा रक्षा कृता पूर्वं विपुलेन गुरुस्त्रियाः ॥ १७॥

ऋषिरासीन्महाबाहो देवशर्मेति विश्रुतः ।
तस्य भार्या रुचिर्नाम रूपेणासदृशी भुवि ॥ १८॥

तस्या रूपेण सम्मत्ता देवगन्धर्वदानवाः ।

---

1. क-घ—अर्धचतुष्टयं नास्ति

दैवं दैत्यमथो राज्ञां वपुर्धारयतेऽपि च ॥ ३६

सुकृशो वायुभक्षश्च शकुनिर्विकृतस्तथा ।
चतुष्पाद्ब्रह्मरूपश्च पुनर्भवति भार्गव ॥ ३७

ब्राह्मणः क्षत्रियश्चैव वैश्यश्शूद्रस्तथैव च ।
वायुभूतश्च स पुनर् देवराजो भवत्युत ॥ ३८

मक्षिकामशकादीनां वपुर्धारयते तथा ।
न शक्यमस्य ग्रहणं कर्तुं विपुल केनचित् ॥ ३९

अपि विश्वसृजा तात येन सृष्टमिदं जगत् ।
पुनरन्तर्हितश्शक्रो रंस्यते ज्ञानचक्षुषा ॥ ४०

एवंरूपाणि कुरुते सततं पाकशासनः ।
तस्माद्विपुल यत्नेन रक्षेमां तनुमध्यमाम् ॥ ४१

यथा रुचिं नावलिहेद् देवेन्द्रो मुनिसत्तम ।
क्रतावुपहितं न्यस्तं हविश्श्वेव दुरात्मवान् ॥ ४२

भीष्मः—

एवमाख्याय समुनिर् यज्ञकारोऽगमत्तदा ।
देवशर्मा महाभागस् ततो भरतसत्तम ॥ ४३

विपुलस्तु वचश्श्रुत्वा गुरोश्चिन्तापरोऽभवत् ।
रक्षां च परमां चक्रे देवराजान्महाबलात् ॥ ४४

किं नु शक्यं मया कर्तुं गुरुदाराभिरक्षणम् ।

मायावीह सुरेन्द्रोऽसौ दुर्धर्षश्चापि वीर्यवान् ॥ ४५

नापिधायाश्रमं शक्यो रक्षितुं पाकशासनात् ।
कूटजं वा तथा ह्यस्य नानाविधसरूपता ॥ ४६

वायुरूपेण वा शक्रो गुरुपत्नीं प्रधर्षयेत् ।
तस्मादिमां सम्प्रविश्य रुचिं स्यास्येऽहमद्य वै ॥ ४७

अथ वा पौरुषेणेयं न शक्या रक्षितुं मया ।
बहुरूपो हि भगवाञ् छ्रूयते हरिवाहनः ॥ ४८

सोऽहं योगबलादेनां रक्षिष्ये पाकशासनात् ।
गात्राणि गात्रैरस्याहं सम्प्रवेक्ष्येऽभिरक्षितुम् ॥ ४९

यदा श्लिष्टामिमां पत्नीं मया पश्येत वै गुरुः ।
शप्स्यत्यसंशयं कोपाद् दिव्यज्ञानो महाबलः ॥ ५०

न चेयं रक्षितुं शक्या यथाऽन्या प्रमदा तथा ।
मायावीह सुरेन्द्रोऽसाविह प्राप्तोत्यसंशयम् ॥ ५१

अवश्यं करणीयं हि गुरोरिह च शासनम् ।
यदि त्विष्टमहं कुर्याम् आश्रयं स्यान् कृतं मया ॥ ५२

योगेनाहं प्रविश्येह गुरुपत्न्याः कलेवरम् ।
असक्तः पद्मपर्णस्थो जलबिन्दुर्यथाऽचलः ॥ ५३

एवमेव शरीरेऽस्या निवत्स्यामि समाहितः ॥ ५३॥

भीष्मः—

इत्येवं धर्ममालोक्य [1]वेदार्थांश्चैव सर्वशः ।
तपश्च विपुलं दृष्ट्वा गुरोरात्मन एव च ॥ ५४॥
इति निश्चित्य मनसा रक्षां प्रति स भार्गवः ।
अतिष्ठत परं यत्नं यथावच्छृणु पार्थिव ॥ ५५॥
गुरुपत्नीमुपासीनो विपुलस्सुमहातपाः ।
उपासीनामनिन्द्याङ्गीं कथार्थैस्समलोभयत् ॥ ५६॥
नेत्राभ्यां नेत्रयोरस्या रश्मीन् संयोज्य रश्मिभिः ।
एवं स विपुलः कायं प्राविशत् पवनो यथा ॥ ५७॥
लक्षणं लक्षणेनैव वदनं वदनेन च ।
अविचेष्टन्नतिष्ठद्वै छायेवान्तर्गतो मुनिः ॥ ५८॥
ततो विष्टभ्य विपुलो गुरुपत्न्याः कलेवरम् ।
उवास रक्षणे युक्तो न च सा तमबुध्यत ॥ ५९॥
यं कालं नागतो राजन् गुरुस्तस्य महात्मनः ।
क्रतुं समाप्य स्वगृहं तं कालं सोऽभ्यरक्षत ॥ ६०॥
ततः कदाचिद्देवेन्द्रो दिव्यरूपवपुर्धरः ।
इदमन्तरमित्येव तदाऽभ्यागात् तदाश्रमम् ॥ ६१॥
रूपमप्रतिमं कृत्वा लोभनीयं जनाधिप ।

1. क-घ—वेदशास्त्रांश्च

* सर्वेषु कोशेषु अत्रैवाध्यायसमाप्तिर्दृश्यते

दर्शनीयतमो भूत्वा प्रविवेश तदाश्रमम् ॥ ६२॥

स ददर्श तमासीनं विपुलस्य कलेवरम् ।
निश्चेष्टं स्तब्धनयनं यथाऽऽलेख्यगतं तथा ॥ ६३॥

रुचिं च रुचिराकारां पीनश्रोणिपयोधराम् ।
पद्मपत्रविशालाक्षीं सम्पूर्णेन्दुनिभाननाम् ॥ ६४॥

सा तमालोक्य सहसा प्रत्युत्थातुमियेष ह ।
रूपेण विस्मिता कोऽसीत्यथ वक्तुमिहैच्छत ॥ ६५॥

उत्थातुकामा तु सती ह्यनिष्टद् विपुलेन सा ।
निगृहीता मनुष्येन्द्र न शशाक विचेष्टितुम ॥ ६६॥

तामाचभाषे देवेन्द्रस् सान्त्वा परमवल्गुना ॥ ६७

देवेन्द्रः—

त्वदर्थमागतं विद्धि देवेन्द्रं मां शुचिस्मिते ॥ ६७॥

क्लिश्यमानमनङ्गेन त्वत्सङ्कल्पोद्भवेन वै ।
तन पर्याप्तुहि मां सुभ्रु पुरा कालोऽतिवर्तते ॥ ६८॥

भीष्मः—

तमेवंवादिनं शक्रं शुश्राव विपुलो मुनिः ।
गुरुपत्न्याश्शरीरस्थो ददर्श च सुराधिपम् ॥ ६९॥

न शशाक च सा राजन् प्रत्युत्थातुमनिन्दिता ।
वक्तुं च नाशकद्राजन् विष्टब्धा विपुलेन सा ॥ ७०॥

आकारं गुरुपत्न्यास्तु विज्ञाय स भृगूत्तमः ।
निजग्राह महातेजा योगेन बलवान् प्रभो ॥ ७१॥

बबन्ध योगबन्धैश्च तस्यास्सर्वेन्द्रियाणि सः ।
निर्विकारां स दृष्ट्वैव पुनरेव शचीपतिः ॥ ७२॥

उवाच व्रीडितो राजंस् तां योगबलमोहिताम् ॥ ७३

एह्येहीति ततस्सा तं प्रतिवक्तुमियेष ह ।
स तां वाचं गुरोः पत्न्या विपुलः पर्यवर्तयत् ॥ ७४

भोः किमागमने कृत्यम् इति तस्याश्च निस्सृता ।
वक्त्राच्छशाङ्कप्रतिमाद् वाणी संस्कारभूषिता ॥ ७५

व्रीडिता सा तु तद्वाक्यम् उक्त्वा परवशं गता ।
पुरन्दरस्तु सन्त्रस्तो बभूव विमनास्तदा ॥ ७६

एतद्वैकृतमालक्ष्य देवराजो विशां पते ।
अवैक्षत सहस्राक्षस् तदा दिव्येन चक्षुषा ॥ ७७

ददर्श च मुनिं तस्याश् शरीरान्तरगोचरम् ।
प्रतिबिम्बमिवादर्शे गुरुपत्न्याश्शरीरगम् ॥ ७८

स तं घोरेण तपसा युक्तं दृष्ट्वा पुरन्दरः ।
प्रावेपत सुसन्त्रस्तो व्रीडितश्च तथा विभो ॥ ७९

विमुच्य गुरुपत्नीं तां विपुलस्सुमहातपाः ।
स्वं कलेबरमाविश्य शक्रं भीतमथाब्रवीत् ॥ ८०

विपुलः—

अजितेन्द्रिय पापात्मन् कामात्मक पुरन्दर ।
न चिरं पूजयिष्यन्ति देवास्त्वां मानवास्तदा ॥ ८१

किञ्चैतद्विस्मृतं शक्र न तन्मनसि ते स्थितम् ।
गौतमेनासि तन्मुक्तो भगाङ्गपरिचिह्नितः ॥ ८२

जाने त्वां वालिशमतिम् अकृतात्मानमस्थिरम् ।
मयेयं रक्ष्यते मूढ गच्छ पाप यथागतम् ॥ ८३

नाहं त्वामद्य मूढात्मन् निर्दहेयं स्वतेजसा ।
कृपायमानस्तु न ते दग्धुमिच्छामि वासव ॥ ८४

स च घोरतपा धीमान् गुरुर्मे पापचेतसम् ।
दृष्ट्वा त्वां निर्दहेदद्य क्रोधदीप्तेन चक्षुषा ॥ ८५

नैवं तु शक्र कर्तव्यं ननु मान्याश्च ते द्विजाः ।
[1]मा गमस्सपुरामात्यो लयं ब्रह्मबलार्दितः ॥ ८६

अमरोऽस्मीति यद्बुद्धिं एतामास्थाय वर्धसे ।
नावमंस्था न तपसाम् असाध्यं नाम विद्यते ॥ ८७

भीष्मः—

तच्छ्रुत्वा वचनं शक्रो विपुलस्य महात्मनः ।
न किञ्चिदुक्त्वा त्वरितं तत्रैवान्तरधीयत ॥ ८८

1. क-व—इदमर्धं नास्ति

याते मुहूर्ते शक्रे तु देवशर्मा महातपाः ।
कृत्वा यज्ञं यथाकामम् आजगाम स्वमाश्रमम् ॥ ८९

आगते तु गुरौ राजन् विपुलः प्रियकर्मकृत् ।
रक्षितां गुरवे भार्यां न्यवेदयदनिन्दिताम् ॥ ९०

अभिवाद्य च शान्तात्मा तं गुरुं गुरुवत्सलः ।
विपुलः पर्युपातिष्ठद् यथापूर्वमशङ्कितः ॥ ९१

विश्रान्ताय ततस्तस्मै सहासीनाय भार्यया ।
निवेदयामास तदा विपुलश्शक्रकर्म तत् ॥ ९२

तच्छ्रुत्वा स मुनिस्तुष्टो विपुलस्य प्रतापवान् ।
बभूव शीलवृत्ताभ्यां तपसा नियमेन च ॥ ९३

विपुलस्य तपोवृत्तिं भक्तिमात्मनि च प्रभुः ।
धर्मे च स्थिरतां दृष्ट्वा साधु साध्वित्युवाच ह ॥ ९४

प्रतिनन्द्य च धर्मात्मा नित्यं धर्मपरायणः ।
वरेण च्छन्दयामास स तस्माद्गुरुवत्सलः ॥ ९५

अनुज्ञातश्च गुरुणा चचारानुत्तमं तपः ॥ ९५॥

तथैव देवशर्माऽपि सभार्यस्स महातपाः ।
निर्भयो बलवृत्रघ्नाच् चचार विजने वने ॥ ९६॥

---

* सर्वेषु कोशेषु अत्रैवाध्यायसमाप्तिर्दृश्यते

विपुलस्त्वकरोत्तीव्रं तपः कृत्वा गुरोर्वचः ।
तपोयुक्तमथात्मानम् अमन्यत च वीर्यवान् ॥ ९७॥

स तेन कर्मणा स्वर्गं पृथिवीं पृथिवीपते ।
चचार गतभीः प्रीतो लब्धकीर्तिवरो नृपु ॥ ९८॥

उभौ लोकौ जितौ राजन्नमन्यत महामुनिः ।
कर्मणा तेन कौरव्य तपसा विपुलेन च ॥ ९९॥

अथ काले व्यतिक्रान्ते कस्मिंश्चित् कुरुनन्दन ।
रूच्या भगिन्या स्थानं तु बभूव धनधान्यवत् ॥ १००॥

एतस्मिन्नेव काले तु दिव्या काचिद्वराङ्गना ।
बिभ्रती परमं रूपं जगामाथ विहायसा ॥ १०१॥

तस्याश्शरीरात् पुष्पाणि पतितानि महीतले ।
तस्याश्रमस्याविदूरे दिव्यगन्धानि भारत ॥ १०२॥

पुष्पाणि तान्यगृह्णात् सा रुचिर्नलिनलोचना ।
तथा चित्ररथस्तत्र ह्यङ्गेभ्यः क्षिप्रमागमत् ॥ १०३॥

तस्या हि भगिनी तात स्मृता नाम्ना प्रभावती ।
भार्या चित्ररथस्याथ बभूवाङ्गेश्वरस्य वै ॥ १०४॥

पिनह्य तानि पुष्पाणि केशेषु वरवर्णिनी ।
आमन्त्रिता ततोऽगच्छद् रुचिरङ्गपतेर्गृहान ॥ १०५॥

पुष्पाणि तानि दृष्ट्वाऽथ तदाऽङ्गेन्द्रवराङ्गना ।

भगिनीं चोदयामास पुष्पार्थे चारुलोचनाम् ॥ १०६॥
[1]सा भर्त्रे सर्वमाचष्ट रुचिस्मुरुचिराङ्गना ।
भगिन्या भाषितं सर्वम् ऋषिस्तत्राभ्यनन्दत ॥ १०७॥
ततो विपुलमानाय्य देवशर्मा महातपाः ।
पुष्पार्थं चोदयामास गच्छ गच्छेति भारत ॥ १०८॥
विपुलस्तु गुरोर्वाक्यम् अविचार्य महातपाः ।
स तथेत्यब्रवीद्राजंस् तं च देशं जगाम ह ॥ १०९॥
यस्मिन् देशे तु तान्यासन् पतितानि नभस्थलात् ।
अथाम्लानानि तत्रासन् कुसुमान्यपराण्यपि ॥ ११०॥
ततस्स तानि जग्राह दिव्यानि रुचिराण्यथ ।
प्राप्तानि स्वेन तपसा दिव्यगन्धानि भारत ॥ १११॥
सम्प्राप्य तानि प्रीतात्मा गुरोर्वचनकारकः ।
ततो जगाम नगरीं चम्पां चम्पकमालिनीम् ॥ ११२॥
स वने [2]निर्जने तात ददर्श मिथुनं नृणाम् ।
चक्रवत् परिवर्तन्तं गृहीत्वा पाणिना करम् ॥ ११३॥
तत्रैकं तूर्णमगमत् तत्पदे परिवर्तयन ।
एकं तु न तथा राजंस् चक्रतुः कलहं ततः ॥ ११४॥
त्वं शीघ्रं गच्छसीत्येकोऽब्रवीन्नेति तथा परः ।

1. क-घ—इदमर्धं नास्ति 2. क-घ—नन्दने

पतितेति च तौ तात परस्परमथोचतुः ॥ ११५॥

तयोर्विस्पर्धतोरेवं शपथोऽयमभूत्तदा ।
मनसोद्दिश्य विपुलं ततो वाक्यमथोचतुः ॥ ११६॥

आवयोरनृतं प्राह यस्तस्याथ द्विजस्य वै ।
विपुलस्य परे लोके या गतिस्सा भवेदिति ॥ ११७॥

एतच्छ्रुत्वा तु विपुलो विपण्णवदनोऽवदत् ॥ ११८

विपुलः—

एतत्तीव्रतपाश्चायं कष्टश्चायं परिग्रहः ॥ ११८॥
मिथुनस्यास्य किं मे स्यात् कृतं पापं यतो गतिः ।
अनिष्टा सर्वभूतानां कीर्तिताऽनेन मेऽद्य वै ॥ ११९॥

भीष्मः—

एवं सञ्चिन्तयन्नेव विपुलो राजसत्तम ।
अवाङ्मुखो न्यस्तशिरा दध्यौ दुष्कृतमात्मनः ॥ १२०॥

ततश्षडन्यान् पुरुषान् अक्षैः काञ्चनराजतैः ।
अपश्यद्दीव्यमानांश्च लोभामर्षान्वितांस्तदा ॥ १२१॥

कुर्वतश्शपथं तं वै यः कृतो मिथुनेन वै ।
विपुलं वै समादिश्य तेऽपि वाक्यमथाब्रुवन् ॥ १२२॥

पुरुषाः—

यो लोभमास्थायास्माकं विषमं कर्तुमुत्सहेत् ।
विपुलस्य परे लोके या गतिस्तामवाप्नुयात् ॥ १२३॥

भीष्मः—

एतच्छ्रुत्वा तु विपुलो नापश्यद्धर्मसङ्करम् ॥ १२४

जन्मप्रभृति कौरव्य कृतपूर्वमथात्मनः ।
सम्प्रदध्यौ महाराजन्नग्निमिरिवाहितः ॥ १२५

दह्यमानेन मनसा वचश्श्रुत्वा तथाविधम् ॥ १२५॥

तत्र चिन्तयतस्तात बृहीर्वाचो निशम्य तु ।
इदमासीन्मनसि च रुच्या रक्षणकारितम् ॥ १२६॥

लक्षणं लक्षणेनैव वदनं वदनेन च ।
विधाय च मया प्रोक्तं सत्यमेतद्बृहीस्तथा ॥ १२७॥

एतदात्मनि कौरव्य दुष्कृतं विपुलस्तदा ।
अमन्यत महाभाग तथा तच्च न संशयः ॥ १२८॥

स चम्पां नगरीमेत्य पुष्पाणि गुरवे ददौ ।
पूजयामास च गुरुं विधिवत्स गुरुप्रियः ॥ १२९॥

तमागतमभिप्रेक्ष्य शिष्यं वाक्यमथाब्रवीत् ।
देवशर्मा महातेजा यत्तच्छृणु नराधिप ॥ १३०॥

देवशर्मा—

किं त्वया मिथुनं दृष्टं तस्मिन्नद्य महावने ।
ते त्वां जानन्ति निपुण आत्मा च रुचिरेव च ॥ १३१॥

* सर्वेषु कोशेषु अत्रैवाध्यायसमाप्तिर्दृश्यते

विपुलः—

ब्रह्मर्षे मिथुनं किं तत् के च षट् पुरुषा विभो ।
ये मां जानन्ति तत्त्वेन तांश्च मे वक्तुमर्हसि ॥ १३२॥

देवशर्मा—

यद्वै तन्मिथुनं ब्रह्मन्नहोरात्रं च विद्धि तत् ।
चक्रवत् परिवर्तेन ते तज्जानाति दुष्कृतम् ॥ १३३॥

ये च ते पुरुषा विप्र अक्षैर्दीव्यन्ति हृष्टवत् ।
ऋतूंस्तानभिजानीहि ते ते जानन्ति दुष्कृतम् ॥ १३४॥

न मां कश्चिद्विजानाति इति कृत्वा न विश्वसेत् ।
नरो मुह्यति पापात्मा पापकर्मा क्वचिद् द्विज ॥ १३५॥

कुर्वाणं हि नरं क्षिप्रं पापं रहसि सर्वदा ।
पश्यन्ति ऋतवश्चापि तथा दिननिशेऽप्युत ॥ १३६॥

त्वां तु वर्त्मस्थितं दृष्ट्वा गुरोः कर्मानिवेदकम् ।
स्मारयन्तस्तथा प्राहुस् ते यथा श्रुतवान् भवान् ॥ १३७॥

अहोरात्रं विजानाति ऋतवश्चापि नित्यशः ।
पुरुषे पापकं कर्म शुभं वाऽशुभकर्म वा ॥ १३८॥

तत्त्वया वै तथा कार्यं व्यभिचारभयात्मकम् ।
नाख्यानमिति जानन्तस् ते त्वामाहुस्तथा द्विज ॥ १३९॥

ते चैव हि भवेयुस्ते लोकाः पापकृतां यथा ।

कृत्वा नाचक्षतः कर्म मम यच्च त्वया कृतम् ॥ १४०॥

तथाऽशक्याश्च दुर्वृत्ता रक्षितुं प्रमदा द्विज ।
न च त्वं कृतवान् किञ्चिद् आगः प्रीतोऽस्मि तेन ते ॥ १४१॥

[1]मनोदोषविहीनानां न दोषस्स्यात्तथा तव ।
अन्यथाऽऽलिङ्ग्यते कान्ता स्नेहेन दुहिताऽन्यथा ॥ १४२॥

यतेश्च कामुकानां च योषिद्रूपेऽन्यथा मतिः ।
अशिक्षयैव मनसः प्रायो लोकस्तु वञ्च्यते ॥ १४३॥

लोलेन्युद्विजते लोको वक्त्रामव इति स्पृहा ।
अवन्ध्यायोग्यमनसां यदि मन्त्रात्मदैवकम् ॥ १४४॥

न रागस्नेहलोभान्धं कर्मिणां तन्महाफलम् ।
निष्कषायो विशुद्धस्त्वं रुच्यावेशान्न दूषितः ॥ १४५॥

यदि त्वहं त्वां दुर्वृत्तम् अद्राक्षं द्विजसत्तम ।
शपेयं त्वामहं क्रोधान्न मेऽत्राऽस्ति विचारणा ॥ १४६॥

सज्जन्ते पुरुषे नार्यस् सोऽर्थः पुंसश्च पुष्कलः ।
अन्यथा रक्षतश्शापो भविष्यति गतिश्च सा ॥ १४७॥

रक्षिता सा त्वया पुत्र मम चापि निवेदिता ।
अहं ते प्रीतिमांस्तात स्वस्ति स्वर्गं गमिष्यसि ॥ १४८॥

1. अ—अर्धाष्टकं नास्ति

भीष्मः—

इत्युक्त्वा विपुलं प्रीतो देवशर्मा महानृषिः ।
मुमोद स्वर्गमास्थाय सहभार्यस्सशिष्यकः ॥ १४९॥

इदमाख्यातवांश्चापि ममाख्यानं महाद्युतिः ।
मार्कण्डेयः पुरा राजन् गङ्गाकूले तथोत्तरे ॥ १५०॥

तथा ब्रवीमि पार्थ त्वां स्त्रियस्सच्चासदेव च ।
उभयं दृश्यते स्त्रीषु सततं साध्वसाधु च ॥ १५१॥

स्त्रियस्साध्व्यो महाभागास् सम्मता लोकमातरः ।
धारयन्ति महीं राजन्निमां सवनकाननाम् ॥ १५२॥

असङ्ग्राह्याश्च दुर्वृत्ताः कुलघ्नाः पापनिश्चयाः ।
विज्ञेया लक्षणैर्दुष्टैस् स्त्रीगोत्रमहजैर्नृप ॥ १५३॥

एवमेतासु रक्षा वै शक्या कर्तुं महात्मभिः ।
अन्यथा राजशार्दूल न शक्या रक्षितुं स्त्रियः ॥ १५४॥

एता हि मनुजव्याघ्र तीक्ष्णास्तीक्ष्णपराक्रमाः ।
नासामस्ति प्रियो नाम मैथुने न समो नृभिः ॥ १५५॥

एताः कृत्याश्च कष्टाश्च कृतघ्ना भरतर्षभ ।
न चैकस्मिन् सुनियताः पुरुषे पाण्डुनन्दन ॥ १५६॥

नासु स्नेहो नृभिः कार्यस् तथैवेर्ष्या जनेश्वर ।
खेदमास्थाय भुञ्जीत धर्ममास्थाय चैव हि ॥ १५७॥

अनृताविह पर्वादिदोषवर्जं नराधिप ॥ १५८

विहन्येतान्यथा कुर्वन् नरः कौरवनन्दन ।
सर्वथा राजशार्दूल युक्तस्सर्वत्र युज्यते ॥ १५९

तेनैकेन तु रक्षा वै विपुलेन कृता स्त्रियाः ।
नान्यश्शक्तो नृलोकेऽस्मिन् रक्षितुं नृप योषितः ॥ १६०

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां
अनुशासनपर्वणि एकोनचत्वारिंशोऽध्यायः ॥ ३९ ॥
॥ ८९ ॥ आनुशासनिकपर्वणि एकोनचत्वारिंशोऽध्यायः ॥ ३९ ॥
[अस्मिन्नध्याये १६० श्लोकाः]

॥ चत्वारिंशोऽध्यायः ॥

भीष्मेण युधिष्ठिरं प्रति विवाहविभागकथनम् ॥ १ ॥ तथा कन्यानां भार्यात्वप्रापकविद्यादिनिरूपणम् ॥ २ ॥

युधिष्ठिरः—

यन्मूलं सर्वधर्माणां प्रजनस्य गृहस्य च ।
पितृदेवातिथीनां च तन्मे ब्रूहि पितामह ॥ १

भीष्मः—

अयं हि सर्वधर्माणां धर्मश्चिन्त्यतमो मतः ।
कीदृशाय प्रदेया स्यात् कन्येति वसुधाधिप ॥ २

शीलवृत्ते समाज्ञाय विद्यां योनिं च कर्म च ।

अद्भिरेव प्रदातव्या कन्या गुणवते भवेत् ॥ ३
ब्राह्मणानां सतामेष धर्मो नित्यं युधिष्ठिर ॥ ३॥
आर्षेण चावहेदेवं यो दद्यादनुकूलिने ।
शिष्टानां क्षत्रियाणां च धर्म एष सनातनः ॥ ४॥
[1]अप्यभिप्रेतमुत्सृज्य कन्याभिप्रेत एव सः ।
अभिप्रेता च या यस्य तस्मै देया युधिष्ठिर ॥ ५॥
गान्धर्वमिति तं धर्मं आहुर्धर्मविदो जनाः ॥ ६
धनेन बहुधा क्रीत्वा सम्प्रलोभ्य च बान्धवान् ।
असुराणां नृपाणां वै धर्ममाहुर्मनीषिणः ॥ ७
हत्वा च्छित्त्वा च शीर्षाणि रुदतीं सुदतीं गृहात् ।
प्रसह्याहरणं तात राक्षसं धर्मलक्षणम् ॥ ८
सुप्तां मत्तां प्रमत्तां वा रहो यत्रोपगच्छति ।
स पापिष्ठो विवाहानां पैशाचः कथितोऽधमः ॥ ९
पञ्चानां तु त्रयो धर्म्या द्वावधर्म्यौ युधिष्ठिर ।
पैशाचश्चासुरश्चैव न कर्तव्यौ कथञ्चन ॥ १०
ब्राह्मः क्षात्रोऽथ गान्धर्व एते धर्म्या नरर्षभ ।
पृथग्वा यदि वा मिश्राः कर्तव्या नात्र संशयः ॥ ११
तिस्रो भार्या ब्राह्मणस्य द्वे भार्ये क्षत्रियस्य तु ।

1. क-घ—अनभिप्रेत

वैश्यस्त्वजातिं विन्देत तास्वपत्यं हितायति ॥ १२

द्विजस्य ब्राह्मणी श्रेष्ठा क्षत्रिया क्षत्रियस्य तु ।
रत्यर्थमपि शूद्रा स्यान्नेत्याहुरपरे जनाः ॥ १३

अपत्यजन्म शूद्रायां न प्रशंसन्ति साधवः ।
शूद्रायां जनयन् विप्रः प्रायश्चित्तमवाप्नुयात् ॥ १४

नातिबालां वहन्त्यन्ये अनित्यत्वात् प्रजार्थिनः ।
वहन्ति कर्मिणस्तस्याम् अन्तश्शुद्धिञ्यपेक्षया ॥ १५

अपरान्वयसम्भूतां दुस्वप्नादिविवर्जिताम् ।
कामो यस्यां निषिद्धश्च केचिदिच्छन्ति चापदि ॥ १६

त्रिंशद्वर्षो दशवर्षां यो विन्देत न नग्निकाम् ।
एकविंशतिवर्षो वा सप्तवर्षामवाप्नुयात् ॥ १७

[1]यस्यास्तु न भवेद्भ्राता पिता माता च भारत ।
नोपगच्छेत तां जातु पुत्रिकाधर्मिका हि सा ॥ १८

त्रीणि वर्षाण्युदीक्षेत कन्या ऋतुमती सती ।
चतुर्थेऽत्वथ सम्प्राप्ते स्वयं भर्तारमाव्रजेत् ॥ १९

प्रजनो हीयते तस्या रतिश्च भरतर्षभ ।
[2]अतोऽन्यथा वर्तमाना भवेद्वाच्या प्रजापतेः ॥ २०

---

1. अ-क-ख-घ—न स्त्रीं बालां वहन्त्यन्ये ह्यनित्यत्वात् प्रजार्थिनः ।
[अधिकः पाठः]

2. क-घ—अर्धंचतुष्टयं नास्ति

असपिण्डा च या मातुर् असगोत्रा च या पितुः ।
इत्येतामुपयच्छेत तं धर्मं मनुरब्रवीत् ॥ २१

युधिष्ठिरः—

शुल्कमन्येन दत्तं स्याद् ददानीत्याह चापरः ।
बलादन्यः प्रभाषेत धनमन्यः प्रदर्शयेत् ॥ २२

पाणिं ग्रहीता त्वन्यस्स्यात् कस्य कन्या पितामह ।
तत्त्वं जिज्ञासमानानां चक्षुर्भवतु नो भवान् ॥ २३

भीष्मः—

यत् किञ्चित् कर्म मानुष्यं सन्तानाय प्रवर्तते ।
मन्त्रवन्मन्त्रतस्तस्या मृषावादस्त्वपातकः ॥ २४

भार्यापत्यृत्विगाचार्याश् शिष्योपाध्याय एव च ।
मृषोक्तौ दण्डमर्हन्ति नेत्याहुरपरे जनाः ॥ २५

न ह्यकामेन संवादं मनुरेवं प्रशंसति ।
अयशस्यमधर्म्यं च यन्मृषा धर्मगोपनम् ॥ २६

नैकान्तदोष एकस्मिन्नुद्यानेनोपलभ्यते ॥ २६॥

धर्मतो यां प्रयच्छन्ति यां वा क्रीणन्ति भारत ।
बन्धुभिस्समनुज्ञातो मन्त्रानेवं प्रयोजयेत् ॥ २७॥

तदा सिध्यन्ति ते मन्त्रा नादत्तायाः कथञ्चन ॥ २८

यस्त्वत्र मन्त्रस्समये भार्यापत्योर्मिथः कृतः ।

[1]तमेवाहुर्गरीयांसं यश्चासौ ज्ञातिभिः कृतः ॥ २९

देवदत्तां पतिर्भार्यां वेत्ति धर्मस्य शासनात् ।
सा दैवी मानुषीं वाचम् अनृतां पर्युदस्यति ॥ ३०

युधिष्ठिरः—

कन्यायां प्राप्तशुल्कायां ज्यायांश्चेद्दात्रजेद्वरः ।
धर्मकामार्थसम्पन्नो वाच्यमत्रानृतं न वा ॥ ३१

तस्मिन्नुभयतो दोषे कुर्वञ् श्रेयस्समाचरेत् ।
अयं तु सर्वधर्माणां धर्मश्चिन्त्यतमो मतः ॥ ३२

तत्त्वं जिज्ञासमानानां चक्षुर्भवतु नो भवान् ।
तदेतन् सर्वमाचक्ष्व न हि तृप्यामि कथ्यताम् ॥ ३३

भीष्मः—

न वै निष्ठाकरं शुल्कं [2]ज्ञात्वासीत्तेन नानृतम् ।
न हि शुल्कपरास्सन्तः कन्यां ददति कर्हिचित् ॥ ३४

अन्यैर्गुणैरुपेतं तु शुल्कं [3]वाञ्छन्ति बान्धवाः ॥ ३४॥

अलङ्कृतां वहस्वेति यो दद्यादनुकूलतः ।
तच्च तावद्दायेव न शुल्कं विक्रयो हि सः ॥ ३५॥

प्रतिगृह्य भवेद्देयम् एष धर्मस्सनातनः ॥ ३६

दास्यामि भवते कन्याम् इति पूर्वं न भाषितम् ॥ ३६॥

---

1. क-घ—इदमर्धं नास्ति
2. ख-घ—ज्ञात्वाऽऽ
3. क-ङ—याचन्ति

ये चैवाहुर्ये च नाहुर्ये चावश्यं ददत्युत ।
तस्मादाग्रहणात् पाणेर् ये वदन्ति परस्परम् ॥ ३७॥

कन्यावरः पुरा दत्तो मरुद्भिरिति नश्श्रुतम् ॥ ३८

नानिष्टाय प्रदातव्या कन्या इत्यृचिचोदना ।
तन्मूलं काममूलस्य प्रजनस्येति मे मतिः ॥ ३९

समीक्ष्य च बहून् दोषान् संवादे विद्विषाणयोः ।
यथा निष्ठाकरं शुल्कं न जात्वासीत् तथा शृणु ॥ ४०

अहं विचित्रवीर्याय द्वे कन्ये समुदावहम् ।
जित्वाऽङ्गमगधान् सर्वान् काशीनपि च कोसलान् ॥ ४१

गृहीतपाणिरेकाऽऽसीत् प्राप्तशुल्काऽपराऽभवत् ।
पाणौ गृहीता तत्रैव विसर्ज्या इति मे पिता ॥ ४२

अब्रवीदितरां कन्यां आवहन् स तु कौरवः ॥ ४२॥

अप्यन्यामनुपप्रच्छ शङ्कमानः पितुर्वचः ।
अतीव ह्यस्य धर्मैप्सा भ्रातुर्मेऽभ्यधिकाऽभवत् ॥ ४३॥

ततोऽहमब्रवं राजन्नाचारेप्सुरिदं वचः ।
आचारं तत्त्वतो वेत्तुम् इच्छामीति पुनः पुनः ॥ ४४॥

ततो मयैवमुक्ते तु वाक्ये वाक्यविदां वरः ।
पिता मम महाराज बाह्लीकोऽवाक्यमब्रवीत् ॥ ४५॥

[1]यदि वा शुल्कतो निष्ठा न पाणिग्रहणं तथा ।
लाजोष्णारमुपासीत प्राप्तशुल्का पतिव्रता ॥ ४६॥

न हि धर्मविदः प्राहुः प्रमाणं वाक्यतस्स्मृतिः ।
येषां वै शुल्कतो निष्ठा न पाणेग्रहणं ततः ॥ ४७॥

प्रसिद्धं भाषितं दानं तेषां प्रत्यसनं पुनः ।
ये मन्यन्ते क्रयं शुल्कं न ते धर्मविदो जनाः ॥ ४८॥

नैव तेभ्यः प्रदातव्या न विक्रेया कथञ्चन ॥ ४९

ये च क्रीणन्ति दास्यीवद् ये च विक्रीणते द्विजाः ।
भवेत्तेषां तथा निष्ठा लुब्धानां पापचेतसाम् ॥ ५०

अस्मिन् धर्मे सत्यवन्तं पर्यपृच्छन्त वै जनाः ॥ ५०॥

जनाः—

कन्यायां प्राप्तशुल्कायां शुल्कदः प्रवसेद्यदि ।
पाणिं ग्रहीता नान्यस्स्याद् अत्र नो धर्मसंशयः ॥ ५१॥

तन्नश्छिन्धि महाप्राज्ञ त्वं हि वै प्राज्ञसत्तमः ।
तत्त्वं जिज्ञासमानानां चक्षुर्भवतु नो भवान ॥ ५२॥

भीष्मः—

तानेवं ब्रुवतस्सर्वान् सत्यवान् वाक्यमब्रवीत् ॥ ५३

1. अ—नास्तीदमधर्म्यम्

सत्यवान्—

यत्रेष्टं तत्र देया स्यान्नात्र कार्या विचारणा ।
कुर्वते जीवतोऽप्येवं मृते नैवास्ति संशयः ॥ ५४

देवरं प्रविशेत् कन्या [1]तप्येद्वाऽपि महत्तपः ।
तमेवानुव्रता भूत्वा पाणिग्राहस्य नाम सा ॥ ५५

लिखित्वैव तु केषाञ्चिद् अपरेषां शतैरपि ।
इति ये संवदन्त्यत्र त एतं निश्चयं विदुः ॥ ५६

तत्पाणिग्रहणात् पूर्वम् उत्तरं यत्र वर्तते ।
सर्वमङ्गलमन्त्रं वै मृषावादस्तु पातकः ॥ ५७

पाणिग्रहणमन्त्राणां निष्ठा स्यात् सप्तमे पदे ।
पाणिग्राहस्य भार्याया यस्य चाद्भिः प्रदीयते ॥ ५८

अनुकूलामनुवशां भ्रात्रा दत्तामपापिकाम् ।
परिक्रम्य यथान्यायं भार्यां विन्देद्द्विजोत्तमः ॥ ५९

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां
अनुशासनपर्वणि चत्वारिंशोऽध्यायः ॥ ४० ॥
॥ ८९ ॥ आनुशासनिकपर्वणि चत्वारिंशोऽध्यायः ॥ ४० ॥
[अस्मिन्नध्याये ५९ श्लोकाः]

---

1. क-घ—जप्ये

॥ एकचत्वारिंशोऽध्यायः ॥

भीष्मेण युधिष्ठिरं प्रति वैवाहिकविध्यादेर्दायार्हतादेश्च कथनम् ॥ १ ॥
भीष्मेण युधिष्ठिरं प्रति स्त्रीणां प्रशंसनम्॥ २ ॥

युधिष्ठिरः—

कन्यायां प्राप्तशुल्कायां पतिश्चेन्नास्ति कश्चन ।
तत्र का प्रतिपत्तिस्यात् तन्मे ब्रूहि पितामह ॥ १

भीष्मः—

या पुत्रकस्य रिक्थस्य प्रतिपन्ना यदा भवेत् ।
अथवा सा हरेच्छुल्कं क्रीता शुल्कप्रदस्य सा ॥ २

तस्यार्थेऽपत्यमिच्छेत येन न्यायेन शक्नुयात् ।
न तस्या मन्त्रवत् कार्यं [1]कश्चित् कुर्वीत किञ्चन ॥ ३

स्वयंवृतेति सा हि स्त्री पित्रा वै प्रतिपद्यते ।
तत्तस्यान्ये प्रशंसन्ति धर्मज्ञा न परे जनाः ॥ ४

एतत्तु नापरे चक्रुर् न परे जातु साधवः ।
साधूनां पुनराचारो गरीयान् धर्मलक्षणः ॥ ५

तस्मिन्नेवम्प्रकारे तु सुक्रतुर्वाक्यमब्रवीत् ।
नप्ता विदेहराजस्य जनकस्य महात्मनः ॥ ६

1. क-ख—केचित्कुर्वन्ति

असदाचरिते मार्गे कथं स्यादनुकीर्तितम् ।
अनुप्रश्नस्संशयो वा सतामेतदुपालभेत् ॥ ७

असदेव हि धर्मस्य प्रमादो धर्म आसुरः ।
नानुशुश्रुम जात्वेव तदिदं पूर्वजन्मसु ॥ ८

भार्यापत्योर्हि सम्बन्धस् स्त्रीपुंसोस्तुल्य एव हि ।
रतिस्साधारणो धर्म इति चाह स पार्थिवः ॥ ९

युधिष्ठिरः—

अथ केन प्रमाणेन पुंसामादीयते धनम् ।
पुत्रवद्धि पितुस्तस्य कन्या भवितुमर्हति ॥ १०

भीष्मः—

यथैवात्मा तथा पुत्रः पुत्रेण दुहिता समा ।
तस्यामात्मनि तिष्ठन्त्यां कथमन्यो धनं हरेत् ॥ ११

मातुश्च यौतकं यत् स्यात् कुमारीभाग एव सः ।
दौहित्र एव वा रिक्थम् अपुत्रस्य पितुर्हरेत् ॥ १२

ददाति हि स पिण्डं वै पितुर्मातामहस्य च ।
पुत्रदौहित्रयोर्नेह विशेषो धर्मतस्स्मृतः ॥ १३

अन्यत्र जायते सोऽपि प्रजया पुत्र ईयते ।
दुहिताऽन्यत्र जायेत पुत्रेणापि विशिष्यते ॥ १४

दौहित्रकेण धर्मेण तत्र पश्यामि कारणम् ।

[1]विक्रीतासु च ये पुत्रा भवन्ति पितुरेव ते ॥ १५

असूयवस्त्वधर्मिष्ठाः परस्वादायिनश्शठाः ।
आसुरादथ सम्भूता धर्माद्विषमवृत्तयः ॥ १६

अत्र गाथा यमोद्गीताः कीर्तयन्ति पुराविदः ।
धर्मज्ञा धर्मशास्त्रेषु निबद्धा धर्मसेतुषु ॥ १७

यो मनुष्यस्स्वकं पुत्रं विक्रीय धनमिच्छति ।
कन्यां वा जीवनार्थाय यश्शुल्केन प्रयच्छति ॥ १८

सप्तवर्षशतं घोरे निरये सान्वयो वसेत् ।
स्वेदं मूत्रं पुरीषं च तत्र प्रेत उपाश्नुते ॥ १९

आर्षे गोमिथुनं शुल्कं केचिदाहुर्मृषेति तत् ।
अल्पं वा बहु वा शुल्कं विक्रयस्तावदेव सः ॥ २०

यद्यप्याचरितः कैश्चिन्नैष धर्मः कथञ्चन ।
अन्येषामपि दृश्यन्ते लोभतस्सम्प्रवृत्तयः ॥ २१

वंशाङ्कुरा च नारी सा ये च तामुपभुञ्जते ।
एतस्याः पापहर्तारस् तमस्यन्धेऽधिशेरते ॥ २२

अन्योऽप्यथ न विक्रेयो मनुष्यः किं पुनः प्रजाः ।
अधर्ममूलैर्नियतैर् न तैरर्थोऽस्ति कश्चन ॥ २३

---

1. क-घ—विदितासु

* सर्वेषु कोशेषु अत्रैवाध्यायसमाप्तिर्दृश्यते

प्राचेतसस्य वचनं कीर्तयन्ति पुराविदः ।
यस्याः किञ्चिन्नाददते ज्ञातयो न स विक्रयः ॥ २४

अर्हणं तत् कुमारीणाम् आनृशंस्यं व्रतं च तत् ।
सर्वं च प्रतिदेयं स्यात् कन्यायै तदशेषतः ॥ २५

पितृभिर्भ्रातृभिश्चैव श्वशुरैरथ देवरैः ।
पूज्या लालयितव्याश्च बहुकल्याणमीप्सुभिः ॥ २६

यदि वै स्त्री न रोचेत पुमांसं न प्रमोदयेत् ।
अमोदनात् पुनः पुंसां प्रजनं न प्रवर्धते ॥ २७

ग्राह्या लालयितव्याश्च स्त्रियो नित्यं जनाधिप ।
अपूजिताश्च यस्यैतास् सर्वास्तस्याफलाः क्रियाः ॥ २८

तदैव तत् कुलं नास्ति यत्र शप्स्यन्ति जामयः ॥ २८॥

कुलानि जामीशप्तानि निकृत्तानीव कृत्यया ॥ २९

नेह भान्ति न वर्धन्ते श्रिया हीनानि पार्थिव ॥ २९॥

स्त्रियः पुंसां परिददौ मनुर्जिगमिपुर्दिवम् ।
अबलास्त्वल्पकौपीनास् सुहृदस्सत्यजिष्णवः ॥ ३०॥

ईर्ष्यवो मानकामाश्च चण्डालसुहृदोऽबुधाः ।
स्त्रियो माननमर्हन्ति ता मानयत मानवाः ॥ ३१॥

स्त्रीप्रत्ययो हि यो धर्मो रतिर्भोगश्च केवलः ।

परिचर्या नमस्कारास् तदायत्ता भवन्तु वः ॥ ३२॥

उत्पादनमपत्यस्य जातस्य परिपालनम् ।
प्रीत्यर्थं लोकयात्रायां पश्यत स्त्रीनिबन्धनम् ॥ ३३॥

सम्मान्यमानाश्चैताभिस् सर्वकर्माण्यवाप्स्यथ ।
विदेहराजदुहिता चात्र श्लोकमगायत ॥ ३४॥

नास्ति यज्ञस्स्त्रियाः कश्चिन्न श्राद्धं नोपवासकम् ।
धर्मस्तु भर्तृशुश्रूषा तया स्वर्गं जयत्युत ॥ ३५॥

पिता रक्षति कौमारे भर्ता रक्षति यौवने ।
पुत्रस्तु स्थाविरे भावे न स्त्री स्वातन्त्र्यमर्हति ॥ ३६॥

श्रिय एतास्स्त्रियो नाम सत्कार्या भूतिमिच्छता ।
लालिताऽनुगृहीता च श्रीस्स्त्री भवति भारत ॥ ३७॥

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां
अनुशासनपर्वणि एकचत्वारिंशोऽध्यायः ॥ ४१ ॥
॥ ८९ ॥ आनुशासनिकपर्वणि एकचत्वारिंशोऽध्यायः ॥ ४१ ॥
[अस्मिन्नध्याये ३७॥ श्लोकाः]

॥ द्विचत्वारिंशोऽध्यायः ॥

भीष्मेण युधिष्ठिरं प्रति ब्राह्मणादीनां दायविभजनविधिनिरूपणम् ॥

युधिष्ठिरः—

सर्वशास्त्रविधानज्ञ राजर्षे धर्मवित्तम ।
अतीव संशयच्छेत्ता भवान् वै प्रथितः क्षितौ ॥ १

कश्चित्तु संशयोऽस्माकं तन्मे छिन्धि पितामह ।
अस्यामापदि कष्टायाम् अन्यं पृच्छाम कं वयम् ॥ २

यथा च येन कर्तव्यं यश्च धर्मस्सनातनः ।
एतत् सर्वं महाबाहो भवान् व्याख्यातुमर्हति ॥ ३

चतस्रो विहिता भार्या ब्राह्मणस्य पितामह ।
[1]ब्राह्मणी क्षत्रिया वैश्या शूद्रा च रतिमिच्छतः ॥ ४

तत्र जातेषु पुत्रेषु सर्वासां कुरुसत्तम ।
आनुपूर्व्येण कस्तेषां पित्र्यं दायाद्यमर्हति ॥ ५

केन वा किं ततो ग्राह्यं पितृवित्तात् पितामह ।
एतदिच्छामि कथितुं विभागस्तेषु कस्स्मृतः ॥ ६

भीष्मः—

ब्राह्मणः क्षत्रियो वैश्यस् त्रयो वर्णा द्विजातयः ।

1. क—अर्धचतुष्टयं नास्ति

एतेषु विहितो धर्मो ब्राह्मणस्य युधिष्ठिर ॥ ७

वैषम्यादथ वा लोभात् कामाद्वाऽपि परन्तप ।
ब्राह्मणस्य भवेच्छूद्रा न तु दृष्टा न तु स्मृता ॥ ८

शूद्रां शयनमारोप्य ब्राह्मणः पतितो भवेत् ।
प्रायश्चित्तीयते चापि विधिदृष्टेन कर्मणा ॥ ९

तत्र जाते[1]षु पुत्रेषु विगुणस्य युधिष्ठिर ।
अतस्ते नियमं वित्ते सम्प्रवक्ष्यामि भारत ॥ १०

दशधा प्रविभक्तस्य स तस्यैव भवेत् क्रमः ।
सवर्णासु प्रजातानां समान् भागान् प्रकल्पयेत् ॥ ११

अब्राह्मणं तु मन्यन्ते शूद्रापुत्रं तु भारत ।
आनृशंस्यं परो धर्म इति तस्मै प्रदीयते ॥ १२

यदि वाप्येकपुत्रस्याद् अपुत्रो यदि वा भवेत् ।
नाधिकं दशमाहृद्याच् छूद्रापुत्राय भारत ॥ १३

[2]स्मृत एकश्चतुर्भागः कन्याभागस्तु धर्मतः ।
अभ्रातृका समग्राही चार्धस्येत्यपरे विदुः ॥ १४

त्रैवार्षिकाद्यदा भक्ताद् अधिकं स्याद्द्विजस्य तु ।
यजेत तेन द्रव्येण न वृथा साधयेद्धनम् ॥ १५

---

1. अ—ष्वपत्येषु
2. क-घ—अर्धद्वयं नास्ति

त्रिसाहस्रावरो दायस् स्त्रिया देयो धनस्य वै ।
तच्चतुर्धा धनं दत्तं नादत्तं भोक्तुमर्हति ॥ १६

स्त्रीणां तु [1]पतिदायाद्यम् उपभोगफलं धनम् ।
नापहारं स्त्रियः कुर्युः पितृवित्तान् कथञ्चन ॥ १७

स्त्रियास्तु यद्भवेद्वित्तं पित्रा दत्तं युधिष्ठिर ।
ब्राह्मण्यास्तद्धरेत् कन्या यथा पुत्रस्तथाऽस्य सा ॥ १८

सा हि पुत्रसमा राजन् विहिता कुरुनन्दन ।
एवमेतत् समुद्दिष्टं धर्मेषु भरतर्षभ ॥ १९

एवं धर्ममनुस्मृत्य न वृथा साधयेद्धनम् ॥ १९॥

युधिष्ठिरः—

शूद्रायां ब्राह्मणाज्जातो यद्यदेयधनस्स्मृतः ।
केन प्रीतिविशेषेण दशमो ह्यस्य दीयते ॥ २०॥

ब्राह्मण्यां ब्राह्मणाज्जातो ब्राह्मणस्यान्न संशयः ।
क्षत्रियायां तथैव स्याद् वैश्यायामपि चैव हि ॥ २१॥

कस्मात्ते विषमं भागं भजेरन् नृपसत्तम ।
यदा सर्वे त्रयो वर्णास् त्वयोक्ता ब्राह्मणा इति ॥ २२॥

भीष्मः—

दारा इत्युच्यते लोके नाम्नैकेन परन्तप ।

---

1. क-घ—पतितो यत्स्यादुप

प्रोक्तेन चैकनाम्नाऽयं विशेषस्सुमहान् भवेत् ॥ २३॥

तिस्रः कृत्वा पुरो भार्याः पश्चाद्विन्देत ब्राह्मणीम् ।
सा च ज्येष्ठा सा च पूज्या सा च ताभ्यो गरीयसी ॥ २४॥

स्नानं प्रसाधनं भर्तुर् दन्तधावनमञ्जनम् ।
हव्यं कव्यं च यच्चान्यद् धर्मयुक्तं गृहे भवेत् ॥ २५॥

न तस्यां जातु तिष्ठन्त्याम् अन्या तत् कर्तुमर्हति ।
ब्राह्मणी त्वेव तत् कुर्याद् ब्राह्मणस्य युधिष्ठिर ॥ २६॥

अन्नं पानं च माल्यं च वासांस्याभरणानि च ।
ब्राह्मण्यैतानि देयानि भर्त्रा सा हि गरीयसी ॥ २७॥

मनुना विहितं शास्त्रं यच्चापि कुरुनन्दन ।
धात्राऽप्येष महाराज दृष्टो धर्मस्सनातनः ॥ २८॥

अथ चेदन्यथा कुर्याद् यथाकामं युधिष्ठिर ।
[1]यथा ब्राह्मणचण्डालः पूर्वदृष्टस्तथैव सः ॥ २९॥

ब्राह्मण्यास्सदृशः पुत्रः क्षत्रियायाश्च यो भवेत् ।
राजन् विशेषो नास्त्यत्र वर्णयोरुभयोरपि ॥ ३०॥

न तु जात्या समा लोके ब्राह्मण्याः क्षत्रिया भवेत् ।
ब्राह्मण्याः प्रथमः पुत्रो भूयान् स्याद् राजसत्तम ॥ ३१॥

भूयोऽपि भूयसा भाव्यं पितृवित्ताद् युधिष्ठिर ।

1. अ—इदमर्धद्वयं नास्ति

यथा न सदृशी जात्या ब्राह्मण्याः क्षत्रिया भवेत् ॥ ३२॥

[1]क्षत्रियायास्तथा वैश्या न जातु सदृशी भवेत् ।
श्रीश्च राज्यं च कोशश्च क्षत्रियाणां युधिष्ठिर ॥ ३३॥

विहिता दृश्यते राजन् सागरान्ता च मेदिनी ।
क्षत्रियो हि स्वधर्मेण श्रियं प्राप्नोति भूयसीम् ॥ ३४॥

राजा दण्डधरो राजन् रक्षा नान्यत्र क्षत्रियात् ॥ ३५

ब्राह्मणा हि महाभागा देवानामपि देवताः ।
तेषु राजा प्रवर्तेत पूजया विधिपूर्वकम् ॥ ३६

प्रणीतमृषिभिर्ज्ञात्वा धर्मं शाश्वतमव्ययम् ।
लुप्यमानास्स्वधर्मेण क्षत्रियो रक्षति प्रजाः ॥ ३७

दस्युभिर्ह्रियमाणं च धनं दारांश्च सर्वशः ।
सर्वेषामेव वर्णानां त्राता भवति पार्थिवः ॥ ३८

भूयान् स्यात् क्षत्रियापुत्रो वैश्यापुत्रान्न संशयः ।
भूयस्तेनापि हर्तव्यं पितृवित्तादुधिष्ठिर ॥ ३९

युधिष्ठिरः—

उक्तो विभागो विधिवद् ब्राह्मणस्वे पितामह ।
इतरेषां तु वर्णानां कथं तु नियमो भवेत् ॥ ४०

---

1. क-घ—इदमर्धं नास्ति

भीष्मः—

क्षत्रियस्यापि भार्ये द्वे विहिते कुरुनन्दन ।
तृतीया या भवेच्छूद्रा न तु दृष्टा न तु स्मृता ॥ ४१

एष एव क्रमो हि स्यात् क्षत्रियाणां युधिष्ठिर ।
अष्टधा तु भवेत् कार्यं क्षत्रियाणां युधिष्ठिर ॥ ४२

क्षत्रियाया हरेत् पुत्रश् चतुरोंशान् पितुर्धनात् ।
युक्तोपचारिकं यच्च पितुस्स्यात् स हरेच्च तत् ॥ ४३

वैश्यापुत्रस्तु भागांस्त्रीञ् शूद्रापुत्रस्तथाऽष्टमम् ।
सोऽपि वित्तं हरेत् पित्रा नादत्तं कर्तुमर्हति ॥ ४४

एकैव हि भवेद्भार्या वैश्यस्य कुरुनन्दन ।
द्वितीया या भवेच्छूद्रा न तु दृष्टा न तु स्मृता ॥ ४५

वैश्यस्य वर्तमानस्य वैश्यायां भरतर्षभ ।
शूद्रायाश्चैव कौन्तेय तयोर्विनिमयस्स्मृतः ॥ ४६

पञ्चधा तु भवेत् कार्यं वैश्यस्वं भरतर्षभ ।
तयोरपीह पश्यामि विभागं च जनाधिप ॥ ४७

वैश्यापुत्रेण हर्तव्याश् चत्वारोंशाः पितुर्धनात् ।
पञ्चमस्तु भवेद् भागश् शूद्रापुत्राय भारत ॥ ४८

सोऽपि दत्तं हरेत् पित्रा नादत्तं कर्तुमर्हति ।
त्रिभिर्वर्णैस्तथा जातश् शूद्रो देयधनो भवेत् ॥ ४९

शूद्रस्य स्यात् सवर्णैव भार्या नान्या कथञ्चन ।
शूद्रस्य समभागस्याद् यदि पुत्रशतं भवेत् ॥ ५०

जातानां समवर्णासु पुत्राणामविशेषतः ।
सर्वेषामेव वर्णानां समो भागोऽयमीप्सितः ॥ ५१

ज्येष्ठस्य भागो ज्येष्ठस्याद् एकांशो यः प्रधानतः ।
एष दायविधिः पार्थ पूर्वमुक्तस्स्वयम्भुवा ॥ ५२

[1]समवर्णासु जातानां विशेषोऽस्त्यपरो नृप ।
विवाहवैषम्यकृतः पूर्वपूर्वो विशिष्यते ॥ ५३

हरेर्ज्येष्ठः प्रधानांशम् एकभार्यासुतेष्वपि ।
मध्यमो मध्यमं चैव कनीयांस्तु कनीयसम् ॥ ५४

एवं जातिषु सर्वासु सवर्णज्येष्ठतां गतः ।
महर्षिरपि चैतद्वै मारीचः काश्यपोऽब्रवीत् ॥ ५५

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां
अनुशासनपर्वणि द्विचत्वारिंशोऽध्यायः ॥ ४२ ॥
॥ ॐ ॥ आनुशासनिकपर्वणि द्विचत्वारिंशोऽध्यायः ॥ ४२ ॥
[अस्मिन्नध्याये ५५ श्लोकाः]

---

1. क-घ—सर्वैव

॥ त्रिचत्वारिंशोऽध्यायः ॥

भीष्मेण युधिष्ठिरं प्रति सङ्करजातीनां शीलविभागादिनिरूपणम् ॥

युधिष्ठिरः—

अथाश्रयाद्वा कामाद्वा वर्णानां वाऽप्यनिर्णयात् ।
अज्ञानाद्वाऽपि वर्णानां जायते वर्णसङ्करः ॥ १

तेषाञ्चानेन विधिना जातानां वर्णसङ्करे ।
को धर्मः कानि कर्माणि तन्मे ब्रूहि पितामह ॥ २

भीष्मः—

चातुर्वर्ण्यस्य कर्माणि चातुर्वर्ण्यं च केवलम् ।
असृजत् सह यज्ञार्थैः पूर्वमेव प्रजापतिः ॥ ३

भार्याश्चतस्रो विप्रस्य द्वयोरात्माऽस्य जायते ।
आनुपूर्व्याच्च द्वौ हीनौ मातृजन्यौ प्रसूयतः ॥ ४

वरोंशभाग् ब्राह्मणस्यैव पुत्रश्
शूद्रापुत्रं पारशवं तमाहुः ।
शुश्रूषकस्स्वस्य कुलस्य स स्यात्
स्वं चारित्रं नित्यमथो न जह्यात् ॥ ५

सर्वानुपायानपि सम्प्रधार्य
समुद्धरेत् स्वस्य कुलस्य तन्तुम् ।

ज्येष्ठो यवीयानपि स द्विजस्य
शुश्रूषिता दानपरायणस्स्यात् ॥ ६

तिस्रः क्षत्रियसम्बन्धाद् द्वयोरात्माऽस्य जायते ।
[1]हीनवर्णस्तृतीयायां शूद्र उग्र इति स्मृतः ॥ ७

द्वे चापि भार्ये वैश्यस्य द्वयोरात्माऽस्य जायते ।
शूद्रा शूद्रस्य चाप्येका शूद्रमेव प्रजायते ॥ ८

ततोऽविशिष्टोऽप्यधमो गुरुदारप्रधर्षकः ।
वाह्यं वर्णं जनयति चातुर्वर्ण्याद् विगर्हितम् ॥ ९

अयाज्यं क्षत्रियो ब्रात्यं सूतं स्तोत्रक्रियापरम् ।
वैश्यो वैदेहकं चापि मौद्गल्यमपवर्जितम् ॥ १०

शूद्रश्चण्डालमत्युग्रं वध्यघ्नं बाह्यवासिनम् ।
ब्राह्मण्यां सम्प्रजायन्त इत्येते कुलपांसनाः ॥ ११

एते मतिमतां श्रेष्ठ वर्णसङ्करजा विभो ॥ ११॥

वन्दी तु जायते वैश्यान्मागधो वाक्यजीवनः ।
[2]शूद्रान्निषादो मत्स्यघ्नः क्षत्रियाया व्यतिक्रमात् ॥ १२॥

शूद्रादायोगवश्चापि वैश्यायां ग्राम्यधर्मतः ।
ब्राह्मणैरप्रतिग्राह्यः क्षत्ता सवनजीवनः ॥ १३॥

1. अ—इदमर्धद्वयं नास्ति
2. क-घ—इदमर्धं नास्ति

एतेऽपि सदृशं वर्णं जनयन्ति स्वयोनिषु ।
[1]मातृजात्या प्रसूयन्ते प्रहीना हीनयोनिषु ॥ १४॥

यथा चतुर्षु वर्णेषु द्वयोरात्माऽस्य जायते ।
आनन्तर्यात् प्रजायन्ते यथा बाह्या प्रधानतः ॥ १५॥

ते चापि सदृशं वर्णं जनयन्ति स्वयोनिषु ।
परस्परस्य वर्तन्ते जनयन्ति विगर्हितान् ॥ १६॥

तथा च शूद्रो ब्राह्मण्यां बाह्यं जन्तुं प्रसूयते ।
एवं बाह्यतरं चापि चातुर्वर्ण्यात् प्रसूयते ॥ १७॥

प्रतिलोमं तु वर्तन्ते [2]बाह्यं बाह्यतरं पुनः ।
हीना हीनान् प्रसूयन्ते वर्णाः पञ्चदशैव ते ॥ १८॥

अगम्यागमनाच्चैव वर्धते वर्णसङ्करः ।
व्रात्यानामत्र जायन्ते सिलिन्ध्र्या मागधीषु च ॥ १९॥

प्रसाधनोपचारज्ञम् अदासं दासजीवनम् ।
क्षत्ता ह्यायोगवं सूते क्रूरं मायोपजीवनम् ॥ २०॥

मैत्रेयकं च वैदेहं सम्प्रसूतेऽथ माध्यकम् ॥ २१

निषादो मुद्गरं सूते दाशं नावोपजीविनम् ।
मृतपं चापि चण्डालश् श्वपाकमतिकुत्सितम् ॥ २२

---

1. अ—इदमर्धचतुष्टयं नास्ति
2. क-घ—इतोऽर्धत्रयं नास्ति

चतुरो मागधी सूते क्रूरान मायोपजीविनः ।
मांसं स्वादुकरं सूदं सौगन्धमिति संज्ञितम् ॥ २३

वैदेहकाच्च पापिष्ठं क्रूरं भार्योपजीवनम् ।
निषादमुद्गरं चापि खरयानप्रयायिनम् ॥ २४

चण्डालात् पुल्कसं चापि खराश्वगजभोजनम् ।
मृतचेलपरिच्छन्नं भिन्नभाजनभोजिनम् ॥ २५

आयोगवीषु जायन्ते हीनवर्णास्तु ते त्रयः ।
क्षुद्रो वैदेहकादन्ध्रो बहिर्ग्रामप्रतिश्रयः ॥ २६

कारावनो निषाद्यां तु चर्मकारान् प्रसूयते ।
चण्डालात् पाण्डुसौपाकस् त्वक्सारव्यवहारवान् ॥ २७

[1]आहिण्डको निषादेन वैदेह्यां वै प्रसूयते ।
चण्डालात् पाण्डुसौपाको मलव्यसनवृत्तिमान् ॥ २८

निषादी चापि चण्डालात् पुत्रमन्तावसायिनम् ।
श्मशानगोचरं सूते बाह्यैरपि बहिष्कृतम् ॥ २९

इत्येतास्सङ्करा जात्यः पितृमातृव्यतिक्रमात् ।
प्रच्छन्ना वा प्रकाशा वा वेदितव्यास्स्वकर्मभिः ॥ ३०

चतुर्णामेव वर्णानां धर्मो नान्यत्र विद्यते ।
वर्णानामविरुद्धेषु संज्ञानार्हेषु कस्यचित् ॥ ३१

1. अ—इदमर्धद्वयं नास्ति

यदृच्छयोपसम्पन्नैर् यज्ञसाधुबहिष्कृतैः ।
बाह्या बाह्यैस्तु जायन्ते यथावृत्ति यथाश्रयम् ॥ ३२

चैत्यद्रुमश्मशानेषु शैलेषूपवनेषु च ।
कार्ष्णायसमलङ्कारं परिगृह्य च नित्यशः ॥ ३३
वसेयुरेतैर्विज्ञेया वर्तयन्तस्स्वकर्मभिः ॥ ३३॥

युञ्जते चाप्यलङ्कारांस् तथोपकरणानि च ।
गोब्राह्मणार्थे साहाय्यं कुर्वाणा वै न संशयः ॥ ३४॥

आनृशंस्यमनुक्रोशस् सत्यवाक्यमथ क्षमा ।
स्वशरीरैः परित्राणं बाह्यानां सिद्धिकारकम् ॥ ३५॥

भवति मनुजव्याघ्र सत्यं मे नास्ति संशयः ॥ ३६

यथोपदेशं परिकीर्तितासु
नरः प्रमूयेत विचार्य बुद्धिमान् ।
विहीनयोनिर्हि सुतोऽवसादयेन्
तितीर्षमाणं सलिले यथोपलः ॥ ३७

अविद्वांसं बलाल्लोके विद्वांसमपि वा पुनः ।
नयन्ते ह्युत्पथं नार्यः कामक्रोधवशानुगम् ॥ ३८

स्वभावश्चैष नारीणां नराणामिह दूषणम् ।
रत्यर्थं न प्रवर्तन्ते प्रमदासु विपश्चितः ॥ ३९

युधिष्ठिरः—

वर्णापेतमविज्ञातं नरं कल्मषयोनिजम् ।
आर्यरूपमिवानार्यं कथं विद्यामहे वयम् ॥ ४०

भीष्मः—

योनौ त्वकल्मषे जाता नानाचारसमाहिताः ।
कर्मभिस्सज्जनाकीर्णैर् विज्ञेयाश्शुद्धयोनिकाः ॥ ४१

अनार्यत्वमनाचारः क्रूरत्वं निर्दयात्मता ।
पुरुषं व्यञ्जयन्तीह लोके कल्मषयोनिजम् ॥ ४२

पित्र्यं वा [1]भजते शीलं मातृजं वाऽथ चोभयम् ।
कथञ्च स न सङ्कीर्णः प्रकृतिं स्वां नियच्छति ॥ ४३

[2]यथैव सदृशो रूपे मातापित्रोः प्रजायते ।
व्याघ्रविन्दोस्तथा योनिं पुरुषस्त्वां नियच्छति ॥ ४४

कुलस्रोतसि विच्छिन्ने यस्य स्याद्योनिसङ्करः ।
संश्रयत्येव तच्छीलं नरोऽल्पमपि वा बहु ॥ ४५

आर्यरूपसमाचारं चरन्तं कृतके पथि ।
सदूर्णमन्यवर्णं वा स्वशीलं शास्ति निश्चये ॥ ४६

नानावृत्तेषु भूतेषु नानाकर्मरतेषु च ।

---

1. क-घ-- लभते
2. अ—इदमर्धद्वयं नास्ति

[1]जन्मवृत्तसमं लोके सुश्लिष्टं न विरज्यते ॥ ४७

शरीरमिह [2]सत्त्वेन नरस्य परिकृष्यते ।
ज्येष्ठमध्यावरं सत्त्वं तुल्यसत्त्वं प्रमोदते ॥ ४८

ज्यायांसमपि शीलेन विहीनं नैव पूजयेत् ॥ ४८॥

आत्मानमाख्याति हि कर्मभिर्नरस्
स्वशीलचारित्रकृतैश्शुभाशुभैः ।
प्रनष्टमप्यात्मकुलं तथा नरः
पुनः प्रकाशीकुरुते स्वकर्मभिः ॥ ४९॥

योषित्स्वेतासु सर्वासु सङ्कीर्णास्वितरासु च ।
यत्रात्मानं न जनयेद् बुधस्ताः परिवर्जयेत् ॥ ५०॥

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां
अनुशासनपर्वणि त्रिचत्वारिंशोऽध्यायः ॥ ४३ ॥
॥ ८९ ॥ आनुशासनिकपर्वणि त्रिचत्वारिंशोऽध्यायः ॥ ४३ ॥
[अस्मिन्नध्याये ५०॥ श्लोकाः]

---

1. क-घ—जन्मवृत्तिसमंलोके विशिष्टेन विरज्यते। [पाठान्तरम्]
2. क—सत्येन

॥ चतुश्चत्वारिंशोऽध्यायः ॥

भीष्मेण युधिष्ठिरं प्रत्यौरसादिपुत्रनिरूपणम् ॥

युधिष्ठिरः—

ब्रूहि पुत्रान् कुरुश्रेष्ठ वर्णानां त्वं पृथक् पृथक् ।
कीदृश्यां कीदृशाश्चापि पुत्राः कस्य च के च ते ॥ १

विप्रवादास्सुबहुशश् श्रूयन्ते पुत्रकारिणाम् ।
अत्र नो मुह्यतां राजन् संशयं छेत्तुमर्हसि ॥ २

भीष्मः—

आत्मा पुत्रस्तु विज्ञेयः प्रथमो बहुधा परे ॥ २॥

स्वे क्षेत्रे संस्कृते यस्तु पुत्रमुत्पादयेत् स्वयम् ।
तमौरसं विजानीयात् पुत्रं प्रथमकल्पितम् ॥ ३॥

अग्निं प्रजापतिं चेष्ट्वा वराय प्रतिपादिता ।
पुत्रिका स्यादुहितरि सङ्कल्पेनापि वा सुतः ॥ ४॥

तल्पे जातः प्रमीतस्य क्लीबस्य पतितस्य वा ।
स्वधर्मेण नियुक्तो यस् स पुत्रः क्षेत्रजस्स्मृतः ॥ ५॥

माता पिता च दद्यातां यमद्भिः पुत्रमापदि ।
सदृशं प्रीतिसंयुक्तो विज्ञेयो [1]दत्रिमस्सुतः ॥ ६॥

1. अ-ख—दत्तक

सदृशं तु प्रकुर्याद्यं गुणदोषविचक्षणम् ।
पुत्रं पुत्रगुणैर्युक्तं विज्ञेयस्तु स कृत्रिमः ॥ ७॥

उत्पद्यते यस्तु गूढं न च ज्ञायेत कस्यचित् ।
स भवेद्गूढजो नाम तस्य स्याद्यस्य तत्पजः ॥ ८॥

मातापितृभ्यामुत्सृष्टस् तयोरन्यतरेण वा ।
यं पुत्रं प्रतिगृह्णीयाद् अपविद्धस्स उच्यते ॥ ९॥

पितृवेश्मनि कन्या तु यं पुत्रं जनयेद्रहः ।
कानीनं तं वदेन्नाम्नां वोढुः कन्यासमुद्भवः ॥ १०॥

या गर्भिणी संस्क्रियते ज्ञाताऽज्ञातापि वा सती ।
वोढुस्स गर्भो भवति सहोढ इति चोच्यते ॥ ११॥

[1]या पत्या वा परित्यक्ता अथ वा स्वेच्छयाऽपि वा ।
उत्पादयेदक्षतायां स पौनर्भव उच्यते ॥ १२॥

[2]मातापितृविहीनो वा त्यक्तो वा स्यादकारणात् ।
आत्मानं स्पर्शयेद्यस्तु स्वयंदत्तस्स उच्यते ॥ १३॥

क्रीणीयाद्यस्त्वपत्यार्थं मातापित्रोर्यमन्तिकात् ।
स सुतस्तस्य सदृशः क्रीतो नाम बुधैस्स्मृतः ॥ १४॥

द्वादशैते परे प्राहुर् एवं धर्मस्य पारगाः ।

1. क-घ—इदमर्धं नास्ति
2. क-घ—स्वपिता वा परित्यक्तस्त्यक्तो

आत्मा पुत्रस्तु विज्ञेयस् तस्यानन्तरजश्च यः ॥' १५॥
नियुक्तजश्च विज्ञेयस् सुतः [1]प्रसृतजस्तथा ॥ १६
पतितस्य च भार्यायां भर्त्रा सुसमचेतसा ।
तथा दत्तः कृतः पुत्रो वध्वोढश्च तथाऽपरः ॥ १७
षडपध्वंसजाश्चापि [2]कानीनापशदास्तथा ।
इत्येते ते समाख्यातास् तान् विजानीहि भारत ॥ १८

युधिष्ठिरः—

षडपध्वंसजाः के स्युः के वाऽप्यपशदास्तथा ।
एतत् सर्वं यथातत्त्वं व्याख्यातुं मे त्वमर्हसि ॥ १९

भीष्मः—

त्रिषु वर्णेषु ते पुत्रा ब्राह्मणस्य युधिष्ठिर ।
वर्णयोश्च द्वयोस्यातां यौ राजन्यस्य भारत ॥ २०
एको द्विवर्ण एवाथ तथाऽत्रैवोपलक्षितः ।
षडपध्वंसजास्ते तु तथैवापशदाञ् शृणु ॥ २१
चाण्डालौ व्रात्यवर्णौ तु ब्राह्मण्यां क्षत्रियासु च ।
वैश्यायां चैव शूद्रस्य लक्ष्यास्तेऽपशदास्त्रयः ॥ २२
मागधो नामकश्चैव द्वौ वैश्यस्योपलक्षितौ ।
ब्राह्मण्यां क्षत्रियायां च क्षत्रियस्यैक एव तु ॥ २३

1. क-घ—प्रथित 2. क-घ—पडेवापशदास्तथा

ब्राह्मण्यां लक्ष्यते सूत इत्येतेऽपशदास्स्मृताः ।
पुत्ररेतो न शक्यं हि मिथ्या कर्तुं नराधिप ॥ २४

युधिष्ठिरः—

क्षेत्रजं केचिदेवाहुस् सुतं केचित्तु शुक्रजम् ।
तुल्यावेतौ सुतौ कस्य तन्मे ब्रूहि पितामह ॥ २५

भीष्मः—

रेतोजो वा भवेत् पुत्रः पुत्रो वा क्षेत्रजो भवेत् ।
अध्यूढमेव समयं हित्वेत्येतन्निबोध मे ॥ २६

युधिष्ठिरः—

रेतोजं विद्म वै पुत्रं क्षेत्रजस्यागमः कथम् ।
अध्यूढं विद्म वै पुत्रं भित्त्वा तु समयं कथम् ॥ २७

भीष्मः—

आत्मजं पुत्रमुत्पाद्य यस्त्यजेत् कारणान्तरात् ।
न तत्र कारणं रेतस् स क्षेत्रस्वामिनो भवेत् ॥ २८

पुत्रकामो हि पुत्रार्थी यां वृणीते विशां पते ।
तत्र क्षेत्रं प्रमाणं स्यान्नैव तत्रात्मजस्सुतः ॥ २९

अन्यस्स क्षेत्रजः पुत्रो लक्ष्यते भरतर्षभ ।
न ह्यात्मा शक्यते हन्तुं दृष्टान्ताय गतो ह्यसौ ॥ ३०

1. अ—नास्तीदमर्धम्
क-घ—अध्यूढमपि पुत्रं च हित्वा च समयं गतम् । [पाठान्तरम्]

क्वचिच्च कृतकः पुत्रस् सङ्ग्रहादेव लक्ष्यते ।
न तत्र रेतः क्षेत्रं वा प्रमाणं स्याद्युधिष्ठिर ॥ ३१

युधिष्ठिरः—

[1]कीदृशः कृतकः पुत्रः सङ्ग्रहादेव लक्ष्यते ।
शुक्लं क्षेत्रं प्रमाणं वा यत्र लक्ष्येत भारत ॥ ३२

भीष्मः—

मातापितृभ्यां संन्यस्तं पथि जन्तुं प्रलक्षयेत् ।
न चास्य मातापितरौ ज्ञायेतां स हि कृत्रिमः ॥ ३३

अस्वामिकस्य स्वामित्वं यस्मिन् सम्प्रति लक्षयेत् ।
सवर्णस्तं च पोषेत सवर्णस्तस्य जायते ॥ ३४

युधिष्ठिरः—

कथमस्य प्रयोक्तव्यस् संस्कारः कस्य वा कथम् ।
देया कन्या कथं चेति तन्मे ब्रूहि पितामह ॥ ३५

भीष्मः—

आत्मवत्तस्य कुर्वीत संस्कारं स्वामिवत्तथा ।
त्यक्तो मातापितृभ्यां यस् सवर्णं प्रतिपद्यते ॥ ३६

ततोऽस्य वर्णतस्तस्य कुर्यात् संस्कारमच्युत ॥ ३६॥

अथ कन्या तु देया स्यात् तद्वर्णेन युधिष्ठिर ।
संस्कृत्य मातृगोत्रेण मातृवर्णविनिर्णये ॥ ३७॥

---

1. ख - अर्धषट्कं नास्ति

कानीनोऽध्यूढजो वाऽपि विज्ञेयौ पुत्रकिल्बिषौ ।
तावपि स्वाविव सुतौ संस्कार्याविति निश्चयः ॥ ३८॥

क्षेत्रजो वाऽप्यपशदो येऽध्यूढास्तेषु चाप्यथ ।
आत्मवद्वै प्रयुञ्जीरन् संस्कारं ब्राह्मणादयः ॥ ३९॥

[1]धर्मशास्त्रेषु वर्णानां निश्चयोऽयं प्रशस्यते ।
एतत्ते सर्वमाख्यातं किं भूयः कथ्यतामिति ॥ ४०॥

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां
अनुशासनपर्वणि चतुश्चत्वारिंशोऽध्यायः ॥ ४४ ॥
॥ ८९ ॥ आनुशासनिकपर्वणि चतुश्चत्वारिंशोऽध्यायः ॥ ४४ ॥
[अस्मिन्नध्याये ४०॥ श्लोकाः]

---

1. ख—स्वजन्म मातृगोत्रेण संस्कारं ब्राह्मणादयः। [अधिकः पाठः]

॥ पञ्चचत्वारिंशोऽध्यायः ॥

भीष्मेण युधिष्ठिरं प्रति महद्दर्शनसहवासयोर्गवां च प्रभाववोधनाय च्यवनोपाख्यानकथनारम्भः ॥ १ ॥ गङ्गायमुनासङ्गमेऽन्तर्जले निमज्य तपस्यतश्च्यवनस्य दाशैर्जालेन जलचरैस्सह कूलप्रापणम् ॥ २ ॥ दाशैः प्रार्थितेन तेन तान् प्रति मत्स्यैस्सह स्वस्य प्राणजालान्यतरस्मान्मोचनचोदना ॥ ३ ॥ दाशैश्च्यवनवृत्तान्तं निवेदितेन नहुषेण तं प्रति तदभीष्टकरणप्रतिज्ञानम् ॥ ४ ॥ च्यवनेन नहुषं प्रति दाशेभ्यस्स्वोचितमूल्यदानेनात्ममोचनचोदना ॥ ५ ॥ नहुषेण सम्पूर्णराज्यस्य मूल्यतापरिकल्पनेपि मुनिना तदनङ्गीकरणे गधि जातेन मुनिना गोः प्रतिनिधीकरणम् ॥ ६ ॥ च्यवनेन गोप्रतिग्रहणेन स्वसहवासिभिर्मत्स्यैस्सह दाशानां स्वर्गप्रापणम् ॥ ७ ॥

युधिष्ठिरः—

दर्शने कीदृशस्स्नेहस् संवासे च पितामह ।
[1]महाभाग्यं गवां चैव तन्मे ब्रूहि यथातथम् ॥ १

भीष्मः—

हन्त ते कथयिष्यामि पुरावृत्तं महाद्युते ।
नहुषस्य च संवादं महर्षेश्च्यवनस्य च ॥ २

पुरा महर्षिश्च्यवनो भार्गवो नाम भारत ।
उदवासकृतारम्भो बभूव स महाव्रतः ॥ ३

निहत्य मानं कामं च प्रहर्षं क्रोधमेव च ।

---

1. क-घ—माहात्म्यं वै गवां चैव तन्मे ब्रूहि पितामह । [पाठान्तरम्]

वर्षाणि द्वादश मुनिर् जलवासे धृतव्रतः ॥ ४

आदधत् सर्वभूतेषु विस्रम्भं परमं शुभम् ।
जलेचरेषु सत्त्वेषु शीत[1]हाऽग्निरिव प्रभुः ॥ ५

स्थाणुभूतश्शुचिर्भूत्वा दैवतेभ्यः प्रणम्य च ।
गङ्गायमुनयोर्मध्ये जलं सम्प्रविवेश ह ॥ ६

गङ्गायमुनयोर्वेगं सुभीमं सुमहास्वनम् ।
प्रतिजग्राह [2]सहसा वातवेगसमं जवे ॥ ७

गङ्गा च यमुना चैव सरितश्च तथाऽनुगाः ।
प्रदक्षिणमृषिं चक्रुर् न चैनं प्रत्यपीडयन् ॥ ८

अन्तर्जले स सुष्वाप काष्ठभूतो महामुनिः ।
पुनश्चोर्ध्वस्थितो धीमान अभवद्भरतर्षभ ॥ ९

जलौकसां च सत्त्वानां [3]बभूव प्रियदर्शनः ।
उपजिघ्रन्ति च तदा मत्स्यास्तं हृष्टमानसाः ॥ १०

तत्रापि वसतः कालस् समतीतोऽभवन्महान् ॥ १०॥

ततः कदाचित् समये कस्मिंश्चिन्मत्स्यजीविनः ।
तं देशं समुपाजग्मुर् जालहस्ता महाद्युते ॥ ११॥

---

1. क-घ—रश्मि
2. क-घ—शिरसा
3 ख—बभूवाद्भुतदर्शनः

निषादा [1]बहवस्तत्र मत्स्योद्धरणनिश्चिताः ।
व्यायता बलिनश्शूरास् सलिलेष्वनिवर्तिनः ॥ १२॥

अभ्याययुश्च तं देशं निश्चिता जालकर्मणि ॥ १३

जालं च योजयामासुर् नवसूत्रकृतं दृढम् ।
मत्स्योद्धरणमाकार्पुस् तदा भरतसत्तम ॥ १४

ततस्ते बहुभिर्योगैः कैवर्ता मत्स्यकाङ्क्षिणः ।
गङ्गायमुनयोर्वारि जालेनावकिरन्ति ते ॥ १५

जालं तु विततं तेषां नवसूत्रकृतं तथा ।
विस्तारायामसम्पन्नं यत्तत्र सलिले क्षमम् ॥ १६

ततस्ते सुमहच्चैव बलवच्च सुवर्तितम् ।
प्रकीर्य सर्वतस्सर्वे जालं चक्रुधिरे तदा ॥ १७

अभीतरूपास्संहृष्टास् तेऽन्योन्यवशवर्तिनः ।
बबन्धुस्तत्र मत्स्यांश्च तथाऽन्याञ्जलचारिणः ॥ १८

ततो मत्स्यैः परिवृतं च्यवनं भृगुनन्दनम् ।
आकर्षन्त महाराज जालेनाथ यदृच्छया ॥ १९

नदीशैवलदिग्धाङ्गं हरिश्मश्रुजटाधरम् ।
लग्नं शङ्खगणैर्गात्रैः कोलैश्चित्रैरिवावृतम् ॥ २०

तं जालेनोद्धृतं दृष्ट्वा ते तदा वेदपारगम् ।

---

1. क-घ—श्चाभवंस्तत्र

सर्वे प्राञ्जलयो दाशाश् शिरोभिः प्रापतन् भुवि ॥ २१

बन्धक्लेदपरित्रासाज् जालस्याकर्षणेन च ।
स मुनिस्तत्तदा दृष्ट्वा मत्स्यानां कदनं कृतम् ॥ २२
बभूव कृपयाऽऽविष्टो निश्श्वसंश्च पुनः पुनः ॥ २२॥

दाशाः—

अज्ञानाद्यत् कृतं पापं प्रसादं तत्र नः कुरु ।
करवाम [1]वयं किं ते तन्नो ब्रूहि महामुने ॥ २३॥

भीष्मः—

इत्युक्तो मत्स्यमध्यस्थश् च्यवनो वाक्यमब्रवीत् ॥ २४

ऋषिः—

यो मेऽद्य परमः कामस् तं शृणुध्वं समाहिताः ॥ २४॥

प्राणोत्सर्गं विक्रयं वा मत्स्यैर्यास्याम्यहं सदा ।
संवासान्नोत्सहे त्यक्तुं सलिलाध्युषितानिमान् ॥ २५॥

भीष्मः—

इत्युक्तास्ते निषादास्तु सुभृशं भयकम्पिताः ।
सर्वे विषण्णवदना नहुषाय न्यवेदयन् ॥* २६॥

भीष्मः—

नहुषस्तु ततश्श्रुत्वा च्यवनं तं तथा गतम् ।

---

1. क-ख—क्रियां कां ते

* सर्वेषु कोशेषु अत्रैवाध्यायसमाप्तिर्दृश्यते

त्वरितः प्रययौ तत्र सहामात्यपुरोहितः ॥ २७॥
सत्यव्रतं महाभागं देवकल्पं विशां पते ॥ २८

नहुषः—

करवाणि प्रियं किं ते तन्मे व्याख्यातुमर्हसि ।
सर्वं कर्तास्मि भगवन् यद्यपि स्यात् सुदुष्करम् ॥ २९

च्यवनः—

श्रमेण महता युक्ताः कैवर्ता मत्स्यजीविनः ।
मम मूल्यं प्रयच्छैभ्यो मत्स्यानां विक्रयैस्सह ॥ ३०

नहुषः—

सहस्रं दीयतां मूल्यं निषादेभ्यः पुरोहित ।
निष्क्रयार्थं भगवतो यथाऽऽह भृगुनन्दनः ॥ ३१

च्यवनः—

सहस्रं नाहमर्हामि किं वा त्वं मन्यसे नृप ।
सदृशं दीयतां मूल्यं स्वबुद्ध्या निश्चयं कुरु ॥ ३२

नहुषः—

सहस्राणां शतं क्षिप्रं निषादेभ्यः प्रदीयताम् ।
स्यादेतत् ते भवन्मूल्यं किं वाऽन्यन्मन्यसे द्विज ॥ ३३

च्यवनः—

नाहं शतसहस्रेण [1]निमेयः पार्थिवर्षभ ।

1. ख—निष्क्रेयः

दीयतां सदृशं मूल्यं सहामात्यैर्विचिन्तय ॥ ३४

नहुषः—

कोटिः परा हिता मूल्यं निषादेभ्यः प्रदीयताम् ।
एभिस्तदपि नौपम्यम् अतो भूयः प्रदीयताम् ॥ ३५

च्यवनः—

राजन्नार्हाम्यहं कोटिं भूयोऽपि च महाद्युते ।
सदृशं दीयतां मूल्यं ऋषिभिस्सह चिन्तय ॥ ३६

नहुषः—

[1]अर्धं राज्यं समग्रं वा निषादेभ्यः प्रदीयताम् ।
एतत्तुल्यमहं मन्ये किं वाऽन्यन्मन्यसे द्विज ॥ ३७

च्यवनः—

अर्धराज्यं समग्रं वा नाहमर्हामि पार्थिव ।
सदृशं दीयतां मूल्यम् ऋषिभिस्सह चिन्तय ॥ ३८

भीष्मः—

[2]महर्षेर्वचनं श्रुत्वा नहुषो दुःखकर्शितः ।
चिन्तयामास स तदा सहामात्यपुरोहितः ॥ ३९

तत्र त्वन्यो वनचरः कश्चिन्मूलफलाशनः ।
नहुषस्य समीपस्थो गविजातोऽभवन्मुनिः ॥ ४०

---

1. क-घ—अर्धचतुष्टयं नास्ति
2. क-घ—महर्षेश्च्यवनात्

स समाभाष्य राजानम् अब्रवीद् द्विजसत्तमः ॥ ४०॥

गविजातः—

तोषयिष्याम्यहं विप्रं यथा तुष्टो भविष्यति ॥ ४१

नाहं मिथ्यावचो ब्रूयां स्वैरेष्वपि कुतोऽन्यथा ।
भवतो यदहं ब्रूयां तत् कार्यमविशङ्कया ॥ ४२

नहुषः—

ब्रवीतु भगवान् मूल्यं महर्षेस्सदृशं प्रभो ।
परित्रायस्व मामस्माद्विपयं च कुलं च मे ॥ ४३

हन्याद्धि भगवान् क्रुद्धस् त्रैलोक्यमपि केवलम् ।
किं पुनर्मानवं हीनं बाहुवीर्यपरायणम् ॥ ४४

अगाधेऽम्भसि मग्नस्य सामात्यस्य सहर्त्विजः ॥
प्लवो भव महर्षे त्वं कुरु मूल्यस्य निश्चयम् । ४५

भीष्मः—

नहुषस्य वचश्श्रुत्वा गविजातः प्रतापवान् ।
उवाचं हर्षयन् सर्वान् सामात्यान् पार्थिवं च तम् ॥ ४६

गविजातः—

ब्राह्मणानां गवां चैव कुलमेकं द्विधा कृतम् ।
एकत्र मन्त्रास्तिष्ठन्ति हविरन्यत्र तिष्ठति ॥ ४७

अनर्घार्हो महाराज द्विजा वर्णमहत्तमाः ।
गावश्च पृथिवीपाल गौर्मूल्यं तु प्रकल्प्यताम् ॥ ४८

भीष्मः—

नहुषस्तु ततश्श्रुत्वा महर्षेर्वचनं नृप ।
हर्षेण महता युक्तस् सहामात्यपुरोहितः ॥ ४९

अभिगम्य भृगोः पुत्रं च्यवनं संशितव्रतम् ।
इदं प्रोवाच नृपतिर् वाचा सन्तर्पयन्निव ॥ ५०

नहुषः—

उत्तिष्ठोत्तिष्ठ विप्रर्षे गवा क्रीतोऽसि भार्गव ।
एतन्मूल्यमहं मन्ये तव धर्मभृतां वर ॥ ५१

च्यवनः—

उत्तिष्ठाम्येष राजेन्द्र सम्यक् क्रीतोऽस्मि तेऽनघ ।
गोभिस्तुल्यं न पश्यामि धनं किञ्चिद् इहाच्युत ॥ ५२

कीर्तनं श्रवणं दानं दर्शनं चापि पार्थिव ।
गवां प्रशस्यते विप्रैस् सर्वपापहरं शिवम् ॥ ५३

गावो लक्ष्म्यास्सदा मूलं गोषु पाप्मा न विद्यते ।
अन्नमेव सदा गावो देवानां परमं हविः ॥ ५४

स्वाहाकारवषट्कारौ गोषु नित्यं प्रतिष्ठितौ ।
गावो यज्ञप्रणेत्र्यो वै तथा यज्ञस्य वै मुखम् ॥ ५५

अमृतं ह्यक्षयं दिव्यं [1]क्षरन्ति च वहन्ति च ।
अमृतस्यायनं चैतास् स्वर्गलोकनमस्कृताः ॥ ५६

---

1. क-ब—रक्षन्ति

तेजसा वपुषा चैव गावो वह्निसमा भुवि ।
गावो हि सुमहत्तेजः प्राणिनां च सुखप्रदाः ॥ ५७

निविष्टं गोकुलं यत्र श्वासं मुञ्चति निर्भयम् ।
विराजयति तं देशं पाप्मानं चापकर्षति ॥ ५८

गावस्स्वर्गस्य सोपानं गावस्स्वर्गेऽपि पूजिताः ।
गावः कामदुघा दिव्या नान्यत् किञ्चित् पुरा स्मृतम् ॥ ५९

भीष्मः—

इत्येतद्दोषु मे प्रोक्तं माहात्म्यं पार्थिवर्षभ ।
[1]गुणैकदेशवचनं शक्यं पारायणं न तु ॥ ६०

[2]निषादाः—

दर्शनं कथनं चैव सहास्माभिः कृतं मुने ।
सतां सान्निपदं मैत्रं प्रसादं नः कुरु प्रभो ॥ ६१

हवींषि सर्वाणि यथा ह्युपभुङ्क्ते हुताशनः ।
एवं त्वमपि धर्मात्मन् पुरुषाग्निः प्रतापवान् ॥ ६२

प्रसादयामहे विप्र भवन्तं प्रणता वयम् ।
अनुग्रहार्थमस्माकम् इयं गौः प्रतिगृह्यताम् ॥ ६३

अत्यन्तापदि मग्नानां परित्राणं हि कुर्वताम् ।
या गतिर्विदिता त्वद्य नरके शरणं भवान् ॥ ६४

---

1. क-घ—इदमर्धं नास्ति
2. क-घ—नहुषः [पाठान्तरम्]

च्यवनः—

कृपणस्य च यच्चक्षुर् मुखमाशीविषस्य च ।
नरं समूलं दहति कक्षमग्निरिव ज्वलन् ॥ ६५

प्रतिगृह्णामि वो धेनुं कैवर्ता मुक्तकिल्बिषाः ।
दिवं गच्छत वै क्षिप्रं मत्स्यैर्जालोद्धृतैस्सह ॥ ६६

भीष्मः—

ततस्तस्य प्रसादात्ते महर्षेर्भावितात्मनः ।
निषादास्तेन वाक्येन सह मत्स्यैर्दिवं ययुः ॥ ६७

ततस्स राजा नहुषो विस्मितः प्रेक्ष्य धीवरान् ।
[1]आरोहणं निषादानां मत्स्यानां चैव भारत ॥ ६८

ततस्तौ गविजश्चैव च्यवनश्च भृगूद्वहः ।
वराभ्यामभिरूपाभ्यां छन्दयामासतुर्नृपम् ॥ ६९

ततो राजा महावीर्यो नहुषः पृथिवीपतिः ।
वरमित्यब्रवीत् प्रीतस् तदा भरतसत्तम ॥ ७०

ततो जग्राह धर्मेषु स्थितिमिन्द्रसमो नृपः ।
नहुषोऽपि वरं लब्ध्वा प्रविवेश पुरं स्वकम् ॥ ७१

एतत्ते कथितं तात यन्मां त्वं परिपृच्छसि ।
दर्शने यादृशस्नेहस् सुबाले च युधिष्ठिर ॥ ७२

1. क-घ—आरोहणं विदित्वस्य मत्स्या[illegible]ां भरतर्षभ । [पाठान्तरम्]

महाभाग्यं गवां चैव तथा धर्मविनिश्चयम् ।
किं भूयः कथ्यतां तात किं ते हृदि विवक्षितम् ॥ ७३

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां
अनुशासनपर्वणि पञ्चचत्वारिंशोऽध्यायः ॥ ४५ ॥
॥ ८९ ॥ आनुशासनिकपर्वणि पञ्चचत्वारिंशोऽध्यायः ॥ ४५ ॥
[अस्मिन्नध्याये ७३ श्लोकाः]

॥ षट्चत्वारिंशोऽध्यायः ॥

भीष्मेण युधिष्ठिरं प्रति रामविश्वामित्रयोरुत्पत्तिप्रकारकथनारम्भः ॥ १ ॥ च्यवनेन कुशिकराजमेत्य सभार्यं तं प्रति स्वशुश्रूषाविधानम् ॥ २ ॥ सभार्येण कुशिकेन एकविंशतिदिवसाननवरतमेकपार्श्वेन प्रसुप्तस्य च्यवनस्य पादसंवाहनेन पर्युपासनम् ॥ ३ ॥ ततश्शयनादुत्थितेन मुनिना किञ्चिद्दूरं गत्वा पुनरन्तर्धानम् ॥ ४ ॥

युधिष्ठिरः—

संशयो मे महाप्राज्ञ सुमहान् सागरोपमः ।
तं मे शृणु महाबाहो श्रुत्वा व्याख्यातुमर्हसि ॥ १

कौतूहलं मे सुमहज् जामदग्न्यं प्रति प्रभो ।
रामं धर्मभृतां श्रेष्ठं तन्मे व्याख्यातुमर्हसि ॥ २

ब्राह्म बले सुपूर्णानाम् एतेषां च्यवनादिनाम् ।

कथमेष समुत्पन्नो रामस्सत्यपराक्रमः ॥ ३

कथं ब्रह्मर्षिवंशे स क्षत्रधर्मा व्यजायत ।
तदस्य सम्भवं राजन् निखिलेनानुकीर्तय ॥ ४

कौशिकश्च कथं वंशात् क्षत्राद्वै ब्राह्मणोऽभवत् ॥ ४॥

अहो प्रभावस्सुमहान् आसीद्वै सुमहात्मनोः ।
रामस्य च नरव्याघ्र विश्वामित्रस्य चैव हि ॥ ५॥

कथं पुत्रानतिक्रम्य तथा नप्तृष्वथाभवत् ।
एष दोषो महाप्राज्ञ तन्मे व्याख्यातुमर्हसि ॥ ६॥

भीष्मः—

अत्राप्युदाहरन्तीमम् इतिहासं पुरातनम् ।
च्यवनस्य च संवादं कुशिकस्य च भारत ॥ ७॥

एतं दोषं तथा दृष्ट्वा भार्गवश्च्यवनस्तदा ।
आगामिनं महाबुद्धिस् स्ववंशे मुनिपुङ्गवः ॥ ८॥

सञ्चिन्त्य मनसा सर्वं गुणदोषबलाबलम् ।
दग्धुकामः कुलं सर्वं कुशिकानां तपोधनः ॥ ९॥

च्यवनस्तमनुप्राप्य कुशिकं वाक्यमब्रवीत् ॥ १०

च्यवनः—

वस्तुमिच्छा समुत्पन्ना त्वया सह ममानघ ॥ १०॥

कुशिकः—

भगवन् सहधर्मोऽयं पण्डितैरिह चर्यते ।

प्रदानकाले कन्याया मुच्यते सर्वदा बुधैः ॥ ११॥

यत्तु तावदतिक्रान्तं धर्मद्वारं तपोधन ।
तत् कार्यं प्रकरिष्यामि तदनुज्ञातुमर्हसि ॥ १२॥

भीष्मः—

अथासनमुपादाय च्यवनस्य महामुनेः ।
कुशिको भार्यया सार्धम् आजगाम महामुनिम् ॥ १३॥

प्रगृह्य राजा भृङ्गारं पाद्यमस्मै न्यवेदयत् ।
कारयामास सर्वाश्च क्रियास्तस्य महात्मनः ॥ १४॥

ततस्स राजा च्यवनं मधुपर्कं यथाविधि ।
प्रत्यग्राहयदव्यग्रो महात्मा नियतव्रतः ॥ १५॥

सत्कृत्य स तथा विप्रम् इदं वचनमब्रवीत् ॥ १६

कुशिकः—

भगवन् परवन्तस्स्मो ब्रूहि किं करवामहे ॥ १६॥

यदि राज्यं यदि धनं यदि गास्संशितव्रत ।
यज्ञदानानि च तथा ब्रूहि मे किं ददामि ते ॥ १७॥

इदं गृहमिदं राज्यम् इदं धर्मासनं च ते ।
राजा त्वमसि शाध्युर्वीं भृत्योऽहं परवांस्त्वया ॥ १८॥

भीष्मः—

एवमुक्ते तदा वाक्ये च्यवनो भार्गवस्तदा ।

कुशिकं प्रत्युवाचेदं मुदा परमया युतः ॥ १९॥

च्यवनः—

न राज्यं कामये राजन् न च धर्मं न योषितः ।
न च गा न च ते देशान् न यज्ञान् ज्ञायतामिदम् ॥ २०॥
नियमं कञ्चिदारप्स्ये युवयोर्यदि रोचते ।
परिचर्योपपन्नाभ्यां युवाभ्यामविशङ्कया ॥ २१॥

भीष्मः—

एवमुक्ते तदा तेन दम्पती तौ जहर्षतुः ।
प्रत्यूचतां च तमृषिम् एवमस्त्विति भारत ॥ २२॥
अथ तं कुशिको हृष्टः प्रावेशयदनुत्तमम् ।
गृहोद्देशं ततस्तत्र दर्शनीयमदर्शनम् ॥ २३॥

कुशिकः—

इयं शय्या भगवतो यथाकाममिहोष्यताम् ।
प्रयतिष्यावहे प्रीतिम् आहर्तुं ते तपोधन ॥ २४॥

भीष्मः—

अथ सूर्योऽतिचक्राम तेषां संवदतां तदा ।
अथर्षिश्चोदयामास पानमन्नं तथैव च ॥ २५॥
तमपृच्छत् ततो राजा कुशिकः प्रणतस्तदा ॥ २६

कुशिकः—

किमन्नजातमिष्टं ते किमुपस्थापयाम्यहम् ॥ २६॥

भीष्मः—

ततस्स परया प्रीत्या प्रत्युवाच जनाधिपम् ।
औपपत्तिकमाहारं प्रयच्छस्वेति भारत ॥ २७॥

तद्वचः पूजयन्नार्यस् तथेत्याह स पार्थिवः ।
यथोपपन्नञ्चाहारं तस्मै प्रादाज्जनाधिपः ॥ २८॥

ततस्स भगवान् भुक्त्वा दम्पती प्राह धर्मवित् ।
स्वप्तुमिच्छाम्यहं निद्रा बाधते मामिह प्रभो ॥ २९॥

ततश्शय्यागृहं प्राप्य भगवान् ऋषिसत्तमः ।
संविवेश नरेन्द्रस्तु सपत्नीकस्स्थितोऽभवत् ॥ ३०॥

न प्रबोध्योऽस्मि संसुप्त इत्युवाचाथ भार्गवः ।
संवाहितव्यौ पादौ मे जागर्तव्यं च वां निशि ॥ ३१॥

अविशङ्कश्च कुशिकस् तथेत्याह स धर्मवित् ।
न प्राबोधयतां तं च तौ तदा रजनीक्षये ॥ ३२॥

यथोद्देशं महर्षेस्तु शुश्रूषापरमौ तदा ।
बभूवतुर्महाराज प्रयतौ चाथ दम्पती ॥ ३३॥

ततस्स भगवान् विप्रस् समादिश्य नराधिपम् ।
सुष्वापैकेन पार्श्वेन दिवसानेकविंशतिम् ॥ ३४॥

स तु राजा निराहारस् सभार्यः कुरुनन्दन ।
पर्युपास्त सुसंहृष्टश् च्यवनाराधने रतः ॥ ३५॥

भार्गवस्तत उत्तस्थौ स्वयमेव तपोधनः ।
न किञ्चिदुक्त्वा च गृहान्निश्चक्राम महामुनिः ॥ ३६॥

तमन्वगच्छतां तौ तु क्षुधितौ श्रमपीडितौ ।
भार्यापती मुनिश्रेष्ठो न च तावभ्यवारयत् ॥ ३७॥

तयोस्तु प्रेक्षतोरेवं भार्गवाणां कुलोद्वहः ।
अन्तर्हितोऽभूद्राजेन्द्र ततो राजाऽपतत् क्षितौ ॥ ३८॥

ततो मुहूर्तादाश्वस्य सह देव्या महामुनेः ।
पुनरन्वेषणे यत्नम् अकरोत् स महीपतिः ॥ ३९॥

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां
अनुशासनपर्वणि षट्चत्वारिंशोऽध्यायः ॥ ४६ ॥
॥ ८९ ॥ आनुशासनिकपर्वणि षट्चत्वारिंशोऽध्यायः ॥ ४६ ॥
[अस्मिन्नध्याये ३९॥ श्लोकाः]

॥ सप्तचत्वारिंशोऽध्यायः ॥

पूर्वमन्तर्हितेन च्यवनेन कुशिकं प्रति पुनरुशयने प्रस्वपत आत्मनः प्रदर्शनम् ॥ १ ॥ पुनरुत्थितेन मुनिना राजानं प्रति आत्मनस्तैलाभ्यञ्जननियोजनेन स्नानशालायां पुनरन्तर्धानम् ॥ २ ॥ पुनराविष्कृतात्मना तेन सभार्यस्य राज्ञो रथधुरि संयोजनपूर्वकं याचकेभ्यस्तदीयवित्तादिवितरणेन वीथ्यां रथेन निर्गमनम् ॥ ३ ॥ स्वीयप्रतोदताडनेऽप्यविकृतमानसे सभार्ये कुशिके प्रसीदता मुनिना वरदानेन तस्य स्वगृहप्रेषणम् ॥ ४ ॥ परेद्युः प्रभाते सभार्येण कुशिकेन च्यवनावलोकनाय वनप्रवेशः ॥ ५ ॥ च्यवनेन कुशिकं प्रति स्वयोगप्रभावसृष्टस्वर्गप्रदर्शनपूर्वकमभिमतवरवरणप्रेरणा ॥६॥

युधिष्ठिरः—

तस्मिन्नन्तर्हिते विप्रे राजा किमकरोत्तदा ।
भार्या च सुमहाभागा तन्मे ब्रूहि पितामह ॥ १

भीष्मः—

अदृष्ट्वा स महीपालस् तमृषिं सह भार्यया ।
परिश्रान्तो निववृते व्रीडितो नष्टचेतनः ॥ २

स प्रविश्य पुरीं दीनो नाभ्यभाषत कञ्चन ।
तदेव चिन्तयामास च्यवनस्य विचेष्टितम् ॥ ३

अथ शून्येन मनसा प्रविवेश गृहं नृपः ।
ददर्श शयने तस्मिन् शयानं भृगुनन्दनम् ॥ ४

विस्मितोऽभूत्तु तं दृष्ट्वा तदाश्चर्यं प्रचिन्तयन् ।
सन्दर्शनात्तस्य मुनेर् विश्रान्तौ सम्बभूवतुः ॥ ५

यथास्थानं ततो गत्वा तत् पादौ संववाहतुः ।
अथापरेण पार्श्वेन सुष्वाप मुनिसत्तमः ॥ ६

तेनैव च स कालेन सम्प्राबुद्ध्यत वीर्यवान् ।
न च तौ चक्रतुः किञ्चिद् विवरं भयशङ्कितौ ॥ ७

[1]अथाह भगवांस्तौ तु प्रतिबुद्धो विशां पते ।
तैलाभ्यङ्गं प्रयच्छेतां स्नातुमिच्छामि पार्थिव ॥ ८

तथेति तौ प्रतिश्रुत्य क्षुधितौ श्रमकर्शितौ ।
शतपाकेन तैलेन महार्हेणोपतस्थतुः ॥ ९

ततस्सुखासीनमृषिं वाग्यतौ सम्बभूवतुः ।
न च पर्याप्तमित्याह भार्गवस्सुमहातपाः ॥ १०

यदा तौ निर्विकारौ तु लक्षमायास भार्गवः ।
तत उत्थाय सहसा स्नानशालामुपागमत् ॥ ११

कृत्स्नमेव तु तत्रासीत् स्नानीयं पार्थिवोचितम् ॥ ११॥

असत्कृत्य च तत् सर्वं तत्रैवान्तरधीयत ।
स मुनिः पुनरेवाथ नृपतेः पश्यतस्तदा ॥ १२॥
नासूयां चक्रतुस्तौ तु दम्पती भरतर्षभ ॥ १३

1. क-घ—यथा हि भगवान् स्तोतुं

अथ स्नातस्स भगवान् सिंहासनगतः प्रभुः ।
दर्शयामास कुशिकं सभार्यं भृगुनन्दनः ॥ १४

संहृष्टवदनो राजा सभार्यः कुशिको मुनिम् ।
सिद्धमन्नमिति प्रह्वो निर्विकारो न्यवेदयत् ॥ १५

आनीयतामिति मुनिस् तं चोवाच जनाधिपम् ।
राजा च समुपाजह्रे तदन्नं भार्यया सह ॥ १६

मांसप्रकारान् विविधान्ञ् शाकानि विविधानि च ।
लेह्यपिष्टविकारांश्च पानान्यतिलघूनि च ॥ १७

[1]रसालापूपकांश्चित्रान् मोदकानथ षड्रसान् ।
[2]रसान् नानाप्रकारांश्च वन्यं च मुनिभोजनम् ॥ १८

फलानि च विचित्राणि तदा भोज्यानि भूरिशः ।
बदरेङ्गुदकाश्मर्यभल्लातक[3]फलानि च ॥ १९

गृहस्थानां च सम्भोज्यं यच्चापि वनवासिनाम् ।
सर्वमाहारयामास राजा शापभयान्मुनेः ॥ २०

अथ सर्वमुपन्यस्तम् अग्रतश्च्यवनस्य तत् ।
ततस्सर्वं समानीय तच्च शय्यासनं मुनिः ॥ २१

---

1. अ—अर्धचतुर्थं नास्ति

2. घ—आनीयतां मुनिवचस् तच्चोवाच जनाधिपम् ।
राजा च समुपाजह्रे वन्यश्च मुनिभोजनः ॥ [अधिकः पाठः]

3 ख—वटानि च

वस्त्रैश्शुद्धैरवच्छाद्य भोजनोपस्करैस्सह ।
सर्वमादीपयामास च्यवनो भृगुनन्दनः ॥ २२

न च तौ चक्रतुः कोपं दम्पती सुमहाव्रतौ ।
तयोस्सम्प्रेक्षतोरेव पुनरन्तर्हितोऽभवत् ॥ २३

तत्रैव च स राजर्षिस् तस्थौ तां रजनीं तदा ।
सभार्यो वाग्यतश्श्रीमान् न चैनं कोप आविशत् ॥ २४

नित्यं संस्कृतमन्नं तु विविधं राजवेश्मनि ।
शयनानि च मुख्यानि परि[1]वेषाश्च पुष्कलाः ॥ २५

वस्त्रं च विविधाकारम् अभवत् समुपार्जितम् ।
न शशाक ततो द्रष्टुम् अन्तरं च्यवनस्तदा ॥ २६

पुनरेव च विप्रर्षिर् अवोचत् कुशिकं नृपम् ॥ २६॥

च्यवनः—

सभार्यो मां रथेनाशु वह यत्र ब्रवीम्यहम् ॥ २७

भीष्मः—

तथेति च प्राह नृपो निर्विशङ्कस्तपोधनम् ॥ २७॥

कुशिकः—

क्रीडारथोऽस्तु भगवन्नुत साङ्ग्रामिको रथः ॥ २८

भीष्मः—

इत्युक्तस्तु मुनिस्तेन राज्ञा हृष्टेन तद्वचः ।
च्यवनः प्रत्युवाचेदं हृष्टः परपुरञ्जयम् ॥ २९

---

1. ख-घ—षेका

च्यवनः—

सज्जीकुरु रथं क्षिप्रं यस्ते साङ्ग्रामिको रथः ।
सायुधस्सपताकश्च सशक्तिः कृतयष्टिकः ॥ ३०

किङ्किणीकृतनिर्घोषो युक्तस्तोमरकर्पणैः ।
गदाखड्गनिबद्धश्च परमेषुशतान्वितः ॥ ३१

भीष्मः—

ततस्स तं तथेत्युक्त्वा कल्पयित्वा महारथम् ।
भार्यां वामे धुरि तदा चात्मानं दक्षिणे तथा ॥ ३२

त्रिदंष्ट्रं वज्रसूच्यग्रं प्रतोदं तत्र चादधत् ॥ ३२॥

सर्वमेतत्ततो दत्त्वा नृपो वाक्यमथाब्रवीत् ॥ ३३

कुशिकः—

भगवन् क्व रथो यातु ब्रवीतु भृगुनन्दन ।
यत्र वक्ष्यसि विप्रर्षे तत्र यास्यति ते रथः ॥ ३४

भीष्मः—

एवमुक्तस्स भगवान् प्रत्युवाचाथ तं नृपम् ॥ ३४॥

च्यवनः—

इतः प्रभृति यातव्यं पदकं पदकं शनैः ॥ ३५

श्रमो मम यथा न स्यात् तथा स्वच्छन्दचारिणः ।
सुखं चैवास्मि वोढव्यो जनस्सर्वश्च पश्यतु ॥ ३६

नोत्सार्यः पथि कश्चिच्च वसु दास्यामि तेऽवहम् ।

ब्राह्मणेभ्यश्च ये कामान् अर्थयिष्यन्ति मां पथि ॥ ३७

सर्वान् दास्याम्यशेषेण धनरत्नानि चैव हि ।
क्रियतां निखिलेनैतन्मा विचारय पार्थिव ॥ ३८

भीष्मः—

तस्य तद्वचनं श्रुत्वा राजाऽमात्यांस्तथाऽब्रवीत् ॥ ३८॥

कुशिकः—

यद्यद्ब्रूयान्मुनिस्तत्तत् सर्वं देयमशङ्कितैः ॥ ३९

भीष्मः—

ततो रत्नान्यनेकानि स्त्रियो युग्यमजाविकम् ।
कृताकृतं च कनकं गजेन्द्राश्चाचलोपमाः ॥ ४०

अन्वगच्छन्त तमृषिं राजामात्याश्च सर्वशः ।
हाहाभूतं च तत् सर्वम् आसीन्नगरमार्तिमत् ॥ ४१

तौ तीक्ष्णाग्रेण सहसा प्रतोदेन प्रचोदितौ ।
पृष्ठे विद्धौ कटौ चैव निर्विकारौ तमूहतुः ॥ ४२

वेपमानौ निराहारौ पञ्चाशद्रात्रकर्शितौ ।
कथञ्चिदूहतुर्धैर्याद् दम्पती तं रथोत्तमम् ॥ ४३

बहुशो भृशविद्धौ तौ क्षरमाणौ क्षतोद्भवम् ।
ददृशाते महाराज पुष्पिताविव किंशुकौ ॥ ४४

तौ दृष्ट्वा पौरवर्गस्तु भृशं कोपपरायणः ।
अभिशापभयत्रस्तो न तं किञ्चिदुवाच ह ॥ ४५

द्वन्द्वशश्चाब्रुवन् सर्वे पश्यध्वं तपसो बलम् ।
क्रुद्धा अपि मुनिश्रेष्ठं वीक्षितुं नैव शक्नुमः ॥ ४६

अहो भगवतो वीर्यं महर्षेर्भावितात्मनः ।
राज्ञश्चास्य सभार्यस्य धैर्यं पश्यत यादृशम् ॥ ४७

श्रान्तावपि तु कृच्छ्रेण [1]रथमेकं समूहतुः ।
न चैतयोर्विकारं वै ददर्श भृगुनन्दनः ॥ ४८

ततस्तु निर्विकारौ तौ मुनिर्दृष्ट्वा भृगूद्वहः ।
वसु विश्राणयामास यथा वैश्रवणस्तथा ॥ ४९

तत्रापि राजा प्रीतात्मा यथाज्ञप्तमथाकरोत् ।
ततोऽस्य भगवान् प्रीतो ह्यभवन्मुनिसत्तमः ॥ ५०

अवतीर्य रथश्रेष्ठाद् दम्पती तौ मुमोच ह ।
विमोच्य चैतौ विधिवत् ततो वाक्यमुवाच ह ॥ ५१

स्निग्धगम्भीरया वाचा भार्गवस्सुप्रसन्नया ।
ददामि वां वरं श्रेष्ठं तं ब्रूतामिति भारत ॥ ५२

सुकुमारौ च तौ दृष्ट्वा कराभ्यां स मुनिस्तदा ।
पस्पर्शामृतकल्पाभ्यां स स्नेहाद्भरतर्षभ ॥ ५३

अथाब्रवीन्नृपो वाक्यं श्रमो नास्त्यावयोरिह ।
विश्रान्तौ स्वप्रभावात्ते ध्यानेनैवेह भार्गव ॥ ५४

---

1. क-घ—नरमेनं

अथ तौ भगवान् प्राह प्रहृष्टश्च्यवनस्तदा ॥ ५४॥

च्यवनः—

न वृथा व्याहृतं पूर्वं यन्मया तद्भविष्यति ॥ ५५

रमणीयोऽयमुद्देशो गङ्गातीरमिदं शुभम् ।
किञ्चित्कालं व्रतपरो निवत्स्यामीह पार्थिव ॥ ५६

गम्यतां स्वपुरं तत्र विश्रान्तः पुनरेष्यसि ।
इहस्थं मां सभार्यस्त्वं द्रष्टासि श्वो नराधिप ॥ ५७

न च मन्युस्त्वया कार्यश् श्रेयस्त्वां समुपस्थितम् ।
यत् काङ्क्षितं हृदिस्थं ते तत् सर्वं हि भविष्यति ॥ ५८

भीष्मः—

इत्येवमुक्तः कुशिकः प्रहृष्टेनान्तरात्मना ।
प्रोवाच मुनिशार्दूलम् इदं वचनमर्थवत् ॥ ५९

कुशिकः—

न मे मन्युर्महाभाग पूतोऽस्मि भगवंस्त्वया ।
संवृतौ यौवनस्थौ स्वो वपुष्मन्तौ बलान्वितौ ॥ ६०

प्रतोदेन व्रणा ये मे सभार्यस्य कृतास्त्वया ।
तान् न पश्यामि गात्रेषु स्वस्थोऽस्मि सह भार्यया ॥ ६१

इमां च देवीं पश्यामि मुने दिव्याप्सरोपमाम् ।
श्रिया परमया युक्तां यथा दृष्ट्वा महत्तपः ॥ ६२

तव प्रसादात् संवृत्तम् इदं सर्वं महामुने ।

नैतच्चित्रं तु भगवंस् त्वयि सत्यपराक्रमे ॥ ६३

भीष्मः—

इत्युक्तः प्रत्युवाचेदं कुशिकं च्यवनस्तदा ।
आगच्छेथास्सभार्यश्च त्वमिहेति नराधिप ॥ ६४

इत्युक्तस्समनुज्ञातो राजा तमभिवाद्य च ।
प्रययौ वपुषा युक्तो नगरं देवराजवत् ॥ ६५

तत एनमुपाजग्मुर् अमात्यास्सपुरोहिताः ।
बलस्थाः क्षत्रिया युक्तास् सर्वाः प्रकृतयस्तथा ॥ ६६

तैर्वृतः कुशिको राजा श्रिया परमया ज्वलन् ।
प्रविवेश पुरं हृष्टः [1]पूज्यमानोऽथ वन्दिभिः ॥ ६७

ततः प्रविश्य नगरं कृत्वा सर्वाह्निकीः क्रियाः ।
[2]भुक्त्वा सभार्यो रजनीम् उवास स महीपतिः ॥ ६८

ततस्तु तौ नवमभिवीक्ष्य यौवनं
परस्परं विगतजराविवामरौ ।
ननन्दतु[3]स्सदनगतौ वपुर्धरौ
श्रिया युतौ द्विजवरदत्तया तया ॥ ६९

स चाप्यृषिर्भृगुकुलकीर्तिवर्धनस्
तपोधनो वनमभिराममृद्धिमत् ।

---

1. क-घ—स्तूयमा
2. क-घ—हत्वा
. घ—श्शयन

मनीषया बहुविधरत्नभूषितं
ससर्ज यन्नास्ति शतक्रतोरपि* ॥ ७०

ततो राजा रजन्यन्ते प्रतिबुद्धो महामनाः ।
कृतसर्वाह्निकः प्रायात् सभार्यस्तद्वनं प्रति ॥ ७१

ततो ददर्श नृपतिः प्रासादं सर्वकाञ्चनम् ।
मणिस्तम्भसहस्राढ्यं गन्धर्वनगरोपमम् ॥ ७२

तत्र दिव्यानभिप्रायान् ददर्श कुशिकस्तदा ॥ ७२॥

पर्वतान् रम्यसानूंश्च नलिनीश्च सपङ्कजाः ।
चित्रशालाश्च विविधाश् [1]शरणानि च भारत ॥ ७३॥

शाद्वलोपहितां भूमिं तथा काञ्चनकुट्टिमाम् ।
सहकारान् प्रफुल्लांश्च केतकोद्दालकान् धवान् ॥ ७४॥

अशोकान् मुचुकुन्दांश्च फुल्लांश्चैवातिमुक्तकान् ।
चम्पकांस्तिलकान् सर्जान् [2]असनानर्जुनानपि ॥ ७५॥

पुष्पितान् कर्णिकारांश्च तत्रतत्र ददर्श ह ॥ ७६

श्यामं वारणपुष्पं च तथाऽऽप्टापदिकां लताम् ।
तत्र तत्र परिक्षिप्तां ददर्श स महीपतिः ॥ ७७

वृक्षान् पद्मोत्पलधरान् सर्वर्तुकुसुमांस्तथा ।

---

* सर्वेषु कोशेषु अत्रैवाध्यायसमाप्तिर्दृश्यते
1. ख-घ—स्तोर 2. घ—पनसानर्जुनानपि

विमानच्छन्दकांश्चापि प्रासादान् पद्मसन्निभान् ॥ ७८

शीतलानि च तोयानि क्वचिदुष्णानि भारत ।
आसनानि विचित्राणि शयनप्रस्तराणि च ॥ ७९

पर्यङ्कान् सर्वसौवर्णान् परार्ध्यास्तरणास्तृतान् ।
भक्ष्यं भोज्य[1]मनेकं च तत्र तत्रोपकल्पितम् ॥ ८०

[2]वाणीवाहाञ् छुकांश्चापि शारिका [3]भृङ्गराजकान् ।
कोकिलाञ्छतपत्रांश्च कोयष्टि[4]मणिकुक्कुटान् ॥ ८१

मयूरान् कुररांश्चापि पुत्रकाञ्जीवजीवकान् ।
चकोरान् वानरान् हंसीश् चक्रवाकसमाह्वयान् ॥ ८२

समन्ततः प्रणदतो ददर्श सुमनोहरान् ॥ ८२॥

क्वचिदप्सरसां सङ्घान् गन्धर्वाणां च पार्थिव ।
कान्ताभिरपरांस्तत्र परिष्वक्तान् ददर्श ह ॥ ८३॥

न ददर्श तदा भूयो ददर्श च [5]पुरं नृपः ॥ ८४

गीतध्वनिं सुमधुरं तथैवाध्ययनध्वनिम् ।
हंसान् सुमधुरांश्चापि तत्र शुश्राव पार्थिवः ॥ ८५

तद् दृष्ट्वाऽत्यद्भुतं राजा मनसाऽचिन्तयत्तदा ॥ ८५॥

---

1. क-घ—मनन्तं च
2. ख-घ—पाणिवाहाञ् शुकांश्चापि
3. क-घ—न् गृहकाजकान्
4. ख—बलि
5. क-घ—पुनर्नृपः

कुशिकः—

स्वप्नोऽयं चित्तविभ्रंश उताहो सत्यमेव तु ।
अहो सह शरीरेण प्राप्तोऽस्मि परमां गतिम् ॥ ८६॥

उत्तरान् वा कुरून् पुण्यान् अथवाऽप्यमरावतीम् ।
किंन्विदं महदाश्चर्यं सत्यं पश्यामि चिन्तयन् ॥ ८७॥

भीष्मः—

एवं सञ्चिन्तयन्नेव ददर्श मुनिपुङ्गवम् ॥ ८८

तस्मिन् विमाने सौवर्णे मणिस्तम्भसमाकुले ।
महार्हशयने दिव्ये शयानं भृगुनन्दनम् ॥ ८९

तमभ्ययात् प्रहर्षेण नरेन्द्रस्सह भार्यया ।
अन्तर्हितस्ततो भूयो मुनिश्च शयनं च तत् ॥ ९०

ततोऽन्यस्मिन् वेनादृशे पुनरेव ददर्श तम् ।
कौश्यां बृस्यां समासीनं जपमानं महाव्रतम् ॥ ९१

एवं योगबलाद्विप्रो मोहयामास पार्थिवम् ॥ ९१॥

क्षणेन तद्वनं चैव ते चैवाप्सरसां गणाः ।
गन्धर्वाः पादपाश्चैव सर्वमन्तरधीयत ॥ ९२॥

निश्शब्दमभवच्चापि गङ्गाकूलं पुनर्नृप ।
कुशवल्मीकभूयिष्ठं बभूव च यथापुरम् ॥ ९३॥

ततस्स राजा कुशिकस् सभार्यस्तेन कर्मणा ।

विस्मयं परमं प्राप्तस् तद्दृष्ट्वा महदद्भुतम् ॥ ९४॥

ततः प्रोवाच कुशिको भार्यां हाससमन्वितः ॥ ९५

कुशिकः—

पश्य भद्रे यथा भावा दृष्टाश्चित्रास्सुदुर्लभाः ।
प्रसादाद्भृगुमुख्यस्य किमन्यत्र तपोबलात् ॥ ९६

तपसा तदवाप्यं हि यन्न शक्यं मनोरथैः ।
त्रैलोक्यराज्यादपि हि तप एव विशिष्यते ॥ ९७

तपसा हि सुतप्तेन क्रीडत्येष तपोधनः ।
अहो प्रभावो ब्रह्मर्षेश् च्यवनस्य महात्मनः ॥ ९८

इच्छन्नेष तपोवीर्याद् अन्याँल्लोकान् सृजेदपि ।
ब्राह्मणा एव जायेरन् पुण्यवाग्बुद्धिकर्मिणः ॥ ९९

उत्सहेदिह कृत्वेदं कोऽन्यो वै च्यवनादृते ।
ब्राह्मण्यं दुर्लभं लोके तल्लब्ध्वा दुर्लभं तपः ॥ १००

सिद्धिस्तत्रापि दुष्प्रापा सिद्धेरपि परा गतिः ।
ब्राह्मण्यं दुर्लभं लोके राज्यं हि सुलभं नरैः ॥ १०१

ब्राह्मण्यस्य प्रभावाद्धि रथे युक्तौ स्वधुर्यवत् ॥ १०१॥

भीष्मः—

इत्येवं चिन्तयानस्सन् विदितश्च्यवनस्य वै ।
[1]सम्प्रेक्ष्योवाच नृपतिं क्षिप्रमागम्यतामिति ॥ १०२॥

1. अ—इमानि नवार्धानि न सन्ति

इत्युक्तस्सहभार्यस्तम् अभ्यगच्छन्महामुनिम् ।
शिरसा वन्दनीयं तम् अवन्दत च पार्थिवः ॥ १०३॥

तस्याशिषः प्रयुज्याथ स मुनिस्तं नराधिपम् ।
निषीदेत्यब्रवीद्धीमान् सान्त्वयन् पुरुषर्षभम् ॥ १०४॥

ततः प्रीतिसमापन्नो भार्गवो नृपते नृपम् ।
उवाच श्लक्ष्णया वाचा तर्पयन्निव भारत ॥ १०५॥

च्यवनः—

[1]राजन् सम्यङ् निर्जितानि पञ्च पञ्चसु यत् त्वया ।
मनष्षष्ठानीन्द्रियाणि कृच्छ्रान्मुक्तोऽसि तेन वै ॥ १०६॥

सम्यगाराधितः पुत्र त्वयाऽहं वदतां वर ।
न हि ते वृजिनं किञ्चित् सुसूक्ष्ममपि दृश्यते ॥ १०७॥

अनुजानीहि मां राजन् गमिष्यामि यथागतम् ।
प्रीतोऽस्मि तव राजेन्द्र वरश्च प्रतिगृह्यताम् ॥ १०८॥

कुशिकः—

अग्निमध्ये गतेनेदं भगवन् सन्निधौ मया ।
वर्तितं भृगुशार्दूल यन्न दग्धोऽस्मि तद्वहु ॥ १०९॥

एष एव वरो मुख्यः प्राप्तो मे भृगुनन्दन ।
यत् प्रीतोऽसि ममाचारैः कुलं पूतं ममानघ ॥ ११०॥

एष मेऽनुग्रहो विप्र जीवितेऽपि प्रयोजनम् ।

---

1. घ—अर्धद्वयं नास्ति

एतद्राज्यफलं चैव तपश्चैतत् परं मम ॥ १११॥

यदि तु प्रीतिमान् विप्र मयि त्वं भृगुनन्दन ।
अस्ति मे संशयः कश्चित् तन्मे व्याख्यातुमर्हसि ॥* ११२॥

च्यवनः—

वरश्च गृह्यतां मत्तो यश्च ते संशयो हृदि ।
तं च ब्रूहि नरश्रेष्ठ सर्वं सम्पादयामि ते ॥ ११३॥

कुशिकः—

यदि प्रीतोऽसि भगवंस् ततो मे वद भार्गव ।
कारणं श्रोतुमिच्छामि मद्गृहे वासकारितम् ॥ ११४॥

शयनं चैकपार्श्वेन दिवसानेकविंशतिम् ।
[1]न किञ्चिदुक्त्वा गमनं [2]बहिश्च मुनिपुङ्गव ॥ ११५॥

अन्तर्धानमकस्माच्च पुनरेव च दर्शनम् ।
पुनश्च शयनं विप्र दिवसानेकविंशतिम् ॥ ११६॥

तैलाभ्यक्तस्य गमनं भोजनं च गृहे मम ।
समुपानीय विविधं यद्यग्धं जातवेदसा ॥ ११७॥

निर्याणं च रथेनाशु सहसा यत्कृतं त्वया ।
धनानां च विसर्गश्च [3]जलस्यापि च दर्शनम् ॥ ११८॥

---

* सर्वेषु कोशेषु अत्रैवाध्यायसमाप्तिर्दृश्यते

1. क—अर्धत्रयं नास्ति
2. घ—इतः षट् पादा न सन्ति
3. क-घ—दर्शनस्याप्य

प्रासादानां बहूनां च काञ्चनानां महामुने ।
मणिविद्रुमपादानां पर्यङ्काणां च दर्शनम् ॥ ११९॥

पुनश्चादर्शनं तस्य श्रोतुमिच्छामि कारणम् ।
अतीव ह्यत्र मुह्यामि चिन्तयानो द्विजर्षभ ॥ १२०॥

न चैवात्राधिगच्छामि सर्वस्यास्य विनिश्चयम् ।
एतदिच्छामि कात्स्न्र्येन सत्यं श्रोतुं तपोधन ॥ १२१॥

च्यवनः—

शृणु सर्वमशेषेण यदिदं येन हेतुना ।
न हि शक्यमनाख्यातुम् एवं पृष्टेन पार्थिव ॥ १२२॥

पितामहस्य वदतः पुरा देवसमागमे ।
श्रुतवानस्मि यद्राजंस् तन्मे निगदतश्शृणु ॥ १२३॥

ब्रह्मक्षत्रविरोधेन भवितां कुलसङ्करः ।
पौत्रस्ते भविता राजंस् तेजोवीर्यतपोन्वितः ॥ १२४॥

ततस्स्वकुलरक्षार्थम् अहं त्वां समुपागतः ।
चिकीर्षन् कुशिकोच्छेदं सन्दिधक्षुः कुलं तव ॥ १२५॥

ततोऽहमागम्य पुरा त्वामवोचं महीपते ।
नियमं कञ्चिदारिप्सुश् शुश्रूषा क्रियतामिति ॥ १२६॥

न च ते दुष्कृतं किञ्चिद् अहमासादयं गृहे ।

तेन जीवसि राजर्षे न भवेथास्ततोऽन्यथा ॥ १२७॥

एतां बुद्धिं समास्थाय दिवसानेकविंशतिम् ।
सुप्तोऽस्मि यदि मां कश्चिद् बोधयेदिति पार्थिव ॥ १२८॥

यदा त्वया सभार्येण संसुप्तो न प्रबोधितः ।
अहं तदैव प्रीतोऽस्मि मनसा राजसत्तम ॥ १२९॥

उत्थाय चापि निष्क्रान्तो यदि मां त्वं महीपते ।
पृच्छेः क्व यास्यसीत्येवं शपेयं त्वामिति प्रभो ॥ १३०॥

अन्तर्हितश्चास्मि विभो पुनरेव च ते गृहे ।
योगमास्थाय संसुप्तो दिवसानेकविंशतिम् ॥ १३१॥

क्षुधितो नाभ्यसूयेथा श्रमाद्वाऽपि नराधिप ।
एतां बुद्धिं समास्थाय कर्शितो वा मया क्षुधा ॥ १३२॥

न च ते वाक् सुसूक्ष्माऽपि मन्युर्मनसि पार्थिव ।
सभार्यस्य नरश्रेष्ठ तेन ते प्रीतिमानहम् ॥ १३३॥

भोजनं च समानाय्य यत् तदा दीपितं मया ।
क्रुध्येथा यदि मात्सर्याद् इति तन्मर्षितं च ते ॥ १३४॥

रथेन वाहितश्चापि श्रमात् क्रोधोद्भवाय ते ।
ततोऽहं रथमारुह्य त्वामवोचं नराधिप ॥ १३५॥

सभार्यो मां वहस्वेति तच्च त्वं कृतवांस्तथा ॥ १३६
अथाविशं नरपते प्रीतोऽहं चापि तेन ते ।

धनोत्सर्गेऽपि च कृते न त्वां क्रोधोऽप्यधर्षयत् ॥ १३७

ततः प्रीतेन ते राजन् [1]पुनरेवं कृतं ततः ।
सभार्यस्य तदा भूयस् तद्विद्धि मनुजाधिप ॥ १३८

प्रीत्यर्थं तव चैतन्मे स्वर्गसन्दर्शनं कृतम् ।
यत्ते वनेऽस्मिन् नृपते दृष्टवांस्त्वं निदर्शनम् ॥ १३९

स्वर्गोद्देशस्त्वया राजन् सञ्शरीरेण पार्थिव ।
मुहूर्तमनुभूतोऽयं सभार्येण नृपोत्तम ॥ १४०

निदर्शनार्थं तपसो धर्मस्य च परन्तप ।
तत्र नासीन् स्पृहा राजंस् तच्चापि विदितं मम ॥ १४१

ब्राह्मण्यं काङ्क्षसे हि त्वं तपश्च पृथिवीपते ।
अवमत्य नरेन्द्रत्वं देवत्वं चापि पार्थिव ॥ १४२

एवमेतद्यथातत्त्वं ब्राह्मण्यं तात दुर्लभम् ।
ब्राह्मण्ये सति चर्षित्वम् ऋषित्वे च तपस्विता ॥ १४३
भविष्यत्येव ते कामः कुशिकात् कौशिको द्विजः ॥ १४३॥

तृतीयं पुरुषं प्राप्य ब्राह्मणत्वं गमिष्यति ।
वंशस्ते पार्थिवश्रेष्ठ भृगूणामेव तेजसा ॥ १४४॥

पौत्रस्ते भविता विप्रस् तपस्वी पावकद्युतिः ।
यस्स देवमनुष्याणां भयमुत्पादयिष्यति ॥ १४५॥

1. क-घ—इतः अष्टौ पादा न सन्ति

जमदग्नौ महाभाग तपसा भावितात्मनि ।
स चापि भृगुशार्दूलस् तवेदं धारयिष्यति ॥ १४६॥
[1]त्रयाणां चैव लोकानां सत्यमेतद् भविष्यति ॥ १४७
वरं गृहाण राजर्षे यस्ते मनसि वर्तते ।
तीर्थयात्रां गमिष्यामि पुरा कालोऽतिवर्तते ॥ १४८

कुशिकः—

एष एव वरो मेऽद्य यत्त्वं प्रीतो महामुने ।
भवत्वेतद्यथाऽऽत्थ त्वं तथा पौत्रो ममानघ ॥ १४९
ब्राह्मण्यं मे कुलस्यास्तु भगवन्नेष मे वरः ।
पुनश्चाख्यातुमिच्छामि भगवन् विस्तरेण वै ॥ १५०
कथमेष्यति विप्रत्वं कुलं मे भृगुनन्दन ।
कश्चास्य भविता बन्धुर् मम कश्च पितामहः ॥* १५१

च्यवनः—

अवश्यं कथनीयं मे तवैतन्नरपुङ्गव ।
यदर्थं चाहमुच्छेत्तुं सम्प्राप्तो मनुजाधिप ॥ १५२
[2]भृगूणां क्षत्रिया याज्या नित्यमेव नराधिप ।
ते च भेदं गमिष्यन्ति दैवयुक्तेन हेतुना ॥ १५३

---

1. अ-क—क्षत्रियाणां च
* सर्वेषु कोशेषु अत्रैवाध्यायसमाप्तिर्दृश्यते
2. अ—अधैतयं नास्ति

क्षत्रियाश्च भृगून् सर्वान् वधिष्यन्ति नराधिप ।
आगर्भादनुकृन्तन्तो देवदण्डनिपीडिताः ॥ १५४

तत उत्पस्यतेऽस्माकं कुलगोत्रविवर्धनः ।
और्वो नाम महातेजा ज्वलितार्कसमद्युतिः ॥ १५५

स त्रैलोक्यविनाशाय [1]कोपाग्निं जनयिष्यति ।
महीं सपर्वतवनां यः करिष्यति भस्मसात् ॥ १५६

कश्चित् कालं तु तं वह्निं स एव शमयिष्यति ।
समुद्रे वडवावक्त्रे प्रक्षिप्य मुनिसत्तमः ॥ १५७

पुत्रं तस्य महाभागम् ऋचीकं भृगुनन्दनम् ।
साक्षान् स्नेहाद् धनुर्वेदस् समुपस्थास्यतेऽनघ ॥ १५८

क्षत्रियाणामभावाय दैवयुक्तेन हेतुना ।
स तु तं प्रतिगृह्यैव पुत्रे सङ्क्रमयिष्यति ॥ १५९

जमदग्नौ महाभागे तपसा भावितात्मनि ।
स चापि भृगुशार्दूलस् तं वेदं धारयिष्यति ॥ १६०

कुलात्तु तव धर्मात्मन् कन्यां सोऽधिगमिष्यति ।
क्षत्र[2]हन्ता भवेद्विप्र इति देवं सनातनम् ॥ १६१

नारायणमुपास्यास्य वरात्तं पुत्रमृच्छति ॥ १६१॥

---

1. क-घ—पावकं
2. क—बुध्या ख—भर्ता घ—भक्त्या

[1]उत्थापनार्थं भवतो वंशस्य नृपसत्तम ।
गाधेर्दुहितरं प्राप्य पौत्रीं तव महातपाः ॥ १६२॥
ब्राह्मणं क्षत्रधर्माणं पुत्रमुत्पादयिष्यति ॥ १६३
क्षत्रियं विप्रधर्माणं बृहस्पतिमिवौजसा ।
विश्वामित्रं तव कुले गाधेः पुत्रं सुधार्मिकम् ॥ १६४
तपसा महता युक्तं प्रदास्यति महातपाः ॥ १६५
स्त्रियौ तु कारणं तत्र परिवृत्तौ भविष्यतः ।
पितामहनियोगाद्वै नान्यथैतद्भविष्यति ॥ १६६॥
तृतीये पुरुषे तुभ्यं ब्राह्मणत्वमुपैष्यति ।
भविता त्वं च सम्बन्धी भृगूणां भावितात्मनाम् ॥ १६६॥

भीष्मः—

कुशिकस्तु मुनेर्वाक्यं च्यवनस्य महात्मनः ।
श्रुत्वा हृष्टोऽभवद्राजा वाक्यं चेदमुवाच ह ॥ १६७॥
एवमस्त्विति धर्मात्मा तदा भरतसत्तम ॥ १६८
च्यवनस्तु महातेजाः पुनरेव नराधिपम् ।
वरार्थं चोदयामास तमुवाच स पार्थिवः ॥ १६९

कुशिकः—

बाढमेव ग्रहीष्यामि कामांस्त्वत्तो महामुने ।

---

1. क-घ—इत्थं वरार्थं

ब्रह्मभूयं कुलं मेऽस्तु धर्मे चास्य मनो भवेत् ॥ १७०

भीष्मः—

तथेऽत्युक्तस्तथेत्येव प्रत्युक्त्वा च्यवनो मुनिः ।
अभ्यनुज्ञाय नृपतिं तीर्थयात्रां ययौ तदा ॥ १७१

एतत्ते कथितं सर्वम् अशेषेण मया नृप ।
भृगूणां कुशिकानां च प्रीतिसम्बन्धकारणम् ॥ १७२

यथोक्तं मुनिना चापि तथा तदभवन्नृप ।
जन्म रामस्य च मुनेर् विश्वामित्रस्य चैव ह ॥ १७३

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां अनुशासनपर्वणि सप्तचत्वारिंशोऽध्यायः ॥ ४७ ॥
॥ ८९ ॥ आनुशासनिकपर्वणि सप्तचत्वारिंशोऽध्यायः ॥ ४७ ॥
[अस्मिन्नध्याये १७३ श्लोकाः]

॥ अष्टचत्वारिंशोऽध्यायः ॥

भीष्मेण युधिष्ठिरं प्रति तत्तद्दानानां विशिष्य फलकथनम् ॥

युधिष्ठिरः—

मुह्यामीति निशम्याथ चिन्तयानः पुनः पुनः ।
हीनां पार्थिवसिंहैस्तैश् श्रीमद्भिः पृथिवीमिमाम् ॥ १

प्राप्य राज्यानि शतशो महीं जित्वाऽपि भारत ।
कोटिशस्तु नरान् हत्वा परितप्ये पितामह ॥ २

का नु तासां वरस्त्रीणाम् अवस्थाऽद्य भविष्यति ।
या हीनाः पतिभिः पुत्रैर् मातुलैर्बन्धुभिस्तथा ॥ ३

वयं हि तान् गुरून् हत्वा ज्ञातींश्च सुहृदोऽपि च ।
अवाक्शीर्षाः पतिष्यामो नरके नात्र संशयः ॥ ४

शरीरं योक्तुमिच्छामि तपसोग्रेण भारत ।
उपदिष्टामिहेच्छामि तत्त्वतोऽहं विशां पते ॥ ५

वैशम्पायनः—

युधिष्ठिरस्य तद्वाक्यं श्रुत्वा भीष्मो महीपतेः ।
परीक्ष्य निपुणं बुद्ध्या युधिष्ठिरमभाषत ॥ ६

भीष्मः—

[1]रहस्यमद्भुतं चैव शृणु वक्ष्यामि भारत ।
या गतिः प्राप्यते येन प्रेत्यभावेषु भारत ॥ ७

तपसा प्राप्यते स्वर्गस् तपसा प्राप्यते यशः ।
[2]आयुःप्रकर्षो भोगाश्च लप्स्यन्ते तपसा विभो ॥ ८

ज्ञानं विज्ञानमारोग्यं रूपसम्पत् तथैव च ।
सौभाग्यं चैव तपसा प्राप्यते भरतर्षभ ॥ ९

धनं प्राप्नोति तपसा मौनं ज्ञानं प्रयच्छति ।
उपभोगांस्तु दानेन ब्रह्मचर्येण जीवितम् ॥ १०

अहिंसायाः फलं रूपं दीक्षया जन्म वै कुले ।

1. अ—इदमर्धं नास्ति 2. ख—आयुः कलत्रभोगा

फलमूलाशनाद्राज्यं स्वर्गः पर्णाशनाद्भवेत् ॥ ११

पयोभक्षो दिवं याति दानेन द्रविणाधिकः ।
गुरुशुश्रूषया विद्या नित्यश्राद्धेन सन्ततिः ॥ १२

गवाह्यश्शाकदीक्षाभिस् स्वर्गमाहुस्तृणाशनात् ।
स्त्रियस्त्रिषवणस्नानाद् वायुं पीत्वा [1]क्रतुं लभेत् ॥ १३

नित्यस्नायी दीर्घजीवी सन्ध्ये तु द्वे जपन् नृप ।
[2]मन्त्रं साधयतो राज्यं नाकपृष्ठमनाशके ॥ १४

स्थण्डिलेषु शयानानां गृहाणि शयनानि च ।
चीरवल्कलवासोभिर् वासांस्याभरणानि च ॥ १५

शय्यासनानि यानानि योगयुक्ते तपोधने ।
अग्निप्रवेशे नियतं ब्रह्मलोको विधीयते ॥ १६

रसानां प्रतिसंहारात् सौभाग्यमिह विन्दति ।
आमिषप्रतिसंहारात् प्रजा ह्यायुष्मती भवेत् ॥ १७

उदवासं वसेद्यस्तु स नराधिपतिर्भवेत् ।
सत्यवादी नरश्रेष्ठ दैवतैस्सह मोदते ॥ १८

कीर्तिर्भवति दानेन तथाऽऽरोग्यमहिंसया ।
द्विजशुश्रूषया राज्यं द्विजत्वं वाऽपि पुष्कलम् ॥ १९

पार्नायस्य प्रदानेन कीर्तिर्भवति शाश्वती ।

---

1. क-घ—ऽमृतं लभेत् 2. घ—मौनं

अन्नपानप्रदानेन तृप्यते कामभोगतः ॥ २०

सान्त्वतस्सर्वभूतानां सर्वशोकैर्विमुच्यते ।
देवशुश्रूषया राज्यं दिव्यं रूपं निगच्छति ॥ २१

दीपालोकप्रदानेन चक्षुष्मान् बुद्धिमान् भवेत् ।
प्रेक्षणीयप्रदानेन स्मृतिं मेधां च विन्दति ॥ २२

गन्धमाल्यप्रदानेन कीर्तिर्भवति पुष्कला ।
केशश्मश्रू धारयताम् अग्र्या भवति सन्ततिः ॥ २३

उपवासं च दीक्षां चाप्यभिषेकं च पार्थिव ।
कृत्वा द्वादशवर्षाणि वीरस्थानाद्विशिष्यते ॥ २४

दासीदासमलङ्कारान् क्षेत्राणि च धनानि च ।
ब्रह्मदेयां सुतां दत्त्वा प्राप्नोति मनुजर्षभ ॥ २५

ऋतुभिश्चोपवासैश्च त्रिदिवं याति भारत ।
लभते तु परं स्थानं बलिपुष्पप्रदो नरः ॥ २६

सुवर्णशृङ्गैस्तु विभूषितानां
गवां सहस्रस्य नरः प्रदाता ।
प्राप्नोति पुण्यं दिवि देवलोकम्
इत्येवमाहुर्मुनिदेवसङ्घाः ॥ २७

प्रयच्छते यः कपिलां सचेलां
कांस्योपदोहां कनकाग्रशृङ्गाम् ।

तैस्तैर्गुणैः कामदुघा तु भूत्वा
नरं प्रदातारमुपैति सा गौः ॥ २८

यावन्ति रोमाणि भवन्ति धेन्वास्
तावत् फलं प्राप्स्यति गोप्रदाता ।
पुत्रांश्च पौत्रांश्च कुलं च सर्वम्
आसप्तमं तारयते परत्र ॥ २९

सदक्षिणां काञ्चनचारुशृङ्गीं
कांस्योपदोहां वसनोत्तरीयाम् ।
धेनुं [1]तिलानां ददतो द्विजाय
लोका वसूनां सुलभा भवन्ति ॥ ३०

स्वकर्मभिर्मानवं सन्निबद्धं
तीव्रान्धकारे नरके पतन्तम् ।
महार्णवे नौरिव वाययुक्ता
दानं गवां तारयते परत्र ॥ ३१

यो ब्रह्मदेयां तु ददाति कन्यां
भूमिप्रदानं च करोति विप्रे ।
ददाति वित्तं विधिवच्च यश्च
स लोकमाप्नोति पुरन्दरस्य ॥ ३२

1. घ—कुलानां

नैवेशिकं सर्वगुणोपपन्नं
ददाति वै यस्तु नरो द्विजाय ।
स्वाध्यायचारित्रगुणान्विताय
तस्यापि लोकाः कुरुपूत्तरेषु ॥ ३३

धुर्यप्रदानेन गवां तथा वै
लोकानवाप्नोति नरो वसूनाम् ।
स्वर्गाय चाहुर्हि हिरण्यदानं
ततो विशिष्टं कनकप्रदानम् ॥ ३४

[1]छत्रप्रदानेन गृहं वरिष्ठं
यानं तथोपानहसम्प्रदाने ।
वस्त्रप्रदानेन फलं सुरूपं
गन्धप्रदाने सुरभिर्नरस्स्यात् ॥ ३५

पुष्पोपगं वाऽथ फलोपगं वा
यः पादपं स्पर्शयते द्विजाय ।
स स्त्रीसमृद्धं बहुरत्नपूर्णं
लभत्ययत्नोपगतं गृहं वै ॥ ३६

भक्ष्यान्नपानीयरसप्रदाता
सर्वानवाप्नोति रसान् प्रकामम् ।

1. क-घ—क्षेत्रप्रदानेन

प्रतिश्रयाच्छादनसम्प्रदाता
प्राप्नोति तान्येव न संशयोऽत्र ॥ ३७

सधूपगन्धान्यनुलेपनानि
स्नानानि माल्यानि च मानवो यः ।
दद्याद्द्विजेभ्यस्स भवेदरोगस्
तथा सुरूपश्च नरेन्द्र लोके ॥ ३८

बीजैरशून्यं शयनैरुपेतं
दद्याद्गृहं यः पुरुषो द्विजाय ।
[1]पुण्याभिरामं बहुरत्नपूर्णं
लभत्यधिष्ठानवरं स राजन् ॥ ३९

सुगन्धचित्रास्तरणोपपन्नं
दद्यान्नरो यस्सदनं द्विजाय ।
रूपान्वितां पक्षवतीं मनोज्ञां
भार्यामयत्नोपगतां लभेत ॥ ४०

पितामहस्यानुचरो वीरशायी भवेन्नरः ।
नाधिकं विद्यते यस्माद् इत्याहुः परमर्षयः ॥ ४१

वैशम्पायनः—

तस्य तद्वचनं श्रुत्वा प्रीतात्मा कुरुनन्दनः ।

---

1. क-घ—अर्धद्वयं नास्ति

नाश्रमेऽरोचयद्वासं वीरमार्गाभिकाङ्क्षया ॥ ४२

ततो युधिष्ठिरः प्राह पाण्डवान् भरतर्षभ ॥ ४२॥

युधिष्ठिरः—

पितामहस्य यद्वाक्यं तद्वो रोचयतु प्रभोः ॥ ४३

वैशम्पायनः—

ततस्तु पाण्डवास्सर्वे द्रौपदी च यशस्विनी ।
युधिष्ठिरस्य तद्वाक्यं बाढमित्यभ्यपूजयन् ॥ ४४

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां
अनुशासनपर्वणि अष्टचत्वारिंशोऽध्यायः ॥ ४८ ॥
॥ ८९ ॥ आनुशासनिकपर्वणि अष्टचत्वारिंशोऽध्यायः ॥ ४८ ॥
[अस्मिन्नध्याये ४४ श्लोकाः]

॥ एकोनपञ्चाशोऽध्यायः ॥

भीष्मेण युधिष्ठिरं प्रति ब्राह्मणप्रशंसनपूर्वकं तदाराधनविधानम् ॥

युधिष्ठिरः—

यानीमानि बहिर्वेद्यां दानानि परिचक्षते ।
तेभ्यो विशिष्टं किं दानं मन्यसे कुरुपुङ्गव ॥ १

भीष्मः—

कौतूहलं हि परमं अत्र मे वर्तते विभो ।
दातारं दत्तमन्वेति तद्दानं भरतर्षभ ॥ २

[1]अभयं सर्वभूतेभ्यो व्यसने वाऽप्यनुग्रहः ।
यच्चाभिलषितं दद्यात् तृषितायाभियाचते ॥ ३

भरणे पुत्रदाराणां तद्दानं श्रेष्ठमुच्यते ॥ ३॥

हिरण्यदानं गोदानं पृथिवीदानमेव च ।
एतानि वै पवित्राणि तारयन्त्यपि दुष्कृतान् ॥ ४॥

एतानि पुरुषव्याघ्र साधुभ्यो देहि नित्यदा ।
एतानि हि नरं पापान्मोक्षयन्ति न संशयः ॥ ५॥

यद्यदिष्टतमं लोके यच्चास्य दयितं गृहे ।
तत्तद्गुणवते देयं तदेवाक्षयमिच्छता ॥ ६॥

1. ख—अर्धद्वयं नास्ति

प्रियाणि लभते लोके प्रियदः प्रियकृत्तथा ।
प्रियो भवति भूतानाम् इह चैव परत्र च ॥ ७॥

याचमानावमानाच्च आशावन्तमकिञ्चनम् ।
यो नार्चति यथाशक्ति स नृशंसो युधिष्ठिर ॥ ८॥

अमित्रमपि चेद्दीनं शरणैषिणमागतम् ।
व्यसने योऽनुगृह्णाति स वै पुरुषसत्तमः ॥ ९॥

कृशाय ह्रीमते तात वृत्तिक्षीणाय सीदते ।
अपहन्यात् क्षुधं यस्तु न तेन पुरुषस्समः ॥ १०॥

ह्रिया तु नियतान् साधून् पुत्रदारैश्च कर्शितान् ।
अयाचमानान् कौन्तेय सर्वोपायैर्निमन्त्रयेत् ॥ ११॥

आशिषो ये न देवेषु न मर्त्येषु च कुर्वते ।
अर्हन्तो नित्यसत्त्वस्था यथा सर्वोपजीविनः ॥ १२॥

आशीविषसमेभ्यश्च तेभ्यो रक्षस्व भारत ॥ १३

तान् युक्तैरुपविज्ञाप्य भोगैर्निर्वप रक्ष च ॥ १३॥

कृतैरावसथैर्नित्यं सप्रेष्यैस्सपरिच्छदैः ।
निमन्त्रयेथाः कौरव्य सर्वभूतसुखावहैः ॥ १४॥

यदि ते प्रतिगृह्णीयुश् श्रद्धापूतं युधिष्ठिर ।
कार्यमित्येव मन्वाना धार्मिकाः पुण्यकर्मिणः ॥ १५॥

विद्यास्नाता व्रतस्नाता धर्ममाश्रित्य जीविनः ।

गूढस्वाध्यायतपसो ब्राह्मणास्संशितव्रताः ॥ १६॥

तेषु शुद्धेषु दान्तेषु स्वदारनिरतेषु च ।
यत् करिष्यति कल्याणं तत् तल्लोकेषु यास्यति ॥ १७॥

यथाऽग्निहोत्रं सुहुतं सायं प्रातर्विजानता ।
तथा भवति दत्तं वै विद्वद्भ्योऽथ कृतात्मना ॥ १८॥

एष [1]भो विततो यज्ञश् श्रद्धापूतस्सदक्षिणः ।
विशिष्टस्सर्वयज्ञेभ्यो ददतस्तात वर्धताम् ॥ १९॥

निवापा दानसदृशास् सदृशेषु युधिष्ठिर ।
निवपन् पूजयंश्चैनं तेष्वानृण्यं निगच्छति ॥ २०॥

[2]य एवं नैव कुप्यन्ति न लुम्पन्ति तृणेष्वपि ।
[3]त एव नः पूज्यतमा ये चान्ये प्रियवादिनः ॥ २१॥

ये नो नु बहुमन्यन्ते न प्रवर्तन्ति याचने ।
पुत्रवत् परिपाल्यास्ते नमस्तेभ्यस्तथाऽभयम् ॥ २२॥

ऋत्विक्पुरोहिताचार्या मृदुधर्मपरा हि ये ।
क्षात्रेणापि हि संस्पृष्टं तेजश्शाम्यति तेष्वपि ॥ २३॥

ईश्वरो बलवानस्मि राजाऽस्मीति युधिष्ठिर ।
ब्राह्मणान् मा स्म पर्यासीर् वासोभिरशनेन वा ॥ २४॥

---

1. अ-ख—नो
2. क-घ—य एव नोपलिप्यन्ति
3. क-घ—अर्धपद्यकं नास्ति

यच्छोभार्थं बलार्थं वा वित्तमस्ति तवानघ ।
तेन ते ब्राह्मणाः पूज्यास् स्वधर्ममनुतिष्ठता ॥ २५॥

नमस्कार्यास्त्वया विप्रा वर्तमाना यथातथम् ।
यथासुखं यथोत्साहं लभन्तु त्वयि पुत्रवत् ॥ २६॥

को ह्यन्य[1]स्सुप्रसादानां सुहृदामल्पतोषिणाम् ।
वृत्तिमर्हत्युपक्षेप्तुं त्वदन्यः कुरुसत्तम ॥ २७॥

यथा पत्याश्रयो धर्मस् स्त्रीणां लोके सनातनः ।
[2]तदेव सुगतिर्नान्या तथाऽस्माकं द्विजातयः ॥ २८॥

यदि नो ब्राह्मणास्तात सन्त्यजेयुरपूजिताः ।
पश्यन्तो दारुणं कर्म सततं क्षत्रिये स्थितम् ॥ २९॥

अवेदानामकीर्तीनाम् अलोकानामयज्विनाम् ।
को नु स्याज्जीवितेनार्थस् तद्धि नो ब्राह्मणाश्रयम् ॥ ३०॥

अत्र ते वर्तयिष्यामि यथा धर्मः पुरातनः ।
राजन्यो ब्राह्मणान् राजन् पुरा परिचचार ह ॥ ३१॥

वैश्यो राजन्यमित्येव शूद्रो वैश्यमिति स्थितिः ॥ ३२

दूराच्छूद्रेणोपचर्यो ब्राह्मणोऽग्निरिव ज्वलन् ।
संस्पृश्य परिचर्यस्तु वैश्येन क्षत्रियेण च ॥ ३३

मृदुभावान् सत्यशीलान् क्षमाशीलानुपासकान् ।

---

1. घ—स्सुप्रदानानाम् 2. क-घ—यथैव स्वागतं मान्यस्तथा

आशीविषानिव क्रुद्धांस् तानुपाचर वै द्विजान् ॥ ३४

अपरेषां परेषां च परेभ्यश्चैव ये परे ।
क्षत्रियाणां [1]प्रभावं च तेजांसि च तपांसि च ॥ ३५

ब्राह्मणेष्वेव मन्यन्ते श्रीरायुर्बलमेव च ॥ ३५॥

न मे पिता प्रियतरो न त्वं तात तथा प्रियः ।
न मे पितुः पिता राजन् न चात्मा न च जीवितम् ॥ ३६॥

त्वत्तश्च मे प्रियतरः पृथिव्यां नास्ति कश्चन ।
त्वत्तोऽपि मे प्रियतरा ब्राह्मणा भरतर्षभ ॥ ३७॥

ब्रवीमि सत्यमेतच्च यथाऽहं पाण्डुनन्दन ।
तेन सत्येन गच्छेयं लोकान् यत्र स शन्तनुः ॥ ३८॥

पश्येयं च सतां लोकाञ् छुचीन् ब्रह्मपुरस्कृतान् ।
तत्र मे तात गन्तव्यम् अह्नाय च चिराय च ॥ ३९॥

सोऽहमेतादृशाँल्लोकान् दृष्ट्वा भरतसत्तम ।
यन्मे कृतं ब्राह्मणेषु न कुप्ये तेन पार्थिव ॥ ४०॥

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां
अनुशासनपर्वणि एकोनपञ्चाशोऽध्यायः ॥ ४९ ॥
॥ ८९ ॥ आनुशासनिकपर्वणि एकोनपञ्चाशोऽध्यायः ॥ ४९ ॥
[अस्मिन्नध्याये ४०॥ श्लोकाः]

---

1. क-ब—प्रतापं च

॥ पञ्चाशोऽध्यायः ॥

भीष्मेण युधिष्ठिरं प्रति ब्राह्मणमहिमानुवर्णनम् ॥

युधिष्ठिरः—

यौ तु स्यातां चरणेनोपपन्नौ
यौ विद्यया सदृशौ जन्मना च ।
ताभ्यां दानं कतरस्मै विशिष्टम्
अयाचमानाय च याचते च ॥ १

भीष्मः—

श्रेयो वै याचतः पार्थ दत्तमाहुरयाचते ।
अर्हेन्नरो वै धृतिमान् कृपणादकृतात्मनः ॥ २
क्षत्रिये रक्षणधृतिर् ब्राह्मणेऽनर्थिताधृतिः ।
ब्राह्मणो धृतिमान् विद्वान् देवान् प्रीणाति तुष्टिमान् ॥ ३
याच्यमाहुरनीशस्य मतिभारं च भारत ।
उद्वेजयति याचन् हि सदा भूतानि दस्युवत् ॥ ४
म्रियते याचमानो वै तमनुम्रियतेऽददत् ।
ददत् सञ्जीवयत्येनम् आत्मानं च युधिष्ठिर ॥ ५
आनृशंस्यं परो धर्मो याचते यत् प्रदीयते ।
अयाचतस्सीदमानान् सर्वोपायैर्निमन्त्रय ॥ ६

यदि ते तादृशा राष्ट्रे वसेयुस्ते द्विजोत्तमाः ।
भस्मच्छन्नानिवाग्नींस्तान् बुध्येथास्त्वं प्रयत्नतः ॥ ७

तपसा दीप्यमानास्ते दहेयुः पृथिवीमपि ।
पूज्या हि ज्ञानविज्ञानतपोयोगसमन्विताः ॥ ८

तेभ्यः पूजां प्रयुञ्जीथा ब्राह्मणेभ्यः परन्तप ॥ ८॥

ददद्धुविधान् देयान् उपच्छन्दयते च तान् ॥ ९

यदग्निहोत्रे सुहुते सायम्प्रातर्भवेत् फलम् ।
विद्यावेदव्रतवति तद्दानफलमुच्यते ॥ १०

विद्यावेदव्रतस्नातास् तद्व्यपाश्रयजीविनः ।
गूढस्वाध्यायतपसो ब्राह्मणान् संशितव्रतान् ॥ ११

कृतैरावसथैर्हृद्यैस् सप्रेष्यैस्सपरिच्छदैः ।
निमन्त्रयेथाः कौरव्य कामैश्चान्यैर्द्विजोत्तमान् ॥ १२

अपि ते प्रतिगृह्णीयुश् श्रद्धापूतं युधिष्ठिर ।
कार्यमित्येव मन्वाना धर्मज्ञास्सूक्ष्मदर्शिनः ॥ १३

अपि ते ब्राह्मणा भुक्त्वा गतास्सोद्धरणान् गृहान् ।
येषां दाराः प्रतीक्षन्ते पर्जन्यमिव कर्षकाः ॥ १४

अन्नानि प्रातस्सवने नियता ब्रह्मचारिणः ।
ब्राह्मणास्तात भुञ्जानास् त्रेताग्नीन् प्रीणयन्ति ते ॥ १५

माध्यन्दिनं च सवनं ददतस्ते विवर्तताम् ।
गौर्हिरण्यानि वासांसि तेनेन्द्रः प्रीयतां तव ॥ १६

तृतीयसवनं तत्ते वैश्वदेवं युधिष्ठिर ।
यद्देवेभ्यः पितृभ्यश्च [1]विप्रेभ्यश्च प्रयच्छसि ॥ १७

अहिंसा सर्वभूतेभ्यस् संविभागश्च सर्वशः ।
दमस्त्यागो धृतिस्सत्यं भवन्तु ददतश्च ते ॥ १८

एष ते विततो यज्ञश् श्रद्धापूतस्सदक्षिणः ।
विशिष्टस्सर्वयज्ञेभ्यो नित्यं तात प्रवर्तताम् ॥ १९

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां
अनुशासनपर्वणि पञ्चाशोऽध्यायः ॥ ५० ॥
॥ ८९ ॥ आनुशासनिकपर्वणि पञ्चाशोऽध्यायः ॥ ५० ॥
[अस्मिन्नध्याये १९ श्लोकाः]

---

1. क—मनुष्येभ्यः

॥ एकपञ्चाशोऽध्यायः ॥

भीष्मेण युधिष्ठिरं प्रति ब्राह्मणप्रशंसनपूर्वकं ब्राह्मणानां प्रजानां च रक्षणस्यावश्यकर्तव्यत्वकथनम् ॥

युधिष्ठिरः—

दानं यज्ञक्रिया चेह किंस्वित् प्रेत्य [1]महाफलम् ।
[2]कस्य ज्यायः फलं किं स्यात् कीदृशेभ्यः कथं कदा ॥ १

भीष्मः—

रौद्रधर्मे क्षत्रियश्च सततं तात वर्तते ।
नास्य वैतानिकफलं विना दानं सुपावनम् ॥ २

न तु पापकृतां राज्ञां याजका द्विजसत्तमाः ।
[3]धने सत्यप्रदातॄणां प्रतिगृह्णन्ति साधवः ॥ ३

प्रतिगृह्णन्ति न तु चेद् यद्रोषादाप्तदक्षिणैः ॥ ३॥

अथ चेत् प्रतिगृह्णीयुर् दद्यादहरहर्नृप ।
श्रद्धामास्थाय परमां पावनं ह्येतदुत्तमम् ॥ ४॥

ब्राह्मणांस्तर्पयेद् दद्यैस् स वै यज्ञोऽनुपद्रवः ।
मैत्रान् साधून् वेदविदश् शीलवृत्ततपोन्वितान् ॥ ५॥

1. क-घ—पदं नृणाम्
2. क-घ—अर्धचतुष्टयं नास्ति
3. क-घ—नित्यानुष्ठानयुक्ताश्चेत् प्रति

यज्ञान् सन्धाय साधुभ्यस् सिद्धान्नान् दक्षिणावतः ॥ ६
इष्टवन्तं च मन्येथा आत्मानं दानकर्मणा ।
यज्ञान् साधय साधुभ्यस् स्वयं च यज पार्थिव ॥ ७
यत्ते तेन करिष्यन्ति कृतं तत्ते भविष्यति ।
पूजयेथाश्च यज्ञीयांस् तवाप्यंशो भवेत्तथा ॥ ८
विद्वद्भ्यस्सम्प्रदानेन तत्राप्यंशोऽस्य पूजया ।
यज्वभ्यश्चाथ विद्वद्भ्यो दत्त्वा लोकं प्रदापयेत् ॥ ९
प्रदद्याज्ज्ञानदातॄणां ज्ञानदानांशभाग्भवेत् ॥ ९॥
प्रजावतो भरेथाश्च ब्राह्मणान् बहुभाषिणः ।
प्रजावांस्तेन भवसि यथा जनयिता तथा ॥ १०॥
यावतो वै साधुधर्मान् सन्तस्संवर्धयन्त्युत ।
सर्वे ते चापि भर्तव्या नरा ये बहुभाषिणः ॥ ११॥
समृद्धस्सम्प्रयच्छस्व ब्राह्मणेभ्यो युधिष्ठिर ।
धेनूरनड्वाहोऽन्नानि च्छत्रं वासांस्युपानहौ ॥ १२॥
आज्यानि यजमानेभ्यस् तथाऽन्नाद्यानि भारत ।
अश्ववन्ति च यानानि वेश्मानि शयनानि च ॥ १३॥
एते देयाः पुष्टिमद्भ्यो लघूपायाश्च भारत ।
अजुगुप्सन् द्विजान् नित्यं ब्राह्मणान् वृत्तिकर्शितान् ॥ १४॥
उपच्छन्नं प्रकाशं वा वृत्त्या तान् प्रतिपादय ।

राजसूयाश्वमेधाभ्यां श्रेयस्तत् क्षत्रियान् प्रति ॥ १५॥
एवं पापैर्विमुक्तस्त्वं पूतस्स्वर्गमवाप्स्यसि ।
संसयित्वा पुनः कोशं यद्राष्ट्रं पालयिष्यसि ॥ १६॥
ततश्च ब्रह्मभूयस्त्वम् अवाप्स्यसि धनानि च ।
आत्मनश्च परेषां च वृत्तिं रक्षस्व भारत ॥ १७॥
पुत्रवच्चापि भृत्यान् स्वान् प्रजाश्च परिपालय ।
योगः क्षेमश्च ते नित्यं ब्राह्मणेष्वस्तु भारत ॥ १८॥
अरक्षितारं हर्तारं विलोप्तारमदायकम् ।
तं स्म राजन् कलिं हन्युः प्रजास्सम्भूय निर्घृणम् ॥ १९॥
अहं वै रक्षितेत्युक्त्वा यो न रक्षति भूमिपः ।
स संहत्यापि हन्तव्यश् श्वेव सोन्माद आतुरः ॥ २०॥
पापं कुर्वन्ति यत् किञ्चित् प्रजा राज्ञा अरक्षिताः ।
चतुर्थं तस्य पापस्य राजा पापं च विन्दति ॥ २१॥
अप्याहुस्सर्वमेवेति भूयोऽर्धमिति निश्चयः ।
चतुर्थं मतमस्माकं मनोरश्रुत्वाऽनुशासनम् ॥ २२॥
शुभं वा यत् प्रकुर्वन्ति प्रजा राजा सुरक्षिताः ।
चतुर्थं तस्य पुण्यस्य राजा चाप्नोति भारत ॥ २३॥
जीवन्तं चानुजीवन्तु प्रजास्सर्वा युधिष्ठिर ।
पर्जन्यमिव भूतानि महाह्रदमिव द्विपाः ॥ २४॥

कुबेरमिव रक्षांसि शतक्रतुमिवामराः ।
ज्ञातयश्चानुजीवन्तु सुहृदश्च परन्तप ॥ २५॥

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां
अनुशासनपर्वणि एकपञ्चाशोऽध्यायः ॥ ५१ ॥
॥ ८९ ॥ आनुशासनिकपर्वणि एकपञ्चाशोऽध्यायः ॥ ५१ ॥
[अस्मिन्नध्याये २५॥ श्लोकाः]

॥ द्विपञ्चाशोऽध्यायः ॥

भीष्मेण युधिष्ठिरं प्रति भूमिगीतगाथाकथन पुरस्सरं सेन्द्रबृहस्पति-संवादानुवादं च भूमिदानप्रशंसनम् ॥

युधिष्ठिरः—

इदं देयमिदं देयम् इतीयं श्रुतिचोदना ।
बहुदेयाश्च राजानः किंस्विद्देयमनुत्तमम् ॥ १

भीष्मः—

अति दानानि सर्वाणि पृथिवीदानमुच्यते ।
अचला चाक्षया भूमिर् दोग्ध्री कामाननुत्तमान् ॥ २

दोग्ध्री वासांसि रत्नानि पशून् व्रीहियवांस्तथा ।
भूमिदस्सर्वदेयेषु शाश्वतीरेधते समाः ॥ ३

[1]यावद्भूमेरायुरिह तावद्भूमिद एधते ।
न भूमिदानादिह तु परं किञ्चिद्युधिष्ठिर ॥ ४

अप्यल्पं प्रददुस्सर्वं पृथिव्या इति नश्श्रुतम् ।
भूमिमेव ददुस्सर्वे ये भूमिं भुञ्जते जनाः ॥ ५

स्वकर्म चोपजीवन्ति नरा इह परत्र च ।
भूमिः पतिं महादेवी दातारं कुरुते प्रियम् ॥ ६

य एतां दक्षिणां दद्याद् अक्षयां पृथिवीपते ।
पुना राजाऽवनिं प्राप्य भवेत् स पृथिवीपतिः ॥ ७

यथा दत्तं तथा भोग इति धर्मेषु निश्चयः ।
सङ्ग्रामे वा तनुं जह्याद् दद्याद्वा पृथिवीमिमाम् ॥ ८

इत्येताः क्षत्रबन्धूनां वदन्ति परमाशिषः ।
पुनाति दत्ता पृथिवी दातारमिति शुश्रुम ॥ ९

अपि पापसमाचारं ब्रह्मघ्नमपि चानृतम् ।
सैव पापं पावयति सैव पापात् प्रमोचयेत् ॥ १०

अपि पापकृतां राज्ञां प्रतिगृह्णन्ति साधवः ।
पृथिवीं नान्यदिच्छन्ति पावनं जग[2]तीं यतः ॥ ११

नामास्याः प्रियदत्तेति गुह्यं देव्यास्सनातनम् ।
दानं वाऽप्यथवा ज्ञानं नाम्नोऽस्याः परमं प्रियम् ॥ १२

1. क-घ—अर्धश्लोकं नास्ति 2. क-घ—तीतले

तस्मात् प्राप्यैव पृथिवीं दद्याद्विप्राय पार्थिवः ॥ १२॥

न भूमिपतिना भूमिर् अधिष्ठेया कथञ्चन ।
न च वस्त्रेण वा गूहेन्नान्तर्धानेन वा चरेत् ॥ १३॥

ये चान्ये भूमिमिच्छेयुः कुर्युरेव न संशयः ।
यस्साधोर्भूमिमादत्ते न भूमिं विन्दते नृप ॥ १४॥

भूमिं तु दत्त्वा साधुभ्यो विन्दते भूमिमेव च ।
प्रेत्येह च स धर्मात्मा सम्प्राप्नोति महद्यशः ॥ १५॥

एकागारकरीं दत्त्वा षष्टिसाहस्रमूर्ध्वगः ।
तावत्या हरणे पृथ्व्या नरकं द्विगुणोत्तरम् ॥ १६॥

यस्य विप्रानुशासन्ति साधोर्भूमिं सदैव हि ।
न तस्य शत्रवो राजन् प्रशासन्ति वसुन्धराम् ॥ १७॥

यत् किञ्चित् पुरुषः पापं कुरुते वृत्तिकर्शितः ।
अपि गोचर्ममात्रेण भूमिदानेन पूयते ॥ १८॥

येऽपि सङ्कीर्णकर्माणो राजानो रौद्रकर्मिणः ।
तेभ्यः पवित्रमाख्येयं भूमिदानमनुत्तमम् ॥ १९॥

अल्पान्तरमिदं शश्वत् पुराणा मेनिरे जनाः ।
यो यजेदश्वमेधेन दद्याद्वा साधवे महीम् ॥ २०॥

अथ चेत् सुकृतं कृत्वा शङ्केरन्नपि पण्डिताः ।
अशक्यमेकमेवैतद् भूमिदानमनुत्तमम् ॥ २१॥

सुवर्णं रजतं वस्त्रं मणिमुक्तावसूनि च ।
सर्वमेतन्महाप्राज्ञ ददाति वसुधां ददत् ॥ २२॥

तपो यज्ञाश्रुतं शीलम् अद्रोहस्सत्यसन्धता ।
गुरुदैवतपूजा च नातिक्रामन्ति भूमिदम् ॥ २३॥

भर्तुर्निश्श्रेयसे युक्तास् त्यक्तात्मानो रणे हताः ।
ब्रह्मलोकगतास्सिद्धा नातिक्रामन्ति भूमिदम् ॥ २४॥

यथा जनित्री क्षीरेण स्वपुत्रं भरते सदा ।
अनुगृह्णाति दातारं तथा सर्वरसैर्मही ॥ २५॥

मृत्योर्वै किङ्करा दण्डास् तापो वह्नेस्सुदारुणः ।
घोराश्च वारुणाः पाशा नोपसर्पन्ति भूमिदम् ॥ २६॥

हलकृष्टां महीं दत्त्वा सबीजां सफलामपि ।
सोदकं वाऽपि शरणं तथा भवति कामदः ॥ २७॥

ब्राह्मणं वृत्तसम्पन्नम् आहिताग्निं शुचिव्रतम् ।
नरः प्रतिग्राह्य महीं न याति यमसादनम् ॥ २८॥

यथा चन्द्रमसो वृद्धिर् अहन्यहनि जायते ।
तथा भूमिकृतं दानं सस्ये सस्ये विवर्धते ॥ २९॥

अत्र गाथा भूमिगीताः कीर्तयन्ति पुराविदः ।
याश्श्रुत्वा जामदग्न्येन दत्ता भूः काश्यपाय वै ॥ ३०॥

[1]मामेवादत्त मां दत्त मां दत्त्वा मामवाप्स्यथ ।
अस्मिँल्लोके परे चैव ततश्च जनने पुनः ॥ ३१॥

य इमां व्याहृतिं वेद ब्राह्मणो ब्रह्मसंश्रितः ।
श्राद्धस्य हूयमानस्य ब्रह्मभूयं स गच्छति ॥ ३२॥

कृत्यानामभिशप्तानाम् अरिष्टशमनं महत् ।
प्रायश्चित्तं महद् दत्त्वा पुनात्युभयतो दश ॥ ३३॥

पुनाति य इदं वेद वेद्मिचाहं तथैव तम् ।
प्रकृतिस्सर्वभूतानां भूमिर्वै शाश्वती मता ॥ ३४॥

अभिषिच्यैव नृपतिं श्रावयेदिममागमम् ।
यथा श्रुत्वा महीं दद्यान्नादद्यात् साधुतश्च ताम् ॥ ३५॥

साऽहं कृत्स्ना ब्राह्मणार्था राजानश्चाप्यसंशयः ।
राजा हि धर्मकुशलः प्रथमं भूमिलक्षणम् ॥ ३६॥

अथ येषामधर्मज्ञो राजा भवति नास्तिकः ।
न ते सुखं प्रबुध्यन्ते न सुखं प्रस्वपन्ति च ॥ ३७॥

तस्य राज्ञश्शुभैः कार्यैः कर्मभिर्निर्वृताः प्रजाः ।
योगक्षेमेण वृष्ट्या च विवर्धन्ते स्वकर्मभिः ॥ ३८॥

स कुलीनस्स पुरुषस् स बन्धुस्स च पुण्यकृत् ।
स राजा स च विक्रान्तो यो ददाति वसुन्धराम् ॥ ३९॥

1. क-घ—मामेव दत्तामादाय मां दत्त्वा

आदित्य इव [1]दीप्येत तेजसा त्विह मानवः ।
ददाति वसुधां स्फीतां यो वेदविदुषि द्विजे ॥ ४०॥

यथा बीजानि रोहन्ति प्रकीर्णानि महीतले ।
तथा कामाः प्ररोहन्ति भूमिदानसमार्जिताः ॥ ४१॥

आदित्यो वरुणो विष्णुर् ब्रह्मा सोमो हुताशनः ।
शूलपाणिश्च भगवान् प्रतिनन्दन्ति भूमिदम् ॥ ४२॥

भूमौ जायन्ति पुरुषा भूमौ निष्ठां व्रजन्त्यपि ।
चतुर्विधो हि लोकोऽयं सोऽयं भूमिगुणात्मकः ॥ ४३॥

[2]एषा माता पिता चैव जगतः पृथिवीपते ।
नानया सदृशं भूतं किञ्चिदस्ति नराधिप ॥ ४४॥

सौवर्णयन्त्रप्रासादा वसोर्धाराश्च कामदाः ।
गन्धर्वाप्सरसो यत्र तत्र गच्छन्ति भूमिदाः ॥ ४५॥

अत्राप्युदाहरन्तीमम् इतिहासं पुरातनम् ।
बृहस्पतेश्च संवादम् इन्द्रस्य च युधिष्ठिर ॥ ४६॥

इष्ट्वा क्रतुशतेनाथ महता दक्षिणावता ।
मघवा वाग्विदां श्रेष्ठं पप्रच्छेदं बृहस्पतिम् ॥ ४७॥

इन्द्रः—

भगवन् येन दानेन स्वर्गे वै सुखमेधते ।

1. क-घ—दीप्तेन तेजसा सतु मानवः 2. क-घ—अर्धसप्तकं नास्ति

यदक्षरमहार्यं च तद्ब्रूहि वदतां वर ॥ ४८॥

भीष्मः—

इत्युक्तस्स सुरेन्द्रेण ततो देवपुरोहितः ।
बृहस्पतिर्महातेजाः प्रत्युवाच शतक्रतुम् ॥ ४९॥

बृहस्पतिः—

सुवर्णदानं गोदानं भूमिदानं च वृत्रहन् ।
विद्यादानं च कन्यानां दानं पापहरं परम् ॥ ५०॥

ददद्देतान् महाप्राज्ञस् सर्वपापैः प्रमुच्यते ॥ ५१

न भूमिदानादेवेन्द्र परं किञ्चिदिति प्रभो ।
विशिष्टमिति मन्येऽहं तथा प्राहुर्मनीषिणः ॥ ५२

ब्राह्मणार्थे गवार्थे वा राष्ट्रघातेऽथ स्वामिनः ।
कुलस्त्रीणां परिभवे मृतास्ते भूमिदैस्समाः ॥ ५३

ये शूराश्शयिता युद्धे स्वर्याता दानगृद्धिनः ।
सर्वे ते विबुधश्रेष्ठ नातिक्रामन्ति भूमिदम् ॥ ५४

भर्तुर्निश्श्रेयसे युक्तास् त्यक्तात्मानो रणे हताः ।
ब्रह्मलोकं गताश्शूरा नातिक्रामन्ति भूमिदम् ॥ ५५

पञ्च पूर्वा हि पुरुषाः षट् च ये च स्वधां गताः ।
एकादश ददद्भूमिं परित्रातीह मानवः ॥ ५६

रत्नोपकीर्णां वसुधां यो ददाति पुरन्दर ।

स मुक्तस्सर्वकलुषैस् स्वर्गलोके महीयते ॥ ५७

महीं स्फीतां ददद्राजा सर्वकामगुणान्विताम् ।
राजाधिराजो भवति तद्धि दानमनुत्तमम् ॥ ५८

सर्वकामसमायुक्तां काञ्चनीं यः प्रयच्छति ।
सर्वभूतानि मन्यन्ते मां ददातीति वासव ॥ ५९

सर्वकामदुघां धेनुं सर्वकामपुरोगमाम् ।
ददाति यस्सहस्राक्ष स स्वर्गं याति मानवः ॥ ६०

मधुसर्पिःप्रवाहिण्यः पयोदधिवहास्तथा ।
सरितस्तर्पयन्तीह सुरेन्द्र वसुधाप्रदम् ॥ ६१

भूमिप्रदानान्नृपतिर् मुच्यते राज्यकिल्बिषात् ।
न हि भूमिप्रदानेन दानमन्यद्विशिष्यते ॥ ६२

ददाति यस्समुद्रान्तां पृथिवीं शस्त्रनिर्जिताम् ।
तं जनाः कथयन्तीह यावद्धरति गौरियम् ॥ ६३

पुण्यां रसभृतां भूमिं यो ददाति पुरन्दर ॥ ६३॥

अपि कृत्वा नरः पापं भूमिं दत्त्वा द्विजातये ।
समुत्सृजति तत् पापं जीर्णां त्वचमिवोरगः ॥ ६४॥

सागरान् सरितश्शैलान् काननानि च सर्वशः ।
सर्वमेतन्नरश्शक्र ददाति वसुधां ददत् ॥ ६५॥

[1]तटाकान्युदपानानि स्रोतांसि च सरांसि च ।
स्नेहान् सर्वरसांश्चैव ददाति वसुधां ददत् ॥ ६६॥

ओषधीर्वीर्यसम्पन्ना नगान् पुष्पफलान्वितान् ।
काननोपलशैलांश्च ददाति वसुधां ददत् ॥ ६७॥

अग्निष्टोमप्रभृतिभिर् इष्ट्वा च स्वाप्तदक्षिणैः ।
न तत् फलमुपाश्नाति भूमिदानाद्यदश्नुते ॥ ६८॥

दाता दशानुगृह्णाति दश हन्ति तथाऽऽक्षिपन् ।
पूर्वदत्तां हरन् भूमिं नरकायोपगच्छति ॥ ६९॥

न ददाति प्रतिश्रुत्य दत्त्वा वा हरते तु यः ।
स बद्धो वारुणैः पाशैस् तप्यते मृत्युशासनात् ॥ ७०॥

आहिताग्निं सदायज्ञं कृशभृत्यं प्रियातिथिम् ।
ये भरन्ति द्विजश्रेष्ठं नोपसर्पन्ति ते यमम् ॥ ७१॥

ब्राह्मणेष्वृणभूतं स्यात् पार्थिवस्य पुरन्दर ।
इतरेषां तु वर्णानां तारयेद् भृशदुर्बलान् ॥ ७२॥

नाच्छिन्द्यात् स्पार्शितां भूमिं परेण त्रिदशाधिप ।
ब्राह्मणाय सुरश्रेष्ठ कृशभृत्याय कञ्चन ॥ ७३॥

अथाश्रु पतितं तेषां दीनानामवसीदताम् ।
ब्राह्मणानां हृते क्षेत्रे हन्यात् त्रिपुरुषं कुलम् ॥ ७४॥

---

1. अ-ख—अर्धचतुष्टयं नास्ति

भूमिपालं च्युतं राष्ट्राद् यस्तु संस्थापयेत् पुनः ।
तस्य वासस्सहस्राक्ष नाकपृष्ठे महीयते ॥ ७५॥

[1]इक्षुभिस्सन्ततां भूमिं यवगोधूमशाद्वलाम् ।
गोश्ववाहनसम्पूर्णां यो ददाति वसुन्धराम् ॥ ७६॥

विमुक्तस्सर्वपापेभ्यस् स्वर्गलोके महीयते ॥ ७७

निधिगर्भां ददद्भूमिं सर्वरत्नपरिच्छदाम् ।
अक्षयाँल्लभते लोकान् भूमिसत्रं हि तस्य तत् ॥ ७८

विधूय कलुषं सर्वं विरजास्सम्मतस्सताम् ।
लोके महीयते सद्भिर् यो ददाति वसुन्धराम् ॥ ७९

यथाऽप्सु पतितश्शक्र तैलबिन्दुर्विसर्पति ।
तथा भूमिकृतं दानं सस्ये सस्ये विसर्पति ॥ ८०

ये रणाग्रे महीपालाश् शूरास्समितिशोभनाः ।
वध्यन्तेऽभिमुखाश्शक्र ब्रह्मलोकं व्रजन्ति ते ॥ ८१

नृत्तगीतपरा नार्यो दिव्यमाल्यविभूषिताः ।
उपतिष्ठन्ति देवेन्द्र [2]सदा भूमिप्रदं दिवि ॥ ८२

[3]मोदते च सुखं स्वर्गे देवगन्धर्वपूजितः ।
यो ददाति महीं सम्यग् विधिनेह द्विजातये ॥ ८३

---

1. अ—अर्धश्लयं नास्ति
2. क-घ—ब्रह्मलोके धराप्रदम्
3. अ-ख—अर्धचतुष्टयं नास्ति

शतमप्सरसश्चैव दिव्यमाल्यविभूषिताः ।
उपतिष्ठन्ति देवेन्द्र ब्रह्मलोके धराप्रदम् ॥ ८४

उपतिष्ठन्ति पुण्यानि सदा भूमिप्रदं नरम् ।
शङ्खं भद्रासनं छत्रं वराश्वा वरवारणाः ॥ ८५

भूमिप्रदानपुष्पाणि हिरण्यनिचयास्तथा ।
आज्ञा सदाऽप्रतिहता जयशब्दो भवत्यथ ॥ ८६

भूमिदानस्य पुष्पाणि फलं स्वर्गः पुरन्दर ।
हिरण्यपुष्पाण्योषध्यः बृहत्काञ्चनशाद्वलाः ॥ ८७

अमृतप्रभवां भूमिं प्राप्नोति पुरुषो ददत् ॥ ८७॥

नास्ति भूमिसमं दानं नास्ति [1]भूमिसमो गुरुः ।
नास्ति सत्यसमो धर्मो नास्ति दानसमो निधिः ॥ ८८॥

भीष्मः—

एतदाङ्गिरसाच्छ्रुत्वा वासवो वसुधामिमाम् ।
वसुरत्नसमाकीर्णां ददावाङ्गिरसे तदा ॥ ८९॥

य इमं श्रावयेच्छ्राद्धे भूमिदानस्य संस्तवम् ।
न तस्य रक्षसां भागो नासुराणां भवत्युत ॥ ९०॥

अक्षयं च भवेद्दत्तं पितृभ्यस्तन्न संशयः ।
तस्माच्छ्राद्धेष्विदं विप्रो भुञ्जतश्श्रावयेद्द्विजान् ॥ ९१॥

---

1. क—मन्त्र ब—मातृ

इत्येतत् सर्वदानानां श्रेष्ठमुक्तं तवानघ ।
मया भरतशार्दूल किं भूयश्श्रोतुमिच्छसि ॥ ९२॥

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां
अनुशासनपर्वणि द्विपञ्चाशोऽध्यायः ॥ ५२ ॥
॥ ८९ ॥ आनुशासनिकपर्वणि द्विपञ्चाशोऽध्यायः ॥ ५२ ॥
[अस्मिन्नध्याये ९२॥ श्लोकाः]

॥ त्रिपञ्चाशोऽध्यायः ॥

भीष्मेण युधिष्ठिरं प्रत्यन्नदानप्रशंसनपूर्वकं तत्फलकथनम् ॥

युधिष्ठिरः—

कानि दानानि लोकेऽस्मिन् दातुकामो महीपतिः ।
गुणाधिकेभ्यो विप्रेभ्यो दद्याद्भूरतसत्तम ॥ १

केन तुष्यन्ति ते सद्यस् तुष्टाः किं प्रदिशन्त्युत ।
सर्वमेतन्महाराज फलं पुण्यकृतं महत् ॥ २

दत्तं किं फलवद्राजन्निह लोके परत्र च ।
भगवञ् श्रोतुमिच्छामि तन्मे विस्तरतो वद ॥ ३

भीष्मः—

इममर्थं पुरा पृष्टो नारदो देवदर्शनः ।
यदुक्तवानसौ तन्मे गदतश्शृणु भारत ॥ ४

नारदः—

अन्नमेव प्रशंसन्ति देवास्सर्षिगणाः पुरा ।
लोकतन्त्रं हि यज्ञाश्च सर्वमन्ने प्रतिष्ठितम् ॥ ५

अन्नेन सदृशं दानं न भूतं न भविष्यति ।
तस्मादन्नं विशेषेण दातुमिच्छन्ति मानवाः ॥ ६

अन्नमूर्जस्करं लोके प्राणाश्चान्ने प्रतिष्ठिताः ।
अन्नेन साध्यते सर्वं विश्वं जगदिदं प्रभो ॥ ७

अन्नाद्गृहस्थो लोकेऽस्मिन् भिक्षवस्तत एव च ।
अन्नात् प्रभवति प्राणः प्रत्यक्षं नात्र संशयः ॥ ८

कुटुम्बं पीडयित्वाऽपि ब्राह्मणाय महात्मने ।
दातव्यं भिक्षवे चान्नम् आत्मनो भूतिमिच्छता ॥ ९

ब्राह्मणायाभिरूपाय यो ददात्यन्नमर्थिने ।
निदधाति निधिश्रेष्ठं पारलौकिकमात्मनः ॥ १०

श्रान्तमध्वनि वर्तन्तं वृद्धमर्हमुपस्थितम् ।
अर्चयेद्भूतिमन्विच्छन् गृहस्थो गृहमागतम् ॥ ११

क्रोधमुत्पतितं हित्वा सुशीलो वीतमत्सरः ।
अन्नदः प्राप्नुते राजन् दिवि चेह महत् सुखम् ॥ १२

नावमन्येदभिगतं न प्रणुद्यात् कथञ्चन ।

अपि श्वपाके शुनि वा [1]ह्यन्नदानं प्रतिष्ठितम् ॥ १३

यो दद्यादपरिक्लिष्टम् अन्नमध्वनि वर्तते ।
श्रान्तायाहूतपूर्वाय स महत्त्वमवाप्नुयात् ॥ १४

पितॄन् देवानृषीन् विप्रान् अतिथींश्च जनाधिप ।
यो नरः प्रीणयत्यन्नैस् तस्य पुण्यफलं महत् ॥ १५

कृत्वाऽपि पातकं कर्म यो दद्यादन्नमर्थिने ।
ब्राह्मणाय विशेषेण न स पापेन युज्यते ॥ १६

ब्राह्मणेष्वेव यद्दानम् अन्नं शूद्रे महाफलम् ।
अन्नदानं हि शूद्रे च ब्राह्मणे च विशिष्यते ॥ १७

न पृच्छेद्गोत्रचरणं स्वाध्यायं देशमेव वा ।
[2]भिक्षितो ब्राह्मणेनान्नं दद्यादेवाविचारतः ॥ १८

अन्नदस्यान्नदा वृक्षास् सर्वकामफलान्विताः ।
भवन्तीह तथाऽमुत्र नृपते नात्र संशयः ॥ १९

आशंसन्ते हि पितरस् सुवृष्टिमिव कर्षकाः ॥ १९॥

अस्माकमपि पुत्रो वा पौत्रो वाऽन्नं प्रदास्यति ॥ २०

ब्राह्मणो हि महद्भूतं स्वयं देहीति याचते ।

---

1. ख—नान्नदानं प्रविश्यति 2. क-घ—भिक्षवे ब्राह्मणाया

अकामो वा सकामो वा दत्त्वा पुण्यमवाप्नुयात् ॥ २१

ब्राह्मणस्सर्वभूतानाम् अतिथिः प्रसृताग्रभुक् ।
विप्रा यमभिगच्छन्ति भिक्षमाणा गृहं सदा ॥ २२

सत्कृताश्च निवर्तन्ते [1]तदतीव प्रवर्धते ।
महाभागे कुले जन्म प्रेत्य प्राप्नोति भारत ॥ २३

दत्त्वा त्वन्नं नरो लोके तस्य स्थानमनुत्तमम् ।
स्विष्टमृष्टान्नदायी तु स्वर्गे भवति सत्कृतः ॥ २४

अन्नं प्राणा नराणां हि सर्वमन्ने प्रतिष्ठितम् ।
[2]अन्नदः पशुमान् [3]पुत्री धनवान् भोगवानपि ॥ २५

प्राणवांश्चापि भवति रूपवांश्च नराधिप ।
अन्नदः प्राणदो लोके सर्वदः प्रोच्यते तु सः ॥ २६

अन्नं हि दत्त्वाऽतिथये ब्राह्मणाय यथाविधि ।
प्रदाता [4]सर्वमाप्नोति दैवैश्चाप्यभिपूज्यते ॥ २७

ब्राह्मणो हि महद्भूतं क्षेत्रं चरति पादवत् ।
उप्यते यत्र यद्बीजं तद्धि पुण्यफलं महत् ॥ २८

प्रत्यक्षं प्रीतिजननं भोक्तृदात्रोर्भवत्युत ।
सर्वाण्यन्यानि दानानि परोक्षफलवन्त्युत ॥ २९

---

1. अ—दाता चैव
2. ख—इतस्त्रयोदशार्धानि न सन्ति
3. क-ब—पुत्रधनवान् हेमवानपि
4. घ—सुख

अन्नाद्धि प्रभवं विद्धि [1]रतिरन्नाद्धि पार्थिव ।
धर्मार्थावन्नतो विद्धि रोगनाशं तथाऽऽत्मनः ॥ ३०

अन्नं ह्यमृतमित्याह पुरा काले प्रजापतिः ।
अन्नं दिवं भुवं खं च सर्वमन्ने प्रतिष्ठितम् ॥ ३१

अन्नप्रणाशे भिद्यन्ते शरीरे पञ्च धातवः ।
बलं बलवतोऽपीह प्रणश्यत्यन्नहानिभिः ॥ ३२

आवाहाश्च विवाहाश्च यज्ञाश्चान्नमृते तथा ।
न वर्तन्ते नरश्रेष्ठ ब्रह्म चानुप्रहीयते ॥ ३३

[2]अन्नतस्सर्वमेतद्धि यत्किञ्चित् स्थाणु जङ्गमम् ।
त्रिषु लोकेषु धर्मार्थम् अन्नं देयं सदा बुधैः ॥ ३४

अन्नदस्य मनुष्यस्य बलमोजो यशस्सुखम्
कीर्तिश्च वर्धते शश्वत् त्रिषु लोकेषु पार्थिव ॥ ३५

मेघेषु कं सन्निधत्ते प्राणानां पवनश्शिवः
तच्च मेघगतं वारि शक्रो वर्षति भारत ॥ ३६

आदत्ते च रसं भौमम् आदित्यस्स्वगभस्तिभिः ।
वायुरादित्यतस्स्वं च रसादेव प्रजापतिः ॥ ३७

तद्यदा मेघतो वारि पतितं भवति क्षितौ ।

---

1. क—अन्नमन्ना ख—वृद्धिरन्ना
2. ख-घ—अन्नदस्सत्यमे

तदा वसुमती देवी स्निग्धा भवति भारत ॥ ३८

ततस्सस्यानि रोहन्ति येन वर्तयते जगत् ।
मांसमेदोस्थि[1]शुक्राणां प्रादुर्भावस्ततः पुनः ॥ ३९

सम्भवन्ति ततश्शुक्रात् प्राणिनः पृथिवीपते ।
अग्नीषोमौ हि तच्छुक्रम् प्रजातं पुष्यतश्च ह ॥ ४०

एवमन्नञ्च सूर्यश्च पवनश्शुक्रमेव च ।
एक एव स्मृतो राशिस् तिर्यग् भूतानि जज्ञिरे ॥ ४१

प्राणान् ददाति भूतानां तेजश्च भरतर्षभ ।
गृहमभ्यागतायाशु यो दद्यादन्नमर्थिने ॥ ४२

भीष्मः—

नारदेनैवमुक्तोऽहम् अन्नदानं सदा नृप ।
अनसूयुस्त्वमप्यन्नं तस्माद्देहि ततः परम् ॥ ४३

दत्त्वाऽन्नं विधिवद्राजन् विप्रेभ्यस्त्वमपि प्रभो ।
यथावदनुरूपेभ्यस् ततस्स्वर्गमवाप्स्यसि ॥ ४४

अन्नदानं हि ये लोकास् तांस्त्वं शृणु नराधिप ।
भवनानि प्रकाशन्ते दिवि तेषां महात्मनाम् ॥ ४५

नानासंस्थानरूपाणि नानास्तम्भान्वितानि च ।
चन्द्रमण्डलशुभ्राणि किङ्किणीजालवन्ति च ॥ ४६

---

1. क—भक्ष्याणां

तरुणादित्यवर्णानि स्थावराणि चराणि च ।
अनेकशतभौमानि सान्तर्जलवनानि च ॥ ४७

वैडूर्यार्कप्रकाशानि रौप्यरुक्ममयानि च ।
सर्वकामफलाश्चापि वृक्षा भवनसंस्थिताः ॥ ४८

वाप्यो वीर्य्यसभाः कूपा दीर्घिकाश्चापि सर्वशः ।
[1]घोषवन्ति च यानानि युक्तान्यथ सहस्रशः ॥ ४९

भक्ष्यभोज्यमयाश्शैला वासांस्याभरणानि च ।
क्षीरं स्रवन्त्यस्सरितस् तथा चैवान्नपर्वताः ॥ ५०

प्रासादाः पाण्डुराभ्राभाश् शय्याश्च कनकोज्ज्वलाः ।
तानन्नदाः प्रपद्यन्ते तस्मादन्नप्रदो भव ॥ ५१

एते लोकाः पुण्यकृताम् अन्नदानां महात्मनाम् ।
तस्मादन्नं विशेषेण दातव्यं मानवैर्भुवि ॥ ५२

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां
अनुशासनपर्वणि त्रिपञ्चाशोऽध्यायः ॥ ५३ ॥
॥ ८९ ॥ आनुशासनिकपर्वणि त्रिपञ्चाशोऽध्यायः ॥ ५३ ॥
[अस्मिन्नध्याये ५२ श्लोकाः]

---

1. क-घ—पल्लवन्ति

॥ चतुःपञ्चाशोऽध्यायः ॥

भीष्मेण युधिष्ठिरं प्रत्यश्विन्यादिनक्षत्रयोगेऽन्नदानफलप्रतिपादक-नारददेवकीसंवादानुवादः ॥ १ ॥ जलादिदानफलप्रतिपादनम् ॥ २ ॥

युधिष्ठिरः—

श्रुतं मे भवतो वाक्यम् अन्नदानस्य यो विधिः ।
नक्षत्रयोगस्येदानीं दानकल्पं ब्रवीहि मे ॥ १

भीष्मः—

अत्राप्युदाहरन्तीमम् इतिहासं पुरातनम् ।
देवक्याश्चैव संवादं देवर्षेर्नारदस्य च ॥ २

द्वारकामनुसम्प्राप्तं नारदं देवदर्शनम् ।
पप्रच्छेदं नृप प्रश्नं देवकी धर्मदर्शिनी ॥ ३

तस्यास्तु पृच्छमानाया देवर्षिर्नारदस्तदा ।
आचष्ट विधिवत् सर्वं यत् तच्छृणु विशां पते ॥ ४

नारदः—

कृत्तिकासु महाभागे पायसेन सुसर्पिषा ।
सन्तर्प्य ब्राह्मणान् साधूँल्लोकानाप्नोत्यनुत्तमान् ॥ ५

रोहिण्यां प्रथितैर्माँसैर् [1]अन्नेन सह सर्पिषा ।

1. क-घ—रसैरन्नेन सर्पिषा

पयोऽनुपानं दातव्यम् आनृण्यार्थं द्विजातये ॥ ६

दोग्ध्रीं दत्त्वा सवत्सां तु नक्षत्रे सोमदैवते ।
उह्यते मानुषाल्लोकात् स्वर्गलोकमनुत्तमम् ॥ ७

आर्द्रायां कृसरं दत्त्वा तैलमिश्रमुपोषितः ।
नरस्तरति दुर्गाणि क्षुरधारांश्च पर्वतान् ॥ ८

अपूपान् पुनर्वसौ दत्त्वा तथैवान्नानि शोभने ।
यशस्वी रूपसम्पन्नो बह्वन्नो जायते कुले ॥ ९

पुष्ये तु कनकं दत्त्वा कृतं चाऽकृतमेव च ।
अनालोकेषु लोकेषु सोमवत्सु विराजते ॥ १०

आश्लेषा[1]यां तु यो रूप्यम् वृषभं वा प्रयच्छति ।
[2]स सर्पभयनिर्मुक्तश् शास्त्रवानधितिष्ठति ॥ ११

मघासु तिलपूर्णानि वर्धमानानि मानवः ।
प्रदाय पुत्रपशुमान् इह प्रेत्य च मोदते ॥ १२

फल्गुनीपूर्वसमये ब्राह्मणस्समुपोषितः ।
प्रणीतं तक्रसम्मिश्रं दत्त्वा सौभाग्यमृच्छति ॥ १३

घृतक्षीरसमायुक्तं विधिवत् षाष्टिकौदनम् ।
उत्तराविषये दत्त्वा स्वर्गलोके महीयते ॥ १४

यद्यत् प्रदीयते दानम् उत्तराविषये नरैः ।

1. क-घ—सु तथा
2. क-ख-घ—अर्धपञ्चकं नास्ति

महाफलमनन्तं च तद्भवति भूरिशः ॥ १५

हस्ते हस्तिरथं दत्त्वा चतुर्युक्तमुपोषितः ।
प्राप्नोति परमाँल्लोकान् पुण्यान् कामसमन्वितान् ॥ १६

चित्रायामृषभं दत्त्वा [1]पुण्यगन्धांश्च भारत ।
चरत्यप्सरसां लोके चरते नन्दने तथा ॥ १७

स्वातावपि धनं दत्त्वा यदिष्टतममर्थिनः ।
प्राप्नोति लोकान् स शुभान् इह चैव महद्यशः ॥ १८

विशाखायामनड्वाहं धेनुं दत्त्वा सुसम्मताम् ।
सप्रासङ्गं च शकटं सधान्यं वसु सत्तम ॥ १९

पितॄन् देवांश्च प्रीणाति प्रेत्य चानन्त्यमश्नुते ।
न च दुर्गाण्यवाप्नोति स्वर्गलोकं स गच्छति ॥ २०

दत्त्वा यथेष्टं विप्रेभ्यो वृत्तिमिष्टां स विन्दति ।
[2]नरकादींश्च सङ्क्लेशान् नाप्नोतीति विनिश्चयः ॥ २१

अनुराधासु प्रावारं वस्त्रास्तरमुपोषितः ।
दत्त्वा युगशतं चापि नरस्स्वर्गे महीयते ॥ २२

कालशाकं तु विप्रेभ्यो दत्त्वा विप्रस्समूलकम् ।
ज्येष्ठायामृद्धिमिष्टां वै गतिमिष्टां च विन्दति । २३

---

1. क—स्वर्गलोके महीयते
2: अ—अर्भपञ्चकं नास्ति

मूले मूलफलं दत्त्वा ब्राह्मणेभ्यस्समाहितः ।
पितॄन् प्रीणयते चापि गतिमिष्टां च विन्दति ॥ २४

अथ पूर्वास्वषाढासु दधि[1]पात्राण्युपोषितः ।
कुलवृत्तोपसम्पन्ने ब्राह्मणे वेदपारगे ॥ २५

प्रदाय जायते प्रेत्य कुले सुबहु शोभने ।
उदमन्थं ससर्पिष्कं प्रभूतमधुफाणितम् ॥ २६

दत्त्वोत्तरास्वषाढासु सर्वकामानवाप्यते ।
दुग्धं त्वभिजिते योगे दत्त्वा मधुघृताप्लुतम् ॥ २७

धर्मनित्यो मनीषिभ्यस् स्वर्गलोके महीयते ॥ २७॥

श्रवणे कम्बलं दत्त्वा वस्त्रान्तरितमेव च ।
श्वेतेन याति यानेन स्वर्गलोकानसंवृतान् ॥ २८॥

गोप्रयुक्तं श्रविष्ठासु यानं दत्त्वा समाहितः ।
वस्त्ररश्मिसमायुक्तं प्रेत्य राज्यं प्रवर्तते ॥ २९॥

गन्धाञ् शतभिषग्योगे दत्त्वा चागुरुचन्दनान् ।
प्राप्नोत्यप्सरसां लोकान् प्रेत्य गन्धांश्च शोभनान् ॥ ३०॥

पूर्वप्रोष्ठपदायोगे छागमांसं प्रदाय तु ।
सर्वभक्षफलोपेतं स वै प्रेत्य सुखी भवेत् ॥ ३१॥

औरभ्रमुत्तरायोगे यस्तु मांसं प्रयच्छति ।

---

1. क-घ—मन्थमुषो

स पितॄन् प्रीणयति वै प्रेत्य चानन्त्यमश्नुते ॥ ३२॥

कांस्योपदोहनां धेनुं रेवत्यां यः प्रयच्छति ।
सा प्रेत्य कामानादाय दातारमुपगच्छति ॥ ३३॥

रथमश्वसमायुक्तं दत्त्वाऽश्विन्यां नरोत्तम ।
हस्त्यश्वरथसम्पन्ने वर्चस्वी जायते कुले ॥ ३४॥

भरणीषु द्विजातिभ्यस् तिलधेनुं प्रदाय वै ।
गास्सुप्रभूताः प्राप्नोति नरः प्रेत्य यशस्तथा ॥ ३५॥

भीष्मः—

इत्येवं लक्षणोद्देशो ह्युक्तो नक्षत्रयोगतः ।
देवक्या नारदेनेह सा स्नुषाभ्योऽब्रवीदिदम् * ॥ ३६॥

सर्वान् कामान् प्रयच्छन्ति ये प्रयच्छन्ति काञ्चनम् ।
इत्येवं भगवानत्रिः पितामहसुतोऽब्रवीत् ॥ ३७॥

पवित्रं शुच्यथायुष्यं पितॄणामक्षयं च तत् ।
सुवर्णं मनुजेन्द्रेण हरिश्चन्द्रेण कीर्तितम् ॥ ३८॥

पानीयदानं परमं दानानां मनुरब्रवीत् ।
तस्मात् कूपांश्च वापीश्च तटाकानि च खानयेत् ॥ ३९॥

सर्वं विनाशयेत् पापं पुरुषस्येह कर्मणः ।

---

* सर्वेषु कोशेषु अत्रैवाध्यायसमाप्तिर्दृश्यते

कूपः प्रवृत्तपानीयस् सुवृत्तस्स हि नित्यशः ॥ ४०॥
सर्वांस्तारयते वंश्यान् यस्य खाते जलाशये ।
गावः पिबन्ति विप्राश्च साधवश्चैव ये नराः ॥ ४१॥
निदाघकाले पानीयं यस्य तिष्ठत्यवारितम् ।
सुदुर्गं विषमं कृच्छ्रं न कदाचिदवाप्नुते ॥ ४२॥
[1]बृहस्पतेर्भगवतः पूष्णश्चैव भगस्य च ।
[2]अश्विनोश्चैव वह्नेश्च प्रीतिर्भवति सर्पिषा ॥ ४३॥
परमं भेषजं ह्येतद् यज्ञानामेतदुत्तमम् ।
रसानामुत्तमं चैतत् फलानां चैतदुत्तमम् ॥ ४४॥
बलकामो यशस्कामः पुष्टिकामश्च नित्यशः ।
घृतं दद्याद् द्विजातिभ्यस् सततं रुचिरार्थवत् ॥ ४५॥
घृतं मासे त्वाश्वयुजि विप्रेभ्यो यः प्रयच्छति ।
[3]तस्मै प्रयच्छतो रूपं प्रीतौ देवाविहाश्विनौ ॥ ४६॥
पायसं सर्पिषा मिश्रं द्विजेभ्यो यः प्रयच्छति ।
गृहं तस्य न रक्षांसि धर्षयन्ति कदाचन ॥ ४७॥
पिपासया न म्रियते सोपच्छन्दश्च दृश्यते ।
न प्राप्नुयाच्च व्यसनं करकान् यः प्रयच्छति ॥ ४८॥

---

1. क-घ—इदमर्धं नास्ति
2. क-घ—बृहस्पतेश्च वह्नेश्च
3. अ—अर्धद्वयं नास्ति

प्रयतो ब्राह्मणाग्र्येभ्यश् श्रद्धया परया युतः ।
उपस्पर्शनपड्भागं लभते पुरुषस्सदा ॥ ४९॥
यस्साधनार्थं काष्ठानि ब्राह्मणेभ्यः प्रयच्छति ।
प्रतापार्थं च राजेन्द्र भुक्तवद्भ्यस्सदा नरः ॥ ५०॥
सिद्ध्यन्त्यर्थास्सदा तस्य कार्याणि विविधानि च ।
उपर्युपरि शत्रूणां [1]वपुषा दीप्यते च सः ॥ ५१॥
भगवांश्चास्य सम्प्रीतो वह्निर्भवति नित्यदा ।
[2]न तं त्यजन्ते पशवस् सङ्ग्रामे विजयत्यपि ॥ ५२॥
पुत्रान्श् श्रियं च लभते यश्छत्रं सम्प्रयच्छति ।
चक्षुर्व्याधिं न लभते यज्ञभागमथाश्नुते ॥ ५३॥
निदाघकाले वर्षे वा यश्छत्रं सम्प्रयच्छति ।
नास्य कश्चिन्मनोदाहः कदाचिदपि जायते ॥ ५४॥
कृच्छ्रात् स विषमाच्चैव विप्रो मोक्षमवाप्नुते ॥ ५५
प्रधानं सर्वदानानां शकटस्य विधीयते ।
एवमाह महाभागश् शाण्डिल्यो भगवानृषिः ॥ ५६

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां
अनुशासनपर्वणि चतुःपञ्चाशोऽध्यायः ॥ ५४ ॥
॥ ८९ ॥ आनुशासनिकपर्वणि चतुःपञ्चाशोऽध्यायः ॥ ५४ ॥
[अस्मिन्नध्याये ५६ श्लोकाः]

---

1. क-घ—धनुषा दीप्ततेजसः 2. घ—न तं जयन्ते रिपवः

॥ पञ्चपञ्चाशोऽध्यायः ॥

भीष्मेण युधिष्ठिरं प्रति जलतिलभूम्यन्नगोदानादिफलकथनम् ॥

युधिष्ठिरः—

दह्यमानाय विप्राय यः प्रयच्छत्युपानहौ ।
यत् फलं तस्य भवति तन्मे ब्रूहि पितामह ॥ १

भीष्मः—

उपानहौ प्रयच्छेद्यो ब्राह्मणेभ्यस्समाहितः ।
मर्दते कण्टकान् सर्वान् विषमान् निस्तरत्यपि ॥ २
स शत्रूणामुपरि च सन्तिष्ठति युधिष्ठिर ।
यानं चाश्वतरीयुक्तं तस्य शुभ्रं विशां पते ॥ ३

युधिष्ठिरः—

[1]यत् फलं तिलदाने च भूमिदाने च कीर्तितम् ।
गोदाने चान्नदाने च भूयस्तद्ब्रूहि कौरव ॥ ४

भीष्मः—

शृणु त्वमपि कौन्तेय तिलदानस्य यत् फलम् ।
निशम्य च यथान्यायं प्रयच्छ कुरुसत्तम ॥ ५
पितॄणां प्रथमं भोज्यं तिलास्सृष्टास्स्वयम्भुवा ।

1. घ—अर्धद्वयं नास्ति

तिलदानेन वै पुण्यं पितृलोके प्रमोदते ॥ ६

माघमासे तिलान् यस्तु ब्राह्मणेभ्यः प्रयच्छति ।
सर्वसत्त्वसमाकीर्णं नरकं स न पश्यति ॥ ७

सर्वकामैस्स यजति यस्तिलैर्यजते पितॄन् ।
न चाकामेन दातव्यं तिलैश्श्राद्धं कथञ्चन ॥ ८

महर्षेः काश्यपस्यैते गात्रेभ्यः प्रसृतास्तिलाः ।
ततो दिव्यं गता भावं प्रदानेन तिलाः प्रभो ॥ ९

पौष्टिका रूपदाश्चैव तथा पापविनाशनाः ।
तस्मात् सर्वप्रदानेभ्यस् तिलदानं विशिष्यते ॥ १०

अजस्तम्भश्च मेधावी शङ्खश्च लिखितस्तथा ।
महर्षिर्गौतमश्चापि तिलदानैर्दिवं गताः ॥ ११

तिलहोमपरा विप्रास् सर्वे संयतमैथुनाः ।
[1]समं गव्येन हविषा विप्रवृत्तिषु संस्थिताः ॥ १२

सर्वेषामन्नदानानां तिलदानं परं स्मृतम् ।
अक्षय्यं सर्वदानानां तिलदानमिहोच्यते ॥ १३

उत्सर्गे च पुरा हव्ये कुशिकर्षिः परन्तप ।
तिलैरग्नित्रयं हुत्वा प्राप्तवान् गतिमुत्तमाम् ॥ १४

इति प्रोक्तं कुरुश्रेष्ठ तिलदानमनुत्तमम् ।

---

1. घ—समं दिव्येन वपुषा

विधानं योगविधिना तिलानामिह शस्यते ॥ १५

अत ऊर्ध्वं निबोधेमं देवानां यष्टुमिच्छताम् ।
समागमं महाराज ब्रह्मणा वै स्वयम्भुवा ॥ १६

देवास्समेत्य ब्रह्माणं भूमिभागमियक्षवः ।
शुभं देशमयाचन्त यजेम इति पार्थिव ॥ १७

देवाः—

भगवंस्त्वं प्रभुर्भूमेस् स्वर्गस्य त्रिदिवस्य च ।
यजेम हि महाभाग यज्ञं भवदनुज्ञया ॥ १८

[1]त्वदनुज्ञातभूमिर्हि यज्ञस्य फलमश्नुते ।
त्वं हि सर्वस्य जगतस् स्थावरस्य चरस्य च ॥ १९

प्रभुर्भवसि तस्मात् त्वं समनुज्ञातुमर्हसि ॥ १९॥

ब्रह्मा—

ददामि मेदिनीभागं भवद्भ्योऽहं सुरर्षभाः ।
यस्मिन् देशे करिष्यध्वं यज्ञं काश्यपनन्दनाः ॥ २०॥

देवाः—

भगवन् कृतकामास्तु यक्ष्यामः प्राप्तदक्षिणाः ।
शुद्धं तु देशं मुनयः पर्युपासन्तु नित्यदा ॥ २१॥

भीष्मः—

ततोऽगस्त्यश्च कण्वश्च भृगुरत्रिर्वृषाकपिः ।

---

1. अ—ततोऽनुष्ठातुमिच्छामो ख—ततोऽनुज्ञातु

असितो देवलश्चैव देवयज्ञमुपागमन् ॥ २२॥
ततो देवा महाभागा ईजिरे यज्ञमच्युतम् ।
तथा समापयामासुर् यथाकालं सुरर्षभाः ॥ २३॥
ततस्तु यज्वा त्रिदशा हिमवत्यचलोत्तमे ।
षष्ठमंशं क्रतोस्तस्य भूमिदातुः प्रचक्रिरे ॥ २४॥
प्रादेशमात्रं भूमेस्तु यो दद्यादनुपस्कृतः ।
न सीदति स कृच्छ्रेषु न च दुर्गाण्यवाप्नुते ॥ २५॥
शीतवातातपसहां यागभूमिं सुसंस्कृताम् ।
प्रदाय सुरलोकस्थः पुण्यान्तं हि न चाप्नुते ॥ २६॥
मुदितो वसते प्राज्ञश् शक्रेण सह पार्थिव ।
प्रतिश्रयप्रदाता च सोऽपि स्वर्गे महीयते ॥ २७॥
अध्यापककुले जातश् श्रोत्रियो नियतेन्द्रियः ।
गृहे यस्य वसेत्तुष्टः प्रधानं लोकमश्नुते ॥ २८॥
तथा गवार्थे शरणं शीतवातसहं महत् ।
आसप्तमं तारयति कुलं भरतसत्तम ॥ २९॥
क्षेत्र[1]भूमिं ददल्लोके पुत्रश्रियमवाप्नुयात् ।
रत्नभूमिं प्रदत्त्वा तु कुलवंशं विवर्धयेत् ॥ ३०॥
न चोषरां न निर्दग्धां महीं दद्यात् कथञ्चन ।

1. क-घ—भूतमिदं लोके पुत्र

न श्मशानपरीतां च न च पापनिषेविताम् ॥ ३१॥
पारक्ये भूमिदेशे च पितॄणां निर्वपेत्तु यः ।
[1]तद्भूमिस्वामिपितृभिश् श्राद्धकर्म विहन्यते ॥ ३२॥
तस्मात् क्रीत्वा महीं दत्त्वा स्वल्पामपि विचक्षणः ।
पिण्डः पितृभ्यो दत्तो वै तस्यां भवति शाश्वतः ॥ ३३॥
अटवी पर्वताश्चैव नदीतीर्थानि यानि च ।
सर्वाण्यस्वामिकान्याहुर् न हि तत्र परिग्रहः ॥ ३४॥
इत्येतद्भूमिदानस्य फलमुक्तं विशां पते ।
अतः परं तु गोदानं कीर्तयिष्यामि तेऽनघ ॥ ३५॥
गावोऽधिकास्तपस्विभ्यो यस्मात् सर्वेभ्य एव च ।
तस्मान्महेश्वरो देवस्तपस्ताभिस्समाश्रितः ॥ ३६॥
ब्रह्मलोके वसन्त्येतास् सोमेन भरतर्षभ ।
यां तां ब्रह्मर्षयस्सिद्धाः प्राप्नुवन्ति परां गतिम् ॥ ३७॥
पयसा हविषा दद्ना शकृताप्यथ चर्मणा ।
अस्थिभिश्चोपकुर्वन्ति शृङ्गैर्वालैश्च भारत ॥ ३८॥
नासां शीतातपौ स्यातां यदेताः कर्म कुर्वते ।
न वर्षविषमं वाऽपि दुःखमासां भवत्युत ॥ ३९॥
ब्राह्मणैस्सहिता यान्ति तस्मात् परतरं पदम् ।

1. क-घ—तद्भूमिदस्य

एकं गोब्राह्मणं तस्मात् प्रवदन्ति मनीषिणः ॥ ४०॥

रन्तिदेवस्य यज्ञे ताः पशुत्वेनोपकल्पिताः ।
ततश्चर्मण्वती राजन् गोचर्मभ्यः प्रवर्तिता ॥ ४१॥

पशुत्वाच्च विनिर्मुक्ताः प्रदानायोपकल्पिताः ॥ ४२

ता इमा विप्रमुख्येभ्यो यो ददाति महीपते ।
निस्तरेदापदं कृच्छ्रां विषमस्थोऽपि पार्थिव ॥ ४३

गवां सहस्रदः प्रेत्य नरकं नैव गच्छति ।
[1]सर्वत्र विजयं चापि लभते मनुजाधिप ॥ ४४

अमृतं वै गवां क्षीरम् इत्याह त्रिदशाधिपः ।
तस्माद् ददाति यो धेनुम् अमृतं स प्रयच्छति ॥ ४५

आकुञ्चितमपि ह्येतद्धव्यं वेदविदो विदुः ।
[2]हव्यं ददाति यो धेनुं स हव्यं सम्प्रयच्छति ॥ ४६

स्वर्गो वै मूर्तिमांस्तेषाम् ऋषभं वै गवां पतिम् ।
विप्रे गुणयुते दद्यात् स वै स्वर्गे महीयते ॥ ४७

प्राणा वै प्राणिनामेताः प्रोच्यन्ते भरतर्षभ ।
तस्माद् ददाति यो धेनुं प्राणान् वै सम्प्रयच्छति ॥ ४८

गावश्शरण्या भूतानाम् इति वेदविदो विदुः ॥ ४८॥

1. अ—इदमर्धत्रयं नास्ति
2. ख—भव्यां

न वधार्थं प्रदातव्या न कीनाशे न नास्तिके ।
गोजीविने न दातव्या तथा गौः पुरुषर्षभ ॥ ४९॥

[1]गोरसानां न विक्रेतुर् अपञ्चयजनस्य च ॥ ५०

[2]ददात्येतादृशानां यो नरो गाः पापकर्मणाम् ।
अक्षय्यं नरकं यातीत्येवमाहुर्मनीषिणः ॥ ५१

न कृशां वाऽपवत्सां वा वन्ध्यां क्रोधान्वितां तथा ।
न व्यङ्गां न परिश्रान्तां दद्याद्गां ब्राह्मणाय वै ॥ ५२

दशगोसहस्रदस्सम्यक् शक्रेण सह मोदते ।
अक्ष[3]य्यानश्नुते लोकान् नरश्शतसहस्रशः ॥ ५३

इत्येवं गोप्रदानं च [4]तिलदानं च कीर्तितम् ।
तथा भूमिप्रदानं च शृणुष्वान्नं च भारत ॥ ५४

अन्नदानं प्रधानं च कौन्तेय परिचक्षते ।
अन्नस्य हि प्रदानेन रन्तिदेवो दिवं गतः ॥ ५५

श्रान्ताय क्षुधितायान्नं यः प्रयच्छति भूमिप ।
स्वायम्भुवं महाभागं स पश्यति नराधिप ॥ ५६

न हिरण्यैर्न वासोभिर् नाश्वदानेन भारत ।

---

1. घ—नास्तीदमर्धम्
2. क-घ—ददात्ते तादृशानां यो नीरोगाः
3. ख-घ—यांल्लभते
4. क-घ—तिलानां चैव कीर्तनम्

प्राप्नुवन्ति नराश्रेयो यथेहान्नप्रदाः प्रभो ॥ ५७

अन्नं हि परमं द्रव्यम् अन्नं श्रीश्च परा मता ।
अन्नात् प्राणः प्रभवति तेजो वीर्यं बलं तथा ॥ ५८

सन्ध्यो ददाति यश्चान्नं सदैकाग्रमना नरः ।
न स दुर्गाण्यवाप्नोति तमेवाह पराशरः ॥ ५९

अर्चयित्वा यथान्यायं देवेभ्योऽन्नं निवेदयेत् ।
यदन्नो हि नरो राजंस् तदन्नास्तस्य देवताः ॥ ६०

कौमुद्यां शुक्लपक्षे तु योऽन्नदानं करोत्युत ।
स सन्तरति दुर्गाणि प्रेत्य चानन्त्यमश्नुते ॥ ६१

अभुक्त्वाऽतिथये चान्नं प्रयच्छेद्यस्समाहितः ।
स वै ब्रह्मविदां लोकान् प्राप्नुयाद्भरतर्षभ ॥ ६२

सुकृच्छ्रामापदं प्राप्तश् चान्नदः पुरुषस्तरेत् ।
पापं तरति चैवेह दुष्कृतं चापकर्षति ॥ ६३

इत्येतदन्नदानस्य तिलदानस्य चैव हि ।
भूमिदानस्य च फलं गोदानस्य च कीर्तितम् ॥ ६४

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां
अनुशासनपर्वणि पञ्चपञ्चाशोऽध्यायः ॥ ५५ ॥
॥ ८९ ॥ आनुशासनिकपर्वणि पञ्चपञ्चाशोऽध्यायः ॥ ५५ ॥
[अस्मिन्नध्याये ६४ श्लोकाः]

॥ षट्पञ्चाशोऽध्यायः ॥

भीष्मेण युधिष्ठिरं प्रति जलप्रभाववर्णनपूर्वकं तद्दानप्रशंसनम् ॥

युधिष्ठिरः—

श्रुतं दानफलं तात यत् त्वया परिकीर्तितम् ।
अन्नन्तु यद्विशेषेण प्रशस्तमिह भारत ॥ १

पानीयदानं परमं कथं चेह महाफलम् ।
इत्येतच्छ्रोतुमिच्छामि विस्तरेण पितामह ॥ २

भीष्मः—

हन्त ते वर्तयिष्यामि यथावद् भरतर्षभ ।
गदतस्तन्ममाद्येह शृणु सत्यपराक्रम ॥ ३

पानीयदानात् प्रभृति सर्वं वक्ष्यामि तेऽनघ ॥ ३॥

यदन्नं यच्च पानीयं सम्प्रदायाश्नुते फलम् ।
न ताभ्यां परमं दानं किञ्चिदस्तीति मे मतिः ॥ ४॥

अन्नात् प्राणभृतस्तात प्रवर्तन्ते हि सर्वशः ।
तस्मादन्नं परं लोके सर्वदानेषु कथ्यते ॥ ५॥

अन्नाद्बलं च तेजश्च प्राणिनां वर्धते सदा ।
अन्नदानमतस्तस्माच् छ्रेष्ठमाह प्रजापतिः ॥ ६॥

सावित्र्या अपि कौन्तेय श्रूयते वचनं शुभम् ।
यच्चेदं नान्यथा चैतद् दैवसत्रे महामखे ॥ ७॥

अन्ने दत्ते नरेन्द्रेण प्राणा दत्ता भवन्त्युत ।
प्राणदानाद्धि परमं न दानमिह विद्यते ॥ ८॥

श्रुतं हि ते महाबाहो लोमशस्य च तद्वचः ।
प्राणान् दत्त्वा कपोताय यत् प्राप्तं शिविना पुरा ॥ ९॥

तां गतिं लभते दत्त्वा द्विजस्यान्नं विशां पते ।
ततो विशिष्टां गच्छन्ति तोयदा इति नश्श्रुतं ॥ १०॥

अन्नं चापि प्रभवति पानीयात् कुरुसत्तम ।
नीरजातेन हि विना न किञ्चित् सम्प्रवर्तते ॥ ११॥

नीरजातश्च भगवान् सोमो ग्रहगणेश्वरः ।
अमृतं च सुधा चैव स्वधा चैव सुरा तथा ॥ १२॥

अन्नौषध्यो महाराज वीरुधश्च जलोद्भवाः ।
[1]देवानाममृतं चान्नं नागानां च सुधा तथा ॥ १३॥

पितॄणां च स्वधा प्रोक्ता पशूनां चापि वीरुधः ॥ १४

पुरा गन्धर्वयक्षेषु पानीयात् सम्प्रवर्तते ॥ १४॥

तस्मात् पानीयदानाद्धि न परं विद्यते क्वचित् ।

---

1. क-घ——अर्धचतुष्टयं नास्ति

यतः प्राणभृतां प्राणास् सम्भवन्ति विशां पते ॥ १५॥
तच्च दद्यान्नरो नित्यं य इच्छेद्भूतिमात्मनः ॥ १६
धन्यं यशस्यमायुष्यं जलदानं विशां पते ।
शत्रूंश्च युधि कौन्तेय सदा जयति तोयदः ॥ १७
सर्वान् कामानवाप्नोति लोकानित्यब्रवीन्मनुः ।
प्रेत्य चानन्त्यमश्नाति पापेभ्यश्च प्रमुच्यते ॥ १८
तोयदो मनुजव्याघ्र स्वर्गं गत्वा महाद्युते ।
अक्षयान् समवाप्नोति [1]कीर्तिं चैव हि शाश्वतीम् ॥ १९

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां
अनुशासनपर्वणि षट्पञ्चाशोऽध्यायः ॥ ५६ ॥
॥ ८९ ॥ आनुशासनिकपर्वणि षट्पञ्चाशोऽध्यायः ॥ ५६ ॥
[अस्मिन्नध्याये १९ श्लोकाः]

---

1. अ—इतः षट्पादा न सन्ति

॥ सप्तपञ्चाशोऽध्यायः ॥

भीष्मेण युधिष्ठिरं प्रति तिलजलदीपादिदानप्रशंसापरयमब्राह्मण-संवादानुवादः ॥

युधिष्ठिरः—

तिलानां कीदृशं दानम् अथ दीपस्य चैव ह ।
अन्नानां वाससां चैव भूय एव ब्रवीहि मे ॥ १

भीष्मः—

अत्राप्युदाहरन्तीमम् इतिहासं पुरातनम् ।
ब्राह्मणस्य च संवादं यमस्य च युधिष्ठिर ॥ २

मध्यदेशे महान् ग्रामो ब्राह्मणानां बभूव ह ।
गङ्गायमुनयोर्मध्ये यामुनस्य गिरेरनु ॥ ३

पर्णशालेति विख्यातो रमणीयो नराधिप ।
विद्वांसस्तत्र भूयिष्ठं ब्राह्मणाश्चावसंस्तथा ॥ ४

अथ प्राह यमः कञ्चित् पुरुषं कृष्णवाससम् ।
रक्ताक्षमूर्ध्वरोमाणं काकजङ्घाक्षिनासिकम् ॥ ५

यमः—

गच्छ त्वं ब्राह्मणग्रामं ततो गत्वा तमानय ।
अगस्त्यं गोत्रतश्चापि नामतश्चापि शर्मिणम् ॥ ६

शमे निविष्टं विद्वांसम् अध्यापकमनारतम् ।
मा चान्यमानयेथास्त्वं सगोत्रं तस्य पार्श्वतः ॥ ७

स हि तादृग्विधस्तेन तुल्योऽध्ययनजन्मना ।
अपत्येषु तथा वृत्ते समस्तैनैव धीमता ॥ ८

तमानय यथोद्दिष्टं पूजा कार्या हि तस्य मे ॥ ८॥

भीष्मः—

स गत्वा प्रतिकूलं तच् चकार च यमाश्रयः ।
तमाक्रम्यानयामास प्रतिषिद्धो यमेन यः ॥ ९॥

तस्मै यमस्समुत्थाय पूजां कृत्वा च वीर्यवान् ।
प्रोवाच नीयतामेष सोऽन्य आनीयतामिति ॥ १०॥

एवमुक्ते तु वचने धर्मराजेन स द्विजः ।
उवाच धर्मराजानं [1]निर्विण्णोऽध्ययनेन वै ॥ ११॥

यो मे कालो भवेच्छिष्टस् तं वसेयमिहाच्युत ॥ १२

यमः—

नाहं कालस्य विहितं प्रपश्यामीह किञ्चन ।
यो हि धर्मं कथयति तं तु जानामि केवलम् ॥ १३

गच्छ विप्र त्वमद्यैव स्वालयं सुमहाद्युते ।
ब्रूहि वा त्वं यथा स्वैरं करवाणि किमित्युत ॥ १४

1. क—निर्वारो व्यसनेन वै घ—निर्वीर्यो व्यसनेन वै

ब्राह्मणः—

शुद्धदानं च सुमहत् पुण्यं स्यात्तद्ब्रवीहि मे ।
सर्वस्य च प्रमाणं तु त्रैलोक्यस्यापि सत्तम ॥ १५

यमः—

शृणु तत्त्वेन विप्रर्षे प्रदानविधिमुत्तमम् ।
तिलाः परमकं दानं पुण्यं चैवेह शाश्वतम् ॥ १६

[1]तिलाश्च सम्प्रदातव्या यथाशक्ति द्विजर्षभ ।
नित्यदानात् सर्वकामांस् तिला निर्वापयन्त्युत ॥ १७

तिलाञ् श्राद्धेषु शंसन्ति दानमेतदनुत्तमम् ।
तान् प्रयच्छस्व विप्रेभ्यो विधिदृष्टेन कर्मणा ॥ १८

तिला भक्षयितव्याश्च [2]दत्त्वा चालभनं च तैः ॥ १८॥

कार्यं सततमिच्छद्भिश् श्रेयस्सर्वात्मना भवेत् ।
तथाऽऽपस्सर्वदा देयास् सर्वजातिष्वसंशयम् ॥ १९॥

पुष्करिण्यस्तटाकानि कूपांश्चैवात्र खानयेत् ।
यदेतद्दुर्लभमिदं मम लोके द्विजोत्तम ॥ २०॥

आपो नित्यं प्रदेयास्ते पुण्यं ह्येतदनुत्तमम् ।
प्रपाश्च कार्या दानार्थं नित्यं ते द्विजसत्तम ॥ २१॥

---

1. क-घ—दिव्याश्च
2. ख—दत्त्वा चातिभवं च तैः घ—दत्त्वा चालशुनं च तैः

[1]भुक्तेः प्रथमदेयं ते पानीयं तु विशेषतः ॥ २२

भीष्मः—

इत्युक्ते सहसा तेन यमदूतेन वै गृहान् ।
नीतश्चकार स तदा सर्वं तद्यमशासनम् ॥ २३

नयित्वा यमदूतोऽपि गृहीत्वा शर्मिणं तदा ।
ययौ स धर्मराजाय न्यवेदयदथापि तम् ॥ २४

तं धर्मराजो धर्मज्ञं पूजयित्वा प्रतापवान् ।
कृत्वा च संविदं तेन विससर्ज यथागतम् ॥ २५

तस्यापि च यमस्सर्वम् उपदेशं चकार ह ।
प्रत्येत्य च स तत् सर्वम् चकारोक्तं यमेन तत् ॥ २६

तथा प्रशंसते दीपान् यमः पितृहितेप्सया ।
[2]तस्माद्दीपप्रदो नित्यं सन्तारयति वै पितॄन् ॥ २७

दातव्यास्सततं दीपास् तस्माद्भरतसत्तम ।
देवानां च पितॄणां च चक्षुष्यास्ते मताः प्रभो ॥ २८

---

1. क-ङ—भुक्तेऽप्यन्ते प्रदेयं ते पानीयं च

2. अ—पानीयार्थ्यार्थितं दृष्ट्वा प्रीत्या दद्यात्त्वरान्वितः ।
यस्त्रे तन्तुप्रमाणेन दीपे निमिषवत्सरम् ॥
गवां रोमप्रमाणेन स्वर्गभोगमुपाश्नुते ।
जले बिन्दुप्रमाणेन तदेतान्युपवर्तय ॥
इत्युक्ते धर्मराजेन यमदूतेन वै गृहान् ।
नीतश्चकार च तदा सर्वं तद्यमशासनम् ॥ [अधिकः पाठः]

रत्नदानं च विधिवत् पुण्यमुक्तं जनाधिप ।
तानि विक्रीय यजते ब्राह्मणेभ्योऽभयङ्करम् ॥ २९

तद्वै ददाति विप्रेभ्यो ब्राह्मणः प्रतिगृह्य वै ।
उभयोस्स्यात्तदक्षय्यं दातुरादातुरेव च ॥ ३०

यो ददाति स्थितिं स्थित्यां तादृशाय प्रतिग्रहम् ।
उभयोरक्षयं धर्मम् [1]स चैनं प्राह धर्मवित् ॥ ३१

वाससां तु प्रदानेन स्वदारनिरतो नरः ।
सुवस्त्रश्च सुवेषश्च भवतीत्यनुशुश्रुम ॥ ३२

गावस्सुवर्णं च तथा तिलश्चैवानुवर्णिताः ।
बहुशः पुरुषव्याघ्र वेदप्रामाण्यदर्शनात् ॥ ३३

विवाहं चैव कुर्वीत पुत्रानुत्पादयेत च ।
पुत्रलाभो हि कौरव्य सर्वलाभाद्विशिष्यते ॥ ३४

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां
अनुशासनपर्वणि सप्तपञ्चाशोऽध्यायः ॥ ५७ ॥
॥ ८९ ॥ आनुशासनिकपर्वणि सप्तपञ्चाशोऽध्यायः ॥ ५७ ॥
[अस्मिन्नध्याये ३४ श्लोकाः]

---

1. क-घ—न वैनः ख—न चैनः

॥ अष्टपञ्चाशोऽध्यायः ॥

भीष्मेण युधिष्ठिरं प्रति गोभूविद्यादानप्रशंसनम् ॥

युधिष्ठिरः—

कथयस्व महाभाग भूमिदानाद्विशिष्यते ।
पृथिवीं क्षत्रियो दद्याद् ब्राह्मणस्तां स्वकर्मणा ॥ १
विधिवत् प्रतिगृह्णीयान्न त्वन्यो दातुमर्हति ॥ १॥
सर्ववर्णैस्तु यच्छक्यं प्रदातुं फलकाङ्क्षिभिः ।
वेदे वा यत् समाम्नातं तन्मे व्याख्यातुमर्हसि ॥ २॥

भीष्मः—

तुल्यनामानि देयानि त्रीणि तुल्यफलानि च ।
सर्वकामफलानीह गावः पृथ्वी सरस्वती ॥ ३॥
यः प्रब्रवीति शिष्याय धर्म्यां ब्राह्मीं सरस्वतीम् ।
पृथिवीगोप्रदानाभ्यां तुल्यं स फलमश्नुते ॥ ४॥
तथैव गाः प्रशंसन्ति न च देयं ततः परम् ।
सन्निकृष्टफलास्ता हि लघ्वर्थाश्च युधिष्ठिर ॥ ५॥
मातरस्सर्वभूतानां गावस्सर्वसुखप्रदाः ।
वृद्धिमाकाङ्क्षता नित्यं गवां कार्यं प्रदक्षिणम् ॥ ६॥

मङ्गलायतनं देव्यस् तस्मात् पूज्यास्सदैव गाः ॥ ७

प्रयोजनं देवकृतं गवां कर्मसु वर्तताम् ।
पूर्वमेकाक्षरं नान्यद् अभिधेयं कथञ्चन ॥ ८

[1]प्रचारे वा निवाते वा बुधो नोद्वेजयेत गाः ।
तृषिता ह्यभिवीक्षन्त्यो नरं हन्युस्सबान्धवम् ॥ ९

[2]पितृसद्मानि सततं देवतायतनानि च ।
पूयन्ते शकृता यासां किं भूयश्चाधिकं ततः ॥ १०

ग्रासमुष्टिं परगवे दद्यात् संवत्सरं तु यः ।
अकृत्वा स्वयमाहारं व्रतं तत् सार्वकामिकम् ॥ ११

स हि पुत्रान् यशोऽर्थं च श्रियं चाप्यधिगच्छति ।
नाशयत्यशुभं चैव दुस्स्वप्नं चाप्यपोहति ॥ १२

युधिष्ठिरः—

देयाः किंलक्षणा गावः काश्चापि परिवर्जयेत् ।
कीदृशाय प्रदातव्या न देयाः कीदृशाय च ॥ १३

भीष्मः—

असद्वृत्ताय पापाय लुब्धायानृतवादिने ।
हव्यकव्यव्यपेताय न देया गौः कथञ्चन ॥ १४

1. क-घ—प्रपाने वाऽतिपाने वा ख—प्रचारे वाऽतिपाने वा×गाः
2. क—अर्धचतुष्टयं नास्ति घ—अर्धत्रयं नास्ति

[1]भिक्षवे बहुपुत्राय श्रोत्रियायाहिताग्नये ।
दत्त्वा दशशतं गावो लोकानाप्नोत्यनुत्तमान् ॥ १५

जुहोति यद्भोजयति यद् ददाति गवां रसैः ।
सर्वस्यैवांशभाग्दाता तन्निमित्तं प्रवर्तितः ॥ १६

यश्चैनमुत्पादयति यश्चैनं त्रायते भयात् ।
[2]यश्चास्य कुरुते वृत्तिं सर्वे ते पितरस्त्रयः ॥ १७

कल्मषं गुरुशुश्रूषा हन्यान्मानो महायशः ।
अपुत्रत्वं त्रयः पुत्राः [3]कुवृत्तिं दश धेनवः ॥ १८

वेदान्तनिष्ठस्य बहुश्रुतस्य
प्रज्ञानतृप्तस्य जितेन्द्रियस्य ।
शिष्टस्य दान्तस्य यतस्य चैव
भूतेषु नित्यं प्रियवादिनश्च ॥ १९

[4]यः क्षुद्भयाद्वै न विकर्म कुर्या-
न्मृदुर्दान्तश्चातिथिर्यस्य नित्यम् ।
वृत्तिं विप्रायातिसृजेत तस्मै
यस्तुल्यदानश्च सपुत्रदारः ॥ २०

---

1. ख-घ—भिक्षते
2 क—अर्धचतुष्टयं पादश्चैको नास्ति घ—अर्धपञ्चकं नास्ति
3. अ-क-घ—प्रवृत्तिं
4. घ—यश्चास्य चैव भूतेषु नित्यं च प्रियवादिना । [अधिकः पाठः]

शुभे पात्रे ये गुणा गोप्रदाने
तावन्तो दोषा ब्राह्मणस्वापहारे ।
[1]सर्वापत्सु ब्राह्मणस्वापहारे
दाराश्चैषां दूरतो वर्जनीयाः ॥ २१

विप्रदारे परहृते [2]विप्रस्वनिचये तथा ।
परित्रायन्ति शक्तास्तु नमस्तेभ्यो मृतास्तु वा ॥ २२

[3]न पालयन्ति चेत्तस्य हन्ता वैवस्वतो यमः ।
दण्डयन् भर्त्सयन् नित्यं निरयेभ्यो न मुञ्चति ॥ २३

तथा गवां परित्राणे पीडने च शुभाशुभम् ।
विप्रगोषु विशेषेण रक्षितेषु [4]हतेषु वा ॥ २४

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां
अनुशासनपर्वणि अष्टपञ्चाशोऽध्यायः ॥ ५८ ॥
॥ ८९ ॥ आनुशासनिकपर्वणि अष्टपञ्चाशोऽध्यायः ॥ ५८ ॥
[अस्मिन्नध्याये २४ श्लोकाः]

---

1. अ-क—सर्वास्वं ब्रा
2. क-घ— यः परैस्तान्निहत्य वै
3. क-घ—स नृपस्स्वर्गमाप्नोति पुत्रपौत्रसमन्वितः । [अधिकः पाठः]
4. अ-ख—गृहेषु वा

॥ एकोनषष्टितमोऽध्यायः ॥

भीष्मेण युधिष्ठिरं प्रति ब्राह्मणस्वापहारस्यानर्थहेतुतायां दृष्टान्ततया नृगोपाख्यानकथनम् ॥

भीष्मः—

अत्रैव कीर्त्यते सद्भिर् ब्राह्मणस्याभिमर्शने ।
नृगेण सुमहत् कृच्छ्रं यदवाप्तं कुरूद्वह ॥ १

[1]निविशन्त्यां पुरा पार्थ द्वारवत्यामिति श्रुतिः ।
अदृश्यत महाकूपस् तृणवीरुत्समावृतः ॥ २

प्रयत्नं तत्र कुर्वाणास् तस्मात् कूपाज्जलार्थिनः ।
श्रमेण महता युक्तास् तस्मिं[2]स्तोये सुसंवृते ॥ ३

ददृशुस्ते महाकायं कृकलासमवस्थितम् ।
तत्र चोद्धरणे यत्नम् अकुर्वंस्ते सहस्रशः ॥ ४

प्रग्रहैश्चैव पट्टैश्च तं बद्ध्वा पर्वतोपमम् ।
नाशक्नुवन् समुद्धर्तुम् ततो जग्मुर्जनार्दनम् ॥ ५

खमावृत्योदपानस्य कृकलासस्थितो महान् ।
तस्य नास्ति समुद्धर्तेत्यथ कृष्णे न्यवेदयन् ॥ ६

---

1. ख—निर्विशन्त्यां+कुरूद्वह । घ—निवसन्त्यां
2. क-घ—स्तोयसमावृते

स वासुदेवेन समुद्धृतश्च
पृष्टश्च कामान् निजगाद राजा ।
नृगस्तदाऽऽत्मानमथो न्यवेदयत्
पुरातनं [1]क्रतुसहस्रयाजिनम् ॥ ७

तथा ब्रुवाणं तु तमाह माधवश्
शुभं त्वया कर्म कृतं न पापकम् ।
अथो भवान् दुर्गतिमीदृशीं गतो
नरेन्द्र तद्ब्रूहि किमेतदीदृशम् ॥ ८

शतं सहस्राणि शतं गवां पुनर्
गवां शतान्यष्टशतायुतानि ।
त्वया पुरा दत्तमितीह शुश्रुमो
नृप द्विजेभ्यः क्व नु तत्तथा गतम् ॥ ९

नृगस्तदाऽब्रवीत् कृष्णं ब्राह्मणस्याग्निहोत्रिणः ।
प्रोषितस्य परिभ्रष्टा गौरेका मम गोधने ॥ १०

गवां सहस्रे सङ्घाते तदा तैः पशुपैर्मम ।
सा ब्राह्मणाय मे दत्ता [2]प्रेत्यार्थमभिकाङ्क्षता ॥ ११

अपश्यत् परिमार्गंश्च तां गां परगृहे द्विजः ।

---

1. ख-घ—यज्ञ
2. क-घ—प्रीत्यर्थं

ममेयमिति चोवाच ब्राह्मणो यस्य साऽभवत् ॥ १२

तावुभौ मामनुप्राप्तौ विवदन्तौ भृशज्वरौ ।
भवान् दाता भवान् हर्तेत्यथ तौ मां तदोचतुः ॥ १३

तत्तेन शतसङ्ख्येन गवां विनिमयेन वै ।
याचे प्रतिग्रहीतारं स तु मामब्रवीदिदम् ॥ १४

देशकालोप[1]सन्ना मे दोग्ध्री कान्ताऽतिवत्सला ।
स्वादुक्षीरप्रदा धन्या मम नित्यं निवेशने ॥ १५

श्रियं च भरते या गौर् मम पुत्रमपस्तनम् ।
न सा शक्या मया दातुम् इत्युक्त्वा स जगाम ह ॥ १६

ततस्तमपरं विप्रं याचे विनिमयेन वै ।
गवां शतसहस्रं वै तत्कृते गृह्यतामिति ॥ १७

न राज्ञः प्रतिगृह्णामि शक्तोऽहं स्वस्य मार्गणे ।
सैव गौर्दीयतां शीघ्रं ममेति मधुसूदन ॥ १८

[2]रुक्ममश्वांश्च ददतो राजतान् स्यन्दनांस्तथा ।
न जग्राह ययौ चापि तदा स ब्राह्मणर्षभः ॥ १९

एतस्मिन्नेव काले तु चोदितः कालधर्मणा ।
पितृलोकमहं प्राप्य धर्मराजमुपागमम् ॥ २०

1. क-घ—सम्पन्ना
2. ख—अर्धसप्तकं नास्ति

यमस्तु पूजयित्वा मां ततो वचनमब्रवीत् ।
नान्तस्सङ्क्षयायते राजंस् तव पुण्यस्य कर्मणः ॥ २१

अस्ति चैव कृतं पापम् अज्ञानात्तदपि त्वया ।
चरस्व पापं पश्चाद्वा पूर्वं वाऽपि यथेच्छसि ॥ २२

रक्षितास्मीति चोक्तं ते प्रतिज्ञा च त्वया कृता ।
ब्राह्मणस्वस्य चादानं त्रिविधस्ते व्यतिक्रमः ॥ २३

पूर्वं कृच्छ्रं चरित्वाऽहं पश्चाच्छुभमिति प्रभो ।
धर्मराजं ब्रुवन्नेव पतितोऽस्मि महीतले ॥ २४

अश्रौषं प्रच्युतश्चाहं यमस्योक्तैः प्रभावतः ।
वासुदेवस्समुद्धर्ता भविता ते जनार्दनः ॥ २५

पूर्णे वर्षसहस्रान्ते क्षीणे कर्मणि दुष्कृते ।
प्राप्स्यसे शाश्वताँल्लोकाञ् जितान् स्वेनैव कर्मणा ॥ २६

कूपेत्मानमधश्शीर्षम् पश्य मां पतितं च ह ।
तिर्यग्योनिमनुप्राप्तं न तु मामजहात् स्मृतिः ॥ २७

त्वया तु तारितोऽस्म्यद्य किमन्यत्र तपोबलात् ।
अनुजानीहि मां कृष्ण गच्छेयं दिवमद्य वै ॥ २८

[1]अनुज्ञातस्स कृष्णेन नमस्कृत्य जनार्दनम् ।
विमानं दिव्यमास्थाय ययौ दिवमरिन्दमः ॥ २९

1. अ-ख—अर्धसप्तकं नास्ति

ततस्तस्मिन् दिवं प्राप्ते नृगे भरतसत्तम ।
वासुदेव इमाञ् श्लोकाञ् जगाद कुरुनन्दन ॥ ३०

ब्राह्मणस्वं न हर्तव्यं क्षत्रियेण विशेषतः ।
ब्राह्मणस्वं हृतं हन्ति नृगं ब्राह्मणगौरिव ॥ ३१

सतां समागमस्सद्भिर् नाफलः पार्थ विद्यते ।
विमुक्तं नरकात् पश्य नृगं साधुसमागमात् ॥ ३२

प्रदानं फलवत्तत्र द्रोहस्तत्र तथाऽबलः ।
अपहारं गवां तस्माद् वर्जयेत युधिष्ठिर ॥ ३३

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां
अनुशासनपर्वणि एकोनषष्टितमोऽध्यायः ॥ ५९ ॥
॥ ८९ ॥ आनुशासनिकपर्वणि एकोनषष्टितमोऽध्यायः ॥ ५९ ॥
[अस्मिन्नध्याये ३३ श्लोकाः]

॥ षष्टितमोऽध्यायः ॥

भीष्मेण युधिष्ठिरं प्रति गोदानप्रशंसापरनाचिकेतोपाख्यानकथनम् ॥

युधिष्ठिरः—

दत्तानां फलसम्प्राप्तिं गवां ब्रूहि मेऽनघ ।
विस्तरेण महाबाहो नाहं तृप्यामि कथ्यताम् ॥ १

भीष्मः—

अत्राप्युदाहरन्तीमम् इतिहासं पुरातनम् ।
ऋषिरौद्दालकिर्दीक्षाम् उपगम्य ततस्सुतम् ॥ २

त्वं मामुपचरस्वेति नाचिकेतमभाषत ॥ २॥

समाप्ते नियमे तस्मिन् महर्षिः पुत्रमब्रवीत् ॥ ३

उपस्पर्शनसक्तस्य स्वाध्यायनिरतस्य च ।
इध्मा दर्भास्सुमनसः कलशश्चाभितो जलम् ॥ ४

विस्मृतं मे तदादाय नदीतीरादिहाव्रज ॥ ४॥

गत्वाऽनवाप्य तत् सर्वं नदीवेगसमाप्लुतम् ।
न पश्यामि तदित्येव पितरं सोऽब्रवीन्मुनिम् ॥ ५॥

क्षुत्पिपासासमाविष्टो मुनिरौद्दालकिस्तदा ।

यमं पश्येति तं पुत्रम् अशपत् क्रोधमूर्च्छितः ॥ ६॥

तथा पित्रा स निहतो वाग्वज्रेण कृताञ्जलिः ।
प्रसीदेति ब्रुवन्नेव गतसत्त्वोऽपतद्भुवि ॥ ७॥

नाचिकेतं पिता दृष्ट्वा पतितं दुःखमूर्च्छितः ।
किं मया कृतमित्युक्त्वा निपपात महीतले ॥ ८॥

तस्य दुःखपरीतस्य स्वं पुत्रमुपगूहतः ।
व्यतीतं तदहश्शेषं सा चोग्रा शर्वरी तदा ॥ ९॥

पित्र्येणास्त्रप्रपातेन नाचिकेतः कुरूद्वह ।
प्रास्पन्दच्छयने शुभ्रे वृष्ट्या सस्यमिवाप्लुतम् ॥ १०॥

पर्यपृच्छत् ततः पुत्रं श्राध्यं प्रत्यागतं पुनः ।
दिव्यगन्धैस्समादिग्धं क्षीणस्वप्नमिवोत्थितम् ॥ ११॥

औद्दालकिः—

अपि पुत्र गता लोकाश् शुभास्ते स्वेन कर्मणा ।
दिष्ट्या चासि पुनः प्राप्तो न हि ते मानुषं वपुः ॥ १२॥

भीष्मः—

प्रत्यक्षदर्शी सर्वस्य पित्रा पृष्टो महात्मना ।
अभ्युत्थाय पितुर्मध्ये महर्षीणां न्यवेदयत् ॥ १३॥

नाचिकेतः—

कुर्वन् भवच्छासनमाशु यातो
ह्यहं विशालां रुचिरप्रभासाम् ।
वैवस्वतीं प्राप्य सभामपश्यं
सहस्रशो योजनहैमभौमाम् ॥ १४॥

दृष्ट्वैव मामभिमुखमापतन्तं
गृहं निवेद्यासनमादिदेश ।
वैवस्वतोऽर्घ्यादिभिरर्हणैश्च
भवत्कृते पूजयामास मां सः ॥ १५॥

[1]ततस्त्वहं तं शनकैरवोचं
वृतं सदस्यैरभिपूज्यावनम्य ।
प्राप्तोऽस्मि ते विषयं धर्मराज
लोकानहं यामि तन्मे विधत्स्व ॥ १६॥

यमोऽब्रवीन्मां न मृतोऽसि सौम्य
[2]यमं पश्येत्याह तु त्वां तपस्वी ।
पिता प्रदीप्ताग्निसमानतेजा
न तच्छक्यमनृतं विप्रकर्तुम् ॥ १७॥

---

1. क-घ—वैवस्वतं तं
2. क-घ—यन्मां पश्येत्याह ततस्तपस्वी

दृष्टस्तेऽहं प्रतिगच्छस्व तातं
शोचत्यसौ तव देहस्य कर्ता ।
ददामि किञ्चापि [1]मनःप्रतीतं
प्रियातिथेस्तव कामं वृणीष्व ॥ १८॥

तेनैवमुक्तस्तमहं प्रत्यवोचं
प्राप्तोऽस्मि ते विषयं दुर्नि[2]वर्त्यम् ।
इच्छाम्यहं पुण्यकृतां समृद्धाँ-
ल्लोकान् द्रष्टुं यदि तेऽहं वरार्हः ॥ १९॥

यानं समारोप्य तु मां स देवो
हयैर्युक्तं सुप्रभं भानुमन्तम् ।
सन्दर्शयामास तदा स्म लोकान्
सर्वांस्तथा पुण्यकृतां द्विजेन्द्र ॥ २०॥

अपश्यं तत्र वेश्मानि [3]तैजसानां कृतात्मनाम् ।
नानासंस्थानरूपाणि सर्वरत्नमयानि तु ॥ २१॥

चन्द्रमण्डलशुभ्राणि किङ्किणीजालवन्ति च ।
अनेकशतभौमानि सान्तर्जलवनानि च ॥ २२॥

---

1. क-घ—वरं प्रतीतम्
2. क-घ—वेद्यम्
3. क—सप्त पादा न सन्ति घ—वैडूर्यकमयानि च [इति पाठान्तरम्]
[ततः अष्टौ पादा न सन्ति]

वैडूर्यार्कप्रकाशानि रूप्यरूपमयानि च ।
तरुणादित्यवर्णानि स्थावराणि चराणि च ॥ २३॥

भक्ष्यभोज्यमयाञ् शैलान् वासांसि शयनानि च ।
सर्वकामफलैश्चैव वृक्षान् भवननिष्ठितान् ॥ २४॥

नद्यो वीर्य्यस्सभा वापीर् दीर्घिकाश्चैव नित्यशः ।
घोषवन्ति च यानानि युक्तान्येव सहस्रशः ॥ २५॥

क्षीरस्रवा वै सरितो [1]गिरींश्चैव ससर्पिषः ॥ २६

वैवस्वतस्यानुमतांश्च देशान्
अदृष्टपूर्वान् सुबहूनपश्यम् ।
सर्वं दृष्ट्वा [2]ह्यगमं धर्मराजम्
अवोचं वै सर्वदेवं सहिष्णुम् ॥ २७

क्षीरस्यैतास्सर्पिषश्चैव नद्यश्
शश्वत् स्रोताः कस्य भोज्याः प्रवृत्ताः ॥ २७॥

यमोऽब्रवीद्विद्धि भोज्यांस्त्वमेतान्
ये दातारस्साधवो गोरसानाम् ।
अन्ये लोकाश्शाश्वता वीतशोकास्
समाकीर्णा गोप्रदाने रतानाम् ॥ २८॥

---

1. क-ख-घ—गिरींश्च ; ससर्पिष्कं विमलं चापि तोयम्
2. घ—तदहम्

न त्वेवासां दानमात्रं प्रशस्तं
पात्रं कालो गोविशेषो विधिश्च ।
ज्ञात्वा देया विप्र गवान्तरं हि
दुःखं ज्ञात्वा पावकादित्यभूतम् ॥ २९॥

स्वाध्यायाध्यायी ह्यंतिमात्रं तपस्वी
वैतानस्थो ब्राह्मणः पात्रमासाम् ।
गोषु क्षान्तं गोशरण्यं कृतज्ञं·
वृत्तिग्लानं तादृशं पात्रमाहुः ॥ ३०॥

कृच्छ्रोत्सृष्टाः पोषणाभ्यागताश्च
द्वारैरेतैर्गोविशेषाः प्रशस्ताः ।
अन्तर्जातास्सुक्रयज्ञानलब्धाः
प्राणक्रीतास्सोदकास्सोद्वहाश्च ॥ ३१॥

तिस्रो रात्रीस्त्वद्भिरुपोष्य भूमौ
तृप्ता गावस्तर्पितेभ्यः प्रदेयाः ।
वत्सैः प्रीतास्सुप्रजास्सोपचारास्
त्र्यहं दत्त्वा गोरसैर्वर्तितव्यम् ॥ ३२॥

दत्त्वा धेनुं सुव्रतां साधुदोहां
कल्याणवत्सामपलायिनीं च ।

यावन्ति रोमाणि भवन्ति तस्यास्
तावद्वर्षाण्यश्नुते देवलोकम् ॥ ३३॥

तथाऽनड्वाहं ब्राह्मणाय प्रदाय
दान्तं धुर्यं बलवन्तं युवानम् ।
कुलोपजीव्यं वीर्यवन्तं बृहन्तं
भुङ्क्ते लोकान् सम्मितान् धेनुदस्य ॥ ३४॥

वृत्तिग्लाने सम्भृते वा महार्थे
शान्त्यर्थं वा होमहेतोः प्रसूत्याम् ।
गुर्वर्थे वा यज्ञसमाप्तये वा
गां वै दातुं देशकालो विशिष्टः ॥ ३५॥

श्रुत्वा वैवस्वतवचस् तमहं पुनरब्रवम् ।
अगोमी गोप्रदातॄणां कथं लोकान् निगच्छति ॥ ३६॥

ततो यमोऽब्रवीद्धीमान् गोप्रदानं ततो गतिम् ।
गोप्रदानानुकल्पात्तु गामृते सन्तु गोप्रदाः ॥ ३७॥

अलाभे यो गवां दद्याद् घृतधेनुं यतव्रतः ।
[1]तमिमा घृतवाहिन्यः क्षरन्ते वत्सला इव ॥ ३८॥

घृतालाभे तु यो दद्यात् तिलधेनुं यतव्रतः ।
स दुर्गात्तारितो धेन्वा क्षीरनद्यां प्रमोदते ॥ ३९॥

---

1. क-घ—तस्यैता

तिलालाभे तु यो दद्यात् क्षीरधेनुं यतव्रतः ।
स कामप्रवहां शीतां नदीमेतामुपाश्नुते ॥ ४०॥

एवमादीनि मे तत्र धर्मराजो व्यदर्शयत् ।
दृष्ट्वा च परमं हर्षम् अवापमहमच्युत ॥ ४१॥

निवेदये चापि प्रियं भवत्सु
क्रतुर्महानल्पधनप्रचारः ।
प्राप्तो मया तत्र [1]स मन्त्रपूतः
प्रवर्त्स्यते वेदविधिप्रवृत्तः ॥ ४२॥

शापो ह्ययं भवतोऽनुग्रहाय
प्राप्तो मया यत्र दृष्टो यमो मे ।
दातुर्व्युष्टिं तत्र दृष्ट्वा महार्हां
निस्सन्दिग्धो दानधर्मांश्चरिष्ये ॥ ४३॥

इदं च मामब्रवीद्धर्मराजः
पुनः पुनस्सम्प्रहृष्टो [2]द्विजर्षे ।
दाने तावत् प्रयतोऽभूस्सदैव
विशेषतो गोप्रदानं च कुर्याः ॥ ४४॥

शुद्धो ह्यर्थो नावमन्यस्व धर्मं
पात्रे देयं देशकालोपपन्नम् ।

---

1. क-घ—समृद्ध 2. क-घ—द्विजेभ्यः

तस्माद् गावस्ते नित्यमेव प्रदेया
मा भूच्च ते संशयः कश्चिदत्र ॥ ४५॥

एताः पुरा अददन् नित्यमेव
शान्तात्मानो दानवशे निविष्टाः ।
तपांस्युग्राण्यप्रतिशंसमानाः
पुनर्दानं प्रददुश्चैव शक्त्या ॥ ४६॥

[1]काले च शक्त्या मत्सरं वर्जयित्वा
शुद्धात्मान[2]श्शीलिनः पुण्यशीलाः ।
दत्त्वा गा वै लोकमुं प्रपन्नास्
ते दीप्यन्ते पुण्यशीलाश्च लोके ॥ ४७॥

एतद्दानं न्यायलब्धं द्विजेभ्यः
पात्रे वित्तं प्रापणीयं परीक्ष्य ।
काम्येऽष्टम्यां वर्तितव्यं दशाहं
रसैर्गवां शकृता प्रस्रवैर्वा ॥ ४८॥

वेदव्रती स्याद् वृषभप्रदाता
वेदावाप्तिर्गोयुगस्य प्रदाने ।
तीर्थावाप्तिर्गोप्रयुक्तप्रदाने
पापोत्सर्गः कपिलायाः प्रदाने ॥ ४९॥

1. अ—अधैवयं नास्ति
2. ख—शुचिनः

गामप्येकां कपिलां सम्प्रदाय
न्यायोपेतां कल्मषाद्विप्रमुच्येत् ।
गवां रसात् परमं नास्ति किञ्चिद्
गवां दानं सुमहत्तद्वदन्ति ॥ ५०॥
गावो लोकान् धारयन्ति क्षरन्त्यो
गावश्चान्नं सञ्जनयन्ति लोके ।
यस्तं जानन् न गवां हार्दमेति
स वै गन्ता निरयं पापचेताः ॥ ५१॥
यत्ते दातुं गास्सहस्रं शतं वा
शतार्धं वा दश वा साधुवत्साः ।
अप्येकां वा साधवे सम्प्रदाय
यास्यत्यमुष्मिन् पुण्यतीर्था नदीर्वै ॥ ५२॥
प्राह्या पुष्ट्या लोकसंरक्षणेन
गावस्तुल्यास्सूर्यपादैः पृथिव्याम् ।
शब्दश्चैकस्संन्ततिश्चोपभोगास्
तस्माद् गोदस्सूर्य इवाभिभाति ॥ ५३॥
गुरुं शिष्यो वरयेद्गोप्रदाने
स वै कर्ता नियतस्स्वर्गदाने ।
विधिज्ञानात् सुमहानेष धर्मो
विधिं [1]विद्याविनयास्संश्रयन्ति ॥ ५४॥

1. क-ख—सद्यो विधयः

[1]त्वय्याशंसन्त्यमरा दानवाश्च
वयं चापि प्रसृते पुण्यशील ॥ ५५
इत्युक्तोऽहं धर्मराज्ञा महर्षे
धर्मात्मानं शिरसाऽभिप्रणम्य ।
अनुज्ञातस्तेन वैवस्वतेन
प्रत्यागमं भगवत्पादमूलम् ॥ ५६

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां अनुशासनपर्वणि षष्टितमोऽध्यायः ॥ ६० ॥
॥ ८९ ॥ आनुशासनिकपर्वणि षष्टितमोऽध्यायः ॥ ६० ॥
[अस्मिन्नध्याये ५६ श्लोकाः]

॥ एकषष्टितमोऽध्यायः ॥

भीष्मेण युधिष्ठिरं प्रति गोदानफलविशेषविषयकेन्द्रप्रश्नानुवादः ॥ १ ॥
ब्रह्मणा इन्द्रं प्रति गोदानप्रशंसनम् ॥ २ ॥

युधिष्ठिरः—

उक्तं वै गोप्रदानं मे नाचिकेतमृषिं प्रति ।
माहात्म्यमपि चैवोक्तम् उद्देशेन गवां प्रभो ॥ १
नृगेण च यथा दुःखम् अनुभूतं महात्मना ।
एकापराधादज्ञानान्नृगस्तां दुर्गतिं गतः ॥ २

1. क-घ—तस्याशं

द्वारवत्यां यथा चासौ [1]निविशन्त्यां समुद्धृतः ।
मोक्षहेतुरभूत् कृष्णस् तदप्यवधृतं मया ॥ ३
किं चास्ति मम सन्देहो गवां लोकं प्रति प्रभो ।
तत्त्वतश्श्रोतुमिच्छामि गोदा यस्मिन् विशन्त्युत ॥ ४

भीष्मः—

अत्राप्युदाहरन्तीमम् इतिहासं पुरातनम् ।
यथाऽपृच्छत् पद्मयोनिम् एतदेव शतक्रतुः ॥ ५

इन्द्रः—

स्वर्लोकवासिनां लक्ष्मीम् अभिभूय स्वया त्विषा ।
गोलोकवासिनः पश्ये वदतां संशयोऽत्र मे ॥ ६
कीदृशा भगवँल्लोका गवां तद्ब्रूहि मेऽनघ ।
यानावसन्ति दातार एतदिच्छामि वेदितुम् ॥ ७
कीदृशाः किम्फलाः किंस्वित्परमास्तत्र वै गुणाः ।
कथं च पुरुषव्याघ्र गच्छन्ति विगतज्वराः ॥ ८
कियत्कालं प्रदानस्य दाता च फलमश्नुते ।
कथं बहुविधं दानं स्यादल्पमपि वा कथम् ॥ ९
बह्वीनां कीदृशं दानम् अल्पानां वाऽपि कीदृशम् ।
अदत्त्वा गोप्रदास्सन्ति केन वै तच्च शंस मे ॥ १०
कथं च बहुदाता स्याद् अल्पदात्रा समः प्रभो ।
अल्पप्रदानाद् बहुदः कथं च स्यादिहेश्वर ॥ ११

1. ख—निवसन्त्यां

कीदृशी दक्षिणा चैव गोप्रदाने विशिष्यते ।
एतत् तथ्येन भगवन् मम शंसितुमर्हसि* ॥ १२

पितामहः—

योऽयं प्रश्नस्त्वया पृष्टो गोप्रदानाधिकारवान् ।
नान्यः प्रष्टाऽस्ति लोकेऽस्मिन् त्वत्तोऽन्यो हि शतक्रतो ॥ १३
सन्ति नानाविधा लोका यांस्त्वं शक्र न पश्यसि ।
पश्यामि तानहं लोकान् [1]एकपद्यश्च यास्त्रियः ॥ १४
कर्मभिश्चापि सुशुभैस् सुव्रताश्चर्षयस्तथा ।
सशरीरा हि तान् यान्ति ब्राह्मणाश्शुभवृत्तयः ॥ १५
शरीरन्यासमोक्षेण मनसा निर्मलेन च ।
स्वप्नभूतांश्च ताँल्लोकान् पश्यन्तीहापि सुव्रताः ॥ १६
ते तु लोकास्सहस्राक्ष शृणु यादृग्गुणान्विताः ।
न तत्र क्रमते लोभो न जरा न च पापकम् ॥ १७
तथाऽन्यन्नाशुभं किञ्चिन्न व्याधिस्तत्र न क्रमः ।
यद्यच्च गावो मनसा तस्मिन् वाञ्छन्ति वासव ॥ १८
तत् सर्वं प्रापयन्ति स्म मम प्रत्यक्षदर्शनात् ।
कामगाः कामचारिण्यः [2]कामं कामांश्च भुञ्जते ॥ १९

---

* सर्वेषु कोशेषु अत्रैवाध्यायसमाप्तिर्दृश्यते
1. अ—अष्टौ पादा न सन्ति
2. घ—कर्मैकामाश्च

वाप्यस्सरांसि सरितो विविधानि [1]वनानि च ।
गृहाणि पर्वताश्चैव यावद्द्रव्यं च किञ्चन ॥ २०
मनोज्ञं सर्वभूतभ्यस् तद्वनं तत्र दृश्यते ।
ईदृशान् विद्धि तांल्लोकान् नास्ति लोकस्ततोऽधिकः ॥ २१
तत्र सर्वसहाः क्षान्ता वत्सला गुरुवर्तिनः ।
अहङ्कारैर्विरहिता यान्ति शक्र नरोत्तमाः ॥ २२

यस्सर्वमांसानि न भक्षयीत
[2]पुमान् सदा यावदतो विरक्तः ।
मातापित्रोरर्चिता सत्ययुक्तश्
शुश्रूषिता ब्राह्मणानां विशुद्धः ॥ २३
अक्रोधनो गोषु तथा द्विजेषु
धर्मे युक्तो गुरुशुश्रूषकश्च ।
यावज्जीवं सत्यवृत्ते रतश्च
दाने युक्तो यः क्षमी चापराधे ॥ २४
मृदुर्दान्तो देवपरायणश्च
सर्वातिथिश्चापि तथा दयावान् ।
ईदृग्गुणा मानवास्सम्प्रयान्ति
लोकं गवां शाश्वतं चाव्ययं च ॥ २५

---

1. क—धनानि
2. क—दयावाचै वदते धर्मयुक्तः ङ—दवाय वै वद ते धर्मयुक्तः

न पारदारी पश्यति लोकमेनं
न वै गुरुघ्नो न मृषा प्रवादी ।
सदापवादी ब्राह्मणश्शान्तवेदो
[1]दोषैरन्यैर्यश्च युक्तो दुरात्मा ॥ २६

न मित्रध्रुङ्नैकृतिकः कृतघ्नश्
शठोऽनृजुर्धर्मविद्वेषकश्च ।
न ब्रह्महा मनसाऽपि प्रपश्येद्
गवां लोकं पुण्यकृतां निवासम् ॥ २७

एतत्ते सर्वमाख्यातं नैपुण्येन सुरेश्वर ।
गोप्रदानरतानां च फलं शृणु शतक्रतो ॥ २८

दायाद्यलब्धैरर्थैर्यो गाः क्रीत्वा सम्प्रयच्छति ।
धर्मार्जितधनैः क्रीतास् स लोकानश्नुतेऽक्षयान् ॥ २९

यो वै द्यूते धनं जित्वा गाः क्रीत्वा सम्प्रयच्छति ।
स [2]विद्वानयुतं शक्र वर्षाणां फलमश्नुते ॥ ३०

दायाद्या यस्य वै गावो न्यायात् पूर्वैरुपार्जिताः ।
प्रदद्युस्ताः प्रदातृणां सम्भवन्त्यक्षया ध्रुवम् ॥ ३१

प्रतिगृह्य च यो दद्याद् गास्सुशुद्धेन चेतसा ।
तस्यापीहाक्षयाँल्लोकान् ध्रुवान् विद्धि शचीपते ॥ ३२

---

1. क—इतः षट् पादा न सन्ति 2. व—दिव्यमयुतं वर्षं

जन्मप्रभृति सत्यं च यो ब्रूयाद्विजितेन्द्रियः ।
गुरुद्विजसहः क्षान्तस् तस्य गोदैस्समा गतिः ॥ ३३

न जातु ब्राह्मणा वाच्या यदवाच्यं शचीपते ।
मनसा गोषु न द्रुह्येद् गोवृत्तिर्गोनुकम्पकः ॥ ३४

सत्ये धर्मे च निरतस् तस्य [1]कर्मफलं शृणु ।
गोसहस्रेण समिता तस्य धेनुर्भवत्युत ॥ ३५

क्षत्रियस्यापि च गुणैर् अन्वितस्य फलं शृणु ।
सप्तार्धशततुल्या गौर् भवतीति विनिश्चयः ॥ ३६

वैश्यस्यैते यदि गुणास् तस्य पञ्चशतं भवेत् ।
शूद्रस्यापि विनीतस्य चतुर्भागं फलं स्मृतम् ॥ ३७

एतच्चैवं योऽनुतिष्ठेत युक्तस्
सत्येन युक्तो गुरुशुश्रूषया च ।
दान्तः क्षान्तो देवतार्चिः प्रशान्तश्
शुचिर्बुद्धो धर्मशीलोऽनहंवाक् ॥ ३८

महत् फलं प्राप्नुते सद्विजाय
दत्त्वा दोग्ध्रीं विधिना तेन धेनुम् ।
नित्यं दद्यादेवभक्तस्सदा च
सदोद्युक्तो गुरुशुश्रूषिता च ॥ ३९

1. क-घ—पुण्यफलं

वेदाध्यायी गोषु च भक्तिमांश्च
नित्यं [1]द्रष्टुं योऽभिनन्देत गाश्च ।
आजानतो यश्च गवां नमेत
इदं फलं शक्र भवेत तस्य ॥ ४०

यत् स्यादिष्ट्वा राजसूये फलं तु
यत् स्यादिष्ट्वा बहुना काञ्चनेन ।
एतत् तुल्यं फलमस्याहुरग्र्यं
सर्वे सन्तस्त्वृषयो ये च सिद्धाः ॥ ४१

योऽग्रं भक्तात् किञ्चिद[2]प्राश्य दद्याद्
गोभ्यो नित्यं गोव्रती सत्यवादी ।
शान्तो [3]भक्तो गोसहस्रस्य पुण्यं
संवत्सरेणाप्नुयात् पुण्यशीलः ॥ ४२

य एवं भक्तमश्नीयाद् दद्यादेवं गवां च यत् ।
दश वर्षाणि च फलं वाजपेयस्य विन्दति ॥ ४३

एकेनैव च भक्तेन यः क्रीत्वा गां प्रयच्छति ।
यावन्ति तस्य प्रोक्तानि दिवसानि शतक्रतो ॥ ४४

तावच्छतानां स गवां फलमाप्नोति शाश्वतम् ।
ब्राह्मणस्य फलं ह्येदं क्षत्रियेऽभिहितं शृणु ॥ ४५

1. क-घ—दृष्ट्वा योगिनं देवताश्च 2. क-घ—दुह्कृत्य
3. क-ख-घ—बुद्धो

पञ्चवार्षिकमेतत् तु क्षत्रियस्य फलं स्मृतम् ।
ततोऽर्धेन तु वैश्यस्य शूद्रो वैश्यार्धतस्स्मृतः ॥ ४६

यश्चात्मविक्रयं कृत्वा गाः क्रीत्वा सम्प्रयच्छति ।
यावतीस्पर्शयेद्वा वै तावतां फलमश्नुते ॥ ४७

रोम्णि रोम्णि महाभाग लोकाश्चास्याक्षयास्स्मृताः ॥ ४७॥

सङ्ग्रामेष्वार्जयित्वा तु यो वै गावः प्रयच्छति ।
आत्मविक्रयतुल्यास्ताश् शाश्वता विद्धि [1]कौशिक ॥ ४८॥

अभावे यो गवां दद्यात् तिलधेनुं यतव्रतः ।
दुर्गात् स तारितो धेन्वा क्षीरनद्यां प्रमोदते ॥ ४९॥

न त्वेवासां दानमात्रं प्रशस्तं
पात्रं कालो गोविशेषो विधिश्च ।
कालज्ञानं विप्रगवान्तरं हि
दुःखं ज्ञातुं पावकादित्यभूतम् ॥ ५०॥

स्वाध्यायाढ्यं शुद्धयोनिं प्रशान्तं
वैतानज्ञं पापभीरुं कृतज्ञम् ।
गोपु क्षान्तं नातितीक्ष्णं शरण्यं
वृत्तिग्लानं तादृशं पात्रमाहुः ॥ ५१॥

वृत्तिग्लाने सीदति वाऽतिमात्रं
तुष्ट्यर्थं वा होमहेतोः प्रसूत्याम् ।

1. क—भारत घ—काश्यप

गुर्वर्थं वा बालसंवृद्धये वा
धेनुं दद्यादेशकालेऽविशिष्टे ॥ ५२॥

अन्तर्जातास्सुक्रयज्ञानलब्धाः
प्राणक्रीतास्सोदकास्सोद्वहाश्च ।
कृच्छ्रोत्सृष्टाः पोषणाभ्यागताश्च
द्वारैरेतैर्गोविशेषाः प्रशस्ताः ॥ ५३॥

बलान्विताश्शीलवयोपपन्नास्
सर्वाः प्रशंसन्ति सुगन्धवत्यः ।
यथा हि गङ्गा सरितां वरिष्ठा
तथाऽर्जुनीनां कपिला विशिष्टा ॥ ५४॥

तिस्रो रात्रीरद्भिरुपोष्य भूमौ
तृप्ता गावस्तर्पितेभ्यः प्रदेयाः ।
वत्सैः पुष्टैः क्षीरपैस्सुप्रचारैस्
त्र्यहं दत्त्वा गोरसैर्वर्तितव्यम् ॥ ५५॥

दत्त्वा धेनुं सुव्रतां साधुवत्सां
कल्याणवृत्तामपलायिनीं च ।
यावन्ति रोमाणि भवन्ति तस्यास्
तावन्ति वर्षाणि वसन्त्यमुत्र ॥ ५६॥

तथाऽनड्वाहं ब्राह्मणायाथ [1]युग्मं
दत्त्वा युवानं बलिनं विनीतम् ।
कुलस्य कर्तारमनन्तवीर्यं
प्राप्नोति लोकान् दशधेनुदस्य ॥ ५७॥

कान्ताराद्ब्राह्मणान् गाश्च यः परित्राति [2]कौशिक ।
क्षेमेण तु विमुञ्चेत तस्य पुण्यफलं शृणु ॥ ५८॥

अश्वमेधक्रतोस्तुल्यम् फलं भवति शाश्वतम् ॥ ५९
मृत्युकाले सहस्राक्ष यां वृत्तिमनुकाङ्क्षते ।
लोकान् बहुफलान् विद्याद् यद्वाऽस्य हृदि वर्तते ॥ ६०
तत्सर्वं समवाप्नोति कर्मणाऽनेन मानवः ॥ ६०॥

गोभिश्च समनुज्ञातस् [3]सर्वत्र स महीयते ॥ ६१
यस्त्वेतेनैव भावेन गा वनेष्वनुगच्छति ।
तृणगोमयपर्णाशी विस्मितो नियतश्शुचिः ॥ ६२
अकामं तेन वस्तव्यं [4]मुदितेन शतक्रतो ॥ ६२॥

मम लोके स वसति लोके वा यत्र चेच्छति* ॥ ६३

इन्द्रः—

[5]जानन् यो गामपहरेद् विक्रीयादर्थकारणात् ।

---

1. घ—युग्यम् 2. घ—काश्यपे
3. क-घ—सर्वदा 4 क—अभीतेन
* अ-ख—कोशयोः अत्रैवाध्यायसमाप्तिर्दृश्यते
* क-घ—कोशयोः नात्राध्यायसमाप्तिर्दृश्यते
5. क-घ—अर्धत्रयं नास्ति

एतद्विज्ञातुमिच्छामि का नु तस्य गतिर्भवेत् ॥ ६४

ब्रह्मा—

भक्तार्थं विक्रयार्थं वा येऽपहारं हि कुर्वते ।
दानार्थं ब्राह्मणार्थं वा तदेवं श्रूयतां फलम् ॥ ६५

विक्रयार्थं हि यो हिंस्याद् भक्षयेद्वा निरङ्कुशः ।
घातयानं हि पुरुषं येऽनुमन्येयुरर्थिनः ॥ ६६

घातकः खादको वाऽपि तथा यश्चानुमन्यते ।
यावन्ति तस्या रोमाणि तावद्वर्षाणि मज्जति ॥ ६७

ये दोषा यादृशाश्चैव द्विजयज्ञोपघातके ।
विक्रये चापहारे च ते दोषा वै स्मृता गवाम् ॥ ६८

अपहृत्य तु यो गां वै ब्राह्मणाय प्रयच्छति ।
यावद्दाने फलं तस्यास् तावन्निरयमृच्छति ॥ ६९

सुवर्णं दक्षिणामाहुर् गोप्रदाने महाद्युते ।
सुवर्णं परमं ह्युक्तम् दक्षिणार्थमसंशयम् ॥ ७०

गोप्रदानं तारयते सप्त पूर्वांस्तथाऽपरान् ।
सुवर्णं दक्षिणां दत्वा तावद्गुणमुच्यते ॥ ७१

सुवर्णं परमं दानं सुवर्णं दक्षिणा परा ।
सुवर्णं पावनं शक्र परमाणां परं स्मृतम् ॥ ७२

सुवर्णं प्राहुरेतज्ज्ञा जातरूपं शतक्रतो ।

एषा [1]मे दक्षिणा प्रोक्ता समासेन महाद्युते ॥ ७३

भीष्मः—

एतत् पितामहेनोक्तम् इन्द्राय भरतर्षभ ।
इन्द्रो दशरथायाह रामायाह पिता तथा ॥ ७४
राघवोऽपि प्रियभ्रात्रे लक्ष्मणाय यशस्विने ।
ऋषिभ्यो लक्ष्मणेनोक्तम् अरण्ये वसता विभो ॥ ७५
परम्परागतं चेदम् ऋषयस्संशितव्रताः ।
दुर्धरं धारयामासू राजानश्चैव धार्मिकाः ॥ ७६
उपाध्यायेन गदितं मम चेदं युधिष्ठिर ॥ ७६॥
य इदं ब्राह्मणो नित्यं वदेद्ब्राह्मणसंसदि ।
यज्ञेषु गोप्रदानेषु द्वयोरपि समागमे ॥ ७७॥
तस्य लोकाः किलाक्षय्या दैवतैस्सह नित्यदा ।
इति ब्रह्मा स भगवान् उवाच परमेश्वरः ॥ ७८॥

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां
अनुशासनपर्वणि एकषष्टितमोऽध्यायः ॥ ६१ ॥
॥ ८९ ॥ आनुशासनिकपर्वणि एकषष्टितमोऽध्यायः ॥ ६१ ॥
[अस्मिन्नध्याये ७८॥ श्लोकाः]

---

1. क-घ—ते

॥ द्विषष्टितमोऽध्यायः ॥

भीष्मेण युधिष्ठिरं प्रति सत्यदमादिप्रशंसनम् ॥

युधिष्ठिरः—

विस्मिभितोऽहं भवता धर्मान् प्रवदता विभो ।
प्रवक्ष्यामि तु सन्देहं तन्मे ब्रूहि पितामह ॥ १

व्रतानां किं फलं प्रोक्तं कीदृशं वा महाद्युते ।
नियमानां फलं किं स्वित् स्वधीतस्य च किं फलम् ॥ २

[1]दमस्येह फलं किं स्वित् [2]वेदानां धारणे च किम् ।
अध्यापने फलं किं स्वित् सर्वमिच्छामि वेदितुम् ॥ ३

अप्रतिग्राहके किं च फलं लोके पितामह ।
तस्य किं च फलं दृष्टं श्रुतं यस्सम्प्रयच्छति ॥ ४

स्वधर्मनिरतानां च शूराणां चापि किं फलम् ।
सत्ये च किं फलं प्रोक्तं ब्रह्मचर्ये च किं फलम् ॥ ५

पितृशुश्रूषणे किं च मातृशुश्रूषणे तथा ।
आचार्यगुरुशुश्रूषासानुक्रोशानुकम्पने ॥ ६

एतत् सर्वमशेषेण पितामह यथातथम् ।

1. घ—अर्धपञ्चकं नास्ति
2. क—इतः अर्धचतुष्टयं नास्ति

वेत्तुमिच्छामि [1]धर्मात्मन् परं कौतूहलं हि मे ॥ ७

भीष्मः—

यो व्रतं वै यथोद्दिष्टं तथा सम्प्रतिपद्यते ।
अखण्डं सम्यगारब्धम् तस्य लोकास्सनातनाः ॥ ८

नियमानां फलं राजन् प्रत्यक्षमिह दृश्यते ।
नियमानां क्रतूनां च त्वयाऽवाप्तमिदं फलम् ॥ ९

स्वधीतस्यापि च फलं दृश्यतेऽमुत्र चेह च ।
इह लोकेऽर्थवान् नित्यं ब्रह्मलोके च मोदते ॥ १०

दमस्य तु फलं राजञ् शृणु त्वं विस्तरेण मे ।
दान्तास्सर्वत्र सुखिनो दान्तास्सर्वत्र निर्वृताः ॥ ११

[2]यत्रेच्छागामिनो विप्रास् सर्वशत्रुनिपूदनाः ।
प्रार्थयन्ते हि यद्दान्ता लभन्ते तदसंशयम् ॥ १२

[3]युज्यन्ते सर्वकामैर्हि दान्तास्सर्वत्र पाण्डव ॥ १२॥

स्वर्गे तथाऽनुमोदन्ते तपसा विक्रमेण च ॥ १३

दानैर्यज्ञैश्च विविधैर् यथा दान्ताः क्षमान्विताः ।
दाता कुप्यति नो दान्तास् तस्माद्दानाद्वरो दमः ॥ १४

यस्तु दद्यादकुप्यन् हि तस्य लोकास्सनातनाः ॥ १४॥

1. क-घ—तद्धर्म
2. अ-क-घ—नास्तीदमर्धम्
3. क-घ—अर्धचतुष्टयं नास्ति

क्रोधो हन्ति हि यद्दानं तस्माद्दानाद्वरो दमः ॥ १५

विद्यादानात् परं नास्ति वेदविद्या महाफला ।
अध्यापकः परिक्लेशाद् अक्षयं फलमश्नुते ॥ १६

विधिवत् पावकं हुत्वा ब्रह्मलो[1]कगतो नृप ।
अधीत्यापि हि यो वेदान् न्यायविद्भ्यः प्रयच्छति ॥ १७

गुरुकर्मप्रशंसी च सोऽपि स्वर्गे महीयते ॥ १७॥

क्षत्रियोऽध्ययने युक्तो यजने दानकर्मणि ।
युद्धे यश्च परित्राता सोऽपि स्वर्गे महीयते ॥ १८॥

वैश्यस्स्वकर्मनिरतः प्रदानाल्लभते महत् ।
शूद्रस्स्वकर्मनिरतस् स्वर्गं शुश्रूषयेच्छति ॥ १९॥

शूरा बहुविधाः प्रोक्तास् तेषामर्थांश्च मे शृणु ।
शूरान् विधात्रा निर्दिष्टान् फलं शूरस्य चैव हि ॥ २०॥

यज्ञे शूरास्तथाशूरा दमे शूरास्तथा परे ।
युद्धशूरास्तथैवोक्ता दानशूराश्च मानवाः ॥ २१॥

बुद्धिशूरास्तथा चान्ये क्षमाशूरास्तथा परे ।
आर्जवेन तथा शूरास् समवर्तन्त मानवाः ॥ २२॥

तैस्तैस्तु नियमैश्शूरा बहवस्सन्ति चापरे ।

---

1. क-ख-घ—के यथा नृप

वेदाध्ययनशूराश्च [1]शूराश्चाध्यापने तथा ॥ २३॥
गुरुशुश्रूषया शूराः [2]पितृशुश्रूषया परे ।
[3]मातृशुश्रूषया शूरा भैक्षशूरास्तथा परे ॥ २४॥
साङ्ग्रहशूराश्च बहवो योगशूरास्तथा परे ।
अरण्ये गृहवासे च शूराश्चातिथि[4]पूजने ॥ २५॥
सर्वे यान्ति परांल्लोकान् स्वकर्मफलनिर्जितान् ॥ २६
[5]पारणं सर्व[6]देये च सर्वतीर्थावगाहनम् ।
सत्यं च ब्रुवतो नित्यं समं वा स्यान्नवा समम् ॥ २७
अश्वमेधसहस्रं च सत्यं च तुलया धृतम् ।
अश्वमेधसहस्राद्धि सत्यमेकं विशिष्यते ॥ २८
सत्येन सूर्यस्तपति सत्येनाग्निः प्रदीप्यते ।
सत्येन मारुतो वाति सर्वं सत्ये प्रतिष्ठितम् ॥ २९
सत्येन देवान् प्रीणाति पितॄंश्च ब्राह्मणांस्तथा ।
सत्यमाहुः परं धर्मं तस्मात् सत्यं न लोपयेत् ॥ ३०
मुनयस्सत्यनिरता मुनयस्सत्यविक्रमाः ।
मुनयस्सत्यशपथास् तस्मात् सत्यं विशिष्यते ॥ ३१

---

1. क-घ—वेदस्याध्यापने तथा
2. अ—अयं पादोऽनन्तरश्च न स्तः
3. ख—इदमर्धं नास्ति
4. क-ख-घ—भोजने
5. ख—धारणं सर्ववेदानां
6. क-घ—तीर्थानां सप्त

सत्यवन्तस्सत्यलोके मोदन्ते भरतर्षभ ।
दमस्सत्यफलावाप्तिर् उक्तस्सर्वात्मना मया ॥ ३२

असंशयं विनीतात्मा स च स्वर्गे महीयते ।
ब्रह्मचर्यस्य तु गुणान् शृणु मे वसुधाधिप ॥ ३३

आजन्ममरणाद्यस्तु ब्रह्मचारी भवेदिह ।
न तस्य किञ्चिदप्राप्यम् इति विद्धि जनाधिप ॥ ३४

बह्वयः कोट्यस्त्वृषीणां तु ब्रह्मलोकमितो गताः ।
सत्ये रतानां सततं दान्तनामूर्ध्वरेतसाम् ॥ ३५

ब्रह्मचर्यं [1]दहेद्राजन् सर्वपापान्युपासितम् ।
ब्राह्मणेन विशेषेण ब्राह्मणो ह्यग्निरुच्यते ॥ ३६

प्रत्यक्षं च तथाप्येतद् ब्राह्मणेषु तपस्विषु ।
बिभेति च तथा शक्रो ब्रह्म[2]चर्यप्रधर्षितः ॥ ३७

तद्ब्रह्मचर्यस्य फलम् ऋषीणामिह विद्यते ॥ ३७॥

मातापित्रोः पूजने यो धर्मस्तमपि मे शृणु ॥ ३८

शुश्रूषते यः पितरं न चासूयेत् कथञ्चन ।
मातरं वाऽनहं वादी गुरुमाचार्यमेव च ॥ ३९

---

1. ख—हरेद्राजन्
2. क-घ—चारि

तस्य पार्थफलं विद्धि स्वर्लोके स्थानमुत्तमम् ।
न च पश्येत नरकं गुरुशुश्रूषुरात्मवान् ॥ ४०

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां
अनुशासनपर्वणि द्विषष्टितमोऽध्यायः ॥ ६२ ॥
॥ ८९ ॥ आनुशासनिकपर्वणि द्विषष्टितमोऽध्यायः ॥ ६२ ॥
[अस्मिन्नध्याये ४० श्लोकाः]

॥ त्रिषष्टितमोऽध्यायः ॥

भीष्मेण युधिष्ठिरं प्रति गोदानविधिफलादिकथनम् ॥

युधिष्ठिरः—

विधिं गवां परमहम् श्रोतुमिच्छामि तत्त्वतः ।
येनेह शाश्वताँल्लोकान् अखिलानश्नुवीमहि ॥ १

भीष्मः—

न गोदानात् परं किञ्चिद् विद्यते वसुधाधिप ।
गौर्हि न्यायागता दत्ता सद्यस्तारयते कुलम् ॥ २

सतामर्थस्सम्यगुत्पादितो यस्
स वै कृत्स्नस्सम्यगिज्या प्रजाभ्यः ।
तस्मात् कालं सम्यगिज्याप्रवृत्तं
गवां दाने शृणु राजन् विधिं मे ॥ ३

पुरा गोष्ठे निलीनासु गोषु सन्दिग्धदर्शिना ।
मान्धात्रा प्रकृतं प्रश्नम् बृहस्पतिरभाषत ॥ ४

द्विजानामन्त्र्य सत्कृत्य प्रोक्तं कालमुपोष्य च ।
गोदानार्थं नियुञ्जीत रोहिणीं नियतव्रतः ॥ ५

आह्वानं च प्रयुञ्जीत सङ्गवे बहुलेऽपि च ।
प्रविश्य च गवां मध्यम् इमां श्रुतिमुदाहरेत् ॥ ६

गौर्मे माता गोवृषभः पिता मे
दिवं गच्छन् जगती मे प्रतिष्ठा ।
प्रपद्यैवं शर्वरीमुष्य गोषु
मुनिर्वाणीमुत्सृजेद् गोप्रदाने ॥ ७

[1]स तामेकां निशां गोभिस् समसङ्ख्यसमावृतः ।
एकाह्यगमनात् सद्यः कलुषाद्विप्रमुच्यते ॥ ८

[2]उत्सृष्टवृषवत्सा हि प्रदेया सूर्यदर्शने ।
त्रिविधा प्रतिपत्तव्या अर्थवादाशिषस्तवाः ॥ ९

ऊर्जस्विन्य ऊर्जमेधाश्च यज्ञा
गर्भोऽमृतस्य जगतश्च प्रतिष्ठा ।

---

1. क—कृशामेकान्नशाङ्गो हि समस्सख्यसमावृतः ।
एतान्मे गमनात् [पाठान्तरम्]
घ—सितामेकान्नशां गोभिस्समसंख्यसमायुतः ।
एतान्मे गमनात् सद्यः [पाठान्तरम्]
2. क-घ—उत्सृष्टा वै सवत्सा हि

[1]क्षितौ रोम्णः प्रभवश्शश्वदेव
प्राजापत्यस्सर्वविद्याप्रवादः ॥ १०
गावो ममैनः प्रणुदन्तु सौर्यास्
तथा सौम्यास्स्वर्गयानाय सन्तु ।
आत्मानं मे मातृवच्चाश्रयन्तु
तथाऽनुक्तास्सन्तु सर्वाशिषो मे ॥ ११
[2]शेषोत्सर्गे कर्मभिर्देहमोक्षे
[3]सरस्वत्यां श्रेयसि सम्प्रवृत्ताः ।
यूयं नित्यं पुण्यकर्मोपवाहाश्
शंसध्वं मे गतिमिष्टां प्रपन्नाः ॥ १२
या वै यूयं सोऽहमद्यैकभावो
युष्मान् दत्त्वा देहमात्मप्रदाता ।
मनश्च्युता मन एवोपपन्नास्
सन्धुक्षध्वं सौम्यरूपाश्च्यदेहाः ॥ १३
दानस्याग्रे पूर्वमेतद्वदेत
गवां दाता विद्धि यत् पूर्वदृष्टम् ।
प्रतिब्रूयाच्छेषधर्मान् द्विजातिः
प्रतिगृह्णन् वै गोप्रदाने विधिज्ञः ॥ १४

1. क-घ—अर्धत्रयं नास्ति 2. घ—रोषात्सर्गे
3. घ—सरस्वत्या

गां ददानीति वक्तव्यम् अर्घ्यमुत्सृज्य सुव्रत ।
ऊढव्या भरितव्या च वैष्णवीति च चोदयेत् ॥ १५

नाम सङ्कीर्तयेत्तस्या यथासङ्ख्योत्तराय वै ।
फलं षट्त्रिंशदष्टौ च सहस्राणि च विंशतिः ॥ १६

एवमेतान् गुणान् वृद्धान् भावनीयान् यथाक्रमम् ।
गोप्रदानात् समाप्नोति समस्तानष्टमे क्रमे ॥ १७

गोदानशीलो निर्भयश्चा[1]न्नदाता
तस्याददे वसुदाता च कामी ।
ऊढव्योढा भारत यश्च विद्वान्
समाख्यातास्ते वैष्णवाश्चन्द्रलोकाः ॥ १८

गा वै दत्त्वा गोव्रती स्यात् त्रिरात्रं
निशां चैकां [2]संवसेतेह ताभिः ।
काम्याष्टम्यां वर्तितव्यं त्रिरात्रं
रसैर्वा गोश्शकृता प्रस्रवैर्वा ॥ १९

[3]वेदव्रती स्याद्वृषभप्रदाता
वेदावाप्तिर्गोयुगस्य प्रदाने ।

---

1. अ—स्य घ—र्हं
2. क-घ—समुपास्ते ह ख—संवसतीह
3. अ-क-घ—देवव्रती

तथा गवां विधिमासाद्य यज्वा
लोकानग्र्यान् विन्दते गोविधिज्ञः ॥ २०

[1]कामान् सर्वान् पार्थिवानेकसंस्थान्
यो वै दद्यात् कामदुघां च भूमिम् ।
सम्यग्यास्युर्हव्यकव्यं वहन्त्यस्
ता उत्सृज्या अक्षयं सम्प्रदानम् ॥ २१

[2]न वाऽशिष्यायाव्रतायोपकुर्या-
न्नाश्रद्दधानाय न वक्रबुद्धये ।
गुह्यो ह्ययं सर्वलोकस्य धर्मो
न मांधाता यत्र तत्र प्रजल्पेत् ॥ २२

सन्ति लोके श्रद्दधाना मनुष्यास्
सन्ति क्षुद्रा राक्षसा मानुषेषु ।
येषां दानं दीयमानं ह्यनिष्टं
नास्तिक्यं वै संश्रयन्ते ह्यपुण्याः ॥ २३

बार्हस्पत्यं वाक्यमेतन्निशम्य
राजानो वै गोप्रदानानि कृत्वा ।
लोकान् प्राप्ताः पुण्यशीलास्सुवृत्तास्
स्थाने राजन् कीर्त्यमानान् निबोध ॥ २४

---

1. क-घ—क्रमात्
2. क-घ—नाशिष्याय नाव्रता

उशीनरो विष्वगश्वो नृगश्च
भगीरथो विश्रुतो यौवनाश्वः ।
मान्धाता वै मुचुकुन्दश्च राजा
भूरिद्युम्नो नैषधस्सोमकश्च ॥ २५

पुरूरवा भरतश्चक्रवर्ती
यस्यान्वया भारतास्सर्व एव ।
तथा वीरो दाशरथिश्च रामो
ये चाप्यन्ये विश्रुताः कीर्तिमन्तः ॥ २६

तथा राजा पृथुकर्मा दिलीपो
दिवं प्राप्ता गोप्रदाने विधिज्ञाः ।
यज्ञैर्होमैस् तपसा दानधर्मैर्
मान्धाता वै गोप्रदानैश्च युक्तः ॥ २७

तस्मात् पार्थ त्वमपीमां मयोक्तां
बार्हस्पत्यां भारतीं धारयस्व ।
द्विजाग्र्येभ्यः प्रयच्छस्व प्रतीतो
गाः पुण्या वै प्राप्य राज्यं कुरूणाम् ॥ २८

वैशम्पायनः—

तथा सर्वं कृतवान् धर्मराजो
भीष्मेणोक्तो विधिवद् गोप्रदाने ।

स मांधाता देवगुरूपदिष्टं
[1]सत्यं धर्मं धारयामास राजा ॥ २९

इति नृपतिवरस्सुस्थितो गोप्रदाने
[2]यवशकलैस्सह गोमयं पिबानः ।
क्षितितलशयनश्शिखी यतात्मा
वृष इव राजवृषस्तदा बभूव ॥ ३०

स नृपतिरभवत् स देवताभ्यः
प्रवणमना ह्यभिसंस्तुवंश्च गा वै ।
न च धुरि नृप गामयुङ्क्त भूयस्
तुरगवरैरगमच्च यत्र तत्र ॥ ३१

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां
अनुशासनपर्वणि त्रिषष्टितमोऽध्यायः ॥ ६३ ॥
॥ ८९ ॥ आनुशासनिकपर्वणि त्रिषष्टितमोऽध्यायः ॥ ६३ ॥
[अस्मिन्नध्याये ३१ श्लोकाः]

---

1. क-ङ—सम्यग्धर्मं
2. ङ—यवीयैस्सकलैस्सह गोमयं पिबानः

॥ चतुष्षष्टितमोऽध्यायः ॥

भीष्मेण युधिष्ठिरं प्रति गोसामान्योत्पत्तिप्रकारकथनपूर्वकं कपिलोत्पत्तिप्रकारकथनम् ॥

वैशम्पायनः—

ततो युधिष्ठिरो राजा भूयश्शान्तनवं नृप ।
गोदाने विस्तरं धीमान् पप्रच्छ विनयान्वितः ॥ १

युधिष्ठिरः—

गोप्रदाने गुणान् सर्वान् पुनः प्रब्रूहि भारत ।
न हि तृप्याम्यहं वीर शृण्वानोऽमृतमीदृशम् ॥ २

वैशम्पायनः—

इत्युक्तो धर्मराजेन तदा शान्तनवो नृप ।
सम्यगाह गुणांस्तस्मै गोप्रदानस्य केवलान् ॥ ३

भीष्मः—

वत्सलां गुणसम्पन्नां तरुणां वस्त्रसंवृताम् ।
दत्त्वेदृशीं गां विप्राय सर्वपापैः प्रमुच्यते ॥ ४
अनन्ता नाम ते लोका गां दत्त्वा यत्र गच्छति ॥ ४॥
पीतोदकां त्यक्तृणां दुष्टदुग्धां निरिन्द्रियाम् ।
ज्वरार्तामुपयुक्तार्थां जीर्णां कूपमिवाजलम् ॥ ५॥
तमो दत्त्वा प्रविशति द्विजं [1]क्लेशेन योजयन् ॥ ६

1. क-घ—कांपेन

दुष्टा रुष्टा व्याधिता दुर्बला च
न दातव्या या तु मूल्यैर्न दत्ता ।
क्लेशैर्विप्रं योऽफलैस्संयुनक्ति
तस्यावीर्याश्चाफलाश्चैव लोकाः ॥ ७

बलान्विताश्शीलवीर्योपपन्नास्
सर्वाः प्रशंसन्ति सुगन्धवत्यः ।
यथा हि गङ्गा सरितां वरिष्ठा
तथाऽर्जुनीनां कपिला वरिष्ठा ॥ ८

युधिष्ठिरः—

कस्मात् साम्ये बहुलानां प्रदानात्
सद्भिः प्रशस्तं कपिलाप्रदानम् ।
विशेषमिच्छामि महानुभाव
श्रोतुं समर्थो हि भवान् प्रवक्तुम् ॥ ९

भीष्मः—

वृद्धानां ब्रुवतां श्रुत्वा कपिलानामथोद्भवम् ।
वक्ष्यामि तमशेषेण रोहिण्यो निर्मिता यथा ॥ १०

प्रजास्सृजेति व्यादिष्टः पूर्वं दक्षस्स्वयम्भुवा ।
नासृजद्वृत्तिमेवाग्रे प्रजानां हितकाम्यया ॥ ११

यथा ह्यमृतमाश्रित्य वर्तयन्ति दिवौकसः ।
तथा वृत्तिमुपाश्रित्य वर्तयन्ति प्रजास्सदा ॥ १२

अचरेभ्यश्च भूतेभ्यश् चराश्रेष्ठास्ततो नराः ।
ब्राह्मणाश्च तथा श्रेष्ठास् तेषु यज्ञाः प्रतिष्ठिताः ॥ १३

यज्ञैराप्यायते सोमस् स च गोषु प्रतिष्ठितः ।
ताभ्यो देवाः प्रमोदन्ते प्रजानां वृत्तिरासु च ॥ १४

ततः प्रजासु सृष्टासु दक्षाद्यैः क्षुधिताः प्रजाः ।
प्रजापतिमुपाधावन् विचिन्त्य च चतुर्मुखम् ॥ १५

एतान्येव तु भूतानि प्राक्रोशन् वृत्तिकाङ्क्षया ।
वृत्तिदं माऽन्वपद्यन्त तृषिताः पितृमातृवत् ॥ १६

इति तन्मनसा गत्वा प्रजासर्गार्थमात्मनः ।
प्रजापतिर्बलाधानम् अमृतं प्रापिबत्तदा ॥ १७

शंसतस्तस्य तृप्तिं तु गन्धात् सुरभिरुत्थिता ॥ १७॥

मुखजा साऽसृजद्धातुस् सुरभिं लोकमातरम् ।
दर्शनीयरसां वृत्तिं सुरभिं मुखजां सुताम् ॥ १८॥

साऽसृजत् सौरभेयीस्तु सुरभिर्लोकमातरः ।
सुवर्णवर्णाः कपिलाः प्रजानां वृत्तिधेनवः ॥ १९॥

तासाममृतवृत्तीनां क्षरन्तीनां समन्ततः ।
बभूवामृतजः फेनस् स्रवन्तीनामिवोर्मिजः ॥ २०॥

स वत्समुखविभ्रष्टो भवस्य भुवि तिष्ठतः ।
शिरस्यवापतत् क्रुद्धस् स तदैक्षत च प्रभुः ॥ २१॥

ललाटप्रभवेनाक्ष्णा रोहिणीं प्रदहन्निव ॥ २२

तत्तेजस्तु ततो रौद्रं कपिलां गां विशां पते ।
नानावर्णत्वमनयन्मेघानिव दिवाकरः ॥ २३

यास्तु तस्मादपक्रम्य सोममेवाभिसंश्रिताः ।
यथोत्पन्नास्त्ववर्णास्ताः ता ह्येता नान्यवर्णगाः ॥ २४

[1]अथ क्रुद्धं महादेवं प्रजापतिरभाषत ॥ २४॥

ब्रह्मा—

अमृतेनावसिक्तस्त्वम् नोच्छिष्टं विद्यते गवाम् ॥ २५

यथा ह्यमृतमादाय सोमो विष्यन्दते पुनः ।
तथा क्षीरं क्षरन्त्येता रोहिण्योऽमृतसम्भवाः ॥ २६

न दुष्यत्यनिलो नाग्निर् न सुवर्णं घृतं दधि ।
नामृतेनामृतं पीतं न वत्सैर्दुष्यते पयः ॥ २७

इमाँल्लोकान् धरिष्यन्ति ह्याविषा प्रस्रवेन च ।
आसाममृतमश्नीहि सर्वामृतमयं शुभम् ॥ २८

भीष्मः—

ऋषभं च ददौ तस्मै भगवाँल्लोकभावनः ।
प्रसादयामास ततस् तेन रुद्रं च भारत ॥ २९

प्रीतश्चापि महादेवश् चकार वृषभं तदा ।
ध्वजं च वाहनं चैव तस्मात् स वृषभध्वजः ॥ ३०

---

1. क-घ—अर्धचतुष्टयं नास्ति

तदा देवो महादेवस् तथा पशुपतिः कृतः ।
ईश्वरस्सन् स भगवान् वृषाङ्क इति कीर्त्यते ॥ ३१

एवमव्यग्रवर्णानां कपिलानां विशां पते ।
प्रदाने प्रथमः कल्पस् सर्वासामेव कीर्तितः ॥ ३२

लोकज्येष्ठा लोकवृत्त्यै प्रवृत्ता
रुद्रोद्भूताम्सोमविष्यन्दभूताः ।
काम्याः पुण्याः कामदाः प्राणदाश्च
गा वै दत्त्वा सर्वकामप्रदस्स्यात् ॥ ३३

इदं गवां प्रभवविधानमुत्तमं
पठेत् सदा शुचिरतिमङ्गल[1]प्रियम् ।
विमुच्यते कलिकलुषेण मानवः
प्रियान् सुतान् पशुधनमाप्नुयान्नरः ॥ ३४

हव्यं कव्यं तर्पणं शान्तिकर्म
यानं वासो वृद्धबालस्य तुष्टिः ।
एतान् सर्वान् गोप्रदाने गुणांस्तु
[2]दानाद्राजन्नाप्नुयात् सर्वदैव ॥ ३५

वैशम्पायनः—

पितामहस्याथ निशम्य वाक्यं
राजा सह भ्रातृभिराजमीढः ।

---

1. ख-घ—प्रियः
2. ख-घ—दाता राजन्नाप्नुयाद्वै सदैव

सौवर्णकांस्योपदुहास्ततो गाः
पार्थो ददौ ब्राह्मणसत्तमेभ्यः ॥ ३६

तथैव तेभ्योऽपि ददौ द्विजेभ्यो
गवां सहस्राणि शतानि चैव ।
यज्ञान् समुद्दिश्य स दक्षिणार्थे
लोकान् विजेतुं [1]परमस्य कर्तुः ॥ ३७

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां अनुशासनपर्वणि चतुष्षष्टितमोऽध्यायः ॥ ६४ ॥
॥ ८९ ॥ आनुशासनिकपर्वणि चतुष्षष्टितमोऽध्यायः ॥ ६४ ॥
[अस्मिन्नध्याये ३७ श्लोकाः]

॥ पञ्चषष्टितमोऽध्यायः ॥

भीष्मेण युधिष्ठिरं प्रति गोमहिमप्रतिपादकवसिष्ठसौदाससंवादानुवादः ॥

भीष्मः—
एतस्मिन्नेव काले तु वसिष्ठमृषिसत्तमम् ।
इक्ष्वाकुवंशजो राजा सौदासो ददतां वरः ॥ १

सर्वलोकचरं सिद्धं ब्रह्मलोकधरं मुनिम् ।
पुरोहितमिदं वाक्यम् अभिवाद्योपचक्रमे ॥ २

1. अ-ख—परमं च कर्तुम्

सौदासः—

त्रैलोक्ये भगवन् किंस्वित् पवित्रं कथ्यतेऽनघ ।
यत् कीर्तयन् सदा मर्त्यः प्राप्नुयात् पुण्यमुत्तमम् ॥ ३

भीष्मः—

तस्मै प्रोवाच भगवान् प्रणताय हितं तथा ।
गवामुपनिषद्विद्यां नमस्कृत्य गवां शुचिः ॥ ४

वसिष्ठः—

गावस्सुरभिगन्धिन्यस् तथा गुग्गुलुगन्धिकाः ।
गावः प्रतिष्ठा [1]लोकानां गावस्स्वस्त्ययनं महत् ॥ ५

गावो भूतं भविष्यच्च गावः पुष्टिस्सनातनी ।
गावो लक्ष्म्यास्सदा मूलं गोषु दानं न नश्यति ॥ ६

अन्नं हि सततं गावो देवानां परमं हविः ।
स्वाहाकारवषट्कारौ नित्यं गोषु प्रतिष्ठितौ ॥ ७

गावो यज्ञस्य हि फलं गोषु यज्ञः प्रतिष्ठितः ।
सायं प्रातश्च सततं होमकाले महामते ॥ ८

गावो ददति वै होमम् ऋषिभ्यः पुरुषर्षभ ॥ ८॥

कानिचिद्यानि दुर्गाणि दुष्कृतानि कृतानि च ।
तरन्ति ते च पाप्मानं धेनुं ये ददति प्रभो ॥ ९॥

एकां च दशगुर्दद्याद् दश दद्याच्च गोशतीं ।

---

1. क-ख-घ—लाभानां

शतं सहस्रगुर्दद्यात् सर्वे तुल्यफला हि ते ॥ १०॥
अनाहिताग्निश्शतगुर् अयज्वा च सहस्रगुः ।
समृद्धो यश्च कीनाशो नार्घमर्हन्ति ते त्रयः ॥ ११॥
कपिलां ये प्रयच्छन्ति सवत्सां कांस्यदोहनाम् ।
सुव्रतां वस्त्रसंवीताम् उभौ लोकौ जयन्ति ते ॥ १२॥
युवानमिन्द्रियोपेतं शतेन सह यूथपम् ।
गवेन्द्रं ब्राह्मणेन्द्राय भूरिशृङ्गमलङ्कृतम् ॥ १३॥
ऋषभं ये प्रयच्छन्ति श्रोत्रियस्य परन्तप ।
ऐश्वर्यं तेऽभिजायन्ते जायमानाः पुनः पुनः ॥ १४॥
नाकीर्तयित्वा गास्सम्यक् नासंस्पृश्य तथोत्पतेत् ।
सायं प्रातर्नमस्येच्च गास्ततः पुष्टिमाप्नुयात् ॥ १५॥
गवां मूत्रपुरीषस्य नोद्विजेत कदाचन ।
न चासां मांसमश्नीयाद् गवां पुष्टिं तथाऽऽप्नुते ॥ १६॥
गाश्च सङ्कीर्तयेन्नित्यं नावमन्येत गास्तथा ।
अनिष्टं स्वप्नमालक्ष्य नरो गास्सम्प्रकीर्तयेत् ॥ १७॥
गोमयेन सदा स्नायाद् गोकरीषे च संविशेत् ।
श्लेष्ममूत्रपुरीषाणां प्रतिघातं तु वर्जयेत् ॥ १८॥
सौम्ये चर्मणि भुञ्जीत निरीक्षन् वारुणीं दिशम् ।
वाग्यतस्सर्पिषा भूमौ गवां पुष्टिं तथाऽऽप्नुते ॥ १९॥

घृतेन जुहुयादग्निं घृतेन स्वस्ति वाचयेत् ।
घृतं दद्याद्घृतं प्राशेद् गवां व्युष्टिं तथाऽश्नुते ॥ २०॥

गोमत्या विद्यया धेनुं तिलानां योऽभिमन्त्रयेत् ।
रथं रत्नमयं दद्यान्न स शोचेत् कृताकृते ॥ २१॥

गावो मामुपतिष्ठन्तु हेमशृङ्गाः पयोमुचः ।
सुरभ्यस्सौरभेय्यश्च सरितस्सागरं यथा ॥ २२॥

गाश्च पश्याम्यहं नित्यं गावः पश्यन्तु मां सदा ।
गावोऽस्माकं वयं तासां यतो गावस्ततो वयम् ॥ २३॥

एवं रात्रौ दिवा चैव समेषु विषमेषु च ।
महाभयेषु च नरः कीर्तयन मुच्यते भयात् ॥* २४॥

शतं वर्षसहस्राणां तपस्तप्तं सुदुश्चरम् ।
गोभिः पूर्वविसृष्टाभिर् गच्छामश्शृङ्गितामिति ॥ २५॥

लोकेऽस्मिन् दक्षिणानां च सर्वासां वयमुत्तमाः ।
[1]स एव चेतसा तेन हतो लिप्येत सर्वशः ॥ २६॥

भवेम न च लिप्येम दोषेणेति परन्तप ।
शकृता च पवित्रार्थं कुर्वीरन् देवमानुषाः ॥ २७॥

---

* सर्वेषु कोशेषु अत्रैवाध्यायसमाप्तिर्दृश्यते

1. क—स एव च ततोऽहं च तेतप्रेत सहस्रशः ।
घ—स एव वाचा सातोहं ते तप्येत सहस्रशः । [पाठान्तरम्]

तथा सर्वाणि भूतानि स्थावराणि चराणि च ।
प्रदातारश्च गोलोकान् गच्छेयुरिति मानद ॥ २८॥

ताभ्यो वरं ददौ ब्रह्मा तपसोऽन्ते स्वयं प्रभुः ।
एवं भवत्विति विभुर् लोकांस्तारयतेति च ॥ २९॥

उत्तस्थुस्सिद्धकामास्ता भूतभव्यस्य मातरः ।
तपसोऽन्ते महाराज गावो लोकपरायणाः ॥ ३०॥

तस्माद् गावो महाभागाः पवित्रं परमुच्यते ।
तथैव सर्वभूतानां गावस्तिष्ठन्ति मूर्धनि ॥ ३१॥

समानवत्सां कपिलां धेनुं दत्त्वा पयस्विनीम् ।
सुव्रतां वस्त्रसंवीतां [1]ब्रह्मलोके महीयते ॥ ३२॥

[2]रोहिणीं तुल्यवत्सां तु धेनुं दत्त्वा पयस्विनीम् ।
सुव्रतां वस्त्रसंवीतां स्वर्गलोके महीयते ॥ ३३॥

[3]समानवत्सां श्वेतां तु धेनुं दत्त्वा पयस्विनीम् ।
सुव्रतां वस्त्रसंवीतां इन्द्रलोके महीयते ॥ ३४॥

समानवत्सां धवलां धेनुं दत्त्वा पयस्विनीम् ।
सुव्रतां वस्त्रसंवीतां स्वर्गलोके महीयते ॥ ३५॥

समानवत्सां कृष्णां तु धेनुं दत्त्वा पयस्विनीम् ।

---

1. घ—वसु
2. क-घ—द्वादशार्धानि न सन्ति
3. ख—अर्धषट्कं नास्ति

सुव्रतां वस्त्रसंवीतां स्वर्गलोके महीयते ॥ ३६॥

समानवत्सां नीलां तु धेनुं दत्त्वा पयस्विनीम् ।
सुव्रतां वस्त्रसंवीताम् अग्निलोके महीयते ॥ ३७॥

वातरेणुसवर्णां तु सवत्सां कांस्यदोहनाम् ।
प्रदाय वस्त्रसंवीतां वायुलोके महीयते ॥ ३८॥

[1-2]समानवत्सां धूम्रीं तु धेनुं दत्त्वा पयस्विनीम् ।
सुव्रतां वस्त्रसंवीतां यमलोके महीयते ॥ ३९॥

अपां फेनसवर्णां तु सवत्सां कांस्यदोहनीम् ।
प्रदाय वस्त्रसंवीतां वारुणं लोकमश्नुते ॥ ४०॥

[3]हिरण्यवर्णां पिङ्गाक्षीं सवत्सां कांस्यदोहनीम् ।
प्रदाय वस्त्रसंवीतां कौबेरं लोकमश्नुते ॥ ४१॥

पलालधूम्रवर्णां तु सवत्सां कांस्यदोहनीम् ।
प्रदाय वस्त्रसंवीतां पितृलोके महीयते ॥ ४२॥

सवत्सां पीवरीं दत्त्वा शितिकण्ठामलङ्कृताम् ।
वैश्वदेवम[4]सौ पुण्यं स्थानं श्रेष्ठं प्रपद्यते ॥ ४३॥

समानवत्सां गौरीं तु धेनुं दत्त्वा पयस्विनीम् ।
सुव्रतां वस्त्रसंवीतां वसूनां लोकमश्नुते ॥ ४४॥

---

1. क-घ—इदमर्धद्वयं नास्ति
2 ख—अर्धचतुष्टयं नास्ति
3. ख—अर्धचतुष्टयं नास्ति
4. ख-घ—संबाधं

पाण्डुकम्बलवर्णां तु सवत्सां कांस्यदोहनाम् ।
[1]प्रदाय वस्त्रसंवीतां साध्यानां लोकमाप्नुते ॥ ४५॥

वैतानस्थितमुक्षाणं सर्वरत्नैरलङ्कृतम् ।
प्रदाय मरुतां लोकान् [2]विशोकः प्रतिपद्यते ॥ ४६॥

वत्सोपपन्नां नीलां गां सर्वरत्नसमन्विताम् ।
गन्धर्वाप्सरसां लोकान् दत्त्वा प्राप्नोति मानवः ॥ ४७॥

शितिकण्ठमनड्वाहं सर्वरत्नैरलङ्कृतम् ।
दत्त्वा प्रजापतेर्लोकान् विशोकः प्रतिपद्यते ॥ ४८॥

गोप्रदानरतो याति भित्त्वा जलदसञ्चयान् ।
विमानेनार्कवर्णेन दिवि राजन विराजते ॥ ४९॥

तं चारुवेषास्सुश्रोण्यस् सहस्रं वारयोषितः ।
रमयन्ति नरश्रेष्ठ गोप्रदानरतं नरम् ॥ ५०॥

वीणानां वल्लकीनां च नूपुराणां च शिञ्जितैः ।
हासैश्च हरिणाक्षीणां प्रसुप्तः प्रतिबोध्यते ॥ ५१॥

यावन्ति रोमाणि भवन्ति धेन्वास्
तावन्ति वर्षाणि महीयते सः ।
स्वर्गाच्च्युतश्चापि ततो नृलोके
कुले प्रसूतो विपुले विशोकः* ॥ ५२॥

---

1. क-घ—इदमर्धं नास्ति 2. अ-ख—आर्जितान्
* सर्वेषु कोशेषु अस्मिन्नेवाध्यायसमाप्तिर्दृश्यते

घृतक्षीरप्रदा गावो घृतयोन्यो घृतोद्भवाः ।
घृतनद्यो घृतावर्तास् ता मे सन्तु सदा गृहे ॥ ५३॥

घृतं मे हृदये नित्यं घृतं नाभ्यां प्रतिष्ठितम् ।
घृतं सर्वेषु गात्रेषु घृतं मे मनसि स्थितम् ॥ ५४॥

गावो ममाग्रतो नित्यं गावः पृष्ठत एव च ।
गावो मे स्वर्वतश्चैव गवां मध्ये वसाम्यहम् ॥ ५५॥

इत्याचम्य जपेत् सायं प्रातश्च पुरुषस्सदा ।
यदहः कुरुते पापं तस्मात् सद्यो विमुच्यते ॥ ५६॥

प्रासादा यत्र सौवर्णा वसोर्धाराश्च कामदाः ।
गन्धर्वाप्सरसो यत्र तत्र यान्ति सहस्रदाः ॥ ५७॥

नवनीतपङ्काः क्षीरोदा दधिशैवलसङ्कुलाः ।
वहन्ति यत्र नद्यो वै तत्र यान्ति सहस्रदाः ॥ ५८॥

गवां शतसहस्रं तु यः प्रयच्छेद्यथाविधि ।
परां वृद्धिमवाप्याथ स गोलोके महीयते ॥ ५९॥

दश चोभयतः प्रेत्य मातापित्रोः पितामहात् ।
स याति सुकृताँल्लोकान पुनाति च कुलं नरः ॥ ६०॥

धेन्वाः प्रमाणेन समप्रमाणां
धेनुं तिलानामपि च प्रदाय ।

पानीयवापीस्स यमस्य लोके
न यातनां काञ्चिदुपैति तत्र ॥ ६१॥

पवित्रमग्र्यं जगतः प्रतिष्ठा
दिवौकसां मातरोऽथाप्रमेयाः ।
अन्वालभेद्दक्षिणतो व्रजेच्च
दद्याच्च पात्रे प्रसमीक्ष्य कालम् ॥ ६२॥

धेनुं सवत्सां कपिलां भूरिशृङ्गीं
कांस्योपदोहां वसनोत्तरीयाम् ।
प्रदाय [1]तां गाहति दुर्विगाहां
याम्यां सभां वीतभयो मनुष्यः ॥ ६३॥

सुरूपा अनुरूपाश्च विश्वरूपाश्च मातरः ।
गावो मामुपतिष्ठन्ताम् इति नित्यं प्रकीर्तयेत् ॥ ६४॥

नातः पुण्यतरं दानं नातः पुण्यतरं फलम् ।
नातो विशिष्टं लोकेषु भूतं भवितुमर्हति ॥ ६५॥

त्वचा लोम्नाऽथ शृङ्गैश्च वालैः क्षीरेण मेदसा ।
यज्ञं वहन्ति सम्भूय किमस्त्यभ्यधिकं ततः ॥ ६६॥

यया सर्वमिदं प्राप्तं जगत् स्थावरजङ्गमम् ।
तां धेनुं शिरसा वन्दे भूतभव्यस्य मातरम् ॥ ६७॥

1. क-घ—तां गां हरिपृष्ठगाढाम्

गुणवचनसमुच्चयैकदेशो
नृवर मयैष गवां प्रकीर्तितस्ते ।
न हि परमिह दानमस्ति गोभ्यो
भवति न चापि परायणं ततोऽन्यत् ॥ ६८॥

भीष्मः—

वरमिदमिति भूमिपो विचिन्त्य
प्रवरमृषेर्वचनं ततो महात्मा ।
व्यसृजत नियतात्मवान् द्विजेभ्यस्
सुबहु स गोधनमाप्तवांश्च लोकान् ॥ ६९॥

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां
अनुशासनपर्वणि पञ्चषष्टितमोऽध्यायः ॥ ६५ ॥
॥ ८९ ॥ आनुशासनिकपर्वणि पञ्चषष्टितमोऽध्यायः ॥ ६५ ॥
[अस्मिन्नध्याये ६९॥ श्लोकाः]

॥ षट्षष्टितमोऽध्यायः ॥

भीष्मेण युधिष्ठिरं प्रति गवां तपःप्रसन्नाद् ब्रह्मणः शृङ्गप्राप्त्यादि-कथनम् ॥ १ ॥ तथा गोदानप्राप्यपुण्यलोकवर्णनम् ॥ २ ॥

युधिष्ठिरः—

पवित्राणां पवित्रं यच् श्रेष्ठं लोके च यद्भवेत् ।
पावनं परमं चैव तन्मे ब्रूहि पितामह ॥ १

भीष्मः—

गावो महार्थाः पुण्याश्च तारयन्ति च मानवान् ।
धारयन्ति प्रजाश्चेमाः पयसा हविषा तथा ॥ २

न हि पुण्यतमं किञ्चिद् गोभ्यो भरतसत्तम ।
एताः पवित्रा पुण्याश्च त्रिषु लोकेष्वनुत्तमाः ॥ ३

देवानामुपरिष्टाच्च गावः प्रतिवसन्ति वै ।
दत्त्वा चैता नरपते यान्ति स्वर्गं मनीषिणः ॥ ४

मान्धाता यौवनाश्वश्च ययातिर्नहुषस्तथा ।
गा वै ददन्तस्सततं सहस्रशतसम्मिताः ॥ ५

गताः परमकं स्थानं देवैरपि सुदुर्लभम् ॥ ५॥

अपि चात्र पुरावृत्तम् कथयिष्यामि तेऽनघ ॥ ६

ऋषीणामुत्तमान् धर्मान् कृष्णद्वैपायनं शुकः ।

अभिवाद्याह्निकं कृत्वा शुचिः प्रयतमानसः ॥ ७

पितरं परिपप्रच्छ दृष्टलोकपरावरम् ॥ ७॥

शुकः—

को यज्ञस्सर्वयज्ञानां वरिष्ठ उपलक्ष्यते ।
किञ्च कृत्वा परं स्वर्गं प्राप्नुवन्ति मनीषिणः ॥ ८॥

केन देवाः पवित्रेण [1]स्वर्गमश्नन्ति वै प्रभो ।
किञ्च यज्ञस्य यज्ञत्वं क च यज्ञः प्रतिष्ठितः ॥ ९॥

दानानामुत्तमं किञ्च किञ्च सत्रमतः परम् ।
पवित्राणां पवित्रं च यत्तद् ब्रूहि महामुने ॥ १०॥

भीष्मः—

एतच्छ्रुत्वा तु वचनं व्यासः परमधर्मवित् ।
पुत्रायाकथयत् सर्वं तत्त्वेन भरतर्षभ ॥ ११॥

व्यासः—

गावः प्रतिष्ठा भूतानां तथा गावः परायणम् ।
गावः पुण्याः पवित्राश्च पावनं धर्मतस्तथा ॥ १२॥

पूर्वमासन्नशृङ्गा वै गाव इत्यनुशुश्रुम ।
शृङ्गार्थे समुपासन्त ताः कुलप्रभुमव्ययम् ॥ १३॥

ततो ब्रह्मा तु गास्सत्रम् उपविष्टास्समीक्ष्य ह ।

---

1. क-घ—स्वर्गं भुञ्जन्ति

ईप्सितं प्रददौ गोभ्यस् ताभ्यः प्रत्येकशः प्रभुः ॥ १४॥
तासां शृङ्गाण्यजायन्त यस्या यादृङ् मनोगतम् ।
नानावर्णाश्शृङ्गवत्यस् ता व्यरोचन्त पुत्रक ॥ १५॥
ब्रह्मणा वरदत्तास्ता हव्यकव्यप्रदाश्शुभाः ।
पुण्याः पवित्रास्सुभगा दिव्यसंस्कारलक्षणाः ॥ १६॥
गावस्तेजो महद्दिव्यं गवां दानं प्रशस्यते ॥ १७
ये चैतास्सम्प्रयच्छन्ति साधवो गतमत्सराः ।
ते वै सुकृतिनः प्रोक्तास् सर्वदानप्रदाश्च ते ॥ १८
गवां लोकं तथा पुण्यम् आप्नुवन्ति च तेऽनघ ॥ १८॥
यत्र वृक्षा मधुफला दिव्यपुष्पफलोपगाः ।
पुष्पाणि च सुगन्धीनि दिव्यानि द्विजसत्तम ॥ १९॥
सर्वा माणिमयी भूमिस् सूक्ष्मकाञ्चनवालुका ।
[1]सर्वत्र शुभसंस्पर्शा निष्पङ्का निरजाशुभा ॥ २०॥
रक्तोत्पलवनैश्चैव मणिदण्डैर्हिरण्मयैः ।
तरुणादित्यसङ्काशैर् भान्ति तत्र जलाशयाः ॥ २१॥
महार्हमणिपत्रैश्च काञ्चनोपमकेसरैः ।
नीलोत्पलविमिश्रैश्च सरांसि बहुपङ्कजैः ॥ २२॥
करवीरवनैः फुल्लैस् सहस्रावर्तसंवृतैः ।

1. क—अर्धपञ्चकं नास्ति

सन्तानक[1]वनैः फुल्लैर् वृक्षैश्च समलङ्कृताः ॥ २३॥
निर्मलाभिश्च मुक्ताभिर् मणिभिश्च महाधनैः ।
उद्भूतपुलिनास्तत्र जातरूपैश्च निम्नगाः ॥ २४॥
सर्वरत्नमयैश्चित्रैर् अवगाढा नगोत्तमैः ।
जातरूपमयैश्चान्यैर् हुताशनसमप्रभैः ॥ २५॥
सौवर्णा गिरयस्तत्र मणिरत्नशिलोच्चयाः ।
सर्वरत्नमयैर्भान्ति शृङ्गैश्चारुभिरुच्छ्रितैः ॥ २६॥
नित्यपुष्पफलास्तत्र नगाः पत्ररथाकुलाः ।
नित्यगन्धरसैः पुष्पैः फलैश्च मुनिसत्तम ॥ २७॥
रज्यन्ते पुण्यकर्माणस् तत्र नित्यं सुखान्विताः ।
सर्वकामसमृद्धाश्च निश्शोका गतमन्यवः ॥ २८॥
विमानेषु विचित्रेषु रमणीयेषु सत्तम ।
मोदन्तः पुण्यकर्माणो विहरन्ति यशस्विनः ॥ २९॥
उपक्रीडन्ति तान ब्रह्मञ् शुभाश्चाप्सरसां गणाः ।
[2]एताँल्लोकानवाप्नोति गां दत्त्वा मुनिसत्तम ॥ ३०॥
यासामधिपतिः पूषा मारुतो बलवान् बले ।
ऐश्वर्ये वरुणो राजा ता मां पान्तु युगन्धराः ॥ ३१॥
अरूपा बहुरूपाश्च विश्वरूपाश्च मातरः ।

1. क-घ—फलैः पुष्पैः 2. क-ख—इमान्

प्राजापत्या इति ब्रह्मञ् जपेन्नित्यं यतव्रतः ॥ ३२॥

गास्तु शुश्रूषते यश्च समन्वेति च सर्वशः ।
तस्मै तुष्टाः प्रयच्छन्ति वरानपि च दुर्लभान् ॥ ३३॥

द्रुह्येन्न मनसा वाऽपि गोषु तास्सुसुखप्रदाः ।
अर्चयेत सदा चैव नमस्कारैश्च पूजयेत् ॥ ३४॥

दान्तः प्रीतमना नित्यं गवां तुष्टिं तथाऽश्नुते ।
[1]त्र्यहमुष्णं पिबेन्मूत्रं त्र्यहमुष्णं पिबेत् पयः ॥ ३५॥

गवामुष्णं पयः पीत्वा त्र्यहमुष्णं घृतं पिबेत् ।
[2]त्र्यहमुष्णं घृतं पीत्वा वायुभक्षो भवेत् त्र्यहम् ॥ ३६॥

[3]येन देवाः पवित्रेण भुञ्जते लोकमुत्तमम् ।
यत् पवित्रं पवित्राणां तद्धृतं शिरसा वहेत् ॥ ३७॥

घृतेन जुहुयादग्निं घृतेन स्वस्ति वाचयेत् ।
घृतं प्राशेद् घृतं दद्याद् गवां पुष्टिं तथाऽश्नुते ॥ ३८॥

[4]निर्वृतैश्च यवैर्गोभिर् मासान् प्रसृतयावकः ।
ब्रह्महत्यासमं पापं सर्वमेतेन शुध्यति ॥ ३९॥

[5]पराभवार्थं दैत्यानां देवैश्शौचमिदं कृतम् ।
देवत्वमपि च प्राप्तास् संसिद्धाश्च महाबलाः ॥ ४०॥

---

1. क-घ—इदमर्धं नास्ति
2. क-घ—इदमर्धं नास्ति
3. अ—इदमर्धचतुष्टयं नास्ति
4. क-घ—इदमर्धं नास्ति
5. अ—पावनार्थं हि देहानां

गावः पुण्याः पवित्राश्च पावनं परमं महत् ।
अपि दत्त्वा द्विजातिभ्यो नरस्स्वर्गमुपाश्नुते ॥ ४१॥
गवां मध्ये शुचिर्भूत्वा गोमतीं मनसा जपेत् ।
पूताभिरद्भिराचम्य शुचिर्भवति निर्मलः ॥ ४२॥
अग्निमध्ये गवां मध्ये ब्राह्मणानां च संसदि ।
विद्यावेदव्रतस्नातान् ब्राह्मणान् पुण्यकर्मिणः ॥ ४३॥
अध्यापयति शिष्यान् वै गोमतीं यज्ञसम्मिताम् ।
त्रिरात्रोपोषितो भूत्वा गोमतीं लभते पराम् ॥ ४५॥
[1]पुत्रकामश्च लभते पुत्रं धनमथापि च ।
पतिकामा च भर्तारं सर्वकामांश्च मानवः ॥ ४५॥
गावस्तुष्टाः प्रयच्छन्ति सेविता वै न संशयः ॥ ४६
एवमुक्ता महाभागा यज्ञियास्सर्वकामदाः ।
रोहिण्य इति जानीहि नैताभ्यो विद्यते परम् ॥ ४७

भीष्मः—

इत्युक्तस्स महातेजाश् शुकपित्रा महात्मना ।
पूजयामास ता नित्यं तस्मात् त्वमपि पूजय ॥ ४८

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां
अनुशासनपर्वणि षट्षष्टितमोऽध्यायः ॥ ६६ ॥
॥ ८९ ॥ आनुशासनिकपर्वणि षट्षष्टितमोऽध्यायः ॥ ६६ ॥
[अस्मिन्नध्याये ४८ श्लोकाः]

---

1. क—अर्धचतुष्टयं नास्ति

॥ सप्तषष्टितमोऽध्यायः ॥

भीष्मेण युधिष्ठिरं प्रति गोलोकस्य ब्रह्मलोकादप्युपरितनत्वे ब्रह्मणो वरदानस्य कारणत्वकथनम् ॥

युधिष्ठिरः—

सुराणामसुराणां च भूतानां च पितामह ।
प्रभुस्स्रष्टा च भगवान् मुनिभिस्स्तूयते [1]भुवि ॥ १

तस्योपरि कथं ह्येष लोकश्च स्थानतां गतः ।
संशयो मे महानेष तन्मे व्याख्यातुमर्हसि ॥ २

भीष्मः—

मनोवाग्बुद्धयस्तावद् एकस्थाः कुरुसत्तम ।
ततो मे शृणु कार्त्स्न्येन गो[2]माहात्म्यमनुत्तमम् ॥ ३

पुण्यं यशस्यमायुष्यं तथा स्वस्त्ययनं महत् ।
कीर्तिर्विहरतां लोके गवां [3]यो गोषु भक्तिमान् ॥ ४

शुश्रूषते पुराणेषु महर्षीणां महात्मनाम् ।
संस्थाने सर्वलोकानां देवानां चापि सम्भवे ॥ ५

देवतार्थेऽमृतार्थे च यज्ञार्थे चैव भारत ।

---

1. क-घ—विभुः 2. अ-क—महाभाग्यमुत्तमम्
3. क-घ—लोकेषु ख—योगेषु

सुरभिर्नाम विख्याता रोहिणी कामरूपिणी ॥ ६

सङ्कल्प्य मनसा पूर्वं रोहिणी ह्यमृताननां ।
घोरं तपस्समास्थाय निर्मिता विश्वकर्मणा ॥ ७

पुरुषं चासृजद्भूयस् तेजसा तपसा च ह ।
देदीप्यमानं वपुषा समिद्धमिव पावकम् ॥ ८

सोऽपश्य[1]द्दिष्टरूपां तां सुरभिं रोहिणीं तदा ।
दृष्ट्वैव चातिविमनास् सोऽभवत् काममोहितः ॥ ९

तं कामार्तमथो ज्ञात्वा स्वयम्भूर्लोकभावनः ।
माऽऽर्तो भव तथा चैष भगवानभ्यभाषत ॥ १०

ततस्स भगवांस्तत्र मार्ताण्ड इति विश्रुतः ।
चकार नाम तं दृष्ट्वा तस्यार्तीभावमुत्तमम् ॥ ११

स ददौ भगवांस्तस्मै मार्ताण्डाय महात्मने ।
सुरूपां सुरभिं कन्यां तपस्तेजोमयीं शुभाम् ॥ १२

यथा मयैष चोद्भूतस् त्वं चैवैषा च रोहिणी ।
मैथुनं गतवन्तौ च [2]तथा चोत्पत्स्यति प्रजा ॥ १३

प्रजा भविष्यते पुण्या पवित्रं परमं च वाम् ।
न वाऽप्यगम्यागमनाद् दोषं प्राप्स्यसि कर्हिचित् ॥ १४

---

1. क-घ—दिव्य ख—दिष्ट
2. क-घ—तथा वां धास्यति प्रजा

त्वत्प्रजासम्भवं क्षीरं भविष्यति परं हविः ।
यज्ञेषु चाज्यभागानां त्वत्प्रजामूलजो विधिः ॥ १५

प्रजाशुश्रूषवश्चैव ये भविष्यन्ति रोहिणि ।
तव तेनैव पुण्येन गोलोकं यान्तु मानवाः ॥ १६

इदं पवित्रं परमम् ऋषभं नाम कर्हिचित् ।
यद्वै ज्ञात्वा द्विजा लोके मोक्ष्यन्ते योनिसङ्करात् ॥ १७

एतत् क्रियाः प्रपत्स्यन्ते मन्त्रब्राह्मणसंस्कृताः ।
देवतानां पितॄणां च हव्यकव्यपुरोगमाः ॥ १८

तत एतेन पुण्येन प्रजास्तव तु रोहिणि ।
ऊर्ध्वं ममापि लोकस्य वत्स्यन्ते निरुपद्रवाः ॥ १९

भद्रं तेभ्यश्च भद्रं ते ये प्रजासु भवन्ति वै ।
युगन्धराश्च ते पुत्रास् सन्तु लोकस्य धारणे ॥ २०

यान् यान् कामयसे लोकांस् ताँल्लोकाननुयास्यसि ।
सर्वदेवगणाश्चैव तव यास्यन्ति पुत्रताम् ॥ २१

तव स्तनसमुद्भूतं पिबन्तोऽमृतमुत्तमम् ॥ २१॥

एवमेतान् वरान् राजन्नगृह्णात् सुरभिस्तदा ।
ब्रुवतस्सर्वलोकेशान्निर्वृतिं चागमत् पराम् ॥ २२॥

सृष्ट्वा प्रजाश्च [1]विविधा लोकसन्धारणाय वै ।

1. अ-क—विपुला

ब्रह्मणा समनुज्ञाता सुरभिर्लोकमाविशत् ॥ २३॥

एवं वरप्रदानेन स्वयम्भोरेव भारत ।

उपरिष्टाद्गवां लोकः प्रोक्तस्ते सर्वमादितः ॥ २४॥

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां अनुशासनपर्वणि सप्तषष्टितमोऽध्यायः ॥ ६७ ॥

॥ ८९ ॥ आनुशासनिकपर्वणि सप्तषष्टितमोऽध्यायः ॥ ६७ ॥

[अस्मिन्नध्याये २४॥ श्लोकाः]

॥ अष्टषष्टितमोऽध्यायः ॥

भीष्मेण युधिष्ठिरं प्रति विस्तरेण गवोत्पत्तिप्रकारकथनम् ॥

युधिष्ठिरः—

[1]सुरभेः काः प्रजाः पूर्वं मार्ताण्डादभवन् पुरा ।

एतन्मे शंस तत्त्वेन गोषु मे प्रीयते मनः ॥ १

भीष्मः—

शृणु नामानि दिव्यानि गोमातॄणां विशेषतः ।

याभिर्व्याप्ता स्त्रयो लोकाः कल्याणीभिर्जनाधिप ॥ २

सुरभ्यः प्रथमोद्भूता याश्च स्युः प्रथमाः प्रजाः ।

मयोच्यमानाञ्शृणु ताः प्राप्स्यसे विपुलं यशः ॥ ३

1. क-घ—सुभगाः

तप्त्वा तपो घोरतपास् सुरभिर्दीप्ततेजसः ।
सुषावैकादश सुतान् रुद्रा ये च्छन्द[1]सि स्तुताः ॥ ४

अजैकपादहिर्बुध्न्यस् त्र्यम्बकश्च महातपाः ।
वृषाकपिश्च शम्भुश्च कपाली रैवतस्तथा ॥ ५

हरश्च बहुरूपश्च उग्र उग्रोऽथ वीर्यवान् ।
तस्य चैवात्मजश्श्रीमान् विश्वरूपो महायशाः ॥ ६

एकादशैते कथिता रुद्रास्ते नाम नामतः ।
महात्मानो महायोगास् तेजोयुक्ता महाबलाः ॥ ७

एते वरिष्ठजन्मानो देवानां ब्रह्मवादिनाम् ।
विप्राणां प्रकृतिर्लोके एत एव हि विश्रुताः ॥ ८

एत एकादश प्रोक्ता रुद्राश्चिभुवनेश्वराः ।
शतं त्वेतत् समाख्यातं शतरुद्रं महात्मनाम् ॥ ९

सुषुवे प्रथमां कन्यां सुरभिः पृथिवीं तदा ।
विश्वकामदुघा धेनुर् या धारयति देहिनः ॥ १०

सुतं गोब्राह्मणं राजन्नेकमित्यभिधीयते ।
गोब्राह्मणस्य जननी सुरभिः परिकीर्त्यते ॥ ११

सृष्ट्वा तु प्रथमं रुद्रान् वरदान् रुद्रसम्भवान् ।
पश्चात् प्रभुर्ग्रहपतिं सुषुवे लोकसम्मतम् ॥ १२

1. क-ब—सा स्थिताः

सोमराजानममृतं यज्ञसर्वस्वमुत्तमम् ।
ओषधीनां रसानां च देवानां जीवितस्य च ॥ १३
ततश्रियं च मेधां च कीर्तिं देवीं सरस्वतीम् ।
चतस्रस्सुषुवे कन्या योगेषु नियतास्थिताः ॥ १४
एतास्सृष्ट्वा प्रजा एषा सुरभिः कामरूपिणी ।
सुषुवे परमं भूयो दिव्या गोमातरश्शुभाः ॥ १५
[1]पुण्यां मायां मधुश्च्योतां शिवां शीघ्रां सरिद्वराम् ।
हिरण्यवर्णां सुभगां गव्यां पृश्निं कुथावतीम् ॥ १६
अङ्गावतीं घृतवतीं दधिक्षीरपयोवतीम् ।
अमोघां सुरसां सत्यां रेवतीं मारुतीं रसाम् ॥ १७
अजां च सिकतां चैव शुद्धधूमामधारिणीम् ।
जीवां प्राणवतीं धन्यां शुद्धां धेनुं घनावहाम् ॥ १८
इन्द्रामृद्धिं च शान्तिं च शान्तपापां सरिद्वराम् ।
चत्वारिंश[2]तिमेकां च धन्यास्ता दिवि पूजिताः ॥ १९
भूयो जज्ञे सुरभ्याश्च श्रीमांश्चन्द्रांशुसन्निभः ।
[3]वृषो दक्ष इति ख्यातः कण्ठे मणितलप्रभः ॥ २०
स्रग्वी ककुद्मान् द्युतिमान् मृणालसदृशप्रभः ।
सुरभ्याऽनुमतो दत्तो ध्वजो माहेश्वरस्तु सः ॥ २१

1. क-ख—पुण्यामम्बां घ—पुण्यामम्बां मधुस्रुताम्
2. क-घ—तिरेताश्च 3. क-घ—भुवि

सुरभ्यः कामरूपिण्यो गावः पुण्यार्थमुत्तमाः ।
आदित्येभ्यो वसुभ्यश्च विश्वेभ्यश्च ददौ वरान् ॥ २२

सुरभिस्तु तपस्तप्त्वा सुषुवे गास्ततः पुनः ।
या दत्ता लोकपालानाम् इन्द्रादीनां युधिष्ठिर ॥ २३

सुष्टुतां कपिलां चैव रोहिणीं च यशस्विनीम् ।
सर्वकामदुघां चैव मरुतां कामरूपिणीम् ॥ २४

गावो मृष्टदुघा ह्येतास् ताश्चतस्रोऽमृतस्तुताः ।
यासां भूत्वा पुरा वत्साः पिबन्त्यमृतमुत्तमम् ॥ २५

सुष्टुतां देवराजाय वासवाय महात्मने ।
कपिलां धर्मराजाय वरुणाय च रोहिणीम् ॥ २६

सर्वकामदुघां धेनुं राज्ञे वैश्रवणाय च ।
इत्येता लोकमहिता विश्रुतास्सुरभेः प्रजाः ॥ २७

एतासां प्रजया पूर्णा पृथिवी मुनिपुङ्गव ।
गोभ्यः प्रभवते सर्वं यत् किञ्चिदिह शोभनम् ॥ २८

सुरभ्यपत्यमित्येतन्नामतस्तेऽनुपूर्वशः ।
कीर्तितं ब्रूहि राजेन्द्र किं भूयः कथयामि ते ॥ २९

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां
अनुशासनपर्वणि अष्टषष्टितमोऽध्यायः ॥ ६८ ॥
॥ ८९ ॥ आनुशासनिकपर्वणि अष्टषष्टितमोऽध्यायः ॥ ६८ ॥
[अस्मिन्नध्याये २९ श्लोकाः]

॥ एकोनसप्ततितमोऽध्यायः ॥

भीष्मेण युधिष्ठिरं प्रति इन्द्रस्य वत्सभावेन सुरभ्याः क्षीरपानादमरत्वादिलाभकथनम् ॥ १ ॥ तथा इन्द्रादिदेवानां वासार्थं सुरभेरनुमत्या तदीयमुखाद्यवयवसमाश्रयणकथनम् ॥ २ ॥

युधिष्ठिरः—

सुरभ्यास्तु तदा देव्याः कीर्तिर्लक्ष्मीस्सरस्वती ।
मेधा च प्रवरा देवी याश्चतस्रोऽथ विश्रुताः ॥ १

पृथग् [1]गोभ्यः किमेतास्युर् उताहो गोषु संश्रिताः ।
देवाः के वाऽऽश्रिता गोषु तन्मे ब्रूहि पितामह ॥ २

भीष्मः—

यं देवं संश्रिता गावस् तं देवं देवसंश्रितम् ।
यद्यदैवाश्रितं दैवं तत्तदैवं द्विजा विदुः ॥ ३

सर्वेषामेव देवानां पूर्वं किल समुद्भवे ।
अमृतार्थे सुरपतिस् सुरभिं समुपस्थितः ॥ ४

इन्द्रः—

इच्छेयममृतं दत्तं त्वया देवि रसाधिकम् ।
त्वत्प्रसादाच्छिवं मह्यम् अमरत्वं भवेदिति ॥ ५

1. क-घ—पृथक् ताभ्यः

सुरभिः—

वत्सो भूत्वा सुरपते पिबस्व प्रस्रवं मम ।
ततोऽमरत्वमपि तत् स्थानमैन्द्रमवाप्स्यसि ॥ ६

न च ते वृत्रहन् युद्धे व्यथाऽरिभ्यो भविष्यति ।
बलार्थमात्मनश्शक्र प्रस्रवं पिब मे विभो ॥ ७

भीष्मः—

[1]ततोऽपिबत् स्तनं तस्यास् सुरभ्यास्सुरसत्तमः ।
अमरत्वं सुरूपत्वं बलं चापदनुत्तमम् ॥ ८

पुरन्दरोऽमृतं पीत्वा प्रहृष्टस्समुपस्थितः ।
पुत्रोऽहं तव भद्रं ते ब्रूहि किं करवाणि ते ॥ ९

सुरभिः—

कृतं पुत्र त्वया सर्वम् उपयाहि त्रिविष्टपम् ।
पालयस्व सुरान् सर्वाञ् जहि ये सुरशत्रवः ॥ १०

न च गोब्राह्मणेऽवज्ञा कार्या ते शान्तिमिच्छता ।
गोब्राह्मणस्य निश्वासश् शोषयेदपि देवताः ॥ ११

गोब्राह्मणप्रियो नित्यं स्वस्तिशब्दमुदाहरन् ।
पृथिव्यामन्तरिक्षे च नाकपृष्ठे च विक्रमे ॥ १२

यच्च तेऽन्यद्भवेत् कृत्यं तन्मे ब्रूयास्समासतः ।
तत्ते सर्वं करिष्यामि सत्येनैतद्ब्रवीमि ते ॥ १३

---

1. ख—ततोऽधयत्

इन्द्रः—

इच्छेयं गोषु नियतं वस्तुं देवि ब्रवीमि ते ।
एभिस्सुरगणैस्सार्धम् ममानुग्रहमाचर ॥ १४

सुरभिः—

गवां शरीरं प्रत्यक्षम् एतत् कौशिक लक्षये ।
यो यत्रोत्सहते वस्तुं स तत्र वसतां सुरः ॥ १५

सर्वं पवित्रं परमं गवां गात्रं सुपूजितम् ।
तथा कुरुष्व भद्रं ते यथा त्वं शक्र मन्यसे ॥ १६

भीष्मः—

तस्यास्तद्वचनं श्रुत्वा सुरभ्यास्सुरसत्तमः ।
सह सर्वैस्सुरगणैर् अभजत् सौरभीं प्रजाम् ॥ १७

शृङ्गे वक्त्रे च जिह्वायां देवराजस्समाविशत् ।
सर्वच्छिद्रेषु पवनः पादेषु मरुतां गणाः ॥ १८

[1]ककुदं सर्वगो रुद्रः कुक्षौ चैव हुताशनः ।
सरस्वती स्तनेष्वग्र्या श्रीः पुरीषे जगत्प्रिया ॥ १९

मूत्रे कीर्तिस्सुमहती मेधा पयसि शाश्वती ।
[2]कण्ठे सोमस्तु वै देवो हृदये भगवान् यमः ॥ २०

धर्मः पुच्छे क्रिया लोम्नि भास्करश्चक्षुषी श्रितः ।

---

1. क-घ—ककुदे सर्वतो रुद्रो वामकुक्षौ
2. अ-ख—वक्त्रे क—कर्णे

सिद्धास्सन्धिषु सिद्धिश्च तपस्तेजश्च चेष्टने ॥ २१

एवं सर्वे सुरगणा नियता गात्रवर्त्मसु ।
महती देवता गावो ब्राह्मणैः परिसंस्कृताः ॥ २२

गामाश्रयन्ति सहिता देवा हि प्रभविष्णवः ।
किमन्यत् सर्वकामेन विदध्याद्भगवान् प्रियम् ॥ २३

भावतः परया भक्त्या पूजयस्व नरेश्वर ।
गावस्तु परमं लोके पवित्रं पावनं हविः ॥ २४

निपात्य भक्षितस्स्वर्गाद् भार्गवः फेनपः किल ।
स च प्राणान् पुनर्लब्ध्वा ततो लोकं समाश्रितः ॥ २५

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां
अनुशासनपर्वणि एकोनसप्ततितमोऽध्यायः ॥ ६९ ॥
॥ ८९ ॥ आनुशासनिकपर्वणि एकोनसप्ततितमोऽध्यायः ॥ ६९ ॥
[अस्मिन्नध्याये २५ श्लोकाः]

॥ सप्ततितमोऽध्यायः ॥

भीष्मेण युधिष्ठिरं प्रति फेनपोपाख्यानकथनारम्भः ॥ १ ॥ लिशिखरगिर्याश्रमवासिने सुमित्रनाम्ने विप्रवराय आङ्गिरसेनैकस्या गोर्दानम् ॥ २ ॥ तस्या वंशेऽसङ्ख्येयानां गवां सम्भवः ॥ ३ ॥ सुमित्रेण वत्समुखोद्गतक्षीरफेनपानात् फेनप इति नामाधिगमः ॥ ४ ॥ फेनपस्य गोभिः कदाचन गोलोकादेत्य गिरिह्रदे स्त्रीरूपधारणेन विहरमाणानां गवामवलोकनम् ॥ ५ ॥ फेनपस्य गोभिस्स्वेषां गोलोकप्राप्त्युपायं पृष्टाभिस्ताभिस्ताः प्रति रन्तिदेवस्य स्वे आत्मनां पशुत्वोपकल्पनस्य तदुपायत्वोक्तिः ॥ ६ ॥ फेनपस्य स्वेष्वतिघस्रलतया यागीयपशुत्वे तदभ्यनुज्ञानस्य दुरुत्सम्पादतां चिन्तयन्तीषु तासु कपिलाभिस्ताभ्यः स्वेषामेव गोषु श्रैष्ठ्यप्राप्तिरूपवराधिगमेन फेनपवधप्रतिज्ञानम् ॥ ७ ॥ फेनपस्य गोभक्त्युद्रेकसन्तुष्टाभिर्गोलोकादागतगोमातृभिः योगप्रभावेण शरीराद्वियोजनेन स्वलोकप्रापणपूर्वकं तस्मिन्कपिलानिश्चयनिवेदनम् ॥ ८ ॥ ततः कपिलाभिर्यथाप्रतिज्ञं शृङ्गाघातादिना फेनपस्य कृत्रपशरीरविभेदनम् ॥ ९ ॥ फेनपस्य गोभी रन्तिदेवं प्रति तत्स्वे स्वेषां पशुत्वेन विनियोगप्रार्थना ॥ १० ॥ तेन गवां मध्ये कस्याश्चिदपि सकामत्वज्ञाने सत्रविरामरूपसमयकरणेन सत्रारम्भः ॥ ११ ॥ कदाचन कस्यश्चिद्गोर्वत्सरनेहाद्विशसने दुःखावगमेन यागोपरमः ॥ १२ ॥

युधिष्ठिरः—

कः फेनपेति नाम्नाऽसौ कथं वा भक्षितः पुरा ।
मृत उज्जीवितः कस्मात् कथं गोलोकमाश्रितः ॥ १
विरुद्धो मानुषे लोके तथा समयवर्त्मसु ।

ऋते दैवं हि दुष्प्रापं मानुषेषु विशेषतः ॥ २

संशयो मे महानत्र तन्मे व्याख्यातुमर्हसि ॥ २॥

भीष्मः—

श्रूयते भार्गवे वंशे सुमित्रो नाम भारत ।
वेदाध्ययनसम्पन्नो विपुले तपसि स्थितः ॥ ३॥

वानप्रस्थाश्रमे युक्तस् स्वकर्मनिरतस्सदा ।
विनयाचारतत्त्वज्ञस् सर्वधर्मार्थकोविदः ॥ ४॥

नित्यं त्रिषवणस्नायी सन्ध्योपासनतत्परः ।
अग्निहोत्ररतः क्षान्तो जपञ् जुह्वच्च नित्यदा ॥ ५॥

पितृदेवांश्च नियतम् अतिथींश्च स पूजयन् ।
प्राणसन्धारणार्थं च यत् किञ्चिदुपहारयन् ॥ ६॥

गिरिस्त्रिशिखरो नाम यतः प्रभवते नदी ।
कूलहेति पुराणेषु विश्रुता रुद्रनिर्मिता ॥ ७॥

तस्यास्तीरे समे देशे पुष्प[1]मालासमाकुले ।
वन्यौषधिद्रुमोपेते नानापक्षिमृगायुते ॥ ८॥

व्यपेतदंशमशके ध्वाङ्क्षगृ[2]ध्रैरसेविते ।
कृष्णदर्भतृणप्राये सुरम्यज्योतिरश्मनि ॥ ९॥

सर्वोन्नतैस्समैश्श्यामैर् याज्ञीयैस्तरुभिर्वृते ।

1. क-ध—मूल 2. क-घ—ध्रोपसे

तत्राश्रमपदं पुण्यं भृगूणामभवत् पुरा ॥ १०॥

उवास तत्र नियतस् सुमित्रो नाम भार्गवः ।
यथोद्दिष्टेन पूर्वेषां भृगूणां साधुवर्त्मना ॥ ११॥

तस्मा आङ्गिरसः कश्चिद् ददौ गां शर्करीं शुभाम् ।
वर्षासु पश्चिमे मासि पौर्णमास्यां शुचिव्रतः ॥ १२॥

स तां लब्ध्वा धर्मशी[1]लश् चिन्तयामास तत्परः ।
सुमित्रः परया भक्त्या जननीमिव मातरम् ॥ १३॥

तेन सन्धुक्ष्यमाणा सा रोहिणी कामचारिणी ।
प्रवृद्धिमगमच्छ्रेष्ठा प्राणतश्च सुदर्शना ॥ १४॥

सिराविमुक्तपार्श्वान्ता विपुलां कान्तिमुद्वहत् ।
श्यामपार्श्वान्तपृष्ठा सा सुरभिर्मधुपिङ्गला ॥ १५॥

बृहती सूक्ष्मलोमान्ता रूपोदग्रा तनुत्वचा ।
कृष्णपुच्छा श्वेतवक्त्रा समवृत्तपयोधरा ॥ १६॥

पृष्ठोन्नता पूर्वनता शङ्कुकर्णी सुलोचना ।
दीर्घजिह्वा ह्रस्वशृङ्गी सम्पूर्णदशनान्तरा ॥ १७॥

मांसाधिकगलान्ता सा प्रसन्ना शुभदर्शना ।
नित्यं शमयुता स्निग्धा सम्पूर्णोदात्तनिस्वना ॥ १८॥

प्राजापत्यैर्गवां नित्यं प्रशान्तैर्लक्षणैर्युता ।

---

1. क-घ—लो वर्धया

यौवनस्थेव वनिता शुशुभे रूपशोभया ॥ १९॥

वृषेणोपगता सा तु कला मधुरशोभना ।
मिथुनं जनयामास तुल्यरूपमिवात्मनः ॥ २०॥

संवर्धयामास स तां सवत्सां भार्गवो ऋषिः ।
तयोः प्रजाधिसंसर्गात् सहस्रं च गवामभूत् ॥ २१॥

गवां [1]जातिसहस्राणि सम्भूतानि परस्परम् ।
ऋषभाणां च राजेन्द्र नैवान्तं प्रतिदृश्यते ॥ २२॥

तैराश्रमपदं रम्यम् अरण्यं चैव सर्वशः ।
समाकुलं समभवन्मेघैरिव नभस्थलम् ॥ २३॥

कानिचित् पद्मवर्णानि किंशुकाभानि कानिचित् ।
रुक्मवर्णानि चान्यानि चन्द्रांशुसदृशानि च ॥ २४॥

तथा राजतवर्णानि कानिचिल्लोहितानि वै ।
नीललोहिततास्राणि कृष्णानि कपिलानि च ॥ २५॥

नानारागविचित्राणि यूथानि कुलयूथप ॥ २६

न च क्षीरं सुतस्नेहाद् वत्सानामुपजीवति ।
भार्गवः केवलं चासीद् गवां प्राणायने रतः ॥ २७

तथा शुश्रूषतस्तस्य गवां हितमवेक्षतः ।
व्यतीयात् सुमहान् कालो वत्सोच्छिष्टेन वर्ततः ॥ २८

1. क—शतस

क्षुत्पिपासापरिश्रान्तस् सततं प्रस्रवं गवाम् ।
वत्सैरुच्छिष्टमुदितं बहुक्षीरतया बहु ॥ २९
पीतवांस्तेन नामाऽस्य फेनपेत्यभिविश्रुतम् ॥ २९॥
[1]गौतमस्याभिनिष्पन्नम् एवं नाम युधिष्ठिर* ॥ ३०
कदाचित् कामरूपिण्यो गावस्स्त्रीवेषमाश्रिताः ।
ह्रदे क्रीडन्ति संहृष्टा गायन्त्यः पुण्यलक्षणाः ॥ ३१
ददृशुस्तस्य गावो वै विस्मयोत्फुल्ललोचनाः ।
ऊचुश्च का यूयमिति स्त्रियो मानुषया गिरा ॥ ३२

स्त्रियः—

[2]गाव एव वयं सर्वाः कर्मभिश्शोभनैर्युताः ।
सर्वास्त्रीवेषधारिण्यो यथाकामं चरामहे ॥ ३३

गावः—

गवां गावः परं दैवं गवां गावः परा गतिः ।
कथयध्वमिहास्माकं केन वस्सुकृतां गतिः ॥ ३४

स्त्रियः—

अस्माकं हविषा देवा ब्राह्मणास्तर्पितास्तथा ।
कव्येन पितरश्चैव हव्येनाग्निश्च तर्पितः ॥ ३५

---

1. अ—भागैवस्या
* सर्वेषु कोशेषु अत्रैवाध्यायसमाप्तिर्दृश्यते
2. क-घ—इदमर्धचतुष्टयं नास्ति

प्रजया च तथाऽस्माकं कृषिरभ्युद्धृता सदा ।
शकटैश्चापि संयुक्ता दशवाहशतेन वै ॥ ३६

[1]तदेतैस्सुकृतैस्स्फीतैर् वयं याश्चैव नः प्रजाः ।
गोलोकमनुसम्प्राप्ता [2]यः परं कामगोचरः ॥ ३७

यूयं तु सर्वरोहिण्यस् सप्रजास्सहपुङ्गवाः ।
अधोगामिन्य इत्येव पश्यामो दिव्यचक्षुषा ॥ ३८

गावः—

एवं गवां परं दैवं गाव एव परायणम् ।
स्वपक्षास्तारणीया वश् शरणाय गता वयम् ॥ ३९

किमस्माभिः करणीयं वर्तितव्यं कथञ्चन ।
प्राप्नुयाम च गोलोकं भवाम न च गर्हिताः ॥ ४०

स्त्रियः—

[3]वर्तते रन्तिदेवस्य सत्रं वर्षसहस्रकम् ।
तत्र तस्य नृपस्याशु पशुत्वमुपगच्छत ॥ ४१

ततस्तस्योपभोगेन पशुत्वे यज्ञसंस्कृताः ।
गोलोकान् प्राप्स्यथ शुभांस् तेन पुण्येन संयुताः ॥ ४२

भीष्मः—

एतत् तासां वचश्श्रुत्वा गवां संहृष्टमानसाः ।

---

1. क-घ—शक्ताश्चापि तथा युक्ता
2. क-घ—पुण्यो यः ख—यः परः कामगोचरः
3. क—पवित्रं वासुदेवस्य घ—पवित्रं

गमनाय मनश्चक्रुर् औत्सुक्यं चागमन् परम् ॥ ४३

न हि नो भार्गवो दाता पशुत्वेनोपयोजनम् ।
यज्ञस्तस्य नरेन्द्रस्य वर्तते धर्मतस्तथा ॥ ४४

वयं न चाननुज्ञाताश् शक्ता गन्तुं कथञ्चन ।
अवोचन्नथ तत्रत्या भार्गवो वध्यतामयम् ॥ ४५

एतत् सर्वा रोचयत न हि शक्यमतोऽन्यथा ।
लोकान् प्रातुं सहास्माभिर् निश्चयः क्रियतामयम् ॥ ४६

न तु तासां समेतानां काचिद् घोरेण चक्षुषा ।
शक्नोति भार्गवं द्रष्टुं सत्कृतेनोपसंयुता ॥ ४७

अथ पद्मसवर्णाभा [1]भास्करेण समप्रभाः ।
जपालोहितताम्राक्ष्यो निर्मांसकठिनाननाः ॥ ४८

रोहिण्यः कपिलाः प्राहुस् सर्वासां वै समक्षतः ।
मेघस्तनितनिर्घोषास् तेजोभिरभिरञ्जिताः ॥ ४९

कपिलाः—

वयं हि तं वधिष्यामस् सुमित्रं नात्र संशयः ।
सुकृतं [2]पृष्ठतः कृत्वा किं नश्श्रेयो विधास्यथ ॥ ५०

गावः—

कपिलास्सर्ववर्णेषु प्रधानत्वमवाप्स्यथ ।
गवां शतफलां चैकां दत्त्वा फलमवाप्स्यथ ॥ ५१

---

1. क-घ—भास्वरांशु
2. क-घ—पूर्वतः

भीष्मः—

एतद्वचां वचश्श्रुत्वा कपिला हृष्टमानसाः ।
चक्रुस्सर्वा भार्गवस्य सुमित्रस्य वधे मतिम्* ॥ ५२

यास्तु गोमातरस्तस्य कामचारिण्य आगताः ।
समीपं हि सुमित्रस्य कृतज्ञास्समपस्थिताः ॥ ५३

अभिप्रशस्य चैवाहुस् तमृषिं पुण्यदर्शनाः ॥ ५३॥

गोमातरः—

गोलोकादागता वेत्थ ऋषे गोमातरो वयम् ॥ ५४

सुप्रीतास्स्म वरं गृह्ण यमिच्छसि महामुने ।
यद्धि गोषु परां बुद्धिं कृतवानसि नित्यदा ॥ ५५

सुमित्रः—

प्रीतोऽस्म्यनुगृहीतोऽस्मि यन्मां गोमातरश्शुभाः ।
सुप्रीतमनसस्सर्वास् तिष्ठन्ते च वरप्रदाः ॥ ५६

भवेद् गोष्वेव मे भक्तिर् यथैवाद्य तथा सदा ।
गोघ्नाश्चैवावसीदन्तु नरा ब्रह्मद्विषश्च ये ॥ ५७

गोमातरः—

एवमेतद् ऋषिश्रेष्ठ हितं वदसि नः प्रियम् ।
एहि गच्छ सहास्माभिर् गोलोकमृषिसत्तम ॥ ५८

* सर्वेषु कोशेषु अत्रैवाध्यायसमाप्तिर्दृश्यते

सुमित्रः—

यूयमिष्टां गतिं यान्तु न ह्यहं गन्तुमुत्सहे ।
इमा गावस्समुत्सृज्य तपस्विन्यो मम प्रियाः ॥ ५९

भीष्मः—

तास्तु तस्य वचश्श्रुत्वा कपिलानां सुदारुणम् ।
निन्युस्तमृषिमुत्क्षिप्य भार्गवं नभ उद्वहन् ॥ ६०

कलेबरं तु तत्रैव तस्य संन्यस्य मातरः ।
निष्कृष्य करणं योगाद् आनयन् भार्गवस्य वै ॥ ६१

सर्वं चास्य तदाऽऽचख्युः कपिलानां विचेष्टितम् ।
यदर्थं हरणं गोभिर् गोलोकं लोकमातरः ॥ ६२

ततस्तु कपिलास्तत्र तस्य दृष्ट्वा कलेबरम् ।
यथाप्रतिज्ञं शृङ्गैश्च खुरैश्चाप्यवचूर्णयन् ॥ ६३

ततस्सञ्छिद्य बहुधा भार्गवं नृपसत्तम ।
ययुर्यत्रेतरा गावस् तच्च सर्वं न्यवेदयन् ॥ ६४

अथ गोमातृभिश्शप्तास् ता गावः पृथिवीचराः ।
अमेध्यवदनाः क्षिप्रं भवध्वं ब्रह्मघातकाः ॥ ६५

एवं कृतज्ञा गावो हि यथा गोमातरो नृप ।
ऋषिश्च प्राप्तवाँल्लोकं गावश्च परिमोक्षिताः* ॥ ६६

* सर्वेषु कोशेषु अत्रैवाध्यायसमाप्तिर्दृश्यते

ता गावो रन्तिदेवस्य गत्वा यज्ञं मनीषिणः ।
आत्मानं ज्ञापयामासुर् महर्षीणां समक्षतः ॥ ६७

रन्तिदेवस्ततो राजा प्रयतः प्राञ्जलिश्शुचिः ।
उवाच गावः प्रणतः किमागमनमित्यपि ॥ ६८

गावः—

इच्छाम तव राजेन्द्र सत्रेऽस्मिन् विनियोजनम् ।
पशुत्वमुपसम्प्राप्तुं प्रसादं कर्तुमर्हसि ॥ ६९

रन्तिदेवः—

नास्मि शक्तो गवां घातं कर्तुं शतसहस्रशः ।
घातयित्वा त्वहं युष्मान् कथमात्मानमुद्धरे ॥ ७०

यः पशुत्वेन संयोज्य युष्मान् स्वर्गं नयेदिह ।
आत्मानं चैव तपसा गावस्समुपगम्यताम् ॥ ७१

गावः—

अस्माकं तारणे युक्तो धर्मात्मा तपसि स्थितः ।
श्रुतोऽस्माभिर्भवान् राजंस् ततस्तु स्वयमागताः ॥ ७२

रन्तिदेवः—

मम सत्रे पशुत्वं वो यद्येवं हि मनीषितम् ।
समयेनाहमेतेन जुहुयां वो हुताशने ॥ ७३

कदाचिद्यदि वः काचिद् अकामा विनियुज्यते ।
तदा समाप्तिस्सत्रस्य गवां स्यादिति नैष्ठिकी ॥ ७४

गावः—

एवमस्तु महाराज यथा त्वं प्रब्रवीषि नः ।
अकामास्स्युर्यदा गावस् तदा सत्रं समाप्यताम् ॥ ७५

भीष्मः—

ततः प्रवृत्ते गोसत्रे रन्तिदेवस्य धीमतः ।
गोसहस्राण्यहरहर् नियुज्यन्ते शमित्रभिः ॥ ७६
एवं बहूनि वर्षाणि व्यतीतानि नराधिप ।
गवां वै वध्यमानानां न चान्तः प्रत्यदृश्यत ॥ ७७
गवां चर्मसहस्रैस्तु राशयः पर्वतोपमाः ।
बभूवुः कुरुशार्दूल बहुला मेघसन्निभाः ॥ ७८
मेदःक्लेदवहा चैव प्रावर्तत महानदी ।
अद्यापि भुवि विख्याता नदी चर्मण्वती शुभा ॥ ७९
ततः कदाचित् स्वं वत्सं गौरुपामन्त्र्य दुःखिता ॥ ७९॥

गौः—

एहि पुत्र स्तनं पाहि मा त्वं पश्चात् क्षुधार्दितः ।
तप्स्यसे विमना दुःखं घातितायां मयि ध्रुवम् ॥ ८०॥
एते ह्यायान्ति चण्डालास् सशस्त्रा मां जिघांसवः ॥ ८१

भीष्मः—

अथ शुश्राव तां वाणीम् मानुषीं समुदाहृताम् ।
रन्तिदेवो महाराज ततस्तां समवारयत् ॥ ८२

स्थापयामास गोसत्रम् अथ तं पार्थिवर्षभ ।
सत्रोत्सृष्टाः परित्यक्ता गावोऽन्यास्समुपाश्रिताः ॥ ८३

यास्तस्य राज्ञो निहता गावो यज्ञे महात्मनः ।
ता गोलोकमुपाजग्मुः प्रोक्षिता ब्रह्मवादिभिः ॥ ८४

रन्तिदेवोऽपि राजर्षिर् इष्ट्वा यज्ञं यथाविधि ।
ततस्सख्यं सुरपतेस् त्रिदिवं चाक्षयं ययौ ॥ ८५

वैशम्पायनः—

फेनपो दिवि गोलोके मुमुदे शाश्वतीस्समाः ।
अविशिष्टाश्च या गावस् ता बभूवुर्वनेचराः ॥ ८६

फेनपाख्यानमेतत्ते गवां माहात्म्यमेव च ।
कथितं पावनं पुण्यं कृष्णद्वैपायनेरितम् ॥ ८७

नारायणोऽपि भगवान् दृष्ट्वा गोषु परं यशः ।
शुश्रूषां परमां चक्रे भक्तिं च भरतर्षभ ॥ ८८

तस्मात् त्वमपि राजेन्द्र गा वै पूजय भारत ।
द्विजेभ्यश्चैव सततं प्रयच्छ कुरुसत्तम ॥ ८९

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां
अनुशासनपर्वणि सप्ततितमोऽध्यायः ॥ ७० ॥
॥ ८९ ॥ आनुशासनिकपर्वणि सप्ततितमोऽध्यायः ॥ ७० ॥
[अस्मिन्नध्याये ८९ श्लोकाः]

॥ एकसप्ततितमोऽध्यायः ॥

भीष्मेण युधिष्ठिरं प्रति गोमाहात्म्यप्रतिपादकव्यासशुकसंवादानुवादः ॥ १ ॥ व्यासेन शुकं प्रति ब्राह्मणेतरवर्णानां कपिलाक्षीरोपजीवनार्हत्वादिकथनम् ॥ २ ॥ व्यासेन शुकं प्रति कपिलानां गवांस्वाङ्गप्रवेशनेन देवेभ्यः प्रच्छन्नमात्मनोगोपनात् परितुष्टस्याग्नेर्वरात् सर्वश्रैष्ठ्यप्राप्तिकथनम् ॥ ३ ॥ व्यासेन शुकं प्रति कपिलालक्षणविभागादिकथनम् ॥ ४ ॥

युधिष्ठिरः—

पवित्राणां पवित्रं यच् छ्रेष्ठं लोकेषु पूजितम् ।
महाव्रतं महाभाग तन्मे ब्रूहि पितामह ॥ १

भीष्मः—

अत्राप्युदाहरन्तीमम् इतिहासं पुरातनम् ।
[1]पितुः पुत्रस्य संवादं व्यासस्य च शुकस्य च ॥ २

ऋषीणामुत्तमं कृष्णं भावितात्मानमच्युतम् ।
पारम्पर्यविशेषज्ञं सर्वशास्त्रार्थकोविदम् ॥ ३

कृतशौचश्शुकस्तत्र कृतजप्यः कृताह्निकः ।
परं नियममास्थाय परं धर्ममुपाश्रितः ॥ ४

प्रणम्य शिरसा व्यासं सूक्ष्मतत्वार्थदर्शिनम् ।
शुकः पप्रच्छ वै प्रश्नं दानधर्मकुतूहलः ॥ ५

1. क-घ—पितापु

शुकः—

बहुचित्राणि दानानि बहुशश्शंससे मुने ।
महार्थं पावनं पुण्यं किंस्विदानं महाफलम् ॥ ६

केन दुर्गाणि तरति केन लोकानवाप्नुते ।
केन वा महदाप्नोति इह लोके परत्र च ॥ ७

के वा यज्ञस्य वोढारः केषु यज्ञः प्रतिष्ठितः ।
किञ्च यज्ञस्य यज्ञत्वं किञ्च यज्ञस्य भेषजम् ॥ ८

यज्ञानामुत्तमं किञ्च तद्भवान् प्रब्रवीतु मे ॥ ८॥

भीष्मः—

स तस्मै भजमानाय जातकौतूहलाय च ।
व्यासो व्रतनिधिः प्राह गवामिदमनुत्तमम् ॥ ९॥

व्यासः—

धन्यं यशस्यमायुष्यं लोके श्रुतिसुखावहम् ।
यत् पवित्रं पवित्राणां मङ्गलानां च मङ्गलम् ॥ १०॥

सर्वपापप्रशमनं तत् समासेन मे शृणु ॥ ११

यदिदं तिष्ठते लोके जगत् स्थावरजङ्गमम् ।
गावस्ताः प्राप्य तिष्ठन्ते लोके पुण्यस्य दर्शनात् ॥ १२

मातरस्सर्वभूतानां विश्वस्य जगतश्च ह ॥ १२॥

रुद्राणामथ साध्यानां गाव एव तु मातरः ॥ १३

रुद्राणां मातरो ह्येता ह्यादित्यानां स्वसा स्मृताः ।

वसूनां च दुहित्र्यस्ता ब्रह्मसन्तानमूलजाः ॥ १४

[1]यासामधिपतिः पूषा मरुतो वालबन्धनः ।
ऐश्वर्यं वरुणो राजा विश्वे देवास्समाश्रिताः ॥ १५

य एवं वेद ता गावो [2]मातरो देवपूजिताः ।
स विप्रो ब्रह्मलोकाय गवां लोकाय वा ध्रुवः ॥ १६

गावस्तु नावमन्येत कर्मणा मनसा गिरा ।
गवां स्थानं परं लोके प्रार्थयेद्यः परां गतिम् ॥ १७

न पद्भ्यां ताडयेद्गा वै न दण्डेन न मुष्टिना ॥ १७॥

इमां विद्यामुपाश्रित्य पावनीं ब्रह्मनिर्मिताम् ।
मातृणाम [3]नुपातेन न गोमध्ये न गोव्रजे ॥ १८॥

[4]नरो मूत्रपुरीषस्य दृष्ट्वा कुर्याद्विसर्जनम् ॥ १९

शुद्धाश्चन्दनशीताढ्यास् चन्द्ररश्मिसमप्रभाः ।
सौम्यास्सुरभ्यस्सुभगा गावो गुग्गुलुगन्धयः ॥ २०

सर्वे देवा विशन् गावस् समुद्रमिव सिन्धवः ।
दिवं चैवान्तरिक्षं च गवां व्युष्टिं समश्नुते ॥ २१

[5]दधिना जुहुयादग्निं दधिना स्वस्ति वाचयेत् ।
दधि दद्याच्च प्राशेत गवां व्युष्टिं समश्नुते ॥ २२

---

1. क-घ—इदमर्धं नास्ति
2. क—इतः अष्टौ पादा न सन्ति
3. क-घ—नुयाने च ख—नुपाते च
4. घ—न गो
5. क—अर्धचतुष्टयं नास्ति

[1]घृतेन जुहुयादग्निं घृतेन स्वस्ति वाचयेत् ।
घृतमालभ्य प्राश्नीयाद् गवां व्युष्टिं समश्नुते ॥ २३

गावस्सञ्जीवना यास्तु गावो दानमनुत्तमम् ।
ताः पुण्यगोपास्सुफला भजमानं भजन्तु माम् ॥ २४

येन देवाः पवित्रेण स्वर्गलोकमितो गताः ।
तत् पवित्रं पवित्राणां मम मूर्ध्नि प्रतिष्ठितम् ॥ २५

वीणामृदङ्गपणवा गवां मन्त्रप्रतिष्ठिताः ।
क्रीडारतिविहारार्थं त्रिषु लोकेषु वर्तते ॥ २६

न तत्र देवा वर्तन्ते नाग्निहोत्राणि जुह्वति ।
न यज्ञैरिज्यते चात्र यत्र गौर्वै न दुह्यते ॥ २७

क्षीरं दधि घृतं यासां रसानामुत्तमो रसः ।
अमृत[2]प्रभवा गावस् त्रैलोक्यं येन जीवति ॥ २८

इडामाहूय धेनुं च सवत्सां यज्ञमातरम् ।
उपाह्वयन्ति [3]यं यज्ञे गावो यज्ञहविष्कृताः ॥ २९

या मेध्या प्रथमं कर्म इयं धेनुस्सरस्वती ।
पौर्णमासेन वत्सेन कामं कामगुणान्विता ॥ ३०

यत्र सर्वमिदं प्रोतं यत् किञ्चिज्जङ्गमं जगत् ।

---

1. क—अर्धर्चं नास्ति
2. क-घ—प्रसवानां वै
3. ख-घ—यं विप्रा

सा गौर्वै प्रथमा पुण्या सर्वभूतहिते रता ॥ ३१

धारणाः पावनाः पुण्या भावना भूतभावनाः ।
गावो मामभिरक्षन्तु इह लोके परत्र च ॥ ३२

एष यज्ञस्सहोपाङ्ग एष यज्ञस्सनातनः ।
वेदास्सहोपनिषदो गवां रूपाः प्रतिष्ठिताः ॥ ३३

एतत्तात मया प्रोक्तं गवामिह परं मतम् ।
सर्वमाश्रावयेन्नित्यं प्रयतो ब्रह्मसंसदि ॥ ३४

श्रुत्वा लभेत तान् [1]सर्वान् ये मया परिकीर्तिताः ।
श्रावयित्वाऽपि प्रीतात्मा लोकांस्तान् प्रतिपद्यते ॥ ३५

धेनुमेकां समादद्याद् अहन्यहनि पावनीम् ।
तत्तथा प्राप्नुयाद्विप्रः पठन् वै गोमतीं सदा ॥ ३६

अथ धेनुर्न विद्येत तिलधेनुमनुत्तमाम् ।
दद्याद्गोमतिकल्पेन तां धेनुं सर्वपावनीम् ॥ ३७

आह्निकं गोमतीं नित्यं यः पठेत सदा नरः ।
सर्वपापात् प्रमुच्येत प्रयतात्मा य आचरेत् ॥ ३८

घृतं वा [2]दधि वा नित्यं प्राश्य वा गोमतीं जपेत् ।
स्नात्वा वा गोकरीषेण पठन् पापात् प्रमुच्यते ॥ ३९

1. क-घ—लोकान्
2. क-ख-घ—नित्यमालभ्य

मनसा गोमतीं जप्येद् गोमत्या नित्यमाह्निकम् ।
न त्वेव दिवसं कुर्याद् व्यर्थं गोमतिपाठकः ॥ ४०

गोमतीं जपमाना हि देवा देवत्वमाप्नुवन् ।
ऋषित्वमृषयश्चापि गोमत्या सर्वमाप्नुवन् ॥ ४१

बद्धो बन्धात् प्रमुच्येत कृच्छ्रान्मुच्येत सङ्कटात् ।
गोमतीं सेवते यस्तु लभेत प्रियसङ्गमम् ॥ ४२

भीष्मः—

एतत् पवित्रं कात्स्न्र्येन एतद्व्रतनुत्तमम् ।
एतत्तु पृथिवीपाल पावनं शृण्वतां सदा ॥ ४३

पुत्रकामाश्च ये केचिद् धनकामाश्च मानवाः ।
अध्वाने चोरवैरिभ्यो मुच्यते गोमतीं पठन् ॥ ४४

पूर्ववैरानुबन्धेषु रणे चाप्याततायिनः ।
लभेत जयमेवाशु सदा गोमतिपाठकः* ॥ ४५

शुकः—

क्षत्रियाश्चैव शूद्राश्च मन्त्रहीनाश्च ये द्विजाः ।
[1]कपिलामुपजीवन्ति कथमेतत् पितर्भवेत् ॥ ४६

व्यासः—

क्षत्रियाश्चैव शूद्राश्च मन्त्रहीनाश्च ये द्विजाः ।

---

* सर्वेषु कोशेषु अत्रैवाध्यायसमाप्तिर्दृश्यते
1. ख—अर्धद्वयं नास्ति

कपिलामुपजीवन्ति तेषां वक्ष्यामि निर्णयम् ॥ ४७

कपिलास्तूत्तमा लोके गोषु चैवोत्तमा मताः ।
तासां दाता लभेत् स्वर्गं विधिना यश्च सेवते ॥ ४८

स्पृशेत कपिलां यस्तु दण्डेन चरणेन वा ।
तेन स्पर्शनमात्रेण नरकायोपपद्यते ॥ ४९

मन्त्रेण युञ्जयात् कपिलां मन्त्रेणैव प्रमुञ्चते ।
मन्त्रहीनं तु यो युञ्जयात् कृमियोनौ हि जायते ॥ ५०

प्रहारहतमर्माङ्गा दुःखेन च जडीकृता ।
पदानि यावद्गच्छेत तावल्लोकान् क्रिमिर्भवेत् ॥ ५१

यावच्च बिन्दवस्तस्याश् शोणितस्य क्षितिं गताः ।
तावद्वर्षसहस्राणि नरकं प्रतिपद्यते ॥ ५२

मन्त्रेण युञ्जयात् कपिलां मन्त्रेण विनियोजयेत् ।
मन्त्रहीनैरनुयुतो मज्जयेत्तमसि प्रभो ॥ ५३

कपिलां येऽपि जीवन्ति बुद्धिमोहान्विता नराः ।
तेऽपि वर्षसहस्राणि पतन्ति नरके नृप ॥ ५४

अथ न्यायेन ये विप्राः कपिलामुपयुञ्जते ।
तस्मिल्लोके प्रमोदन्ते लोकाश्चैपामनामयाः ॥ ५५

विधिना ये न कुर्वन्ति शूद्रांस्तानुपधारय* ॥ ५५॥

---

* सर्वेषु कोशेषु अत्रैवाध्यायसमाप्तिर्दृश्यते

शुकः—

नानावर्णैरुपेतानां गवां किं मुनिसत्तम ।
कपिलास्सर्ववर्णेषु वरिष्ठत्वमवाप्नुवन् ॥ ५६॥

व्यासः—

शृणु पुत्र यथा गोषु वरिष्ठाः कपिलास्स्मृताः ।
कपिलत्वं च सम्प्राप्ताः पूज्याश्च सततं नृषु ॥ ५७॥

अग्निः पुराऽपचक्राम देवेभ्य इति नश्श्रुतम् ।
देवेभ्यो मां छादयत शरण्याश्शरणं गतम् ॥ ५८॥

ऊचुस्तास्सहितास्तत्र स्वागतं तव पावक ।
इह गुप्तस्त्वमस्माभिर् न देवैरुपलप्स्यसे ॥ ५९॥

अथ देवा विवित्सन्तः पावकं परिचक्रमुः ।
गोषु गुप्तं च विज्ञाय ताः क्षिप्रमुपतस्थिरे ॥ ६०॥

युष्मासु निवसत्यग्निर् इति गास्समचूचुदन् ।
[1]प्रकाश्यतां हुतवहो लोकान्न च्छेत्तुमर्हथ ॥ ६१॥

एवमस्त्वित्यनुज्ञाय पावकं समदर्शयन् ॥ ६२

अधिगम्य पावकं तुष्टास् ते देवास्तद्य एव तु ।
अग्निं प्रचोदयामासुः क्रियतां गोष्वनुग्रहः ॥ ६३

गवां तु यासां गात्रेषु पावकस्समवस्थितः ।

1. क-घ—अर्धपञ्चकं नास्ति

कपिलत्वमनुप्राप्तास् सर्वश्रेष्ठत्वमेव च ॥ ६४

महाफलत्वं लोके च ददौ तासां हुताशनः ॥ ६४॥

तस्माद्धि सर्ववर्णानां कपिलां गां प्रदापय ।

श्रोत्रियाय प्रशान्ताय प्रयतायाग्निहोत्रिणे ॥ ६५॥

यावन्ति रोमाणि भवन्ति धेन्वा
युगानि तावन्ति पुनाति दातृन् ।
प्रतिग्रहीतृंश्च पुनाति दत्ता
शिष्टे तु गौर्वै प्रतिपादनेन* ॥ ६६॥

शुकः—

केन वर्णविभागेन विज्ञेया कपिला भवेत् ।

कति वा लक्षणान्यस्य दृष्टानि मुनिभिः पुरा ॥ ६७॥

व्यासः—

शृणु तात यथा गोषु विज्ञेया कपिला भवेत् ॥ ६८

नेत्रयोश्शृङ्गयोश्चैव खुरेषु वृषणेषु च ।

कर्णतो घ्राणतश्चापि षड्विधाः कपिलास्स्मृताः ॥ ६९

एतेषां लक्षणानां तु यद्येकमपि दृश्यते ।

कपिलां तां विजानीयाद् एवमाहुर्मनीषिणः ॥ ७०

आग्नेयी नेत्रकपिला खुरैर्माहेश्वरी भवेत् ।

---

* सर्वेषु कोशेषु अत्रैवाध्यायसमाप्तिर्दृश्यते

ग्रीवायां वैष्णवी ज्ञेया पूष्णो घ्राणादजायत ॥ ७१

[1]वर्णतस्तु वसन्तेन स्वयोनिमभिजायते ।
गायत्र्याश्च वृषणयोर् उत्पत्तिष्वङ्गुणा स्मृता ॥ ७२

एवं गावश्च विप्राश्च गायत्री सत्यमेव च ।
वसन्तश्च सुपर्णश्च एकतस्समजायत ॥ ७३

नेत्रयोः कपिलां यस्तु वाहयेत दुहेत वा ।
स पापकर्मा नरकं प्रतिष्ठां प्रतिपद्यते ॥ ७४

नरकाद्विप्रमुक्तस्तु तिर्यग्योनिं निषेवते ।
यदा लभेत मानुष्यं जात्यन्धो जायते नरः ॥ ७५

शृङ्गयोः कपिलां यस्तु वाहयेत दुहेत वा ।
तिर्यग्योनिं स लभते जायमानः पुनः पुनः ॥ ७६

खुरेषु कपिलां यस्तु वाहयेत दुहेत वा ।
तमस्यपारे मज्जेत धनहीनो नराधमः ॥ ७७

कपिलां वालधानेषु वाहयेत दुहेत वा ।
निराश्रयस्सदा चैव जायते यदि चेत् क्रिमिः ॥ ७८

कर्णेन कपिलां यस्तु जानन्नप्युपजीवति ।
सहस्रशः क्रिमिर्भूत्वा मानुष्यं प्राप्नुयादथ ॥ ७९

चण्डालः पापयोनिश्च जायते स नराधमः ॥ ७९॥

---

1. क-घ—अकृतस्तु

घ्राणेन कपिलां यस्तु प्रमादादुपजीवति ।
सोऽपि वर्षसहस्राणि तिर्यग्योनौ प्रजायते ॥ ८०॥

व्याधिग्रस्तो जडो रोगी भवेन्मानुष्यमागतः ॥ ८१

मधुसर्पिस्सुगन्धास्तु कपिलाश्शास्त्रतस्स्मृताः ।
एतास्समुपजीवेत सोऽपि तिर्यक्षु जायते ॥ ८२

स्थावरत्वमनुप्राप्तो यदि मानुष्यतां लभेत् ।
अल्पायुस्स भवेज्जातो हीनवर्णकुलोद्भवः ॥ ८३

ये तु पापा ह्यसूयन्ते कपिलां वाहयन्ति च ।
निरयेषु प्रतिष्ठन्ते यावदाभूतसम्प्लवम् ॥ ८४

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां
अनुशासनपर्वणि एकसप्ततितमोऽध्यायः ॥ ७१ ॥
॥ ८५ ॥ आनुशासनिकपर्वणि एकसप्ततितमोऽध्यायः ॥ ७१ ॥
[अस्मिन्नध्याये ८४ श्लोकाः]

॥ द्विसप्ततितमोऽध्यायः ॥

भीष्मेण युधिष्ठिरं प्रति श्रियो बलात्कारेण स्वप्रार्थनया गोमूत्रपुरीषयोर्निवासस्य कथनम् ॥ १ ॥ गोश्रीसंवादानुवादः ॥ २ ॥

युधिष्ठिरः—

मया गवां पुरीषं हि श्रिया जुष्टमिति श्रुतम् ।
एतदिच्छाम्यहं श्रोतुं संशयोऽत्र हि मे महान् ॥ १

भीष्मः—

अत्राप्युदाहरन्तीमम् इतिहासं पुरातनम् ।
गोभिर्नृपेह संवादं श्रिया भरतसत्तम ॥ २

श्रीः कृत्वेह वपुः कान्तं गोमध्यं प्रविवेश ह ।
गावोऽथ विस्मितास्तस्या दृष्ट्वा रूपस्य सम्पदम् ॥ ३

गावः—

काऽसि देवि कुतो वा त्वं रूपेणाप्रतिमा भुवि ।
विस्मितास्स्म महाभागे तव रूपस्य सम्पदा ॥ ४

इच्छामस्त्वां वयं ज्ञातुं का त्वं क च गमिष्यसि ।
तत्त्वेन हि सुवर्णाभे सर्वमेतद्ब्रवीहि नः ॥ ५

श्रीः—

लोकस्य कान्तिर्भद्रं वश् श्रीर्नामेह परिश्रुता ।

मया [1]दैत्याः परित्यक्ता विनष्टाश्शाश्वतीस्समाः ॥ ६

इन्द्रो विवस्वान् सोमश्च विष्णुरापोऽग्निरेव च ।
मयाऽभिपन्ना दीप्यन्ते ऋषयो देवतास्तथा ॥ ७

यांश्च द्विषाम्यहं गावस् ते विनश्यन्ति सर्वशः ।
धर्मार्थकामहीनाश्च ते भवन्त्यसुखान्विताः ॥ ८

एवम्प्रभावां मां गावो विजानीत सुखप्रदाम् ॥ ८॥

इच्छेयं चापि युष्मासु वस्तुं सर्वासु नित्यदा ।
आगता प्रार्थयानाऽहं श्रीजुष्टा भवतानघाः ॥ ९॥

गावः—

अध्रुवा चपला च त्वं सामान्या बहुभिस्सह ।
न त्वामिच्छाम भद्रं ते गम्यतां यत्र रोचते ॥ १०॥

वपुष्मन्त्यो वयं सर्वाः किमस्माकं त्वयाऽद्य वै ।
यथेष्टं गम्यतां तत्र कृतकार्या वयं त्वया ॥ ११॥

श्रीः—

किमेतद्वः क्षमं गावो यन्मां नेहाभिनन्दथ ।
न मां सम्प्रतिगृह्णीत कस्माद्वै दुर्लभां सतीम् ॥ १२॥

सत्यश्च लोकवादोऽयं लोके चरति सुव्रताः ।
स्वयं प्राप्ते परिभवो भवतीति विनिश्चयः ॥ १३॥

---

1. क-ङ—देवा

॥ द्विसप्ततितमोऽध्यायः ॥

भीष्मेण युधिष्ठिरं प्रति श्रियो बलात्कारेण स्वप्रार्थनया गोमूत्रपुरीषयोर्निवासस्य कथनम् ॥ १ ॥ गोश्रीसंवादानुवादः ॥ २ ॥

युधिष्ठिरः—

मया गवां पुरीषं हि श्रिया जुष्टमिति श्रुतम् ।
एतदिच्छाम्यहं श्रोतुं संशयोऽत्र हि मे महान् ॥ १

भीष्मः—

अत्राप्युदाहरन्तीमम् इतिहासं पुरातनम् ।
गोभिर्नृपेह संवादं श्रिया भरतसत्तम ॥ २

श्रीः कृत्वेह वपुः कान्तं गोमध्यं प्रविवेश ह ।
गावोऽथ विस्मितास्तस्या दृष्ट्वा रूपस्य सम्पदम् ॥ ३

गावः—

काऽसि देवि कुतो वा त्वं रूपेणाप्रतिमा भुवि ।
विस्मितास्स्म महाभागे तव रूपस्य सम्पदा ॥ ४

इच्छामस्त्वां वयं ज्ञातुं का त्वं क्व च गमिष्यसि ।
तत्त्वेन हि सुवर्णाभे सर्वमेतद्ब्रवीहि नः ॥ ५

श्रीः—

लोकस्य कान्तिर्भद्रं वश् श्रीर्नामेह परिश्रुता ।

मया [1]दैत्याः परित्यक्ता विनष्टाश्शाश्वतीस्समाः ॥ ६

इन्द्रो विवस्वान् सोमश्च विष्णुरापोऽग्निरेव च ।
मयाऽभिपन्ना दीप्यन्ते ऋषयो देवतास्तथा ॥ ७

यांश्च द्विषाम्यहं गावस् ते विनश्यन्ति सर्वशः ।
धर्मार्थकामहीनाश्च ते भवन्त्यसुखान्विताः ॥ ८

एवम्प्रभावां मां गावो विजानीत सुखप्रदाम् ॥ ८॥

इच्छेयं चापि युष्मासु वस्तुं सर्वासु नित्यदा ।
आगता प्रार्थयानाऽहं श्रीजुष्टा भवतानघाः ॥ ९॥

गावः—

अध्रुवा चपला च त्वं सामान्या बहुभिस्सह ।
न त्वामिच्छाम भद्रं ते गम्यतां यत्र रोचते ॥ १०॥

वपुष्मन्त्यो वयं सर्वाः किमस्माकं त्वयाऽद्य वै ।
यथेष्टं गम्यतां तत्र कृतकार्या वयं त्वया ॥ ११॥

श्रीः—

किमेतद्वः क्षमं गावो यन्मां नेहाभिनन्दथ ।
न मां सम्प्रतिगृह्णीत कस्माद्वै दुर्लभां सतीम् ॥ १२॥

सत्यश्च लोकवादोऽयं लोके चरति सुव्रताः ।
स्वयं प्राप्ते परिभवो भवतीति विनिश्चयः ॥ १३॥

1. क-घ—देवा

महदुग्रं तपः कृत्वा मां निषेवन्ति मानवाः ।
देवदानवगन्धर्वाः पिशाचोरगराक्षसाः ॥ १४॥

क्षममेतद्धि वो गावः प्रतिगृह्णीत मामिह ।
नावमन्या ह्यहं सौम्यास् त्रैलोक्ये सचराचरे ॥ १५॥

गावः—

नावमन्यामहे देवि न त्वां परिभवामहे ।
[1]अध्रुवा चलचित्ताऽसि ततस्त्वां वर्जयामहे ॥ १६॥

बहुनाऽत्र किमुक्तेन गम्यतां यत्र वाञ्छसि ।
वपुष्मन्त्यो वयं सर्वाः किमस्माकं त्वयाऽनघे ॥ १७॥

श्रीः—

अवज्ञाता भविष्यामि सर्वलोकेषु मानवैः ।
प्रत्याख्यातेति युष्माभिः प्रसादः क्रियतामिति ॥ १८॥

महाभागा भवत्यो वै शरण्याश्शरणागताम् ।
परित्रायन्तु मां नित्यं भजमानामनिन्दिताम् ॥ १९॥

मानयित्वाऽहमिच्छामि भवत्यस्सततं शुभाः ।
सुप्रीताऽङ्गेषु वो वस्तुम् इच्छामीह न कुत्सिते ॥ २०॥

न वोऽस्ति कुत्सितं किञ्चिद् अङ्गेष्वालक्ष्यतेऽनघाः ।
पुण्याः पवित्रास्सुभगा अवाग्देशं प्रयच्छत ॥ २१॥

---

1. क-घ—इदमर्धं नास्ति

वसेयं यत्र वो देहे तन्मे व्याख्यातुमर्हथ ॥ २२

भीष्मः—

एवमुक्तास्तु ता गावश् शुभाः करुणवत्सलाः ।
सम्मान्य सहितास्सर्वाश् श्रियमूचुर्नराधिप ॥ २३

गावः—

अवश्यं मानना कार्या तवास्माभिर्यशस्विनि ।
शकृन्मूत्रे निवसतां पुण्यमेतद्धि नश्शुभे ॥ २४

[1]श्रीः—

दिष्ट्या प्रसादो युष्माभिः कृतो मेऽनुग्रहात्मकः ।
एवं भवतु भद्रं वः पूजिताऽस्मि सुखप्रदाः ॥ २५

भीष्मः—

एवं कृत्वा तु समयं श्रीर्गोभिस्सह भारत ।
पश्यन्तीनां ततस्तासां तत्रैवान्तरधीयत ॥ २६

एवं गोशकृतः पुत्र माहात्म्यं तेऽनुवर्णितम् ।
माहात्म्यं च गवां भूयश् श्रूयतां गदतो मम ॥ २७

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां
अनुशासनपर्वणि द्विसप्ततितमोऽध्यायः ॥ ७२ ॥
॥ ८९ ॥ आनुशासनिकपर्वणि द्विसप्ततितमोऽध्यायः ॥ ७२ ॥
[अस्मिन्नध्याये २७ श्लोकाः]

भीष्मः—

1. घ—एवमुक्तास्तु ता गावश्शुभास्तरुणवत्सलाः । [अधिकः पाठः]

॥ त्रिसप्ततितमोऽध्यायः ॥

भीष्मेण युधिष्ठिरं प्रति गोलोकस्य देवलोकादप्युपरितनत्वे निमित्त-प्रतिपादकब्रह्मशक्रसंवादानुवादः ॥

भीष्मः—

ये च गास्सम्प्रयच्छन्ति हुतशिष्टाशनाश्च ये ।
तेषां सत्राणि यज्ञाश्च नित्यमेव युधिष्ठिर ॥ १

ऋते दधिघृतेनेह न यज्ञस्सम्प्रवर्तते ।
तेन यज्ञस्य यज्ञत्वम् अतो मूलं च लक्ष्यते ॥ २

[1]दानानामपि सर्वेषां गवां दानं प्रशस्यते ।
गावश्श्रेष्ठाः पवित्राश्च पावनं परमं तथा ॥ ३

पुष्ट्यर्थमेतास्सेवेत शान्त्यर्थमपि चैव ह ।
पयो दधि घृतं तासां सर्वपापप्रमोचनम् ॥ ४

गावस्तेजः परं प्रोक्तम् इह लोके परत्र च ।
न गोभ्यः परमं किञ्चित् पवित्रं भरतर्षभ ॥ ५

अत्राप्युदाहरन्तीमम् इतिहासं पुरातनम् ।
पितामहस्य संवादम् इन्द्रस्य च युधिष्ठिर ॥ ६

पराभूतेषु दैत्येषु शक्रस्त्रिभुवनेश्वरः ।

1. ख—देवानामपि

प्रजास्समुदितास्सर्वास् सत्यधर्मपरायणाः ॥ ७

अथर्षयस्सगन्धर्वाः किन्नरोरगराक्षसाः ।
देवासुरसुपर्णाश्च प्रजानां पतयस्तथा ॥ ८

पर्युपासन्त कौरव्य कदाचिद्वै पितामहम् ॥ ८॥

नारदः पर्वतश्चैव विश्वावसुहहाहुहू ।
दिव्यगानेन गायन्तः पर्युपासत तं प्रभुम् ॥ ९॥

तत्र दिव्यानि पुष्पाणि प्रावहत् पवनस्तदा ।
आजह्रुर्ऋतवश्चापि सुगन्धीनि पृथक् पृथक् ॥ १०॥

तस्मिन् देवसमावापे सर्वभूतसमागमे ।
दिव्यवादित्रसङ्घुष्टे दिव्यस्त्रीचारणान्विते ॥ ११॥

इन्द्रः पप्रच्छ देवेशम् अभिवाद्य प्रणम्य च ॥ १२

इन्द्रः—

देवानां भगवन् कस्मात् लोकेशानां पितामह ।
उपरिष्टाद्भवां लोक एतदिच्छामि वेदितुम् ॥ १३

किं तपो ब्रह्मचर्यं वा गोभिः कृतमिहेश्वर ।
देवानामुपरिष्टाद्यद् वसन्त्यरजसस्सुखम् ॥ १४

भीष्मः—

ततः प्रोवाच तं ब्रह्मा शक्रं बलनिषूदनम् ॥ १४॥

ब्रह्मा—

अवज्ञातास्त्वया नित्यं गावो बलनिषूदन ।
तेन त्वमासां माहात्म्यं न वेत्थ शृणु तत् प्रभो ॥ १५॥

गवां प्रभावं परमं माहात्म्यं च सुरर्षभ ॥ १६

यज्ञाङ्गं कथिता गावो यज्ञ एव च वासव ।
एताभिश्चाप्यते यज्ञो न प्रवर्तेत् कथञ्चन ॥ १७

धारयन्ति प्रजा[1]श्चैताः पयसा हविषा तथा ।
एतासां तनयाश्चापि कृषियोगमुपासते ॥ १८

जनयन्ति च धान्यानि बीजानि च धनानि च ।
ततो यज्ञाः प्रवर्तन्ते हव्यं कव्यं च सर्वशः ॥ १९

पयो दधि घृतं चैव पुण्याश्चैतास्सुराधिप ।
हरन्ति विविधान् भोगान् क्षुत्तृष्णापरिपीडितान् ॥ २०

[2]मुनींश्च धारयन्तीह प्रजाश्चैव तु कर्मणा ।
वासवाकूटवाहिन्यः कर्मणा सुकृतेन च ॥ २१

उपरिष्टात् ततोऽस्माकं वसन्त्येतास्सदैव हि ।
एतत् ते कारणं शक्र निवासकृतमद्य वै ॥ २२

गावो देवोपरिष्टाद्धि समाख्याताश्शतक्रतो ।
एता हि [3]वरदत्ताश्च वरदाश्चैव वासव ॥ २३

1. क-घ—श्चेष्टाः 2. क-घ—अग्नींश्च
3. अ—वरदाश्चैव वरदत्ता हि वासव

सौरभ्यः पुण्यकर्मिण्यः पावनाश्शुभलक्षणाः ॥ २३॥

यदर्थं गां गताश्चैव सुरभ्यस्सुरसत्तम ।
तच्च मे शृणु कात्स्न्र्येन वदतो बलसूदन ॥ २४॥

पुरा देवयुगे तात दैत्येन्द्रेषु महात्मसु ।
त्रींल्लोकाननुशासत्सु विष्णौ गर्भत्वमागते ॥ २५॥

अदित्यां तप्यमानायां तपो घोरं सुदुश्चरम् ।
पुत्रार्थममरश्रेष्ठ पादेनैकेन नित्यदा ॥ २६॥

तां दृष्ट्वा महतीं देवीं तप्यमानां महत्तपः ।
दक्षस्य दुहिता देवी सुरभिर्नाम नामतः ॥ २७॥

अतप्यत तपो घोरं दृष्ट्वा धर्मपरायणा ॥ २८

कैलासशिखरे रम्ये देवगन्धर्वसेविते ।
व्यतिष्ठदेकपादेन [1]परं योगमुपस्थिता ॥ २९

दशवर्षसहस्राणि दशवर्षशतानि च ।
सन्तप्तास्तपसा तस्या देवास्सर्षिपुरोगमाः ॥ ३०

तत्र गत्वा मया सार्धं प्रत्युपासत तां शुभाम् ।
अथाहमब्रवं तत्र देवीं तां तपसाऽन्विताम् ॥ ३१

किमर्थं तप्यसे देवि तपो घोरमनिन्दिते ।
प्रीतस्तेऽहं महाभागे तपसा तव शोभने ॥ ३२

1. अ-ख—परमं योगमास्थिता

वरयस्व वरं देवि दातास्मीति पुरन्दर ॥ ३२॥

सुरभिः—

वरेण भगवन् मेऽद्य कृतं लोकपितामह ।
एष एव वरो मेऽद्य यत् प्रीतोऽसि ममानघ ॥ ३३॥

ब्रह्मा—

तामेवं ब्रुवतीं देवीं सुरभिं त्रिदशेश्वर ।
प्रत्यब्रवं यद्देवेन्द्र तन्निबोध शचीपते ॥ ३४॥

अलोभकाम्यया देवि तपसा शुचिना च ते ।
प्रसन्नोऽहं वरं तस्माद् अमरत्वं ददामि ते ॥ ३५॥

त्रयाणामपि लोकानाम् उपरिष्टान्निवत्स्यसि ।
मत्प्रसादाच्च विख्यातो गोलोकस्सम्भविष्यति ॥ ३६॥

मानुष्येषु च कुर्वाणाः प्रजाः कर्म सुतास्तव ।
निवत्स्यन्ति महाभागे सर्वा दुहितरश्च ते ॥ ३७॥

मनसा चिन्तिता भोगास् त्वया दिव्याश्च मानुषाः ।
यच्च स्वर्गसुखं देवि तत्ते सम्पत्स्यते शुभे ॥ ३८॥

तस्या लोकास्त्रहस्राक्ष सर्वकामसमन्विताः ।
न तत्र क्रमते मृत्युर् न च कालो न [1]पावकः ॥ ३९॥

न दैन्यं नाशुभं किञ्चिद् विद्यते तत्र वासव ॥ ४०

1. अ-ख—पातकम्

तत्र दिव्यान्यरण्यानि दिव्यानि भवनानि च ।
विमानानि च युक्तानि कामगानि च वासव ॥ ४१
व्रतैश्च विविधैः पुण्यैस् तथा तीर्थानुसेवनात् ।
तपसा महता चैव सुकृतेन च कर्मणा ॥ ४२
शक्यस्समासादयितुं गोलोकः पुष्करेक्षण ॥ ४२॥
एतत् ते सर्वमाख्यातं मया शक्राभिपृच्छते ।
न ते परिभवः कार्यो गवामरिनिषूदन ॥ ४३॥

भीष्मः—

एतच्छ्रुत्वा सहस्राक्षः पूजयामास नित्यदा ।
गाश्चक्रे बहुमानं च तासु नित्यं युधिष्ठिर ॥ ४४॥
एतत् ते सर्वमाख्यातं पावनं च महाद्युते ।
पवित्रं परमं चापि गवां माहात्म्यमुत्तमम् ॥ ४५॥
कीर्तितं पुरुषव्याघ्र सर्वपापविनाशनम् ॥ ४६
य इदं कथयेन्नित्यं ब्राह्मणेभ्यस्समाहितः ।
हव्यकव्येषु यज्ञेषु पितृकार्येषु चैव ह ॥ ४७
सार्वकामिकमक्षय्यं पितॄंस्तस्योपगच्छति ॥ ४७॥
गोषु भक्तिं च लभते यद्यदिच्छति मानवः ।
स्त्रियोऽपि भक्ता या गोषु ताश्च कामानवाप्नुयुः ॥ ४८॥
पुत्रार्थी लभते पुत्रं कन्या पतिमवाप्नुयात् ।

विद्यार्थी प्राप्नुयाद्विद्यां सुखार्थी प्राप्नुयात् सुखम् ॥ ४९॥
न किञ्चिद् दुर्लभं चैव गवां भक्तस्य भारत ॥ ५०

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां
अनुशासनपर्वणि त्रिसप्ततितमोऽध्यायः ॥ ७३ ॥
॥ ८९ ॥ आनुशासनिकपर्वणि त्रिसप्ततितमोऽध्यायः ॥ ७३ ॥
[अस्मिन्नध्याये ५० श्लोकाः]

॥ चतुस्सप्ततितमोऽध्यायः ॥

युधिष्ठिरेण सुवर्णोत्पत्तिप्रकारं पृष्टेन भीष्मेण तत्प्रतिपादकवसिष्ठ-परशुरामसंवादानुवादारम्भः ॥ १ ॥ भवस्य भवान्या सह रतियोगे तद्वीर्य-भीरुभिर्देवैः प्रार्थितेन देवेन वीर्यस्योर्ध्वनिरोधने प्रजोच्छेदकुपितया देव्या देवानामनपत्यत्वशापदानम् ॥ २ ॥ तारकासुरबाधितैर्देवैर्ब्रह्माणं प्रति स्वेषां पार्वतीशापेनानपत्यत्वकथनपूर्वकमसुरवधोपायकथनप्रार्थना ॥ ३ ॥ ब्रह्म-णा देवान्प्रति अग्नेरसंनिहितत्वेन देवीशापाविषयतया देवेन स्ववीर्यनिरोध-काले भुवि प्रस्कन्नकिंचिद्वीर्यांशस्य तस्मिन्संसृष्टतया च तेन गङ्गायां कुमा-रोत्पादनकथनेनाऽन्वेषणचोदना ॥ ४ ॥ अग्निना देवानां प्रार्थनया गङ्गा-यां स्वयंसृष्टरुद्रवीर्याधानम् ॥ ५ ॥ गङ्गयाऽग्निना स्वस्मिन्नाहितगर्भस्य मेरुगिरौ समुत्सर्जने तदीयतेजोव्याप्तयावद्वस्तूनां काञ्चनीभावप्राप्तिः ॥ ६ ॥ एवं भीष्मेण सुवर्णोत्पत्तिप्रकारकथनम् ॥ ७ ॥ वसिष्ठेन परशुरामं प्रति सुवर्णप्रभावकथनप्रसङ्गेन रुद्रयज्ञे भृग्वङ्गिरःप्रभृतिप्रभावादिकथनम् ॥ ८ ॥

युधिष्ठिरः—

उक्तं पितामहेनेदं गवां दानमनुत्तमम् ।
विशेषेण नरेन्द्राणाम् इति धर्ममवेक्षताम् ॥ १

राज्यं च सततं दुःखम् आश्रमाश्च सुदुर्विदाः ।
परिचारेण वै दुःखं दुर्धरं चाकृतात्मभिः ॥ २
भूयिष्ठं च नरेन्द्राणां विद्यते न शुभा गतिः ॥ २॥
पूयन्ते ते तु नियतं प्रयच्छन्तो वसुन्धराम् ।
पूर्वं च कथिता धर्मास् त्वया मे कुरुनन्दन ॥ ३॥
एवमेव गवामुक्तं प्रदानं ते नृगेण ह ।
ऋषिणा नाचिकेतेन पूर्वमेव निदर्शितम् ॥ ४॥
वेदोपनिषदे चैव सर्वकर्मसु दक्षिणा ।
सर्वक्रतुषु चोद्दिष्टा भूमिर्गावोऽथ काञ्चनम् ॥ ५॥
तत्र श्रुतिस्तु परमा सुवर्णं दक्षिणेति वै ।
एतदिच्छाम्यहं श्रोतुं पितामह यथातथम् ॥ ६॥
किं सुवर्णं कथं जातं कस्मिन् काले किमात्मकम् ।
किंदानं किंफलं चैव कस्माच्च परमुच्यते ॥ ७॥
कस्माद् दानं सुवर्णस्य पूजयन्ति मनीषिणः ।
कस्माच्च दक्षिणार्थं तद् यज्ञकर्मसु शस्यते ॥ ८॥
कस्माच्च पावनं श्रेष्ठं भूमेर्गोभ्यश्च काञ्चनम् ।
परमं दक्षिणार्थं च तन्मे ब्रूहि पितामह ॥ ९॥

भीष्मः—

शृणु राजन्नवहितो बहुकारणविस्तरम् ।

जातरूपसमुत्पत्तिम् अनुभूतं च यन्मया ॥ १०॥
पिता मम महातेजाश् शन्तनुर्निधनं गतः ।
तस्य दित्सुरहं श्राद्धं गङ्गाद्वारमुपागतः ॥ ११॥
तत्राहमागत्य पितुश् श्राद्धकर्म समारभम् ।
[1]माता मे जाह्नवी चैव साहाय्यमकरोत्तदा ॥ १२॥
तत्रागतांस्तपस्सिद्धान् उपवेश्य बहूनृषीन् ।
तोयप्रदानात् प्रभृति कार्याण्यथ समारभम् ॥ १३॥
तत् समाप्य यथोद्दिष्टं सर्वं कर्म समाहितः ।
दातुं निवपनं सम्यग् यथावदहमारभम् ॥ १४॥
ततस्स दर्भविन्यासं भित्त्वा सुरुचिराङ्गदः ।
प्रलम्बाभरणो बाहुर् उदतिष्ठद्विशां पते ॥ १५॥
[2]मुहूर्तमपि तं दृष्ट्वा परं विस्मयमागतः ।
प्रतिग्रहीता साक्षान्मे पितेति भरतर्षभ ॥ १६॥
[3]ततो मे पुनरेवासीत् संज्ञा सञ्चिन्त्य शास्त्रतः ।
नायं वेदेषु विहितो विधिर्हस्त इति प्रभो ॥ १७॥
पिण्डो देयो नरेणेह ततो मतिरभून्मम ॥ १८
साक्षादेहं मनुष्यस्य पितरोऽन्तर्हिताः क्वचित् ।

1. क-घ—अर्धपञ्चकं नास्ति 2. क-घ—मुहूर्तं पितरम्
3. क-घ—अर्धनवकं नास्ति

गृह्णन्ति विहितं देयं पिण्डो देयः कुशेष्विति ॥ १९

ततोऽहं तदपाक्रम्य पितृहस्तनिदर्शनम् ।
शास्त्रप्रमाणसूक्ष्मार्थम् इमं पार्थिव संस्मरे ॥ २०

ततो दर्भेषु तत् सर्वम् अददं भरतर्षभ ।
शास्त्रमार्गानुसारेण तद्विद्धि त्वं युधिष्ठिर ॥ २१

ततस्सोऽन्तर्हितो बाहुः पितुर्मम जनाधिप ।
ततो मां दर्शयामासुस् तृप्तास्ते पितरस्तथा ॥ २२

प्रीयमाणास्स्म मामूचुः प्रीतास्स्म भरतर्षभ ।
विज्ञानेन तवानेन यन्न मुह्यसि धर्मतः ॥ २३

त्वया हि कुर्वता शास्त्रं प्रमाणमिह भारत ।
आत्मा धर्मश्श्रुतं वेदाः पितरश्च महर्षिभिः ॥ २४

साक्षात् पितामहो ब्रह्मा गुरवोऽथ प्रजापतिः ।
प्रमाणमुपनीता वै स्थितिश्च न विचालिता ॥ २५

तदिदं सम्यगारब्धं त्वयाऽद्य भरतर्षभ ।
किं तु भूमेर्गवां चार्थे सुवर्णं दीयतामिति ॥ २६

एवं वयं च धर्मश्च सर्वे चास्मत्पितामहाः ।
पाविता वै भविष्यन्ति पावनं परमं हि तत् ॥ २७

नवपूर्वानधश्चान्यान् नव सन्तारयन्ति ते ।
सुवर्णं ये प्रयच्छन्तीत्येवं मां पितरोऽब्रुवन् ॥ २८

ततोऽहं विस्मितो राजन् प्रतिबुद्धो विशां पते ।
सुवर्णदानेऽकरवं मतिं भरतसत्तम ॥ २९

इतिहासमिमं चापि शृणु राजन् पुरातनम् ।
जामदग्न्यं प्रति विभो धन्यमायुष्यमेव च ॥ ३०

जामदग्न्येन रामेण तीव्ररोषान्वितेन च ।
त्रिस्सप्तकृत्वः पृथिवी कृता निःक्षत्रिया पुरा ॥ ३१

ततो जित्वा महीं कृत्स्नां रामो राजीवलोचनः ।
आजहार क्रतुं वीरो ब्रह्मक्षत्रेण पूजितम् ॥ ३२

वाजिमेधं महाराज सर्वकामसमन्वितम् ।
पावनं सर्वभूतानां तेजो[1]वीर्यविवर्धनम् ॥ ३३

विपाप्माऽपि च तेजस्वी [2]तेन क्रतुबलेन वै ।
नैवात्मनोऽथ लघुतां जामदग्न्योऽध्यगच्छत ॥ ३४

स तु क्रतुवरेणेष्ट्वा महात्मा दक्षिणावता ।
पप्रच्छागमसम्पन्नान् ऋषीन् देवांश्च भारत ॥ ३५

पावनं परमं नृणाम् उग्रे कर्मणि वर्तताम् ।
तदुच्यतां महाभागा इति [3]रामो वचोऽब्रवीत् ॥ ३६

प्रत्युवाच ततस्तेषां वसिष्ठो भगवान् ऋषिः ॥ ३६॥

---

1. अ-ख—द्युति
2. क—इतः चत्वारः पादा न सन्ति ङ—पादत्रयं नास्ति
3. अ-ख—जातघृणो

वसिष्ठः—

देवतास्ते प्रयच्छन्ति सुवर्णं ये ददत्युत ।
अग्निर्हि देवतास्सर्वास् सुवर्णं च तदात्मकम् ॥ ३७॥

तस्मात् सुवर्णं ददता दत्तास्सर्वाश्च देवताः ।
भवन्ति पुरुषव्याघ्र न ह्यतः परमं विदुः ॥ ३८॥

भूय एव च माहात्म्यं सुवर्णस्य निबोध मे ।
वदतो मम विप्रर्षे सर्वशस्त्रभृतां वर ॥ ३९॥

मया श्रुतमिदं पूर्वं पुराणे भृगुनन्दन ।
प्रजापतेः कथयतो मनोस्स्वायम्भुवस्य वै ॥ ४०॥

शूलपाणेर्भगवतो रुद्रस्यापि महात्मनः ।
गिरौ हिमवति श्रेष्ठे तदा भृगुकुलोद्वह ॥ ४१॥

देव्या विवाहे निर्वृत्ते रुद्राण्या भृगुनन्दन ।
समागमो भगवतो देव्या सह महात्मनः ॥ ४२॥

ततस्सर्वे समुद्विग्ना भगवन्तमथागमन् ॥ ४३

ते महादेवमासीनं देवीं च वरदामुमाम् ।
[1]प्रसाद्य सगणं सर्वे रुद्रमूचुस्सुरेश्वराः ॥ ४४

देवाः—

अयं समागमो देव देव्या सह तवानघ ।
तपस्विनस्तपस्विन्या तेजस्विन्याऽतितेजसः ॥ ४५

1. क-घ—प्रणम्य

अमोघतेजास्त्वं देव देवी चेयमुमा तथा ।
अपत्यं युवयोर्देव बलवद्भविता प्रभो ॥ ४६
तन्नूनं त्रिषु लोकेषु न किञ्चिच्छेषयिष्यति ॥ ४६॥
[1]तदेभ्यः प्रणतेभ्यस्तु देवेभ्यः पृथुलोचन ।
वरं प्रयच्छ लोकेश त्रैलोक्यहितकाम्यया ॥ ४७॥
अपत्यार्थं निगृह्णीष्व तेजो ज्वलनमुत्तमम् ॥ ४८

वसिष्ठः—

इति तेषां कथयतां भगवान् वृषभध्वजः ।
एवमस्त्विति देवांस्तान् विप्रर्षे प्रत्यभाषत ॥ ४९

उमा—

तस्मात् सर्वे सुरा यूयम् अनपत्या भविष्यथ ॥ ४९॥
प्रजाच्छेदो मम कृतो यस्माद् युष्माभिरद्य वै ।
तस्मात् प्रजा वः खगमास् सर्वेषां न भविष्यति ॥ ५०॥

वसिष्ठः—

पावकस्तु न तत्रासीच् छापकाले भृगूद्वह ।
[2]देवा देव्यास्ततश्शापाद् अनपत्यास्तदाऽभवन् ॥ ५१॥
रुद्रस्तु तेजोऽप्रतिमं धारयामास तत्तदा ।
प्रस्कन्नं तु ततस्तस्मात् किञ्चित्तत्रापतद्भुवि ॥ ५२॥
तत् पपात तदा चाग्नौ ववृधे चाद्भुतोपमम् ।
तेजस्तेजसि सम्पृक्तम् एकयोनित्वमागतम् ॥ ५३॥

1. घ—अर्धश्लोकं नास्ति 2. क-घ—अर्धश्लोकं नास्ति

एतस्मिन्नेव काले तु देवाश्शक्रपुरोगमाः ।
असुरस्तारको नाम तेन सन्तापिता भृशम् ॥ ५४॥
आदित्या वसवो रुद्रा मरुतोऽथाश्विनावपि ।
साध्याश्च सर्वे सन्त्रस्ता दैतेयस्य पराक्रमात् ॥ ५५॥
स्थानानि देवतानां हि विमानानि पुराणि च ।
ऋषीणामाश्रमाश्चापि बभूवुरसुरैर्हृताः ॥ ५६॥
ते दीनमनसस्सर्वे देवाश्च ऋषयश्च ह ।
प्रजग्मुश्शरणं देवं ब्रह्माणमजरं प्रभुम्* ॥ ५७॥

देवाः—

असुरस्तारको नाम त्वया दत्तवरः प्रभो ।
सुरानृषींश्च क्षिप्रमति वधस्तस्य विधीयताम् ॥ ५८॥
तस्माद्भयं समुत्पन्नम् अस्माकं वै पितामह ।
परित्रायस्व नो देव न ह्यन्या गतिरस्ति नः ॥ ५९॥

ब्रह्मा—

समोऽहं सर्वभूतानाम् अधर्मं तं न रोचये ।
हन्यतां तारकः क्षिप्रं सुरर्षिगणबाधकः ॥ ६०॥
वेदा धर्माश्च नोत्सादं गच्छेयुस्सुरसत्तमाः ।
विहितं पूर्वमेवात्र मया वै व्येतु वो भयम् ॥ ६१॥

देवाः—

वरदानाद्भगवतो दैतेयो बलगर्वितः ।

---

* सर्वेषु कोशेषु अत्रैवाध्यायसमाप्तिर्दृश्यते

देवैर्न शक्यते हन्तुं स कथं प्रशमं व्रजेत् ॥ ६२॥

स हि नैव स्म देवानां नासुराणां न रक्षसाम् ।
वध्यस्स्यामिति जग्राह वरं त्वत्तः पितामह ॥ ६३॥

देवाश्च शप्ता रुद्राण्या प्रजोच्छेदे पुराकृते ।
न भविष्यति वोऽपत्यम् इति सर्वजगत्पते ॥ ६४॥

ब्रह्मा—

हुताशनो न तत्रासीच् छापकाले सुरोत्तमाः ।
स उत्पादयिताऽपत्यं वधार्थं त्रिदशद्विषाम् ॥ ६५॥

तद्वै देवानतिक्रम्य देवदानवराक्षसान् ।
मानुषानथ गन्धर्वान् नागानपि च पक्षिणः ॥ ६६॥

अस्त्रेणामोघपातेन शक्त्या तं घातयिष्यति ।
यतो वो भयमुत्पन्नं ये चान्ये सुरशत्रवः ॥ ६७॥

सनातनो हि सङ्कल्पः काम इत्यभिधीयते ।
रुद्रस्य [1]तेजः प्रस्कन्नम् अग्नौ निपतितं च तत् ॥ ६८॥

तत्तेजोऽग्निर्महद्भूतं द्वितीयमिव पावकम् ।
वधार्थं देवशत्रूणां गङ्गायां जनयिष्यति ॥ ६९॥

स तु नावाप तं शापं नष्टस्स हुतभुक् तदा ।
[2]तस्माद्वो न भयं देवास् समुत्पत्स्यति पावकिः ॥ ७०॥

1. अ-ख—रेतः+च पतितं 2. ख—तस्माद्वो भयनुद्देवाः

[1]अन्विष्य तं वै ज्वलनं तथा चाद्य नियुज्यताम् ।
तारकस्य वधोपायः कथितो वो मयाऽनघाः ॥ ७१॥

न हि तेजस्विनां शापास् तेजसः प्रभवन्ति वै ।
बलान्यतिबलं प्राप्य न बलानि भवन्ति वै ॥ ७२॥

हन्यादवध्यानपरान् अपि चैव तपस्विनः ।
सङ्कल्पाभिरुचिः [2]कामस् सनातनसमोऽनलः ॥ ७३॥

जगत्पतिरनिर्देश्यस् सर्वगस्सर्वभावनः ।
[3]ह्रच्छयस्सर्वभूतानां ज्येष्ठो रुद्रादपि प्रभुः ॥ ७४॥

अन्विष्यतां ततः क्षिप्रं तेजोराशिर्हुताशनः ।
स वो मनोगतं कामं देवस्सम्पादयिष्यति ॥ ७५॥

वसिष्ठः—

एतद्वाक्यमुपश्रुत्य ततो देवा महात्मनः ।
जग्मुस्संसिद्धसङ्कल्पाः पर्यटन्तो विभावसुम् ॥ ७६॥

ततस्त्रैलोक्यमृषयो विचिन्वन्तस्सुरैस्सह ।
काङ्क्षन्तो दर्शनं वह्नेस् सर्वे तद्गतमानसाः ॥ ७७॥

परेण तपसा युक्ताश् श्रीमन्तो लोकविश्रुताः ।
लोकानन्वचरन् सिद्धास् सर्व एव भृगूद्वह ॥ ७८॥

---

1. अ-क-घ—अन्वीक्ष्य
2. क—कालः + समो बलः घ—काल + समो नयः
3. क-घ—अर्धचतुष्टयं नास्ति

नष्टमात्मनि संलीनं नाभिजग्मुर्हुताशनम् ॥ ७९

ततस्ताञ् जातसन्त्रासान् अग्नेर्दर्शनलालसान् ।
जलेचरः क्लान्तमनास् तेजसाऽग्नेः प्रदीपितः ॥ ८०

उवाच देवान् मण्डूको रसातलतलोत्थितः ॥ ८०॥

मण्डूकः—

रसातलतले देवा वसत्यग्निरिति प्रभुः ॥ ८१
सन्तापादिह सम्प्राप्तः पावकप्रभवादहम् ॥ ८१॥
स संसुप्तो जले देवा भगवान् हव्यवाहनः ।
अपस्संसृज्य तेजोभिस् तेन सन्तापिता वयम् ॥ ८२॥
तस्य दर्शनमिष्टं वो यदि देवा विभावसोः ।
तत्रैवमभिगच्छध्वं कार्यं वो वह्निना यदि ॥ ८३॥
मृग्यतां साधयिष्यामो वयं ह्यग्निभयात् पुरा ॥ ८४

वसिष्ठः—

एतावदुक्त्वा मण्डूकस् त्वरितो जलमाविशत् ॥ ८४॥
हुताशनस्तु बुबुधे मण्डूकस्याथ पैशुनम् ।
शशाप तं समासाद्य न रसान् वेत्स्यसीति वै ॥ ८५॥
स तं संयुज्य शापेन मण्डूकं पावको ययौ ।
अन्यत्र वासाय विभुर् न च देवानदर्शयत् ॥ ८६॥
देवास्त्वनुग्रहं चक्रुर् मण्डूकानां भृगूद्वह ।
यत्तच्छृणु महाबाहो गदतो मम सर्वशः ॥ ८७॥

देवाः—

अग्निशापादजिह्वा हि रसज्ञानबहिष्कृताः ।
सरस्वतीं बहुविधां यूयमुच्चारयिष्यथ ॥ ८८॥

बिलवासगताश्चाथ निरादाना विचेतसः ।
गतासूनपि वश्शुष्कान् भूमिस्सन्धारयिष्यति ॥ ८९॥

तमोगतायामपि च निशायां प्रचरिष्यथ ॥ ९०

वसिष्ठः—

[1]इत्युक्त्वा तांस्ततो देवाः पुनरेव महीमिमाम् ।
परीयुर्ज्वलनस्यार्थे न चाविन्दन् हुताशनम् ॥ ९१

अथ तान् द्विरदः कश्चित् सुरेन्द्रद्विरदोपमः ।
अश्वत्थस्थोऽग्निरित्येवम् आह देवान् भृगूद्वह ॥ ९२

शशाप ज्वलनस्सर्वान् द्विरदान् क्रोधमूर्च्छितः ॥ ९२॥

प्रतीपा भवतां जिह्वा भवित्रीति भृगूद्वह ।
इत्युक्त्वा निस्सृतोऽश्वत्थाद् अग्निर्वारणसूचितः ॥ ९३॥

प्रविवेश शमीगर्भम् अथ वह्निस्सुपुष्पया ॥ ९४

अनुग्रहं तु नागानां यं चक्रुश्शृणु तं प्रभो ।
देवा भृगुकुलश्रेष्ठ प्रीतास्सत्यपराक्रमाः ॥ ९५

देवाः—

प्रतीपया जिह्वयाऽपि सर्वाहारान् हरिष्यथ ।

1. अ—एकादशार्धानि न सन्ति

वाचश्चोच्चारयिष्यध्वम् उच्चैरव्यञ्जिताक्षराः ॥ ९६

वसिष्ठः—

इत्युक्त्वा पुनरेवाग्निम् अनुसस्रुर्दिवौकसः ॥ ९६॥

अश्वत्थान्निस्सृतश्चाग्निश् शमीगर्भगतस्तदा ।
शुकेन ख्यापितो विप्र तं देवास्समुपाद्रवन् ॥ ९७॥

शशाप शुकमग्निस्तु वाग्विहीनो भविष्यसि ।
जिह्वां चावर्तयामास तस्यापि हुतभुक् तदा ॥ ९८॥

दृष्ट्वा तु ज्वलनं देवाश् शुकमूचुर्दयान्विताः ॥ ९९

देवाः—

भविता न त्वमत्यन्तं शकुने नष्टवागिति ॥ ९९॥

आवृत्तजिह्वस्य सतो वाक्यं कान्तं भविष्यति ।
बालस्येव प्रवृत्तस्य कलमव्यक्तमद्भुतम् ॥ १००॥

वसिष्ठः—

इत्युक्त्वा तं शमीगर्भं वह्निमालक्ष्य देवताः ।
तदेवायतनं चक्रुः पुण्यं सत्यं क्रियास्वपि ॥ १०१॥

तदाप्रभृति चाप्यग्निश् शमीगर्भेषु दृश्यते ।
उत्पादने तथोपायम् अभिजग्मुश्च मानुषाः ॥ १०२॥

आपो रसातले यास्तु संसृष्टाश्चित्रभानुना ।
तास्सर्वतःप्रस्रवणैर् ऊष्मां मुञ्चन्ति भार्गव ॥ १०३॥

पावकेनाधिशयितास् सन्तप्तास्तस्य तेजसा ।

तथाऽग्निर्देवता दृष्ट्वा बभूव व्यथितस्तदा ॥ १०४॥
किमागमनमित्येतत् तानपृच्छच्च पावकः ।
तमूचुर्विबुधास्सर्वे ते चैव परमर्षयः ॥ १०५॥

देवाः—

त्वां नियोक्ष्यामहे कार्यं तद्भवान् कर्तुमर्हति ॥
कृते च तस्मिन् भविता तवापि सुमहान् गुणः ॥ १०६॥

अग्निः—

ब्रूत यद्भवतां कार्यं सर्वं कर्तास्मि तत् सुराः ।
भवतां विनियोज्योऽहं न मेऽत्रास्ति विचारणा ॥ १०७॥

देवाः—

असुरस्तारको नाम ब्रह्मणो वरदर्पितः ।
अस्मान् प्रबाधते वीर्याद् वधस्तस्य विधीयताम् ॥ १०८॥
इमान् देवगणांस्तात प्रजापतिगणांस्तथा ।
ऋषींश्चापि महाभागान् परित्रायस्व पावक ॥ १०९॥
अपत्यं तेजसा युक्तं प्रवीरं जनय प्रभो ।
यद्भयं नोऽसुरात् तस्मान्नाशयेद्धव्यवाहन ॥ ११०॥
शत्रूनां नो महादेव्या नान्यदस्ति परायणम् ।
अन्यत्र भवतो वीर तस्मात् त्रायस्व नस्ततः ॥ १११॥

वसिष्ठः—

इत्युक्तस्स तथेत्युक्त्वा भगवान् हव्यकव्यभुक् ।
जगामाथ दुराधर्षो गङ्गां भागीरथीं प्रति ॥ ११२॥

तया चास्याभवन्मिश्रो गर्भश्चास्याभवत्तदा ।
ववृधे स तदा गर्भः [1]कक्षे कृष्णगतिर्यथा ॥ ११३॥

तेजसा तस्य गर्भस्य गङ्गा [2]विह्वललोचना ।
सन्तापमगमत्तीव्रं प्रवोढुं न शशाक ह ॥ ११४॥

आहिते ज्वलनेनाथ गर्भे तेजस्समन्विते ।
गङ्गायामसुरः कश्चिद् भैरवं नादमुत्सृजत् ॥ ११५॥

अबुद्धिपतितेनाथ नादेन विपुलेन सा ।
विस्रस्तोद्भ्रान्तनयना गङ्गा विप्लुतलोचना ॥ ११६॥

विसंज्ञा नाशकद् गर्भं सन्धारयितुमात्मना ॥ ११७

सा तु तेजःपरीताङ्गी कम्पमाना च जाह्नवी ।
उवाच वचनं विप्र तदा बाला हुताशनम् ॥ ११८

गङ्गा—

[3]न ते शक्तास्मि भगवंस् तेजसोऽस्य विधारणे ।
विमूढाऽस्मि कृता तेन यथा स्वस्थं पुरा कृतम् ॥ ११९

विह्वला चास्मि भगवंस् तेजो नष्टं च मेऽनघ ।
धारणे नास्य [4]शक्ताऽहं गर्भस्य तपतां वर ॥ १२०

उत्सृक्ष्येऽहमिमं दुःखान्न तु कामात् कथञ्चन ॥ १२०॥

---

1. क-घ—उष्णे
2. क—निश्चल
3. ख—अर्धाष्टकं नास्ति
4. क-घ—तप्ताङ्गा

[1]न चेतसोऽस्ति संस्पर्शो मम देव विभावसो ।
आपदर्थे न सम्बन्धस् सुसूक्ष्मोऽपि महाद्युते ॥ १२१॥

यदत्र गुणसम्पन्नम् इतरद्वा हुताशन ।
त्वय्येव तदहं मन्ये धर्माधर्मौ च केवलौ ॥ १२२॥

वसिष्ठः—

तामुवाच ततो वह्निर् धार्यतां धार्यतामयम् ।
गर्भो मत्तेजसा युक्तो महागुणफलोदयः ॥ १२३॥

सूर्यवैश्वानरसमः कान्त्या सोम इवापरः ॥ १२४

शक्ता ह्यसि महीं कृत्स्नां वोढुं धारयितुं यथा ।
न हि ते किञ्चिदप्राप्यम् अन्यतो धारणादृते ॥ १२५

एवमुक्ता तु सा देवी तत्रैवान्तरधीयत ॥ १२५॥

पावकश्चापि तेजस्वी कृत्वा कार्यं दिवौकसाम् ।
जगामेष्टं तदा देशं ततो भार्गवनन्दन ॥ १२६॥

सा वह्निना वार्यमाणा देवैश्चापि सरिद्वरा ।
समुत्ससर्ज तं गर्भं मेरौ गिरिवरे तदा ॥ १२७॥

समर्था धारणेनापि रुद्रतेजःप्रधर्षिता ।
नाशकन्ती तदा गर्भं सन्धारयितुमोजसा ॥ १२८॥

सा समुत्सृज्य तं दुःखाद् दीप्तवैश्वानरप्रभम् ।

---

1. क-घ—न स्रोतसो

दर्शयामास चाग्निस्तां तदा गङ्गां भृगूद्वह ॥ १२९॥
पप्रच्छ सरितां श्रेष्ठां कचिद् गर्भस्सुखोदयः ।
कीदृग्गुणोऽपि वा देवि कीदृग्रूपश्च दृश्यते ॥ १३०॥
तेजसा केन वा युक्तस् सर्वमेतद् ब्रवीहि मे ॥ १३१

गङ्गा—

जातरूपस्स गर्भो वै तेजसा त्वमिवानल ।
सुवर्णो विमलो दीप्तः पर्वतं चावभासयन् ॥ १३२
पद्मोत्पलविचित्राणां ह्रदानामिव शीतलः ।
गन्धोऽस्य स कदम्बानां तुल्यो वै तपतां वर ॥ १३३
तेजसा तस्य गर्भस्य भास्करस्येव रश्मिभिः ।
यद्द्रव्यं परिसंस्पृष्टं पृथिव्यां पर्वतेषु वा ॥ १३४
तत् सर्वं काञ्चनीभूतं समन्तात् प्रत्यदृश्यत ॥ १३४॥
पर्यधावद्धि शैलांश्च नदीप्रस्रवणानि च ।
व्यदीपयत् तेजसा च त्रैलोक्यं सचराचरम् ॥ १३५॥
एवंरूपस्स भगवान् पुत्रस्ते हव्यवाहन ॥ १३६

वसिष्ठः—

स तु गर्भो महातेजा गाङ्गेयः पावकोद्भवः ।
दिव्यं शरवणं प्राप्य ववृधेऽद्भुतदर्शनः ॥ १३७
ददृशुः कृत्तिकास्तूर्णं बालार्कसदृशद्युतिम् ।

जातस्नेहास्तु तं बालं पुपुपुस्तन्यविस्रवैः ॥ १३८

स ततः कार्तिकेयत्वम् अवाप परमद्युतिः ।
स्कन्नत्वात् स्कन्दतां चापि गुहावासाद् गुहोऽभवत् ॥ १३९

एवं सुवर्णमुत्पन्नम् अपत्यं जातवेदसः ।
पवित्रं च पवित्राणां मङ्गलानां च मङ्गलम् ॥ १४०

तत्र जाम्बूनदं श्रेष्ठं देवानामपि भूषणम् ।
ततःप्रभृति चाप्येतज् जातरूपमुदाहृतम् ॥ १४१

[1]यत् सुवर्णं स भगवान् अग्निरीशः प्रजापतिः ।
पवित्राणां पवित्रं हि कनकं द्विजसत्तम ॥ १४२

अग्नीषोमात्मकं चैव जातरूपमुदाहृतम् ।
रत्नानामुत्तमं रत्नं भूषाणानां तथोत्तमम् ॥ १४३

एतेन कर्मणा लोके ततोऽग्निः परिगीयते ।
[2]हिरण्यरेता इति वै ऋषिभिर्विबुधैस्तदा ॥ १४४

पृथिवी च तदा देवी ख्याता वसुमतीति वै* ॥ १४४॥

अपि चेदं पुरा राम श्रुतं मे ब्रह्मदर्शनम् ।
पितामहस्य यद्वृत्तं ब्रह्मणः परमात्मनः ॥ १४५॥

---

1. ख—इदमर्धंखयं नास्ति
2. घ—नास्तीदमर्धम्
* सर्वेषु कोशेषु अस्मत्राध्यायसमाप्तिर्दृश्यते

देवस्य महतस्तात वारुणीं बिभ्रतस्तनुम् ।
ऐश्वर्ये वारुणे वाऽथ रुद्रस्येशस्य वै प्रभो ॥ १४६॥
आजग्मुर्मुनयस्सर्वे देवाश्चाग्निपुरोगमाः ॥ १४७
यज्ञाङ्गानि च सर्वाणि वषट्कारश्च मूर्तिमान् ।
मूर्तिमन्ति च सामानि यजूंषि च सहस्रशः ॥ १४८
[1]ऋग्वेदोऽथर्ववेदश्च पदक्रमविभूषितः ।
[2]लक्षणानि स्वरास्तोभा निरुक्तास्स्वरषड्ङ्कयः ॥ १४९
ओङ्कारश्छन्दसां नेता निग्रहप्रग्रहौ तथा ।
वेदाश्च सोपनिषदो विद्या सावित्र्यथापि च ॥ १५०
भूतं भव्यं भविष्यच्च दधार शिरसा शिवः ॥ १५०॥
जुहुवुश्चात्मनाऽऽत्मानं स्वयञ्चैव तदा [3]प्रभुः ॥ १५१
देवपत्न्यश्च कन्याश्च देवतानां च मातरः ।
आजग्मुस्सहितास्तत्र तदा भृगुकुलोद्वह ॥ १५२
यज्ञं पशुपतेः प्रीता वरुणस्य महात्मनः ॥ १५२॥
स्वयम्भुवस्तु ता दृष्ट्वा रेतस्समपतद्भुवि ॥ १५३
तस्य शुक्रस्य निष्यन्दान् पांसून् सङ्गृह्य भूमितः ।
प्रास्यत् पूषा कराभ्यां वै तस्मिन्नेव हुताशने ॥ १५४

1. क-ख—ऋग्वेदश्च क्रमैस्तत्र पदैश्च सुविभूषितः । [पाठान्तरम्]
2. क-ख—अक्षराणि
3. अ-क-ख—प्रभोः

ततस्तस्मिन् सम्प्रवृत्ते सत्रे ज्वलितपावके ।
ब्रह्मणे जुह्वतस्तस्य प्रादुर्भावो बभूव ह ॥ १५५

स्कन्नमात्रं च तच्छुक्रं स्रुवेण प्रतिगृह्य सः ।
आज्यवन्मन्त्रतश्चापि सोऽजुहोद्भृगुनन्दन ॥ १५६

ततस्सञ्जनयामास भूतग्रामं स वीर्यवान् ।
ततस्तु तेजसस्तस्माज् जज्ञे लोकेषु तैजसम् ॥ १५७

तमसस्तामसो भावो व्यापि सत्त्वं तमोमयात् ।
सगुणस्तेजसो नित्यं तमस्याकाश एव च ॥ १५८

सर्वभूतेष्वपि तथा ससत्त्वस्तैजसस्तमः ॥ १५८॥

शुक्रे हुतेऽग्नौ तस्मिंस्तु प्रादुरासंस्त्रयः प्रभो ।
पुरुषा वपुषा युक्ता युक्ताः प्रवरजैर्गुणैः ॥ १५९॥

भर्जनाद्भृगुरित्येवम् अङ्गारादङ्गिराभवत् ।
सह यज्ञभिरुत्पन्नो भृगुस्तस्माद् गुरुस्स्मृतः ॥ १६०॥

मरीचिभ्यो मरीचिस्तु मारीचः काश्यपो ह्यभूत् ।
अङ्गारेभ्योऽङ्गिरास्तात वालखि[1]ल्यश्शिलोञ्छयात् ॥ १६१॥

अत्रेरत्रिं च हि विभो जातमेवं वदन्त्यपि ॥ १६२

तथाऽग्नेस्तस्य भस्मभ्यो ब्रह्मर्षिगणसम्मिताः ।
वैखानसास्समुत्पन्नास् तथा भूतगुणेप्सवः ॥ १६३

1. क—ल्यः शरोञ्छवान् ख—ल्यः शिरोञ्छयाम् घ—ल्य गरोञ्छवान्

अश्रुतश्च समुत्पन्नावश्विनौ रूपसम्मतौ ।
शेषाः प्रजानां पतयस् स्रोतोभ्यस्तस्य जज्ञिरे ॥ १६४

ऋषयो रोमकूपेभ्यस् स्वेदाच्छन्दो बलान्मखः ॥ १६४॥

एतस्मात् कारणादाहुर् अग्निस्सर्वा हि देवताः ।
ऋषयश्श्रुतसम्पन्ना वेदप्रामाण्यदर्शनात् ॥ १६५॥

यानि दारूणि ते मासा निर्यासाः पक्षसंज्ञिताः ।
अहोरात्रा मुहूर्ताश्च वीतज्योतिश्च वारुणम् ॥ १६६॥

रौद्रं लोहितमित्याहुर् लोहितात् कनकं स्मृतम् ।
तन्मैत्रमिति विज्ञेयं धूमाच्च वसवस्स्मृताः ॥ १६७॥

अर्चिषो याश्च ते रौद्रास् तथाऽऽदित्या महाप्रभाः ।
उद्दीप्तास्ते तथाऽङ्गारा ये धिष्ण्येषु दिवि स्थिताः ॥ १६८॥

अग्निर्नाथश्च लोकस्य तत् परं ब्रह्म तद्ध्रुवम् ।
सर्वकामदमित्याहुस् तत्र हव्यमुपावहन् ॥ १६९॥

ततोऽब्रवीन्महादेवो वरुणः परमात्मकः ॥ १७०

श्रीमहादेवः—

मम सत्रमिदं दिव्यम् अहं गृहपतिस्त्विह ।
त्रीणि पूर्वाण्यपत्यानि मम तानि न संशयः ॥ १७१

इति जानीत खगमा मम यज्ञफलं हि तत् ॥ १७१॥

अग्निः—

मदङ्गेभ्यः प्रसूतानि मदाश्रयकृतानि च ।

मम चैतान्यपत्यानि मम शुक्रं हुतं हि तत् ॥ १७२॥

श्रीमहादेवः—

अहं वक्ता च मन्त्रस्य होता शुक्रस्य चैव ह ।
यस्य बीजं फलं तस्य शुक्रं च करणं मतम् ॥ १७३॥

वसिष्ठः—

ततोऽब्रुवन् देवगणाः पितामहमुपेत्य वै ।
कृताञ्जलिपुटास्सर्वे शिरोभिरभिवन्द्य च ॥ १७४॥

देवाः—

वयं च भगवन् सर्वे जगच्च सचराचरम् ।
तवैव प्रभवं सर्वं तस्मादग्निर्विभावसुः ॥ १७५॥
वरुणश्चेश्वरो देवो वहतां काममीप्सितम् ॥ १७६
निसर्गाद्वरुणश्चापि [1]ब्रह्मणो यादसां पतिः ।
जग्राह वै भृगुं पूर्वम् अपत्यं सूर्यवर्चसम् ॥ १७७
ईश्वरोऽङ्गिरसं चाग्नेर् अपत्यार्थे ह्यकल्पयत् ।
पितामहस्त्वपत्यं वै कविं जग्राह तत्त्ववित् ॥ १७८
तदा स वारुणिः ख्यातो भृगुः प्रसवकर्मकृत् ।
आग्नेयस्त्वङ्गिराश्श्रीमान् कविर्ब्राह्मो महायशाः ॥ १७९
भार्गवाङ्गिरसो लोके लोकसन्तानलक्षणाः ।
एते विप्रवरास्सर्वे प्रजानां पतयस्त्रयः ॥ १८०

1. क-ख—इतः अष्टौ पादा न सन्ति

सर्वं सन्तानमेतेषाम् इदमित्युपधारय ॥ १८०॥
भृगोस्तु पुत्रास्तत्रासन् सप्त तुल्या भृगोर्गुणैः ॥ १८१
च्यवनो वज्रशीर्षश्च शुचिरौर्वस्तथैव च ।
शुक्रो वरेण्यश्च विभुस् सवनश्चेति सप्त ते ॥ १८२
भार्गवा वारुणास्सर्वे [1]येषां वंशे भवानपि ।
अष्टावङ्गिरसः पुत्रा वारुणास्तेऽप्यवारुणाः ॥ १८३
बृहस्पतिरुचथ्यश्च वयस्यश्शान्तिरेव च ।
घोरो विरूपस्संवर्तस् सुधन्वा चाष्टमस्स्मृतः ॥ १८४
एतेऽष्टावग्निजास्सर्वे पावकिश्चाङ्गिरा विभुः ॥ १८४॥
ब्राह्मणाश्च कवेः पुत्रा वारुणास्तेऽप्युदाहृताः ।
अष्टौ प्रसवनैर्युक्ता गुणैर्ब्रह्मविदश्शुभाः ॥ १८५॥
कविः काव्यश्च विष्णुश्च बुद्धिमानुशना तथा ।
भृगुश्च वरुणश्चैव काश्यपोऽत्र्यश्च धर्मवित् ॥ १८६॥
अष्टौ कविसुता ह्येते सर्वमेतज्जगत्तम् ।
प्रजापतय एते हि प्रजानां यैरिमाः प्रजाः ॥ १८७॥
एवमाङ्गिरसश्चैव कवेश्च प्रभवान्वये ।
भृगोश्च भृगुशार्दूल वंशजैस्सन्ततं जगत् ॥ १८८॥
वरुणश्चादितो विप्र जग्राह प्रभुरीश्वरः ।

1. क-घ—इतः अष्टौ पादा न सन्ति

कविं तात भृगुं चैव तस्मात्तौ वारुणौ स्मृतौ ॥ १८९॥
जग्राहाङ्गिरसं देवश् शिखी यस्माद्धुताशनः ।
तस्मादाङ्गिरसा ज्ञेयास् सर्व एव हुताशनाः ॥ १९०॥

वसिष्ठः—

ब्रह्माऽपि चाहवैः पूर्वं देवताभिः प्रसादितः ॥ १९१

ब्रह्मा—

इमे सञ्जनयिष्यन्ति प्रजा हि जगदीश्वराः ॥ १९१॥
सर्वे प्रजानां पतयस् सर्वे चापि तपस्विनः ।
मत्प्रभावादिमं लोकं धारयिष्यन्ति शाश्वतम् ॥ १९२॥
तथैव वंशकर्तारस् तव तेजोविवर्धनाः ।
भवेयुर्वेदविदुषस् सर्वासां पतयस्तथा ॥ १९३॥
वेदपक्षधरास्सौम्याः प्राजापत्या महर्षयः ।
अनन्तं ब्रह्म सत्यं च तपश्च परमं भुवि ॥ १९४॥

देवाः—

सर्वे हि वयमेतावत् तवैव प्रसवा विभो ।
[1]देवानां ब्राह्मणानां च त्वं च कर्ता पितामह ॥ १९५॥
मारीचमादितः कृत्वा सर्वे ते भवतस्तव ।
अपत्यानीति सम्प्रेक्ष्य [2]क्षमाम च पितामह ॥ १९६॥
अथ स्वेनैव रूपेण प्रजनिष्यन्ति वै प्रभो ।

1. अ-क-ख—वेदानां 2. ख—क्षमयाम

स्थापयिष्यन्ति चात्यर्थं युगान्तनिधनाः प्रजाः ॥ १९७॥

वसिष्ठः—

एवमेतत् पुरावृत्तं तस्मिन् यज्ञे महात्मनः ।
देवश्रेष्ठस्य लोकादौ वारुणीं बिभ्रतस्तनुम् ॥ १९८॥

अग्निर्ब्रह्मा पशुपतिश् शर्वो रुद्रः प्रजापतिः ।
अग्नेरपत्यमेते हि सुवर्णमिति धारय ॥ १९९॥

अग्न्यभावे च कुर्व[1]न्ति ह्यग्निस्थानेषु काञ्चनम् ।
जामदग्न्य प्रमाणज्ञा वेदश्रुतिनिदर्शनाः ॥ २००॥

कुशस्तम्बे जुहोत्यग्निं सुवर्णं तत्र संस्थितम् ।
हुते प्रीतिगुणामृद्धिं भगवांस्तत्र मन्यते ॥ २०१॥

तस्मादग्निपरास्सर्वा देवता इति नश्श्रुतिः ॥ २०२

ब्रह्मणश्च प्रसूतोऽग्निर् अग्नेरपि च काञ्चनम् ।
तस्माद्देवाः प्रयच्छन्ति सुवर्णं धर्मदर्शनात् ॥ २०३

सुवर्णं ये प्रयच्छन्ति नराश्शुद्धेन चेतसा ।
देवतास्ते प्रयच्छन्ति समस्ता इति नश्श्रुतिः ॥ २०४

तस्य वा तपसो लोके गच्छतः परमां गतिम् ।
सौराज्ये राजराज्ये च सोऽभिषिच्यो ह्यनेकशः ॥ २०५

आदित्योदयने प्राप्ते विधिमन्त्रपुरस्कृतम् ।

---

1. क—न्ति अग्निस्थाने च ख—न्ति ह्यग्निस्थाक्षेषु
ङ—न्ति शिरस्थाने च

ददाति कनकं यो वै दुस्स्वप्नं तं न बाधते ॥ २०६

ददात्युदितमात्रे यस् तस्य [1]पापोऽवधूयते ।
मध्याह्ने सर्वमेवास्य हन्ति पाप्मानमागतम् ॥ २०७

ददाति [2]पश्चिमां सन्ध्यां यस्सुवर्णं धृतव्रतः ।
ब्रह्मवाग्वह्निसोमानां सालोक्यमुपयास्यति ॥ २०८

सेन्द्रेषु चैव लोकेषु प्रतिष्ठां प्राप्नुयाच्छुभाम् ।
इह लोके यशश्चैव शान्तपाप्मा प्रमोदते ॥ २०९

इतस्स विद्यतेऽन्येषु लोकेष्वप्रतिमेषु च ।
अनावृतगतिर्नित्यं कामचारी भवत्युत ॥ २१०

न च क्षरति तेभ्यस्तु शश्वच्चोपाप्नुते महत् ।
सुवर्णमक्षयं दत्त्वा लोकानाप्नोति पुष्कलान् ॥ २११

यस्तु सङ्खवलयित्वाऽग्निम् आदित्योदयनं प्रति ।
दद्याद्वै व्रतमुद्दिश्य सर्वान् कामानवाप्नुयात् ॥ २१२

अग्निरित्येव तत् प्राहुः प्रजानां च सुखावहम् ।
यथेष्टगुणसंवृत्तः प्रवर्तक इति स्मृतम् ॥ २१३

भीष्मः—

एवमेतन्महाराज सुवर्णस्य महात्मनः ।
जन्म ते कथितं पुण्यं प्रदानं च युधिष्ठिर ॥ २१४

---

1. क-घ—पाप्माऽवधूयते 2. क-घ—परमां

इति राममुवाचेदं वसिष्ठश्श्रेष्ठवागृषिः ।
सुवर्णदाने माहात्म्यं तत् कुरुष्व युधिष्ठिर ॥ २१५

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां
अनुशासनपर्वणि चतुस्सप्ततितमोऽध्यायः ॥ ७४ ॥
॥ ८९ ॥ आनुशासनिकपर्वणि चतुस्सप्ततितमोऽध्यायः ॥ ७४ ॥
[अस्मिन्नध्याये २१५ श्लोकाः]

॥ पञ्चसप्ततितमोऽध्यायः ॥

भीष्मेण युधिष्ठिरं प्रति कुमारोत्पत्तिप्रकारस्य देवादिभिस्तस्मै क्रीडनकादिदानस्य तारकासुरवधादेश्च कथनम् ॥

युधिष्ठिरः—

उक्ताः पितामहेनेह सुवर्णस्य विधानतः ।
विस्तरेण प्रदानेषु ये गुणाश्श्रुतिलक्षणाः ॥ १

यत्तु कारणमुत्पत्तेस् सुवर्णस्येह कीर्तितम् ।
स कथं तारकः प्राप्तो निधनं तद् ब्रवीहि मे ॥ २

[1]उक्तं स देवतानां हि अवध्य इति पार्थिव ।
न च तस्येह ते मृत्युर् विस्तरेण प्रकीर्तितः ॥ ३

एतदिच्छाम्यहं श्रोतुं त्वत्तः कुरुकुलोद्वह ।

---

1. ख—अर्धचतुष्टयं नास्ति

तारकस्यैव तु वधं परं कौतूहलं हि मे ॥ ४

भीष्मः—

विपन्नकृत्या राजेन्द्र देवता ऋषयस्तथा ।
कृत्तिकाश्चोदयामासुर् अपत्यभरणाय वै ॥ ५

न देवतानां काचिद्धि समर्था जातवेदसः ।
एता हि शक्तास्तं गर्भं सन्धारयितुमोजसा ॥ ६

षण्णां तासां गतः प्रीतिं पावको गर्भधारणात् ।
स्वेन तेजोविसर्गेण वीर्येण परमेण ह ॥ ७

तास्तु षट् कृत्तिका गर्भं पुपुषुर्जातवेदसः ।
तत् षड्धोपु तेजोऽग्नेस् सकलं निहितं प्रभो ॥ ८

ततस्ता वर्धमानस्य कुमारस्य महात्मनः ।
तेजसा हि परीताङ्ग्यो न क्वचिच्छर्म लभिरे ॥ ९

ततस्तेजःपरीताङ्ग्यस् सर्वाः काल उपस्थिते ।
स्वयं गर्भं सुषुविरे कृत्तिकास्ता नरर्षभ ॥ १०

ततस्तं षडधिष्ठानं गर्भमेकत्वमागतम् ।
पृथिवी परिजग्राह कृत्तिकानां समीपतः ॥ ११

स गर्भो दिव्यसंस्थानो दीप्तिमान् पावकप्रभः ।
दिव्यं शरवणं प्राप्य ववृधे प्रियदर्शनः ॥ १२

ददृशुः कृत्तिकास्तं तु बालं वह्निसमद्युतिम् ।

जातस्नेहाश्च सौहार्दात् पुपुषुस्तन्यविस्रवैः ॥ १३
अभवत् कार्तिकेयस्स त्रैलोक्ये सचराचरे ।
स्कन्नत्वात् स्कन्दता चापि गुहावासाद् गुहोऽभवत् ॥ १४
ततो देवास्त्रयस्त्रिंशद् ऋषयश्च महेश्वरः ।
तत्र धाता च विष्णुश्च [1]यमः पूषाऽर्यमा भगः ॥ १५
अंशो मित्रश्च साध्याश्च वासवो वसवोऽश्विनौ ।
आपो वायुर्भुवश्चन्द्रो नक्षत्राणि ग्रहा दिवः ॥ १६
[2]पृथग् भूतानि चान्यानि यानि देवगणानि वै ।
आजग्मुस्तत्र तं द्रष्टुं कुमारं ज्वलनात्मजम् ॥ १७
ऋषयस्तुष्टुवुश्चैव गन्धर्वाश्च जगुस्तथा ।
षडाननं कुमारं तं [3]द्विपट्काक्षं द्विजप्रियम् ॥ १८
पीनांसं द्वादशभुजं पावकादित्यवर्चसम् ।
शयानं शरगुल्माभं दृष्ट्वा देवास्सहर्षिभिः ॥ १९
लेभिरे परमं हर्षं मेनिरे चासुरं हतम् ॥ १९॥
ततो देवाः प्रियाण्यस्य सर्व एव समाचरन् ।
क्रीडतः क्रीडनीयानि ददुः पक्षिगणांश्च ह ॥ २०॥
सुपर्णोऽस्य ददौ पत्रं मयूरं चित्रबर्हिणम् ।

1. क—यज्ञः + भगः ख-घ—यज्ञः + भगः
2. क-घ—इदमर्धं नास्ति 3. क-घ—द्विपडक्षम्

राक्षसाश्च ददुस्तस्मै वराहमहिषावुभौ ॥ २१॥
कुक्कुटं चाग्निसङ्काशं प्रददौ वरुणस्स्वयम् ।
चन्द्रमाः प्रददौ मेषम् आदित्यो रुचिरां प्रभाम् ॥ २२॥
गवां माता प्रभां देवी ददौ शतसहस्रशः ।
छागमग्निर्गुणोपेतम् इला पुष्पफलं वहु ॥ २३॥
सुधन्वा शकटं चैव रथं चाश्वितकूवरम् ।
वरुणो वारुणान् दिव्यान् भुजङ्गान् प्रददौ शुभान् ॥ २४॥
सिंहान् सुरेन्द्रो व्याघ्रांश्च द्विपानन्यांश्च दंष्ट्रिणः ।
श्वापदांश्च वहून् घोराञ् शस्त्राणि विविधानि च ॥ २५॥
राक्षसासुरसङ्घाश्च ये न जग्मुस्तमीश्वरम् ।
वर्धमानवधोपायं प्रार्थयामास तारकः ॥ २६॥
उपायैर्वहुभिर्हन्तुं नाशकच्चापि तं विभुम् ॥ २७
सैनापत्येन तं देवाः पूजयित्वाऽन्वपालयन् ।
शशंसुर्विप्रकारं तं तस्मै तारककारितम् ॥ २८
स प्रवृद्धो महावीर्यो देवसेनापतिः प्रभुः ।
जघानामोघया शक्त्या दानवं तारकं गुहः ॥ २९
तेन स्म तत्कुमारेण क्रीडता निहतेऽसुरे ।
सुरेन्द्रस्स्थापितो राज्ये देवानां पुनरीश्वरः ॥ ३०
स सेनापतिरेवाथ ददौ स्कन्दः प्रतापवान् ।

ईशो गोप्ता च देवानां प्रियकृच्छङ्करस्य च ॥ ३१

हिरण्यमूर्तिर्भगवांस् तेषामेव च पावकिः ।
सदा कुमारो देवानां सैनापत्यमवाप्तवान् ॥ ३२

तस्मात् सुवर्णं मङ्गल्यं [1]रत्नमक्षयमुत्तमम् ।
सहजं कार्तिकेयस्य वह्नेस्तेजः परं मतम् ॥ ३३

[2]एवं रामाय कौरव्य वसिष्ठोऽकथयत् पुरा ।
तस्मात् सुवर्णदानाय प्रयतस्व युधिष्ठिर ॥ ३४

रामस्सुवर्णं दत्त्वा हि विमुक्तस्सर्वकिल्बिषैः ।
त्रिविष्टपं महास्थानम् अवापासुलभं नरैः ॥ ३५

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां
अनुशासनपर्वणि पञ्चसप्ततितमोऽध्यायः ॥ ७५ ॥
॥ ८९ ॥ आनुशासनिकपर्वणि पञ्चसप्ततितमोऽध्यायः ॥ ७५ ॥
[अस्मिन्नध्याये ३५ श्लोकाः]

---

1. क-घ—दत्त
2. ख—भीष्मः—

॥ षट्सप्ततितमोऽध्यायः ॥

भीष्मेण युधिष्ठिरं प्रति प्रतिपदादितिथिषु श्राद्धकरणस्य प्रत्येकं फलकथनम् ॥

युधिष्ठिरः—

चातुर्वर्ण्यस्य धर्मात्मन् धर्मः प्रोक्तस्त्वयाऽनघ ।
तथैव मे श्राद्धविधिं कृत्स्नं प्रब्रूहि पार्थिव ॥ १

वैशम्पायनः—

युधिष्ठिरेणैवमुक्तो [1]भीष्मश्शान्तनवस्तदा ।
इमं श्राद्धविधिं कृत्स्नं प्रवक्तुमुपचक्रमे ॥ २

भीष्मः—

शृणुष्वावहितो राजञ् श्राद्धकल्पमिमं शुभम् ।
धन्यं यशस्यं पुत्रीयं पितृयज्ञं परन्तप ॥ ३

देवासुरमनुष्याणां गन्धर्वोरगरक्षसाम् ।
पिशाचकिन्नराणां च पूज्या वै पितरस्सदा ॥ ४

पितॄन् पूज्य ततः पश्चाद् देवान् सन्तर्पयीत वै ।
तस्मात्तान् सर्वयत्नेन पुरुषः पूजयेत् पितॄन् ॥ ५

अन्वाहार्यं महाराज पितॄणां श्राद्धमुच्यते ।
तच्चामिषेण विधिना विधिः प्रथमकल्पितः ॥ ६

1. ख—भीष्मोऽथ जनमेजय

सर्वेष्वहस्सु प्रीयन्ते [1]कृतैश्श्राद्धैः पितामहाः ॥ ६॥

पिण्डान्वाहार्यकं श्राद्धं कुर्यान्मासानुमासिकम् ॥ ७

पितृयज्ञं तु निर्वर्त्य विप्रश्चन्द्रक्षयेऽग्निमान् ॥ ७॥

पिण्डानां मासिकं श्राद्धम् अन्वाहार्यं विदुर्बुधाः ॥ ८

तदामिषेण कुर्वीत प्रयतः प्राञ्जलिश्शुचिः ॥ ८॥

प्रवक्ष्यामि तु ते सर्वान्स् [2]तिथ्यां तिथ्यां दिने गुणान् ॥ ९

येष्वहस्सु कृतैश्श्राद्धैर् यत् फलं प्राप्यते महत् ।
तत् सर्वं कीर्तयिष्यामि फलवत्तन्निबोध मे ॥ १०

पितृनर्चन् प्रतिपदि प्राप्नुयात् स्वगृहे स्त्रियः ।
अभिरूपप्रदायिन्यो दर्शनीया बहुप्रजाः ॥ ११

स्त्रियो द्वितीयां जायन्ते तृतीयायां तु वन्दिनः ।
चतुर्थ्यां क्षुद्रपशवो भवन्ति बहवो गृहे ॥ १२

पञ्चम्यां बहवः पुत्रा जायन्ते कुर्वतां नृप ।
कुर्वाणास्तु नराष्षष्ठ्यां भवन्ति [3]द्यूतभागिनः ॥ १३

कृषिभागी भवेच्छ्राद्धं कुर्वाणस्सप्तमीं नृप ।
कुर्वाणस्त्वष्टमीं पुष्टिं वाणिज्ये लाभमाप्नुयात् ॥ १४

नवम्यां कुर्वतश्श्राद्धं भवत्येकशफं बहु ।

---

1. ख—कृच्छ्रैः
2. अ-क-ख—तिथ्य तिथ्यान्
3. क-घ—व्रत

विवर्धन्ते तु दशमीं गावश्राद्धानि कुर्वतः ॥ १५

रूप्यभागी भवेन्मर्त्यः कुर्वन्नेकादशीं नृप ।
ब्रह्मवर्चस्विनः पुत्रा जायन्ते चात्मवेश्मनि ॥ १६

द्वादश्यामीहमानस्य नित्यमेव प्रदृश्यते ।
राजतं बहुवित्तं च सुवर्णं च मनोरमम् ॥ १७

ज्ञातीनां तु भवेच्छ्रेष्ठश् श्राद्धं कुर्वंस्त्रयोदशीम् ॥ १७॥

अवश्यं तु युवानोऽस्य प्रमीयन्ते नरा गृहे ।
युद्धभागी भवेन्मर्त्यश् श्राद्धं कुर्वंश्चतुर्दशीम् ॥ १८॥

अमावास्यां तु निवपन् सर्वान् कामानवाप्नुयात् ॥ १९

कृष्णपक्षे दशम्यादौ वर्जयित्वा चतुर्दशीम् ।
श्राद्धकर्माणि तिष्यस्युः प्रशस्ता न तथेतराः ॥ २०

यथा चैवापरः पक्षः पूर्वपक्षाद्विशिष्यते ।
तथा श्राद्धस्य पूर्वाह्णाद् अपराह्णो विशिष्यते ॥ २१

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां
अनुशासनपर्वणि षट्सप्ततितमोऽध्यायः ॥ ७६ ॥
॥ ८९ ॥ आनुशासनिकपर्वणि षट्सप्ततितमोऽध्यायः ॥ ७६ ॥
[अस्मिन्नध्याये २१ श्लोकाः]

॥ सप्तसप्ततितमोऽध्यायः ॥

भीष्मेण युधिष्ठिरं प्रति श्राद्धे तिलमाषविशेषदानस्य फलविशेषकथनम् ॥ १ ॥ भीष्मेण युधिष्ठिरं प्रति कृत्तिकादिनक्षत्रेषु श्राद्धकरणस्य फलविशेषकथनम् ॥ २ ॥

युधिष्ठिरः—

किंस्विदत्तं पितृभ्यो वै भवत्यक्षयमीश्वर ।
किंस्विद्धुतफलं चोक्तं किमानन्त्याय कल्पते ॥ १

भीष्मः—

ब्रवीमि श्राद्धकल्पे वै यानि श्राद्धविदो विदुः ।
तानि मे शृणु वक्ष्यामि फलं चैषां युधिष्ठिर ॥ २

तिलैर्व्रीहियवैर्माषैर् अद्भिर्मूलैः फलैस्तथा ।
दत्तेन मासं प्रीयन्ते श्राद्धेन पितरो नृप ॥ ३

वर्धमानफलं चैवम् अक्षयं मनुरब्रवीत् ।
सर्वेष्वेव तु भोज्येषु तिलाः प्राधान्यतस्स्मृताः ॥ ४

द्वौ मासौ तु भवेत्तृप्तिर् मत्स्यैः पितृगणस्य तु ।
त्रीन् मासानाविकेनाहुश् [1]चतुर्मासं शशेन तु ॥ ५

गव्येन दत्ते श्राद्धे तु संवत्सरमिहोच्यते ॥ ५॥

यथा गव्यं तथा युक्तं पायसं सर्पिषा सह ।

1. क-घ—चातुर्मास्यमजेन तु

वार्ध्राणसस्य मांसेन तृप्तिर्द्वादशवार्षिकी ॥ ६॥

आनन्त्याय भवेदत्तं खड्गमांसं पितृक्षये ।
कालशाकं च [1]रोहं चाप्यानन्त्यं छाग उच्यते ॥ ७॥

गाथाश्चाप्यत्र गायन्ति पितृगीता युधिष्ठिर ।
सनत्कुमारो भगवान् पुरा या अभ्यभाषत ॥ ८॥

अपि नस्स्वकुले जायाद् यो नो दद्यात् त्रयोदशीम् ।
मघासु सर्पिषा युक्तं पायसं दक्षिणायने ॥ ९॥

आजेन चाऽपि रोहेण मघास्वेवं यतव्रतः ।
हस्तिच्छायासु विधिवत् कर्णव्यजनवीजितम् ॥ १०॥

एष्टव्या बहवः पुत्रा यद्येकोऽपि गयां व्रजेत् ।
यत्रासौ प्रथितो लोकेष्वक्षय्यकरणो वटः ॥ ११॥

आपो मूलं घृतं मांसम् अन्नं वाऽपि पितृक्षये ।
यत् किञ्चिन्मधुना मिश्रं तदानन्त्याय कल्पते* ॥ १२॥

यमस्तु यानि श्राद्धानि प्रोवाच [2]शशबिन्दवे ।
तानि मे शृणु काम्यानि नक्षत्रेषु पृथक् पृथक् ॥ १३॥

श्राद्धं यः कृत्तिकायोगे कुर्वीत सततं नरः ।

---

1. क-ख-घ—फलं
* सर्वेषु कोशेषु अत्रैवाध्यायसमाप्तिर्दृश्यते
2. क-घ—शशि

अग्नीनाधाय सापत्यो यजेत विगतज्वरः ॥ १४॥

अपत्यकामो रोहिण्याम् ओजस्कामो [1]मृगोत्तमे ।
क्रूरकर्मा ददच्छ्राद्धम् आर्द्रायां मानवो भवेत् ॥ १५॥

कृषिभागी भवेन्मर्त्यः कुर्वञ् श्राद्धं पुनर्वसौ ।
पुष्टिकामस्तु पुष्ये वै श्राद्धमीहेत मानवः ॥ १६॥

आश्लेषासु ददच्छ्राद्धम् वीरान् पुत्रान् प्रजायते ।
ज्ञातीनां तु भवेच्छ्रेष्ठो मघासु श्राद्धमावहन् ॥ १७॥

फल्गुनीषु ददच्छ्राद्धं सुभगश्श्राद्धदो भवेत् ।
अपत्यवानुत्तरासु हस्तेषु फलभाग्भवेत् ॥ १८॥

चित्रायां तु ददच्छ्राद्धम् लभेद्रूपवतस्सुतान् ।
स्वातियोगे पितॄनर्च्य वाणिज्यमुपजीवति ॥ १९॥

बहुपुत्रो विशाखासु पितॄनिह यजन्नरः ।
अनुराधासु कुर्वाणो राजचक्रं प्रवर्तयेत् ॥ २०॥

[2]आधिपत्यं लभेन्मर्त्यो ज्येष्ठायामुपवर्तयन् ।
नरः कुरुकुलश्रेष्ठ श्राद्धं दमपुरस्सरः ॥ २१॥

मूले त्वारोग्यमृच्छेत यशोऽषाढास्वनुत्तमम् ।
उत्तरासु त्वषाढासु वीतशोकश्चरेन्महीम् ॥ २२॥

---

1. घ—नृपोत्तम
2. क-घ—अर्धतयं नास्ति

श्राद्धं त्वभिजितौ कुर्वन् विद्यां श्रेष्ठामवाप्नुयात् ।
[1]श्रवणे श्रुतिसम्पत्तिं धनिष्ठासु धनं लभेत् ॥ २३॥

तथा शतभिषग्योगे व्याधिमोक्षं बलं तथा ॥ २४

पूर्वप्रोष्ठपदां कुर्वन् बहु विन्देदजाविकम् ।
उत्तरास्वथ कुर्वाणो विन्दते रेवतीं श्रितः ॥ २५

बहु रूप्यकृतं वित्तम् विन्दते रेवतीं श्रितः ।
अश्वांश्चाश्वयुजे चेति भरणीष्वायुरुत्तमम् ॥ २६

इमं श्राद्धविधिं श्रुत्वा शशबिन्दुस्तथाऽकरोत् ।
अक्लेशेनाजयच्चापि महीं सोऽनुशशास च ॥ २७

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां
अनुशासनपर्वणि सप्तसप्ततितमोऽध्यायः ॥ ७७ ॥
॥ ८९ ॥ आनुशासनिकपर्वणि सप्तसप्ततितमोऽध्यायः ॥ ७७ ॥
[अस्मिन्नध्याये २७ श्लोकाः]

---

1. ख—इदमर्धं नास्ति

॥ अष्टसप्ततितमोऽध्यायः ॥

भीष्मेण युधिष्ठिरं प्रति श्राद्धे निमन्त्रणार्हानर्हाणां लक्षणनिरूपणम् ॥

युधिष्ठिरः—

कीदृशेभ्यः प्रदातव्यं भवेच्छ्राद्धं पितामह ।
द्विजेभ्यः कुरुशार्दूल तन्मे व्याख्यातुमर्हसि ॥ १

भीष्मः—

ब्राह्मणान् न परीक्षेत क्षत्रियो दानधर्मवित् ।
दैवे कर्मणि पित्र्ये तु न्याय्यमाहुः परीक्षणम् ॥ २

देवताः पावयन्तीह दैवेनैवेह तेजसा ।
उपेत्य तस्मिन् देवेभ्यस् सर्वेभ्यो दापयेन्नरः ॥ ३

श्राद्धे त्वथ महाराज परीक्षेद्ब्राह्मणान् मिथः ।
कुलशीलवयोरूपैर् विद्ययाऽभिजनेन च ॥ ४

एषामन्ये पङ्क्तिदूष्यास् तथाऽन्ये पङ्क्तिपावनाः ।
अपाङ्क्तेयास्तु ये राजन् कीर्तयिष्यामि तान् शृणु ॥ ५

कितवो [1]भ्रूणहा यक्ष्मी पशुपालो [2]निराकृतिः ।
ग्रामप्रेष्यो वार्धुषिको गायकस्सर्वविक्रयी ॥ ६

अगारदाही गरदः कुण्डाशी सोमविक्रयी ।

1. क-घ—ब्राह्मणोऽलक्ष्मीः 2. ख—महाकृतिः

सामुद्रो राजभृतकस् तैलिकः कूटदारिकः ॥ ७

[1]पित्रा विभजमानश्च यस्य चोपपतिर्गृहे ।
अभिशस्तस्तथा स्तेनश् शिल्पं यश्चोपजीवति ॥ ८

कर्मकारश्च मूली च मित्रध्रुक् पारदारिकः ।
अव्रतानामुपाध्यायः काण्डपृष्ठस्तथैव च ॥ ९

[2]श्वभिर्यश्च परिक्रामेद् यश्शुना दष्ट एव च ।
परिवित्तिश्च यश्च स्याद् यश्च स्याद् गुरुतल्पगः ॥ १०

कुशीलवो देवलको नक्षत्रैर्यश्च जीवति ।
एतानिह विजानीयाद् अपाङ्क्तेयान् द्विजाधमान् ॥ ११

शूद्राणामुपदेशं च ये कुर्वन्त्यल्प[3]चेतसः ॥ ११॥

[4]कुष्ठी काणश्शतं वन्दी श्वित्री यावत् प्रपश्यति ।
पङ्क्त्यां समुपविष्टायां तावद् दूषयते नृप ॥ १२॥

यद्वेष्टितशिरा भुङ्क्ते [5]भुङ्क्ते यद्दक्षिणामुखः ।
सोपानत्कोऽन्नमश्नाति सर्वं विद्यात् तदासुरम् ॥ १३॥

असूयया च यद्दत्तं यच्च श्रद्धाविवर्जितम् ।
सर्वं तदसुरेन्द्राय ब्रह्मा भागमकल्पयत् ॥ १४॥

---

1. ख—पुत्रान् वि
2. घ—बहिर्यश्च
3. क—तेजसः
4. क-ख-घ—पष्टिम्
5. क—यो ददद्दक्षि

श्वानश्च पङ्क्तिदूषाश्च नावेक्षेरन् कथञ्चन ।
तस्मात् परिश्रिते दद्यात् तिलांश्चान्ववकीरयेत् ॥ १५॥

तिलदानेऽप्यदायादा ये च क्रोधवशा गणाः ।
यातुधानाः पिशाचाश्च विप्रलुम्पन्ति तद्धविः ॥ १६॥

यावद्ध्यपाङ्क्त्यः पङ्क्त्यां वै समासीनान् प्रपश्यति ।
तावत् फलाङ्कुशयति दातारं तस्य बालिशः ॥ १७॥

इमे तु भरतश्रेष्ठ विज्ञेयाः पङ्क्तिपावनाः ।
हेतुतस्तान् प्रवक्ष्यामि परीक्षस्वेह तान् द्विजान् ॥ १८॥

वेदविद्याव्रतस्नातो विप्रः पङ्क्तिं पुनात्युत ॥ १९

अथर्वशिरसोऽध्येता ब्रह्मचारी यतव्रतः ।
सत्यवादी दानशीलस् स्वकर्मनिरतश्च यः ॥ २०

ये च पुण्येषु तीर्थेषु ह्यभिषेककृतश्रमाः ।
मखेषु च सहस्रेषु भवन्त्यवभृथाप्लुताः ॥ २१

अक्रोधना ह्यचपलाः क्षान्ता दान्ता जितेन्द्रियाः ।
सर्वभूतहिता ये च श्राद्धेष्वेतान् निमन्त्रय ॥ २२

एतेषु दत्तमक्षय्यम् एते वै पङ्क्तिपावनाः ॥ २२॥

इमे परे महाराज विज्ञेयाः पङ्क्तिपावनाः ॥ २३

यतयो मोक्षधर्मज्ञा योगिनश्चरितव्रताः ।
पाञ्चरात्रविदो मुख्यास् तथा भागवताः परे ॥ २४

[1]वैखानसाः कुलेश्रेष्ठा वैदिकाचारचारिणः ।
ये चेतिहासं प्रयताश् श्रावयन्ति द्विजोत्तमान् ॥ २५

ये च भाष्यविदः केचिद् ये च व्याकरणे रताः ।
अधीयते पुराणं ये धर्मशास्त्राण्यथापि च ॥ २६

अधीत्य च यथान्यायं विधिवत्तस्य कारिणः ।
उपपन्नो गुरुकुले सत्यवादी सहस्रशः ॥ २७

अभ्यस्सर्वेषु वेदेषु सर्वप्रवचनेषु च ।
यावदेते प्रपश्यन्ति पङ्क्तीस्तावत् पुनन्ति च ॥ २८

ततो हि पावनात् पङ्क्त्याः पङ्क्तिपावन उच्यते ।
क्रोशादर्धतृतीयात्तु पावयेदेक एव च ॥ २९
ब्रह्मदेयानुसन्तान इति ब्रह्मविदो विदुः ॥ २९॥

अनृत्विगनुपाध्यायस् स चेदभ्यासनं व्रजेत् ।
ऋत्विग्भिरननुज्ञातः पङ्क्त्यां हरति दुष्कृतम् ॥ ३०॥

अथ चेद्वेदवित् सर्वैः पङ्क्तिदोषैर्विवर्जितः ।
न च स्यात् [2]पतितो राजन् पङ्क्तिपावन एव सः ॥ ३१॥

तस्मात् सर्वप्रयत्नेन परीक्ष्यामन्त्रयेद्द्विजान् ।
स्वकर्मनिरतान् दान्तान् कुले जातान् बहुश्रुतान् ॥ ३२॥

---

1. ब—इदमर्धं नास्ति
2. क—पलितो अ-घ—पालितो

यस्य मित्रप्रधानानि श्राद्धानि च हवींषि च ।
न प्रीणाति पितॄन् देवान् स्वर्गं च न स पश्यति ॥ ३३॥

[1]यश्च श्राद्धेषु कुरुते सङ्गतानि
न देवयानेन पथा स याति ।
स वै मुक्तः पिप्प[2]लबन्धनाद्धि
स्वर्गाल्लोकाच्च्यवते श्राद्धमित्रः ॥ ३४॥

तस्मान्मित्रं श्राद्धतो नाददीत
दद्यान्मित्रेभ्य[3]स्सङ्गतार्थं धनानि ।
यं मन्यते नैव शत्रुं न मित्रं
तं मध्यस्थं भोजयेद्धव्यकव्यैः ॥ ३५॥

यथोषरे बीजमुप्तं न रोहे-
न्न चास्योप्ता प्राप्नुयाद्बीजभावम् ।
एवं श्राद्धं भुक्तमनर्हमाणैर्
न चेह चामुत्र फलं ददाति ॥ ३६॥

ब्राह्मणोऽप्यनधीयानस् तृणाग्निरिव शाम्यति ।
तस्मै श्राद्धं न दातव्यं न हि भस्मनि हूयते ॥ ३७॥

सम्भोजनी नाम पिशाचभिक्षा
सा नैव देवान् न पितॄनुपैति ।

---

1. ख—यच्छ्राद्धकाले कु 2. क-घ—लं बन्धनानि
3. ख—स्सङ्ग्रहार्थं अ—सङ्गरार्थं

इहैव सा चरति क्षीणपुण्या
शालान्तरे गौरिव [1]नष्टवत्सा ॥ ३८॥

तथा दत्तं नर्तके गायने च
यथाऽनृचे दक्षिणा चावृणोति ॥ ३९

उभौ हिनस्ति न भुनक्ति चैषा
येनानृचे दक्षिणा दीयते वै ।
अघादिनी गृहमेषां पतन्ती
तेषां प्रेतान् पातयेदेवयानात् ॥ ४०

ऋषीणां समयं नित्यं ये रक्षन्ति युधिष्ठिर ।
[2]निश्चितान् सर्वधर्मज्ञांस् तादृशान् ब्राह्मणान् विदुः ॥ ४१

स्वाध्यायनिष्ठा ऋषयो ज्ञाननिष्ठास्तथैव च ।
तपोनिष्ठाश्च बोद्धव्याः कर्मनिष्ठाश्च भारत ॥ ४२

कव्यानि ज्ञाननिष्ठेभ्यः प्रतिष्ठाप्यानि भारत ।
तत्र ये ब्राह्मणाः केचिन्न च निन्दन्ति ते पराः ॥ ४३

ये तु निन्दन्ति [3]जल्पेषु न तान् श्राद्धेषु भोजयेत् ।
ब्राह्मणा निन्दिता राजन् हन्युस्त्रिपुरुषं कुलम् ॥ ४४

वैखानसानां वचनम् ऋषीणां श्रूयते नृप ।

---

1. घ—नव्य
2. अ-क-घ—निश्चितास्सर्वधर्मार्थास्तादृशा ब्राह्मणा विदुः
3. ख-घ—कल्पेषु

दूरादेव परीक्षेत ब्राह्मणान् वेदपारगान् ॥ ४५

[1]प्रियान् वा यदि वा द्वेष्यांस् तेषु तच्छ्राद्धमावपेत् ॥ ४५॥

यस्सहस्रं सहस्राणां भोजयेदनृचो नरः ।
एकस्तान् मन्त्रवित् पूतस् सर्वानर्हति भारत ॥ ४६॥

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां
अनुशासनपर्वणि अष्टसप्ततितमोऽध्यायः ॥ ७८ ॥
॥ ८९ ॥ आनुशासनिकपर्वणि अष्टसप्ततितमोऽध्यायः ॥ ७८ ॥
[अस्मिन्नध्याये ४६॥ श्लोकाः]

अतः परं आनुशासनिकपर्वणि एकोनाशीतितमाध्याये
आद्यश्लोकः—

युधिष्ठिरः—

केन सङ्कल्पितं श्राद्धं कस्मिन काले किमात्मकम् ।
येन सङ्कल्पितं चैव तन्मे ब्रूहि पितामह ॥ इति ॥

---

1. क—ब्राह्मणान् यदि वाऽन्वेष्यान् तेषु तच्छ्राद्धमाचरेत् ।
[पाठान्तरम]

Printed by V. Venkateswara Sastrulu of
V. Ramaswamy Sastrulu & Sons at the 'Vavilla' Press, Madras.-1935.

पुटम्	पङ्क्तिः	अशुद्धम्	शोधनम्
२९४	६	चा	सा
३००	६	इक्ष्वकोस्तु	इक्ष्वाकोस्तु
३०९	१७	असुता	असूता
,,	१९	समाप्नि दृश्यते	समाप्निर्दृश्यते
३१४	२०	,,	,,
,,	१६	मुज्यते	मुच्यते
३२५	२१	त्यस्ति	अस्ति
३२६	७	घर्मश्	धर्मश्
३३४	१८	समाप्निदृश्यते	समाप्निर्दृश्यते
३७४	७	ब्राह्मणानां	ब्राह्मणानां
३८०	३	कामानवात्स्यथ	कामानवाप्स्यथ
,,	१४	दुरासदाश्च	दुरासदाश्च
३९०	५	इषद्वा	ईषद्वा
४००	१३	सत्तस	सत्तम
४१९	१९	बाह्लीकोः	बाह्लीको
४५५	२	चव	चैव
४७४	१३	वनाद्दशे	वनोद्देशे
४८४	४	तथेऽत्युक्तः	तथेत्युक्तः
५६६	४	भूतभ्यस्	भूतेभ्यस्
६७०	२१	प्रभोः	प्रभो

॥ श्रीः ॥

महाभारतानुशासनपर्वप्रथमसम्पुटस्थानामशुद्धानां शोधनम् ॥

पुटम्	पंक्तिः	अशुद्धम्	शोधनम्
११	२	कर्म र्तदजनुक	कर्म तदर्जुनक
१३	७	महदाख्यानाम्	महदाख्यानम्
५४	१४	पुत्रौ वै	पुत्रो वै
६३	२	करेति	करोति
७८	२	चंक	च कः
८२	२१	श्लोको चास्ति	श्लोको नास्ति
८८	७	वासुदेव	वासुदेव
९७	५	मात्मनं	मात्मानं
१०६	४	उभाववव	उभावेव
२११	४	हरस्यांङ्गेपु	हरस्याङ्गेपु
,,	१३	अवज्ञताः	अवज्ञाताः
२२८	७	भुञ्जीयां	भुञ्जीयां
२४०	१२	निष्ठनां	निष्ठानां
२४२	११	ध्रवः	ध्रुवः
२४५	२	मत्प्रसादद्विज	मत्प्रसादाद्विज
२६१	१२	दीर्घ	दीर्घ
२७८	७	स्वभर्त्रास्वजनो	स्वभर्त्रा स्वजनो
२८८	५	ज्ञावा	ज्ञात्वा